पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन
राष्ट्रियसंस्कृतसंस्थानेन सम्मानितम्

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः

तन्त्रसारसङ्ग्रहः

श्रीविदरहळ्ळिश्रीनिवासतीर्थतनुजश्रीवेङ्कटपत्याचार्यकृतया
गुर्वर्थदीधित्या व्याख्यया समलङ्कृतः

मार्गदर्शकाः
श्री १०८ श्री सुविद्येन्द्रतीर्थश्रीपादाः
श्रीराघवेन्द्रस्वामिमठः

सम्पादकः
डा. तिरुमल कुलकर्णी
प्राध्यापकः, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - २८

प्रकाशनम्
पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - २८

२००९

JACL-KRC
023655

योऽनूचान स नो महान्
राष्ट्रिय संस्कृत संस्थान

राष्ट्रिय संस्कृत संस्थान, जयपुर परिसर

पुस्तकालय

पुस्तक संख्या ....

वर्गीकरण संख्या ....

राष्ट्रिय संस्कृत संस्थान, जयपुर परिसर

23655

वर्गीकरण सं.....................

पुस्तक सं......................... दिनाङ्क.......................

यह पुस्तक नीचे अङ्कित तिथि या उससे पूर्व लौटा दी जानी चाहिये। यदि पुस्तक निर्धारित तिथि से अधिक समय तक पाठक अपने पास रखेंगे तो 50 पैसे प्रतिदिन के हिसाब से विलम्ब शुल्क देय होगा।

जयपुर

12·2U

SV-2024

पूर्णप्रज्ञसंशोधनमन्दिरम्

नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन-

राष्ट्रियसंस्कृतसंस्थानेन सम्मानितम्

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः

तन्त्रसारसङ्ग्रहः

श्रीबिदरहळ्ळिश्रीनिवासतीर्थतनुजश्रीवेङ्कटपत्याचार्यकृतया

गुर्वर्थदीधित्याख्यव्याख्यया

समलङ्कृतः

राष्ट्रिय संस्कृत संस्थान
ग्रन्थालय
23655
जयपुर

मार्गदर्शकाः

श्री १०८ श्री सुविद्येन्द्रतीर्थश्रीपादाः

श्रीराघवेन्द्रस्वामिमठः

सम्पादकः

डा. तिरुमल कुलकर्णी

प्राध्यापकः, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु

प्रकाशनम्

पूर्णप्रज्ञसंशोधनमन्दिरम्

पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - २८

२००९

1A

पूर्णप्रज्ञसंशोधनमन्दिरग्रन्थमाला - ६१

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः तन्त्रसारसङ्ग्रहः

श्रीबिदरहळ्ळिश्रीनिवासतीर्थतनुजश्रीवेङ्कटपत्याचार्यकृतया गुर्वर्थदीधित्याख्यव्याख्यया समलङ्कृतः

सम्पादकः - डा. तिरुमल कुलकर्णी

प्राध्यापकः, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु

पूर्णप्रज्ञसंशोधनमन्दिरम्

पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - २८

This publication is brought out with the generous financial help of **Rashtriya Sanskrit Samsthan (Deemed University), New Delhi**

प्रथममुद्रणम् - २००९

मुद्रितपुस्तकसङ्ख्या - १०००

मूल्यम् - २०० रूप्यकाणि

वागर्थमुद्रणद्वारा मुद्रितम् ।

JACL-KRC
023655

Poornaprajna Samshodhana Mandiram
Recognised by Rashtriya Sanskrit Samsthan, Deemed
University, Ministry of H.R.D., Govt. of India, New Delhi

Tantrasārasaṅgraha

of Sri Ānandatīrthabhagavatpādāćārya

with the commentary Gurvarthadīdhiti of Śrī Bidarahaḷḷi Venkaṭapatyāćārya, son of Śrī Bidarahaḷḷi Śrīnivāsatīrtha

Guide

Śrī 108 Śrī Suvidyendra Tīrtha Swāmīji

Śrī Rāghavendra Swāmy Maṭh

Editor

Dr. Tirumala Kulakarni

Asst Prof, Poornaprajna Vidyapeetha, Bangalore

Publisher:

Poornaprajna Samshodhana Mandiram

Poornaprajna Vidyapeetha,

Bangalore - 560 028

2009

Poornaprajna Samshodhana Mandira Granthamālā - 61

Tantrasārasaṅgraha of Sri Ānandatīrthabhagavatpādāćārya
with the commentary Gurvarthadīdhiti of Śrī Bidarahaḷḷi Venkaṭa-
patyāćārya, son of Śrī Bidarahaḷḷi Śrīnivāsatīrtha

Editor: **Dr. Tirumala Kulakarni**

Published by: **Poornaprajna Samshodhana Mandiram**
Poornaprajna Vidyapeetha, Bangalore - 560 028

First Edition - 2009

Copies: 1000

Price : Rs. 200/-

Typesetting: Editor

Printed by: Vagartha Mudrana, Bangalore

अनुग्रहसन्देशः

श्रीमदानन्दतीर्थभगवत्पादैः प्रणीतोऽयं तन्त्रसारसङ्ग्रहग्रन्थः तन्त्रग्रन्थवाङ्मये सहस्त्ररश्मिरिव विराजत इत्यतिरोहितं विदुषाम् । तन्त्रसाराख्यो ग्रन्थवरः भगवता नारायणेन सृष्ट्यादौ चतुर्मुखायोपदिष्टः । तत्रत्यविषया एव जिज्ञासूनामनुग्रहाय कृपालुभिः भगवत्पादाचार्यैः सङ्गृहीताः । अत एवास्य ग्रन्थस्य `तन्त्रसारसङ्ग्रहः' इति नाम प्रथितम् । प्रायस्तन्त्रग्रन्थेषु मन्त्र-देवता-यज्ञविधि-प्रतिमानिर्मिति-देवतोपासन-देवालयनिर्मितिप्रभृतयः विषयाः निरूप्यन्ते । अस्मिंश्च ग्रन्थे तन्त्रग्रन्थान्तरेषु सूक्ष्मेक्षिकया अविमृष्टाः वैष्णवागमेषु पञ्चरात्रप्रभृतिषु परिदृश्यमाना अपूर्वाः विषयाः विमर्शकानां नितान्तमानन्दमुत्पादयन्ति ।

सोऽयं तन्त्रसारसङ्ग्रहग्रन्थः श्रीवंशपल्लीवेङ्कटपत्याचार्यकृतव्याख्याविभूषितः अस्मदीयपूर्णप्रज्ञसंशोधनमन्दिरद्वारा मुद्राप्यत इति विज्ञाय मोमुद्यते नश्चेतः । व्याख्यैषा नैकापूर्वप्रबन्धप्रणेतृभिः श्रीवेङ्कटपत्याचार्यैः प्रणीता मूलाशयविशदनदीक्षा तत्रतत्र अपूर्वानुक्तप्रमेयप्रतिपादनदक्षा च विराजतेतमाम् । अस्याः संशोधनम् अस्मत्प्रियच्छात्रेण न्यायवेदान्तविदुषा विशिष्य गणकयन्त्रे कृतभूरिपरिश्रमेण कुलकर्णीत्युपाह्वतिरुमलाचार्येण व्यधायि । शुद्धपाठनिर्धारणे उपयुक्तटिप्पणीसंयोजने चास्य कौशलमभिनन्दनार्हम् । अस्मदुपास्यः श्रीकृष्णः एवंविधसंशोधनकर्मणि असाधारणपाटवमस्मै प्रदाय समनुगृह्णात्वेनमिति प्रार्थयामहे ।

श्रीविश्वेशतीर्थश्रीपादाः

श्रीपेजावरमठाधीशाः

उडुपि

Director's Note

Dr. Tirumala Kulkarṇi, a well known scholar in Nyāya and Vedānta and efficient in Computer technology, has edited Gurvarthadīdhiti (a commentary of Tantrasāra-saṅgraha), an unpublished commentary of Vamshapalli Venkatapatyacharya. Sri Venkatapatyacharya is a commentator of several Mādhwa texts and son of Śrīnivāsatīrtha, who has contributed more than fifty works in Mādhwa tradition.

The Tantrasāra is a summary of teachings of Śrī Hari given to Brahma in the beginning of creation of the world. Jagadguru Madhwāchārya has condensed the essence of Tantrasāra in his Tantrasāra-saṅgraha. The work gives an introduction to the real form of the rituals taught by the Vedas and Puranas. The contents of the Tantras include the form of mantras, their utilisation, the image to be contemplated upon, the purpose of doing the japa of the mantras, the preparation of the Homa-kunda, the eight limbs of the yoga,

making of the images of gods, building of temples and explanations of the procedures of sacrifices. In this work of Sri Madhwa, we find a brief description of the various branches of knowledge just as Yashoda found the whole universe in the mouth of Sri Krishna. Like a light house, this work helps the voyager in the ocean of philosophical achievement. Even though the work is small in volume it has an all-pervading scope and reminds the reader of the Trivikrama episode of Lord Vamana.

Dr. Tirumala Kulkarni has edited this commentary and text with the reference of many manuscripts available in various places under the able guidance of Sri Suvidyendratirtha Swamiji, Sri Raghavendra Swamiji Matha. His skill in deciding the right readings and providing the necessary footnotes is an evidence of his scholarship in each part of the present work. Needless to say only an expert in editing philosophical texts can do this kind of job. Sri Srinivas Guttal and Sri V Srinidhi have devoted their precious time for preparing the page layout by using LATEX(Latex), a document preparation system. It is mostly used for publishing technical and scientific documents. For the first time our institution is publishing a work prepared using the LATEX.

I heartily congratulate the able editor and LATEXpersons

for their valuable service to the Poornaprajna Samshodhana Mandiram.

The source of inspiration behind this useful venture is our founder H.H. Sri Sri Vishveshatirtha Swamiji. To him we owe all we have and all we will have. How can we repay him for his support and encouragement except through our gratitude and Pranamas.

We are grateful to Prof. Radha Vallabh Tripathi, Vice-chancellor, Rashtriya Sanskrit Samsthan (Deemed University), New Delhi, for his help and guidance at every step of our activities.

I will be failing in my duty, if I do not express my thanks to Sri C.S.Kaniyal, Finance Officer of Rashtriya Sanskrit Samsthan, New Delhi for his timely cooperation in all our venture.

I also thank Prof. D. Prahlada Char, Chairman, Poornaprajna Samshohana Mandiram Managing Committee, for his kind support in our academic activities.

Some devotees of Sri Venkatapatyacharya have contributed Rs. 20,000/- and Sri N.R. Desai also donated Rs. 5,000/- for publication of this valuable work. I express my gratitude for their financial help for publication of present text.

I thank authorities of Vagartha Printers who have printed neatly in a short span of time. I hope they extend the same co-operation in future also.

Dr. A.V. Nagasampige

Director

विषयानुक्रमणिका

Director's Note iv

कन्नडभूमिका xviii

भूमिका xxix

0.1 भारतीयसंस्कृतौ तन्त्रशास्त्रस्य स्थानम् xxx

0.1.1 तन्त्रशास्त्रम् xxx

0.1.2 तन्त्रशास्त्रस्य महत्त्वम् xxxiii

0.1.3 तन्त्रशास्त्रस्य विषयः, प्रयोजनं प्रस्तुतता च xxxiv

0.1.4 तन्त्रप्रभेदः xxxix

0.1.5 तन्त्रसारसङ्ग्रहः xxxix

0.2 श्रीमध्वाचार्यविरचितः तन्त्रसारसङ्ग्रहः xl

0.2.1 श्रीमध्वाचार्याः xl

0.2.2 तन्त्रसारसङ्ग्रहस्य वैशिष्ट्यम् xlvi

0.3 तन्त्रसारसङ्ग्रहस्य इतरव्याख्यानानि lii

0.4 गुर्वर्थदीधितिकाराः श्री वेङ्कटपत्याचार्याः lviii

0.4.1 श्रीरघूत्तमतीर्थाः lix

0.4.2 श्रीवेदेशतीर्थाः (क्रि.श.1570-1620) lx

0.4.3 श्रीयादवार्याः (क्रि.श.1580-1630) lxi

0.4.4 श्रीश्रीनिवासतीर्थाः - श्रीवेङ्कटपत्याचार्याणां पितृपादाः (क्रि.श.1590-1674) lxi

0.4.5 श्रीवेङ्कटपत्याचार्याः lxiii

0.4.6 श्रीवेङ्कटपत्याचार्याणां कृतयः lxvii

0.5 प्रकृतव्याख्या गुर्वर्थदीधितिः lxviii

0.5.1 गुर्वर्थदीधितिरचने कारणम् lxviii

0.5.2 गुर्वर्थदीधितेः सम्पादने उपयुक्ताः मातृकाः lxix

0.6 गुर्वर्थदीधितेः वैशिष्ट्यम् lxx

0.6.1 नामनिर्वचनसूचितं वैशिष्ट्यम् lxxi

0.6.2 प्राक्तनटिप्पण्यः आकरभूताः lxxi

0.6.3 सूक्तव्याख्यानम् lxxii

0.6.4 अकारादिवर्णप्रतिपाद्यभगवन्नाम्नां निर्वचनप्रदर्शनम् . . lxxii

0.6.5 सर्वेषां मन्त्राणामर्थः प्रकाशितः lxxiii

0.6.6 पितृभक्तिपराकाष्ठा lxxiii

0.6.7 ग्रन्थशतोल्लेखः lxxiv

0.6.8 पाठान्तरोल्लेखः lxxiv

0.6.9 कानिचित् विशिष्टव्याख्यानोदाहरणानि lxxiv

0.7 इतरव्याख्याभिः सह तुलना lxxvi

0.7.1 श्रीछलारीशेषाचार्याणां व्याख्यानेन सह तुलना lxxvii

0.7.2 श्रीश्रीनिवासाचार्यकृतेन गूढार्थसङ्ग्रहेण सह तुलना . . . lxxviii

0.8 उपसंहारः lxxix

0.9 जनसामान्योपयोगिनः तन्त्रविषयाः lxxx

0.10 अन्तनिवेदना lxxxi

कृतज्ञतासमर्पणम् lxxxii

सङ्क्षिप्तनामसूची lxxxvi

1 तन्त्रसारसङ्ग्रहे प्रथमोऽध्यायः 1

1.1 मङ्गलाचरणम् 1

1.2 उपोद्घातः 4

1.3 प्रणवलक्षणं तन्माहात्म्यं च 6

1.4 पञ्चाशन्मातृकामूर्तयः 9

1.5 नारायणाष्टाक्षरव्याहृतिमन्त्रौ 16

1.6 वासुदेवद्वादशाक्षरमन्त्रः 17

1.7 गायत्रीमन्त्रपुरुषसूक्तसकलवेदाभिव्यक्तिः 19

1.8 उक्तमन्त्राणाम् ऋषिच्छन्दोदेवताविचारः 22

1.9 उक्तमन्त्राणां ध्येयदेवतास्वरूपविचारः 23

1.10 मन्त्रवर्णोत्पत्तिक्रमविचारः 31

1.11 उक्तमन्त्राणामङ्गन्यासादिकथनम् 32

1.12 अष्टाक्षरमन्त्रः 34

1.13 प्रणवमंन्त्रः 36

1.14 व्याहृतिमन्त्रः 37

1.15 द्वादशाक्षरमन्त्रः 39

1.16 ब्रह्मगायत्रीमन्त्रः 40

1.17 मातृकामन्त्रपुरुषसूक्तमन्त्रयोरङ्गन्यासादिनिरूपणम् 41

1.18 विष्णुषडक्षरमन्त्रनिरूपणम् 57

1.19 अष्टमहामन्त्रमहिमवर्णनम् 58

1.20 भगवत्पूजाकथनम् 61

1.21 पीठपूजा 62

1.22 आवरणपूजा 76

1.23 जपध्यानहोमादीनां फलनिरूपणम् 87

1.24 विष्णुसर्वोत्तमत्वज्ञानस्यावश्यकता 88

2 तन्त्रसारसङ्ग्रहे द्वितीयोऽध्यायः 93

2.1 मातृकान्यासविधिः 93

2.2 प्राणायामः 95

2.3 शौचम् 96

2.4 कलशे आवाह्यरूपविशेषाः 97

2.5 होमविधिः 100

2.6 होमकुण्डपरिमाणम् 101

2.7 होमद्रव्याणि 105

3 तन्त्रसारसङ्ग्रहे तृतीयोऽध्यायः 108

3.1 प्रतिमाद्रव्यम् 108

3.2 प्रतिमालक्षणम् 109

3.3 षण्णवत्यङ्गुलानामवयवशो विभागः 109

3.4 आगुल्फपादपरिमाणम् 112

3.5 नखपरिमाणम् 114

3.6 प्रपदतिर्यग्विस्तारः 115

3.7 जङ्घादिपरिमाणम् 116

3.8 कटिविस्तृतिः नाभिपरिमाणम् 117

3.9 उरःपरिमाणम् 118

3.10 तलपरिमाणमङ्गुलपरिमाणं च 120

3.11 पञ्चाङ्गुलीनां दैर्घ्यस्थौल्यपरिमाणम् 121

3.12 गलपरिमाणम् 122

3.13 हस्तनखपरिमाणम् 123

3.14 मुखस्यावयवशो विभागस्तत्परिमाणं च 124

3.15 केशविचारः आभरणविचारश्च 128
3.16 शिलापरीक्षापूर्वकं शिलानयनप्रकारः 130
3.17 शिलाभेदस्तदुपयोगेन प्रतिमादिनिर्माणम् 134
3.18 प्रतिमानयनप्रकारः 135
3.19 देवालयस्थलतन्निर्माणविचारः 135
3.20 सिंहावलोकनन्यायेन अङ्गुलिपरिमाणम् 137
3.21 वास्तुपुरुषोपरि देवतापूजा 145
3.22 प्रतिष्ठाङ्गबलिः 152
3.23 प्रतिमाधिवासः 152
3.24 वेदादिपारायणम् 153
3.25 मण्डलविचारः 157
3.26 कलशसङ्ख्यादिविचारः 158
3.27 कलशद्रव्यविचारः 161
3.28 कलशाभिषेकः 164
3.29 प्रतिमायामनुसन्धानम् 165
3.30 उत्सवकालावधिः 168
3.31 अवभृथस्नानम् 169
3.32 जीर्णदेवालयोद्धारप्रकारः 171
3.33 सम्प्रोक्षणविधानम् 173
3.34 प्रसङ्गात् विष्णुगायत्रीमन्त्रोद्धारः 174

3.35 अन्यदेवताप्रतिमाप्रतिष्ठापनविधिः 175

3.36 भगवद्भक्तेरावश्यकता 176

3.37 पञ्चविंशतेः विवक्षान्तरेण षड्विंशतः तत्वानां निरूपणम् 176

3.38 एतद्ग्रन्थमहत्त्ववर्णम् 183

4 तन्त्रसारसङ्ग्रहे चतुर्थोऽध्यायः 185

4.1 अध्यायार्थकथनम् 185

4.2 भूवराहमन्त्रः - 1 186

4.3 वराहाष्टाक्षरः-वराहचतुर्दशाक्षरश्च 2-3 187

4.4 श्रीकरमन्त्रः-4 191

4.5 आनुष्टुभनृसिंहमन्त्रः-5 193

4.6 नृसिंहचतुर्विंशत्यक्षरः-6 194

4.7 नृसिंहगायत्री-7 194

4.8 हंसमन्त्राः 8-12 198

4.9 दधिवामनमन्त्रः-13 204

4.10 वामनाष्टाक्षरः-14 206

4.11 वामन[त्रिविक्रम]गायत्रीमन्त्रः-15 206

4.12 परशुराम-दाशरथिरामषडक्षरः-16 207

4.13 भार्गवमन्त्रौ राघवमन्त्रौ च 17-20 209

4.14 अष्टादशाक्षरः कृष्णमन्त्रः 21 210

4.15 कृष्णषडक्षरः-एकाक्षरश्च 22-23 212
4.16 वेदव्यासाष्टाक्षरः 24 213
4.17 व्यासगायत्रीमन्त्रः 25 215
4.18 एकाक्षरव्यासबीजमन्त्रः 26 215
4.19 हयग्रीवमन्त्रः 27 217
4.20 कपिलमन्त्रः दत्तात्रेयमन्त्रः 28-29 219
4.21 वैदिकमन्त्राः 30-33 220
4.22 वेदोक्तलक्ष्मीमन्त्रः 34 228
4.23 लज्जाबीजं श्रीबीजम् 35-36 229
4.24 भूबीजं-दुर्गाबीजम् 37-38 231
4.25 भूपञ्चाक्षरः-दुर्गाषडक्षरः 39-40 238
4.26 वेदोक्तदुर्गामन्त्रः 41 238
4.27 वेदोक्तचतुर्मुखमन्त्रः 42 240
4.28 ब्रह्मपञ्चाक्षरः-हिरण्यगर्भाष्टाक्षरः 43-44 250
4.29 वेदोक्तप्राणमन्त्रः 45 250
4.30 पञ्च प्राणमन्त्राः 46-50 255
4.31 वेदोक्तसरस्वतीभारतीमन्त्रौ 51-52 256
4.32 ब्रह्माणीमन्त्रः-भारतीमन्त्रः 53-54 258
4.33 शिवपञ्चाक्षरः 55 260
4.34 पार्वतीपञ्चाक्षरः 56 262

4.35 शेषमन्त्रः 57 262

4.36 गरुडमन्त्रः 58 263

4.37 दिक्पालमन्त्राः 59-67 265

4.38 स्कन्दमन्त्रः 68 266

4.39 सूर्यमन्त्रः 69 266

4.40 गणपतिमन्त्रः 70 267

4.41 धन्वन्तरिमन्त्रः 71 268

4.42 वेदोक्तधन्वन्तरिमन्त्रः 72 281

4.43 यन्त्रविधिः 288

4.44 विद्यागुरुः 291

4.45 उपासनाविधिः 294

4.46 आसनम् 303

4.47 प्राणायामः 304

4.48 नाडीचक्रम् 306

4.49 धारणा-ध्यानं-समाधिः 314

4.50 भक्तेरत्यावश्यकता 317

4.51 भक्तितारतम्येन फलतारतम्यम् 319

4.52 ग्रन्थनामकथनम् 321

4.53 एतद्ग्रन्थमहिमवर्णनम् 322

4.54 उपसंहारः ग्रन्थसमर्पणं च 323

4.55 अन्त्यमङ्गलम् 324

A गुर्वर्थदीधित्युदाहृतग्रन्थसूची 328

B पुराणेषु प्रतिमालक्षणम् 332

C साम्प्रदायिकाद्यर्थाः 336

D गुर्वर्थदीधितौ उल्लिखितानामनुपलब्धाकराणां वाक्यानां सूची 338

E मूलमातृकापरिशीलनेन लब्धानां शुद्धपाठानां कानिचिदुदाहरणानि 343

F विद्यावारिध्युपाधिकृते समर्पितस्य शोधप्रबन्धस्य विस्तृतायाः भूमिकायाः विषयानुक्रमणी 346

ಶ್ರೀಗುರುಭ್ಯೋ ನಮಃ

ಮುನ್ನುಡಿ

'ದಾರಿ ಯಾವುದಯ್ಯ ?'

ಮನುಷ್ಯನ ಆವಶ್ಯಕತೆಗಳು ಕಾಲಕಾಲಕ್ಕೆ ಬದಲಾಗುತ್ತಿರುತ್ತವೆ. ಚಿಕ್ಕಂದಿನಲ್ಲಿ ಆಟಿಗೆ -ತಿಂಡಿ -ತಿನಸುಗಳೇ ಸರ್ವಸ್ವ. ಮುಂದೆ ಆಟ -ಪಾಟಗಳ ಜೊತೆಗೆ ಸ್ಪರ್ಧೆಯೂ ಜೀವನದಲ್ಲಿ ಅಡಿ ಇಡುತ್ತದೆ. ಯೌವನದಲ್ಲಿ ಸಾಮಾಜಿಕ ಸ್ಥಿರತೆ, ಬದ್ಧತೆ, ಮನೆ, ಕುಟುಂಬ, ತನ್ನ ಸಾಮರ್ಥ್ಯವನ್ನು ಜಾಹೀರುಪಡಿಸುವ ಹಂಬಲ - ಹೀಗೆ ಪಟ್ಟಿ ಬೆಳೆಯುತ್ತಾ ಹೋಗುತ್ತದೆ. ಜೀವನದ ಜಂಜಾಟದಲ್ಲಿ ಬೇರೆ ಏನನ್ನೂ ಸಾಧಿಸಲೇ ಆಗುವುದಿಲ್ಲ. ಕೆಲವರಿಗೆ ಕೂದಲು ನೆರೆತಂತೆ, ಅನುಭವ ಮಾಗಿದಂತೆ ಎಲ್ಲ ಇದ್ದೂ ಏನೋ ಕೊರತೆ ಇರುವಂತೆ ಕಾಡಲಾರಂಭಿಸುತ್ತದೆ. ಅಪೂರ್ಣತೆಯನ್ನು ತುಂಬುವ ಬಗೆ ಮಾತ್ರ ತಿಳಿಯದು. ಇನ್ನು ಹಲವರಿಗೆ, ಈ ಜಗದ ಆಚೆ ಏನಿದೆ ? ಜೀವನದ ನಂತರದ ಸ್ಥಿತಿ ಏನು ? ನನ್ನ ನಿಜವಾದ ರೂಪ ಏನು ? ನಾನು ಯಾರು ? ಎಲ್ಲಿಂದ ಬಂದೆ ? - ಹೀಗೆ ಪ್ರಶ್ನೆಗಳು ಮೂಡಿದರಂತೂ ಜೇನುಗೂಡಿಗೆ ಕಲ್ಲೆಸೆದಂತೆ. ಪ್ರಶ್ನೆಗಳ ಮೇಲೆ ಪ್ರಶ್ನೆ. ಉತ್ತರ ಊಹಿಸಿದಷ್ಟೂ ಕಠಿಣವಾಗುವ ಸಿಕ್ಕು. ಇನ್ನು ಜೀವನದಲ್ಲಿ ಹೆಚ್ಚು ಕಷ್ಟ -ನಷ್ಟಗಳನ್ನು ಅನುಭವಿಸದೆ ಎಲ್ಲ ಸುಖಸಂತೋಷಗಳನ್ನು ಪಡೆದರು ಎನ್ನುವಂಥವರ ಕಥೆ ಮತ್ತೊಂದು ಬಗೆ. ಒಂದು ಜನ್ಮ ಕಳೆಯಿತು. ಮುಂದೇನು ?

ಈ ಎಲ್ಲ ಪ್ರಶ್ನೆಗಳಿಗೆ ಏಕೈಕ ಉತ್ತರ ಭರತಭೂಮಿಯ ವೇದಾಂತ.

ತಂತ್ರಶಾಸ್ತ್ರ

ವೇದಾಂತ ಬರಿಯ ವಿಚಾರಗಳನ್ನು ಹೇಳುವುದಿಲ್ಲ ; ಪಾರಲೌಕಿಕ ಗುರಿಯನ್ನು ನೀಡಿ ಅದಕ್ಕನುಗುಣವಾದ ಸುಂದರ -ಸುಖಮಯ ಜೀವನವನ್ನು ನಡೆಸುವ ಬಗೆಯನ್ನೂ ತಿಳಿಸುತ್ತದೆ. ಅದರಲ್ಲಿ ವಿಚಾರದ ಭಾಗ ವೇದೋಪನಿಷತ್ -ಬ್ರಹ್ಮಸೂತ್ರಾದಿಗಳಾದರೆ ವಿಚಾರದ ಉಪಯೋಗ ಹೇಗೆ ಎಂದು ಬೋಧಿಸುವ ಭಾಗ ತಂತ್ರಶಾಸ್ತ್ರ. ವೇದಾಂತದ

ದಾರಿಯಲ್ಲಿ ಸಾಗುವವರಿಗೆ ಉಪವಾಸ -ವನವಾಸಗಳೇ ಜೊತೆಯಾಗಬೇಕಿಲ್ಲ. ತ್ಯಾಗ -ವೈರಾಗ್ಯಗಳನ್ನೇ ಹಾಸಿ ಹೊದೆಯಬೇಕೆಂದಿಲ್ಲ. ಇದರಲ್ಲೂ ಎಲ್ಲ ತರಹದ ಸುಖ - ಸೌಭಾಗ್ಯಗಳಿವೆ ; ಇದು ಲೌಕಿಕ ಆನಂದದ ಜೊತೆಗೆ ಪಾರಲೌಕಿಕ ಪರಮಾನಂದವನ್ನೂ ಸವಿವಂತೆ ಮಾಡುವ ರಾಜಮಾರ್ಗ. ಈ ಮೋಕ್ಷಮಾರ್ಗದ ಕೈಪಿಡಿ ತಂತ್ರಶಾಸ್ತ್ರ.

ನಾವು ವಿವಿಧ ಯಂತ್ರ -ವಾಹನಗಳನ್ನು ಖರೀದಿಸಿದಾಗ Manual ನೀಡುತ್ತಾರೆ. ಆಯಾ ವಸ್ತುವನ್ನು ಹೇಗೆ ಉಪಯೋಗಿಸಬೇಕು, ತೊಂದರೆಯಾದರೆ ಏನು ಮಾಡಬೇಕು, ಪ್ರಶ್ನೆ ಮೂಡಿದರೆ ಯಾರನ್ನು ಸಂಪರ್ಕಿಸಬೇಕು, ಹಾಳಾದಲ್ಲಿ ಎಲ್ಲಿಗೆ ಒಯ್ಯಬೇಕು - ಎಂಬುದನ್ನೆಲ್ಲ ಅದು ತಿಳಿಸುತ್ತದೆ. ಇದೇ ತರಹ ದೇಹ -ಮನಸ್ಸು -ಇಂದ್ರಿಯಗಳನ್ನು ಒದಗಿಸಿದ ದೇವರು ನಮಗೆ ನೀಡಿರುವ ಕೈಪಿಡಿ 'ತಂತ್ರಶಾಸ್ತ್ರ '. ನಮ್ಮ ಜೀವನವನ್ನು ಸುಸ್ಥಿತಿಯಲ್ಲಿ ನೋಡಿಕೊಳ್ಳಬೇಕಾದ ರೀತಿ, ಅದರಲ್ಲಿ ತೊಂದರೆಗಳು ಬಂದರೆ ಯಾರನ್ನು ಕಾಣಬೇಕು, ಏನು ಮಾಡಬೇಕು ಎಂದೆಲ್ಲ ಇದರಿಂದ ತಿಳಿಯುತ್ತದೆ.

ತಂತ್ರ ಎಂದರೇನು ಎನ್ನುವುದನ್ನು ವಿಷ್ಣುಸಂಹಿತಾ ಎಂಬ ತಂತ್ರಗ್ರಂಥ ಬಹಳ ಸೊಗಸಾಗಿ ತಿಳಿಸುತ್ತದೆ -

'ಸರ್ವಾರ್ಥಾ ಯೇನ ತನ್ಯಂತೇ ತ್ರಾಯತೇ ಚ ಭಯಾಜ್ಜನಾನ್
ಇತಿ ತಂತ್ರಸ್ಯ ತಂತ್ರತ್ವಂ ತಂತ್ರಜ್ಞಾಃ ಪರಿಚಕ್ಷತೇ || ' (೨ -೧೦)

'ತನ್ ಎಂದರೆ ಎಲ್ಲ ಬಯಕೆಗಳನ್ನು ತಂದು ನೀಡುವಂಥದ್ದು. ತ್ರ ಎಂದರೆ ತ್ರಾಣ, ರಕ್ಷಣೆ ; ಬೇಡವಾದ ಅನಿಷ್ಟದಿಂದ ರಕ್ಷಣೆ ಕೊಡುವಂಥದ್ದು. ಹೀಗೆ ಇಷ್ಟಪ್ರಾಪಕ ಹಾಗೂ ಅನಿಷ್ಟನಿವಾರಕವಾಗಿರುವುದರಿಂದ ಇದನ್ನು ತಂತ್ರ ಎನ್ನುತ್ತಾರೆ ' - ಎನ್ನುವುದು ಇದರ ಆಶಯ. ಜೀವನದಲ್ಲಿ ಇದಕ್ಕಿಂತ ಹೆಚ್ಚಿನ ಭರವಸೆ ಇನ್ನೇನು ಬೇಕು ?

ಈ ಪುಸ್ತಕದಲ್ಲಿ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ಬರೆದ ತಂತ್ರಸಾರಸಂಗ್ರಹವೆಂಬ ಮಹತ್ತ್ವಪೂರ್ಣ ಕೃತಿಗೆ ಶ್ರೀವೇಂಕಟಪತ್ಯಾಚಾರ್ಯರೆಂಬುವವರು ಬರೆದ ಗುರ್ವರ್ಥದೀಧಿತಿ ಎಂಬ ವ್ಯಾಖ್ಯಾನವು ಪ್ರಕಾಶನಗೊಳ್ಳುತ್ತಿದೆ.

ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು

ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ಜಗತ್ತು ಕಂಡ ಮಹೋನ್ನತ ದಾರ್ಶನಿಕರು. ಎಂಟುನೂರು ವರ್ಷಗಳ ಹಿಂದೆ ಕರ್ನಾಟಕದ ಉಡುಪಿಯ ಬಳಿಯ ಪಾಜಕವೆಂಬ ಊರಿನಲ್ಲಿ ಅವತರಿಸಿದರು. ಕ್ರಿ.ಶ. ೧೨೦೦ರಿಂದ ೧೨೭೮ರ ವರೆಗೆ ಭೂಮಿಯಲ್ಲಿ ಇದ್ದ ಇವರು ದೇಶದ ಉದ್ದಗಲಕ್ಕೂ ಸಂಚರಿಸಿ ವೇದೋಪನಿಷತ್ತುಗಳ ಆಧಾರದಲ್ಲಿ ವಿಷ್ಣುಪಾರಮ್ಯದ ನೆಲೆಗಟ್ಟಿನ ತತ್ತ್ವಜ್ಞಾನದ ಪುನರುತ್ಥಾನವನ್ನು ಕೈಗೊಂಡರು. ಇವರು ರಚಿಸಿದ ಗ್ರಂಥಗಳ ಹರವು ವಿಸ್ತಾರವಾದುದು. ವೇದ -ಉಪನಿಷತ್ತು -ವೇದಾಂಗ -ಪುರಾಣ -ಇತಿಹಾಸ -ಪಂಚರಾತ್ರ -ಬ್ರಹ್ಮಸೂತ್ರ -ಧರ್ಮಶಾಸ್ತ್ರ ಹೀಗೆ ಎಲ್ಲಾ ವಿದ್ಯಾಸ್ಥಾನಗಳನ್ನು ಇವರ ಗ್ರಂಥಗಳು ಒಳಗೊಳ್ಳುತ್ತವೆ . ಹೀಗೆ ಆರ್ಷವಾಙ್ಮಯದ ಎಲ್ಲ ಪ್ರಕಾರಗಳನ್ನೂ ಒಪ್ಪಿ ಅವುಗಳಲ್ಲಿ ಸಮನ್ವಯ ಸಾಧಿಸಿದ್ದು ಇವರ ಹಿರಿಮೆ.

ತಂತ್ರಸಾರಸಂಗ್ರಹ

ಇವರ ಗ್ರಂಥಗಳಲ್ಲಿ ಸುಮಾರು ನಾಲ್ಕುನೂರು ಶ್ಲೋಕಗಳ ಈ ಗ್ರಂಥದ ಸ್ಥಾನ ವಿಶಿಷ್ಟವಾದದ್ದು. ಶ್ರೀವಿಷ್ಣುತೀರ್ಥರು, ಶ್ರೀಪದ್ಮನಾಭತೀರ್ಥರಿಂದ ಮೊದಲುಗೊಂಡು ಶ್ರೀಶ್ರೀಪಾದರಾಜರು, ಶ್ರೀವ್ಯಾಸರಾಜರು, ಶ್ರೀವಾದಿರಾಜರು, ಶ್ರೀರಾಘವೇಂದ್ರಸ್ವಾಮಿಗಳಂತಹ ಜ್ಞಾನಿಗಳ ಚರಿತ್ರೆಯಲ್ಲಿ ಕೇಳುವ ತಪಃಸಿದ್ಧಿ, ಶಾಪಾನುಗ್ರಹಶಕ್ತಿಗಳ ಮೂಲ ಏನು ಎನ್ನುವುದು ಈ ಗ್ರಂಥದಿಂದ ತಿಳಿಯುತ್ತದೆ. ಈ ಗ್ರಂಥದ ಮಹತ್ತ್ವವನ್ನು ಶ್ರೀನಾರಾಯಣಪಂಡಿತರು ತಮ್ಮ ಯೋಗದೀಪಿಕಾಗ್ರಂಥದಲ್ಲಿ ಹೇಳುತ್ತಾರೆ[1] -

'ಮನುಷ್ಯ ಜೀವನದಲ್ಲಿ ಕೆಲವು ಗ್ರಂಥಗಳನ್ನು ಓದಲೇ ಬೇಕು. ಆ ಗ್ರಂಥಗಳಲ್ಲಿ ತಂತ್ರಸಾರಸಂಗ್ರಹ ಒಂದು. ಈ ಗ್ರಂಥವನ್ನು ಗಡಿಬಿಡಿ ಮಾಡದೆ ನಿಧಾನವಾಗಿ ಶ್ರದ್ಧೆಯಿಂದ ಗುರುಗಳಿಂದ ಕೇಳಬೇಕು. ಇದು ಜೀವನವನ್ನು ಬೆಳಗುವ ಶಾಸ್ತ್ರ. ಅಲ್ಲಿ

---

1 ಕನ್ನಡದ ಮುನ್ನುಡಿಯು ಸಂಸ್ಕೃತ ಭೂಮಿಕೆಯ ಸಂಕ್ಷಿಪ್ತರೂಪವಾಗಿದೆ. ಆದ್ದರಿಂದ ಇದರಲ್ಲಿ ಬರುವ ವಿಷಯಗಳಿಗೆ ಸಂಬಂಧಿಸಿದ ಶ್ಲೋಕಗಳನ್ನು ಹಾಗೂ ಇತರ ವಿವರಗಳನ್ನು ಸಂಸ್ಕೃತದ ಭೂಮಿಕೆಯಲ್ಲಿ ನೋಡಬಹುದು.

ಹೇಳಿದ್ದನ್ನು ಅನುಷ್ಠಾನಕ್ಕೆ ತರಬೇಕು. ಅದರಲ್ಲಿ ತಿಳಿಸಿದ ಮಂತ್ರಗಳನ್ನು ಜಪಿಸಬೇಕು ; ಅದರಲ್ಲಿ ನಿರೂಪಿಸಿದಂತೆ ದೇವರ ಧ್ಯಾನವನ್ನು ನಡೆಸಬೇಕು. ಮಂತ್ರಸಿದ್ಧಿ ಪಡೆದವನಿಗೆ ಭಗವಂತನ ಅನುಗ್ರಹ ಬಹು ಬೇಗ ಆಗುತ್ತದೆ. ಇಂಥವನು ನಡೆಸುವ ಆಧ್ಯಾತ್ಮಿಕ ಸಾಧನೆ ಸಫಲವಾಗುತ್ತದೆ. ತತ್ತ್ವಾಭಿಮಾನಿದೇವತೆಗಳ ಅನುಗ್ರಹದಿಂದ ಜೀವನದಲ್ಲೂ ಒಳ್ಳೆಯ ಸುಖ ಲಭಿಸುತ್ತದೆ. ಆದರಿಂದ ನಿಶ್ಚಿಂತನಾಗಿ ಸಾಧನೆ ನಡೆಸಬಹುದು. '

ಇವರೇ ಸುಮಧ್ವವಿಜಯದಲ್ಲಿ 'ಈ ಗ್ರಂಥ ದೇವಲೋಕದ ಕಲ್ಪವೃಕ್ಷವಿದ್ದಂತೆ. ಭಕ್ತರು ಬಳಿ ಸಾರಿ ಏನು ಕೇಳಿದರೂ ದಯಪಾಲಿಸುತ್ತದೆ ' ಎಂದು ಹೊಗಳಿದ್ದಾರೆ.

ಆಚಾರ್ಯರೂ ಗ್ರಂಥದಲ್ಲಿ ಅಲ್ಲಲ್ಲಿ ಇದರ ಮಹಿಮೆಯನ್ನು ಹಾಡಿ ಹೊಗಳಿದ್ದಾರೆ.

'ಎಷ್ಟನ್ನು ಮಾಡದಿದ್ದರೆ ಕರ್ಮಗಳು ಪೂರ್ಣವಾಗವೊ ಅಷ್ಟೆಲ್ಲವನ್ನೂ ಈ ಗ್ರಂಥದಲ್ಲಿ ಹೇಳಿದೆ. ಇದರಲ್ಲಿ ಹೇಳಿದಂತೆ ನಡೆದರೆ ಭಗವಂತ ಮೆಚ್ಚುತ್ತಾನೆ. ಪರದಲ್ಲಿ ಮುಕ್ತಿಯನ್ನೂ ಇಹದಲ್ಲಿ ಎಲ್ಲ ಕಾಮನೆಗಳನ್ನೂ ಪೂರೈಸುತ್ತಾನೆ. ' (೩ -೧೪೦,೧೪೧)

'ಇಲ್ಲಿ ಹೇಳಿದಂತೆ ಜಪ -ಧ್ಯಾನ -ಹೋಮ -ಪೂಜೆಗಳನ್ನು ನಡೆಸುವವರಿಗೆ ಜೀವನದಲ್ಲಿ ಯಾವುದೂ ದುರ್ಲಭವಲ್ಲ ' (೧ -೭೦).

'ಈ ಗ್ರಂಥದ ಪಾರಾಯಣದಿಂದಲೇ ಬಯಸಿದ್ದನ್ನೆಲ್ಲಾ ಪಡೆಯಬಹುದು. ಅರ್ಥ ತಿಳಿದರಂತೂ ಅದಕ್ಕಿಂತ ಇನ್ನೂ ಹೆಚ್ಚು ಫಲ. ತಿಳಿದು ಆಚರಿಸಿದರಂತೂ ಹೇಳುವುದೇ ಬೇಡ ' . (೪ -೧೫೫)

ಇದಕ್ಕೆ ತಕ್ಕಂತೆ ಆಚಾರ್ಯರು ವಿದ್ಯೆ -ಐಶ್ವರ್ಯ -ವಕ್ತೃತ್ವ -ಕೀರ್ತಿ -ವಾದಜಯ -ಶತ್ರುಪರಾಜಯ -ಆರೋಗ್ಯದಂತಹ ಅಭೀಷ್ಟಗಳನ್ನು ಹೇಗೆ ಪಡೆಯಬಹುದೆಂದು ತಿಳಿಸಿದ್ದಾರೆ. ವಿಪರೀತ ಅನಾರೋಗ್ಯವಿದ್ದಾಗ, ಬುದ್ಧಿ ಮಂದವಾಗಿದ್ದರೆ - ಹೀಗೇ ಜೀವನದ ಹಲವಾರು ಸಮಸ್ಯೆಗಳಿಗೆ ಪರಿಹಾರವನ್ನು ತೋರಿಸಿದ್ದಾರೆ. 'ನಿಷ್ಕಾಮವಾಗಿ ಇಲ್ಲಿ ಹೇಳಿದವುಗಳನ್ನು ಭಕ್ತಿಯಿಂದ ಆಚರಿಸಿದರೆ ಎಲ್ಲ ಫಲಗಳೂ ಲಭಿಸುತ್ತವೆ ' ಎಂಬ ಮಾತೂ ಇಲ್ಲಿ ಬಂದಿದೆ (೪ -೧೧೮). ಹೀಗೆ ಈ ಗ್ರಂಥ ನಿಷ್ಕಾಮಭಕ್ತರಿಗೂ, ಸಕಾಮಭಕ್ತರಿಗೂ ಅತ್ಯಾವಶ್ಯಕವಾದ ಗ್ರಂಥ.

ತಂತ್ರಸಾರಸಂಗ್ರಹದ ವ್ಯಾಖ್ಯಾನಗಳು

ಇಂಥ ಮಹತ್ತ್ವಪೂರ್ಣ ಕೃತಿಗೆ ಮಾಧ್ವಪರಂಪರೆಯಲ್ಲಿ ೨೪ ವ್ಯಾಖ್ಯಾನಗಳು ರಚಿತವಾಗಿವೆ ಎಂದು ಶ್ರೀ ವ್ಯಾಸನಕೆರೆ ಪ್ರಭಂಜನಾಚಾರ್ಯರು ಛಲಾರಿಟಿಪ್ಪಣಿಯನ್ನು ಸಂಪಾದಿಸುವಾಗ ಮುನ್ನುಡಿಯಲ್ಲಿ ತಿಳಿಸಿದ್ದಾರೆ. ಅವುಗಳಲ್ಲಿ ನಾಲ್ಕು ಪ್ರಕಟಗೊಂಡಿವೆ. ಶ್ರೀಛಲಾರೀಶೇಷಾಚಾರ್ಯರ ಹಾಗೂ ಶ್ರೀರಘುನಾಥತೀರ್ಥರ ವ್ಯಾಖ್ಯಾನಗಳು ಹೆಚ್ಚು ಪ್ರಚಲಿತವಾಗಿವೆ. ಇಂದು ಮುದ್ರಿತವಾಗಿರುವ ಎಲ್ಲ ವ್ಯಾಖ್ಯಾನಗಳಿಗಿಂತ ಶ್ರೀವೆಂಕಟ -ಪತ್ಯಾಚಾರ್ಯರ ಗುರ್ವರ್ಥದೀಧಿತಿ ಹೆಚ್ಚು ಪ್ರಾಚೀನ.

ಶ್ರೀವೆಂಕಟಪತ್ಯಾಚಾರ್ಯರು

ಮಾಧ್ವವಾಙ್ಮಯದ ಟಿಪ್ಪಣಿಕಾರರಲ್ಲಿ ಶ್ರೀ ಶ್ರೀನಿವಾಸತೀರ್ಥರ ಸ್ಥಾನ ಹಿರಿದು. ಶ್ರೀರಘೂತ್ತಮತೀರ್ಥರು -ಶ್ರೀವೇದೇಶತೀರ್ಥರು -ಶ್ರೀಯಾದವಾರ್ಯರು ಇವರ ಪರಂಪರೆಯಲ್ಲಿ ಬಂದ ಇವರು ತಮ್ಮ ನಲವತ್ತೆರಂಟು ಗ್ರಂಥಗಳಲ್ಲಿ ವಿದ್ಯಾರ್ಥಿಗಳಿಂದ ಆರಂಭಿಸಿ ಪಂಡಿತರೂ ಓದುವ ಅತ್ಯಂತ ಉಪಕಾರಕವಾದ ಟಿಪ್ಪಣಿಗಳನ್ನು ರಚಿಸಿದ್ದಾರೆ. ದ್ವೈತವೇದಾಂತದ ಮೇರುಕೃತಿ ನ್ಯಾಯಾಮೃತವನ್ನು ಓದಬಯಸುವ ವಿದ್ಯಾರ್ಥಿಗಳಿಗೆ ಇವರ ಟಿಪ್ಪಣಿಯೇ ಇಂದಿಗೂ ಪ್ರಮುಖ ಆಧಾರ. ವೇದ -ಉಪನಿಷತ್ತು -ಸರ್ವಮೂಲ -ಟೀಕಾ -ಧರ್ಮಶಾಸ್ತ್ರ ಹೀಗೇ ಹಲವಾರು ಪ್ರಕಾರಗಳಲ್ಲಿ ಇವರು ಸಲ್ಲಿಸಿರುವ ಕೊಡುಗೆ ಅಪಾರ. ಇವರ ಮಕ್ಕಳು ಶ್ರೀವೇಂಕಟಪತ್ಯಾಚಾರ್ಯರು.

ಶ್ರೀರಘೂತ್ತಮಸ್ವಾಮಿಗಳು ಆರಂಭಿಸಿದ ಟಿಪ್ಪಣಿಪರಂಪರೆಯಲ್ಲಿ ಹಿಂದಿನವರು ಬರೆಯದೆ ಬಿಟ್ಟ ಗ್ರಂಥಗಳನ್ನು ಮುಂದಿನವರು ವ್ಯಾಖ್ಯಾನಿಸುತ್ತಾ ಬಂದರು. ಅದರಲ್ಲಿ ತಂತ್ರಸಾರಸಂಗ್ರಹ ಒಂದು ಉಳಿದು ಹೋಗಿತ್ತು. ಅದನ್ನು ಇವರು ವ್ಯಾಖ್ಯಾನಿಸಿ ಸರ್ವಮೂಲ -ಟೀಕಾಗಳ ಟಿಪ್ಪಣಿರಚನಾಯಜ್ಞಕ್ಕೆ ಮಂಗಳ ಹಾಡಿದರೆನ್ನಬಹುದು.

ಇವರು ತಮ್ಮ ತಂದೆಯೊಂದಿಗೆ ಆರಂಭದಲ್ಲಿ ಗದಗಜಿಲ್ಲೆಯ ಬಿದರಹಳ್ಳಿಯಲ್ಲಿ, ನಂತರ ಕೆಲವು ಕಾಲ ಹರಿಹರದಲ್ಲಿ, ಆಮೇಲೆ ಶಿವಮೊಗ್ಗಸಮೀಪದ ಹೊನ್ನಾಳಿಯಲ್ಲಿ ಕೊನೆಗೆ ರಾಣೆಬೆನ್ನೂರಿನಿಂದ ೨೦ ಕಿ.ಮೀ. ದೂರದ ರಟ್ಟೆಹಳ್ಳಿಯಲ್ಲಿ ವಾಸವಾಗಿದ್ದರು.

ಇಂದಿಗೂ ಅವರು ವಾಸವಾಗಿದ್ದ ಮನೆ, ಅವರ ಸಾಧನೆಯ ಸ್ಥಳಗಳು ಅಲ್ಲಿವೆ. ಅವರು ಆಹ್ನೀಕಾದಿಗಳನ್ನು ನಡೆಸುತ್ತಿದ್ದ ಸ್ಥಳದಲ್ಲಿ ಇದ್ದ ಕಟ್ಟೆಯನ್ನು ನವೀಕರಿಸಿ ಸಂರಕ್ಷಿಸಲಾಗಿದೆ. ಅವರ ವಂಶದವರು ಇವತ್ತಿಗೂ ಅಲ್ಲಿದ್ದು ಇದನ್ನೆಲ್ಲ ನೋಡಿಕೊ ಪ್ರತಿವರ್ಷ ಪುಷ್ಯಕೃಷ್ಣಷಷ್ಠಿಯಂದು ಆರಾಧನೆಯ ರೂಪದ ಅವರ ಪುಣ್ಯಸ್ಮರಣೆಯ ನಡೆಸುತ್ತಾರೆ.

ತಂದೆಯಂತೆಯೇ ಇವರೂ ವ್ಯಾಪಕವಾಗಿ ಓದಿದವರು, ಗ್ರಂಥರಚನೆಕಾರರು, ತಪಸ್ವಿಗಳು, ಮಹಾಮಹಿಮರು. ಇವರ ಗ್ರಂಥ ಇವರ ಅಧ್ಯಯನ ಎಷ್ಟು ಪರಿಪೂಣ ಎಂಬುದಕ್ಕೆ ದ್ಯೋತಕ.

ಇವರು ಒಟ್ಟು ಐದು ಕೃತಿಗಳನ್ನು ರಚಿಸಿದ್ದಾರೆ. ಅವು -

೧. ಗುರ್ವರ್ಥದೀಧಿತಿ (ತಂತ್ರಸಾರಸಂಗ್ರಹದ ವ್ಯಾಖ್ಯಾನ)

೨. ಸೂತ್ರಾರ್ಥಸಂಗ್ರಹ (ಬ್ರಹ್ಮಸೂತ್ರಗಳಿಗೇ ನೇರವಾಗಿ ಬರೆದ ವಿವರಣೆ)

೩. ತಾರತಮ್ಯನವಶ್ಲೋಕೀವ್ಯಾಖ್ಯಾ ಭಾವದೀಪಿಕಾ (ತಮ್ಮ ತಂದೆಯವರ ಗ್ರಂ ವ್ಯಾಖ್ಯಾನ)

೪. ನಖಸ್ತುತಿವ್ಯಾಖ್ಯಾ

೫. ಶ್ರೀಶ್ರೀನಿವಾಸಸ್ತುತಿ

ಇವರ ತಪಃಸಿದ್ಧಿಗೆ ಅನೇಕ ನಿದರ್ಶನಗಳನ್ನು ಹೇಳುತ್ತಾರೆ. ಅವುಗಳಲ್ಲಿ ಒಂದ ಇಲ್ಲಿ ಉಲ್ಲೇಖಿಸಲಾಗುತ್ತಿದೆ. ಒಮ್ಮೆ ಇವರು ವೇಂಕಟಾಚಲಕ್ಕೆ ಹೋಗಿದ್ದರು. ನೈವೇ ನಂತರ ಅರ್ಚಕರು ದೇವರ ಎದುರಿನಲ್ಲಿದ್ದ ಪ್ರಸಾದವನ್ನು ಸ್ವೀಕರಿಸಲು ಹೇಳಿದರು. ವಾಸಸ್ಥಳಕ್ಕೆ ಹೋಗಿ ಮೊಸರನ್ನದ ಪ್ರಸಾದವನ್ನು ನೋಡಿದಾಗ ಏನಾಶ್ಚರ್ಯ ! ಶ್ರೀನಿ ಬೆಳ್ಳಿಯ ಪ್ರತಿಮೆ !! ಆ ಪ್ರತಿಮೆ ಇಂದಿಗೂ 'ಬುತ್ತಿ ಶ್ರೀನಿವಾಸ' ಎಂಬ ಹೆಸರಿನಿಂದ ನಿತ್ಯ ಪೂಜೆಗೊಳ್ಳುತ್ತಿದೆ. ಪ್ರತಿವರ್ಷ ಪುಷ್ಯಕೃಷ್ಣಷಷ್ಠಿಯಂದು ರಟ್ಟಿಹಳ್ಳಿಯಲ್ಲಿ ಶ್ರೀ ವೆಂಕಟಪತ್ಯಾಚಾರ್ಯರ ಪುಣ್ಯದಿನವನ್ನು ಆಚರಿಸಲಾಗುತ್ತದೆ. ಅಲ್ಲಿ ಅವರ ವಂಶದ

ಶ್ರೀಬಿದಿರಹಳ್ಳಿ ಶ್ರೀಕೃಷ್ಣಾಚಾರ್ಯರು ಈ ವಿಷಯವನ್ನು, ಇದರಂತೆ ಇನ್ನೂ ಹಲವಾರು ವಿಷಯಗಳನ್ನು ತಿಳಿಸಿದರು.

ಗುರ್ವರ್ಥದೀಧಿತಿ

ಶ್ರೀವೇಂಕಟಪತ್ಯಚಾರ್ಯರ ಕೃತಿಗಳಲ್ಲಿ ಇದು ಮೂರ್ಧನ್ಯ. ಇವರು ಪ್ರಾರಂಭದಲ್ಲಿ ಅನೇಕವ್ಯಾಖ್ಯಾನಗಳನ್ನು ಪರಿಶೀಲಿಸಿ ಈ ಗ್ರಂಥವನ್ನು ರಚಿಸುತ್ತಿರುವುದಾಗಿ ಹೇಳಿದ್ದಾರೆ. ಅಂದರೆ ಇನ್ನೂ ಎಷ್ಟು ವ್ಯಾಖ್ಯಾನಗಳು ಗಂಟಿನಲ್ಲಿವೆಯೋ ? ಎಷ್ಟು ಕಾಲಗರ್ಭದಲ್ಲಿ ಸೇರಿಹೋಗಿವೆಯೊ ?

'ಗುರುಗಳ ಅರ್ಥದ ಮೇಲೆ ಬೆಳಕು ಚೆಲ್ಲುವ ಕೃತಿ ' ಎನ್ನುವುದು ಹೆಸರಿನಿಂದ ತಿಳಿದುಬರುವ ಅರ್ಥ. ಅದಕ್ಕೆ ತಕ್ಕಂತೆ ಮೂವತ್ತಕ್ಕೂ ಹೆಚ್ಚು ಸ್ಥಳಗಳಲ್ಲಿ 'ಇಲ್ಲಿ ಸಂಪ್ರದಾಯ ಹೀಗಿದೆ ' 'ಇದು ಸಾಂಪ್ರದಾಯಿಕ ಅರ್ಥ ' 'ಇದು ಗುರುಗಳು ಹೇಳಿದ ಅರ್ಥ ' ಎಂದು ಉಲ್ಲೇಖಿಸುತ್ತಾ ಸಾಗುತ್ತದೆ ಈ ವ್ಯಾಖ್ಯಾನ. ಈ ಪುಸ್ತಕದ ಸಂಪಾದನೆ ನಡೆಯುತ್ತಿದ್ದ ಕಾಲದಲ್ಲಿ ಒಂದುಸಭೆಯಲ್ಲಿ ಹೀಗೊಂದು ಪ್ರಶ್ನೆ ಬಂದಿತು - ತತ್ವನ್ಯಾಸದಲ್ಲಿ ಸೃಷ್ಟಿ -ಸ್ಥಿತಿ -ಲಯನ್ಯಾಸಗಳೆಂದು ಮೂರುವಿಧಗಳು. ಬ್ರಹ್ಮಚಾರಿ -ಸಂನ್ಯಾಸಿಗಳು ಸೃಷ್ಟಿ -ಲಯನ್ಯಾಸಗಳನ್ನು ಮಾಡಬೇಕೆಂದು ಪ್ರಮಾಣವಿದೆ ; ಆದರಂತೆ ಆಚರಣೆಯೂ ಇದೆ. ಆದರೆ ಗೃಹಸ್ಥರು ಸ್ಥಿತಿನ್ಯಾಸ ಮಾಡಬೇಕೆಂದು ಪ್ರಮಾಣವಿದ್ದರೂ ಮಾಡುವ ಪದ್ಧತಿ ಬಂದಿಲ್ಲ. ಮಾಡಬೇಕೆಂದರೂ ಹೇಗೆ ಎಂಬ ಬಗ್ಗೆ ಸ್ಪಷ್ಟವಿವರಣೆ ಸಿಗುವುದಿಲ್ಲ - ಎಂದು. ಈ ವ್ಯಾಖ್ಯಾನವನ್ನು ನೋಡಿದಾಗ ನಾಲ್ಕನೆ ಅಧ್ಯಾಯದಲ್ಲಿ ನ್ಯಾಸಗಳ ವಿಷಯ ಬಂದಾಗ ಈ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಆ ಪ್ರಶ್ನೆಗೆ ಉತ್ತರ ಕಂಡಿತು. ಹೀಗೆ ಹಲವಾರು ಸಂದರ್ಭಗಳಲ್ಲಿ ಈ ವ್ಯಾಖ್ಯಾನದ ಮಹತ್ತ್ವ ಅನುಭವಕ್ಕೆ ಬಂದಿದೆ.

ಗುರ್ವರ್ಥದೀಧಿತಿಯ ವೈಶಿಷ್ಟ್ಯಗಳು

- ಈ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಭಗವಂತನಿಗೆ ಸಂಬಂಧಿಸಿದ ಪುರುಷ -ವಿಷ್ಣುಸೂಕ್ತಗಳನ್ನು, ಲಕ್ಷ್ಮೀದೇವಿಯ ಅಂಭ್ರಣೀಸೂಕ್ತ, ಬ್ರಹ್ಮದೇವರ ಹಿರಣ್ಯಗರ್ಭಸೂಕ್ತ ಹಾಗೂ ವಾಯುದೇವರ ಬಳಿತ್ಥಾಸೂಕ್ತ - ಹೀಗೆ ಐದು ಸೂಕ್ತಗಳನ್ನು ಬಹಳ ಸರಳವಾಗಿ

ವ್ಯಾಖ್ಯಾನಿಸಲಾಗಿದೆ.

- ಅಕಾರದಿಂದ ಆರಂಭಿಸಿ ಕ್ಷಕಾರದ ವರೆಗಿನ ಐವತ್ತೊಂದು ಅಕ್ಷರಗಳಿಗೆ ತಂತ್ರಶಾಸ್ತ್ರಗಳಲ್ಲಿ ವಿಶಿಷ್ಟಸ್ಥಾನವಿದೆ. ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ಈ ಐವತ್ತೂ ಅಕ್ಷರಗಳಿಂದ ಭಗವಂತನ ಅಜಾದಿ ಮೂರ್ತಿಗಳು ಪ್ರತಿಪಾದ್ಯವೆಂದು ತಿಳಿಸಿ ಅವುಗಳ ಹೆಸರುಗಳನ್ನು ತಿಳಿಸಿದ್ದಾರೆ. ಅವುಗಳಲ್ಲಿ ಕೆಲವು ನಾಮಗಳ ಅರ್ಥ ಸಂಸ್ಕೃತ ಬಲ್ಲವರಿಗೆ ಅರ್ಥವಾಗಬಹುದಾದರೂ ಲೃಜಿ, ಅರ್ಧಗರ್ಭ, ಈಸಾರ, ಟಂಕೀ - ಇಂತಹ ಶಬ್ದಗಳ ಅರ್ಥ ತಿಳಿಯುವುದು ಅಸಾಧ್ಯವೇ ಸರಿ. ಈ ಗ್ರಂಥದಲ್ಲಿ ವಿವಿಧ ಕೋಶಗಳನ್ನು ಉಲ್ಲೇಖಿಸಿ ಆ ಎಲ್ಲ ಶಬ್ದಗಳ ನಿರ್ವಚನವನ್ನು ಮಾಡಿದ್ದಾರೆ.

- ಸಮಗ್ರ ತಂತ್ರಸಾರದಲ್ಲಿ ಎಂಭತ್ತಕ್ಕೂ ಹೆಚ್ಚು ಮಂತ್ರಗಳ ಉಲ್ಲೇಖವಿದೆ. ಆ ಎಲ್ಲದರ ಅರ್ಥವನ್ನು ಇದರಲ್ಲಿ ಸಾಧಾರವಾಗಿ ನಿರೂಪಿಸಿದ್ದಾರೆ.

- ನೂರು ಗ್ರಂಥಗಳನ್ನು ಉಲ್ಲೇಖಿಸಲಾಗಿದೆ.

ವ್ಯಾಖ್ಯಾನದ ಕೆಲವು ವಿಶಿಷ್ಟ ಉದಾಹರಣೆಗಳು

ಐದುಬಗೆಯ ನೈವೇದ್ಯ : ೪-೨೮ರಲ್ಲಿ ದಧಿವಾಮನಮಂತ್ರದ ಫಲವನ್ನು ಹೇಳುತ್ತಾ ಯಥೇಷ್ಟ ಭಕ್ಷ್ಯ-ಭೋಜ್ಯಾದಿಗಳು ಅದರಿಂದ ದೊರೆಯುತ್ತವೆ ಎಂದು ಆಚಾರ್ಯರು ಹೇಳಿದ್ದಾರೆ. ಇದರ ಅರ್ಥವನ್ನು ವಿವರಿಸುತ್ತಾ - ಭಕ್ಷ್ಯ = ಹಲ್ಲಿನಿಂದ ಕಚ್ಚಿ ತಿನ್ನುವಂಥದ್ದು ಉದಾಹರಣೆಗೆ ಅಪೂಪ (ಅನಾರಸ-ಜಿಲೇಬಿಯಂಥವು). ಭೋಜ್ಯ = ನಾಲಿಗೆಯಿಂದ ನುರಿಸಿ ತಿನ್ನುವ ಅನ್ನದಂಥವು. ಆದಿಶಬ್ದದಿಂದ ಲೇಹ್ಯ-ಚೋಷ್ಯ-ಪೇಯಗಳನ್ನು ಇಟ್ಟುಕೊಳ್ಳಬೇಕು. ಲೇಹ್ಯ = ಬಾಯಿಯ ಲಾಲಾರಸದಿಂದ ಕರಗಿಸಿ ತಿನ್ನುವ ಕಲ್ಲುಸಕ್ಕರೆ ಯಂಥವು. ಚೋಷ್ಯ = ರಸವನ್ನಷ್ಟೆ ತೆಗೆದುಕೊಡು ಬಿಡುವ ಕಬ್ಬಿನಂಥವು. ಪೇಯ = ಹಲ್ಲಿಗೆ ಕೆಲಸ ನೀಡದ ಪಾನಕ ಮೊದಲಾದವು - ಎಂಬ ವಿವರಣೆ ನೀಡಿದ್ದಾರೆ.

ಅಭಿಷೇಕದಲ್ಲಿ ವೈವಿಧ್ಯ : ತಂತ್ರಸಾರದಲ್ಲಿ ವಿಸ್ತಾರವಾಗಿ ಹೇಳದ ನಾನಾವಿಧ ಮುದ್ರೆಗಳು, ಅವುಗಳ ಲಕ್ಷಣ ; ಪಂಚಾಮೃತ -ಕಬ್ಬಿನ ಹಾಲು -ಮಾವಿನಹಣ್ಣಿನ ರಸ -ಪುಷ್ಪೋದಕ -ಗಂಧೋದಕ -ರತ್ನೋದಕ ಹಾಗೂ ತೀರ್ಥಾದಿಗಳ ಸ್ವಾದೂದಕಗಳಿಂದ ಅಭಿಷೇಕ ಮಾಡಬಹುದು ಎಂಬ ವಿಚಾರ ಬೋಧಜನಕವಾಗಿ ಮೂಡಿಬಂದಿದೆ. ಶ್ಲೋಕ ೧ -೬೦.

ಎದೆಯ ಅಳತೆ : ಇದೊಂದು ಈ ವ್ಯಾಖ್ಯಾನದ ಅತ್ಯಪೂರ್ವ ವಿಷಯ. ಆಚಾರ್ಯರು ಪ್ರತಿಮೆಯ ಒಟ್ಟು ಅಳತೆ, ಪ್ರತಿಮೆಯ ಅವಯವಗಳ ಅಳತೆಗಳನ್ನು ದಂಗುಹೊಡೆಯುವಷ್ಟು ಕರಾರುವಾಕ್ಕಾಗಿ, ಅತ್ಯಂತ ಕಡಿಮೆ ಪದಗಳಲ್ಲಿ ಈ ತಂತ್ರಸಾರಸಂಗ್ರಹದಲ್ಲಿ ಮತ್ತು ಬೃಹದಾರಣ್ಯಕ ಭಾಷ್ಯದ ಮೂರನೆಯ ಅಧ್ಯಾಯದಲ್ಲೂ ವಿವರಿಸಿದ್ದಾರೆ. ವ್ಯಾಖ್ಯಾನಗಳಲ್ಲಿ ಈ ಪ್ರಕರಣದ ಉದ್ದಕ್ಕೂ ಎರಡನ್ನೂ ಪರಿಶೀಲಿಸಿ ವಿರೋಧ ಕಂಡಲ್ಲಿ ಪರಿಹರಿಸುವ ಪರಿಪಾಠಿ ಇದೆ.

ಎದೆಯ ಅಳತೆ ಹೇಳುವಾಗ ಹೀಗೊಂದು ಪ್ರಶ್ನೆ ಬಂದಿದೆ. ಪ್ರತಿಮೆಯ ಒಟ್ಟು ಅಳತೆ ೯೬ ಅಂಗುಲಗಳಿರಬೇಕು ಎಂದು ತೀರ್ಮಾನಿಸಲಾಗಿದೆ (೩ -೨). ಬೃಹದಾರಣ್ಯಕ ಭಾಷ್ಯದಲ್ಲಿ ಎದೆಯ ಅಳತೆಯ ಐದುಪಟ್ಟು ಪ್ರತಿಮೆಯ ಅಳತೆ ಎನ್ನಲಾಗಿದೆ. ಇಲ್ಲಿ ಎದೆಯ ಅಳತೆಯನ್ನು ಹೇಳುವ ವಾಕ್ಯ 'ಏಕೋನವಿಂಶಾಂಗುಲಂ ತದುರೋವಿಸ್ತಾರ ಲಕ್ಷಣಮ್ ಪಾದೋನಮ್ ' ಎಂದು. ಏಕೋನವಿಂಶಾಂಗುಲ = ಹತ್ತೊಂಬತ್ತು, ಪಾದೋನಂ = ಕಾಲುಭಾಗ ಕಡಿಮೆ ಆದ ಒಂದು, ಅಂದರೆ ಮುಕ್ಕಾಲು. ಒಟ್ಟಿನಲ್ಲಿ ೧೯.೭೫ ಅಳತೆ ಸಿಗುತ್ತದೆ. ಇದರ ಐದು ಪಟ್ಟೆಂದರೆ ೧೯.೭೫ * ೫ = ೯೮.೭೫ ಅಂಗುಲಗಳಾಗುತ್ತವೆ. ಇದು ೯೬ಕ್ಕಿಂತ ಹೆಚ್ಚಾಯಿತಲ್ಲವೆ ? ಎಂಬುದು ಪ್ರಶ್ನೆ. ಹೆಚ್ಚಿನವರು ಹೇಳುವ ಉತ್ತರವನ್ನೂ ಇಲ್ಲಿ ಉಲ್ಲೇಖಿಸಿದ್ದಾರೆ. ಅದು - ಎದೆಯ ಒಂದು ಭಾಗದ ಅಳತೆ, ಅಂದರೆ ೧೯.೨೦ ಅಳತೆಯನ್ನು ಮನಸ್ಸಿನಲ್ಲಿಟ್ಟುಕೊಂಡು ಎದೆಯ ಐದುಪಟ್ಟು ಎಂದಿದ್ದು ; ಸಂಪೂರ್ಣ ಅಳತೆಯನ್ನಲ್ಲ - ಎಂದು.

ನಮ್ಮ ಗುರುಗಳು ಹೇಳಿದ ಉತ್ತರ ಹೀಗಿದೆ ಎನ್ನುತ್ತಾ ಇವರು ನೀಡಿರುವ

ಉತ್ತರ ಅತ್ಯಪೂರ್ವವಾಗಿದೆ - ಇಲ್ಲಿ ಪಾದೋನ ಎಂಬ ಶಬ್ದಕ್ಕೆ, ಪಾದೇನ ಊನಂ ಎಂಬ ವಿಗ್ರಹವನ್ನು ಇಟ್ಟುಕೊಳ್ಳಬಾರದು. ಪಾದಾತ್ ಊನಂ ಅಂದರೆ ಕಾಲು ಭಾಗಕ್ಕಿಂತ ಕಡಿಮೆ ಅಂದರೆ ಪ್ರಕೃತದಲ್ಲಿ .೨೦ ಭಾಗವನ್ನು ಇಟ್ಟುಕೊಳ್ಳಬೇಕು. ಒಟ್ಟಿನಲ್ಲಿ ೧೯.೨೦ರ ಅಳತೆಯೇ ಲಭಿಸುತ್ತದೆ. ಇದರ ಐದು ಪಟ್ಟು ೯೬ ಆಗುತ್ತದೆ. ಇದರಿಂದ ಎರಡೂ ಗ್ರಂಥಗಳಿಗೆ ವಿರೋಧವಿಲ್ಲ - ಇದು ಶ್ರೀವೆಂಕಟಪತ್ಯಾಚಾರ್ಯರು ನೀಡಿರುವ ಅಪೂರ್ವ ಸಮಾಧಾನ.

ವಾಸ್ತುಪುರುಷ ಯಾರು ? ವರಾಹರೂಪಿ ಭಗವಂತನ ಮಗ ವಾಸ್ತು. ಅವನನ್ನು ದೇವತೆಗಳು ಭೂಮಿಯಲ್ಲಿ ಕೆಡುವಿದ್ದಾರೆ. ಅವನ ಮೇಲೆ ಬ್ರಹ್ಮಾದಿದೇವತೆಗಳನ್ನು ಯಾವಾಗಲೂ ಪೂಜಿಸಬೇಕು - ಎಂದು ಆಚಾರ್ಯರು ೩-೬೦,೬೧ರಲ್ಲಿ ಹೇಳಿದ್ದಾರೆ. ಈ ಬಗ್ಗೆ ವಿವರಿಸುತ್ತಾ ನಾನಾಗ್ರಂಥಗಳನ್ನು ಉಲ್ಲೇಖಿಸಿ ವಿವಿಧ ಮತಗಳ ವಿಮರ್ಶೆಯನ್ನು ನಡೆಸಿದ್ದಾರೆ. ಅಲ್ಲಿ ಬಂದಿರುವ ವಿಷಯದ ಸಂಕ್ಷಿಪ್ತ ಸಂಗ್ರಹ ಹೀಗಿದೆ -

'ಹಿಂದೆ ವಾಸ್ತು ಎಲ್ಲ ಪ್ರಾಣಿಗಳಿಗೆ ತೊಂದರೆ ಕೊಡುತ್ತಿದ್ದ. ಅವನನ್ನು ದೇವತೆಗಳು ಮೇಲಿನಿಂದ ಕೆಡವಿದರು. ಅವನು ಕೆಳಮುಖವಾಗಿ ಬಿದ್ದ. ಈ ಭೂಮಿ ಇರುವವರೆಗೂ ಅವನು ಇರುತ್ತಾನೆ. ಲಯಕಾಲದಲ್ಲಿ ದೇವತೆಗಳೊಂದಿಗೆ ಅವನೂ ಲಯ ಹೊಂದುತ್ತಾನೆ. ಅವನ ವಿಸ್ತಾರ ನೂರು ಕೋಟಿ ಯೋಜನ. ಇವನು ಭೂಮಿಯನ್ನೆಲ್ಲ ವ್ಯಾಪಿಸಿದ್ದಾನೆ. ಇವನ ಬಣ್ಣ ಕಪ್ಪು.

'ಈ ವಾಸ್ತುಪೂಜೆಯನ್ನು ಬಹುಮಹಡಿ ಕಟ್ಟಡ -ಮನೆ -ಉದ್ಯಾನಗಳ ಆರಂಭದಲ್ಲಿ, ಗೃಹಪ್ರವೇಶಕಾಲದಲ್ಲಿ, ಬಾಗಿಲನ್ನು ಬದಲಿಸಿದಾಗ, ಮಹಡಿಯಲ್ಲಿ ಬದಲಾವಣೆ ಮಾಡಿದಾಗ, ಹೊಸ ಊರು -ಮನೆಯನ್ನು ಪ್ರವೇಶಿಸುವಾಗ - ಎಲ್ಲವಿಧದ ದೋಷಗಳ ಶಮನಕ್ಕಾಗಿ ವಾಸ್ತುಶಾಂತಿಯನ್ನು ನಡೆಸಬೇಕು.' (೩ -೬೪)

ಹೀಗೆ ಬೇಕಾದಷ್ಟು ಉದಾಹರಣೆಗಳನ್ನು ನೀಡಬಹುದು. ಸಂಸ್ಕೃತಭೂಮಿಕಾದ ೬.೯ರಲ್ಲಿ ಇಂಥ ಹತ್ತಾರು ವಿಷಯಗಳನ್ನು ಪಟ್ಟಿಮಾಡಲಾಗಿದೆ. ಆಸಕ್ತರು ಅವನ್ನು ಪರಿಶೀಲಿಸಬಹುದು.

ಉಪಸಂಹಾರ

ಮಾಧ್ವ ವಾಙ್ಮಯದಲ್ಲಿ ಶ್ರೀ ಬಿದಿರಹಳ್ಳಿ ಶ್ರೀನಿವಾಸತೀರ್ಥರ ಸ್ಥಾನ ಹಿರಿದು. ಅವರ ಮಕ್ಕಳ ಮಹೋನ್ನತ ಕೃತಿಯೊಂದು ಪ್ರಕಾಶನಕ್ಕೆ ಬರುತ್ತಿರುವುದು ಸಂತೋಷದ ಸಂಗತಿ. ಈ ಗ್ರಂಥ ಈ ರೂಪದಲ್ಲಿ ಇರುವುದರ ಹಿಂದೆ ಬಹಳ ಜನರ ಆಶೀರ್ವಾದ, ಪ್ರೇರಣೆ, ಸಹಕಾರ, ಸಲಹೆ -ಸೂಚನೆಗಳು ಇವೆ. ಅವರ ಹೆಸರನ್ನು ಸಂಸ್ಕೃತದಲ್ಲಿ ನೀಡಿದೆ. ಈ ಪುಸ್ತಕದ ಈ ರೂಪಕ್ಕೆ ಅವರೆಲ್ಲ ಕಾರಣರು.

ಕೊನೆಯಲ್ಲಿ ಒಂದು ಮಾತು. XƎLATEX (ಎಕ್ಸ್ ಇ ಲಾಟೆಕ್) ಎಂಬ, ಭಾರತೀಯ ಭಾಷಾಕ್ಷೇತ್ರದಲ್ಲಿ ಹೆಚ್ಚು ಪರಿಚಿತವಲ್ಲದ, ಸಾಫ್ಟ್ ವೇರನ್ನು ಬಳಸಿ ಈ ಪುಸ್ತಕವನ್ನು ಸಿದ್ಧಪಡಿಸಲಾಗಿದೆ. ಹಲವಾರು ದೃಷ್ಟಿಗಳಿಂದ ಇದು ತುಂಬ ಉಪಯುಕ್ತ. ಉದಾಹರಣೆಗೆ, ಸಾಲಿನ ಕೊನೆಗೆ ದೊಡ್ಡ ಪದ ಬಂದರೆ ಇದು ತಾನೇ ಪದದ ಮಧ್ಯದಲ್ಲಿ '-' ಚಿಹ್ನೆಯನ್ನು ಹಾಕುತ್ತದೆ. ಇದೊಂದರಿಂದಲೇ ನೂರಾರು ಮಾನವಗಂಟೆಗಳನ್ನು ಉಳಿಸಬಹುದು. ಆವರಣದಲ್ಲಿರುವುದನ್ನು ಕ್ಷಣಾರ್ಧದಲ್ಲಿ ಅಡಿಟಿಪ್ಪಣಿಯಾಗಿಸಬಹುದು. ಹೀಗೆ ಇದರಲ್ಲಿರುವ ಸೌಲಭ್ಯಗಳಿಗೆ ಮಿತಿಯಿಲ್ಲ. ಇಷ್ಟಾಗಿ ಇದು ಅಂತರ್ಜಾಲದಲ್ಲಿ ಉಚಿತವಾಗಿ ಸಿಗುತ್ತದೆ. ಆದರೆ, ಭಾರತೀಯ ಲಿಪಿಗಳಿಗೆ ಇದನ್ನು ಉಪಯೋಗಿಸಲು ಕೆಲವು ತೊಂದರೆಗಳಿವೆ. ಹೆಚ್ಚು ಸುಂದರ ಫಾಂಟ್ ಗಳು ಉಪಲಬ್ಧವಿಲ್ಲ. ಇರುವುದನ್ನೇ ಬಳಸಿ ಇದನ್ನು ಸಿದ್ಧಪಡಿಸಲಾಗಿದೆ. ಫಾಂಟ್ ಹಾಗೂ ಪುಟ ವಿನ್ಯಾಸದ ದೃಷ್ಟಿಯಿಂದ ಏನೇ ನ್ಯೂನತೆ ಇದೆ ಎನಿಸಿದರೂ ಅದನ್ನು ಓದುಗರು ಮನ್ನಿಸಬೇಕು. ನಿಮ್ಮ ಕ್ಷಮೆ ತಂತ್ರಜ್ಞಾನದ ಬೆಳವಣಿಗೆಗೆ ಪ್ರೋತ್ಸಾಹವಾಗುತ್ತದೆ.

ಶುಭಮ್

भूमिका

कल्याणगुणपूर्णाय दोषदूराय विष्णवे ।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने ॥

निवेदना

अथायं प्रबन्धः विद्वत्करकमलेषु सानन्दं समर्प्यते, यस्मिन् श्रीमध्वाचार्यरचितस्य तन्त्रसारसङ्ग्रहस्य श्रीवंशपल्ली(बिदिरहळ्ळि)वेङ्कटपत्याचार्यैः प्रणीतायाः गुर्वर्थदीधितिनाम्न्याः सम्पादनं विहितम् ।

सम्पादितग्रन्थस्य समर्पणात् प्राक् तत्सम्बद्धतया व्याख्येय-व्याख्यानग्रन्थौ, तद्विषयं, तत्कर्तारौ सम्पादनसरणिं चाधिकृत्य किञ्चिन्निवेद्यते ।[1]

---

[1] अस्य ग्रन्थस्य सम्पादनं मूलतः `विद्यावारिधि'[Ph.D.]नामकोपाध्यर्थं कृतम् । नवदेहलीस्थेन राष्ट्रियसंस्कृतसंस्थानेन उपाधिप्रदानानन्तरमिदानीं प्राकाश्यं नीयते । ग्रन्थविस्तारभिया नैकानंशान् परित्यज्य शोधप्रबन्धस्य भूमिका अत्र सङ्गृहीता । षष्ठपरिशिष्टे मूलभूमिकायाः विषयानुक्रमणी दर्शिता ।

0.1 भारतीयसंस्कृतौ तन्त्रशास्त्रस्य स्थानम्

0.1.1 तन्त्रशास्त्रम्

इह जगतीतले प्रथितासु विचारधारासु प्राचीनभारतीयऋषिकुलप्रणीतायाः वैदिकविचारधारायाः अस्ति अनितरसाधारणं सम्मानं स्थानं च। साक्षात्कृतवैदिकमन्त्राः एते मुनिजनाः न केवलं पारत्रिकलोकाप्तये प्रायतन्त किन्तु, तदनुगुणां तदनुकूलां सर्वभूतहितावहां साधनपद्धतिमपि साक्षादकुर्वन् तां शास्त्रदीपेन प्रादर्शयन् च। तदेतत् शास्त्रं तन्त्रशास्त्रसंज्ञया प्रथितम् ।

तस्यास्य तन्त्रशास्त्रस्य विषये प्राज्ञाः एवमाहुः - `भारतस्य[1] प्राचीनतमशास्त्रेषु तन्त्रशास्त्रमन्यतमम् । अस्मत्प्राचीनानामलौकिकाया बुद्धिशक्तेः, अप्रतिमायाः सिद्धेः, अपूर्वायास्तत्वान्वेषणप्रज्ञायाश्च निदर्शनायमानं शास्त्रं तन्त्रशास्त्रम् । मनुष्यस्य सारभूतेषु सफलेषु च यत्नेषु सफलतमो यत्नः तन्त्रशास्त्ररूपेण परिणतः । "यत्सारभूतं तदुपासितव्यम्" इत्युक्तेस्तन्त्रशास्त्रमुत्तमो दृष्टान्तः। तस्य विषये प्राचीनानामपारा श्रद्धा आसीत्, तस्य साधने तैरनितरसाधारणतया प्रयत्नः कृतः, तेन तैः प्राप्ता सिद्धिरप्यनन्यसाधारणी।' - इति

`ऋषिमुनीनां[2] या योगसिद्धयः प्रथन्ते तास्तन्त्रशास्त्रानुष्ठानस्य फलभूताः। तन्त्रशास्त्रं मूलतः तत्त्वज्ञानमेव। तत्त्वज्ञानार्जनोपायाः, अर्जितस्य तत्त्वज्ञानस्य प्रत्यक्षतः सिद्धेरुपायाश्च तन्त्रशास्त्रस्य लक्ष्याः। तन्त्रशास्त्रस्य विषयान्तर्गताः ये मन्त्र-पूजा-होम-यज्ञ-यन्त्र-व्रतोपवासादयः ते आरुरुक्षूणां साधकानां तत्त्वज्ञानप्राप्त्युपायाः, तथा, आरूढानां अपरोक्षज्ञानिनां तत्त्वज्ञानफलभूताणिमादिसिद्धेः प्राप्तिद्वारा स्वयमनुभवितुं,

---

1 श्री वन्नञ्जे गोविन्दाचार्याः, तन्त्रसारसङ्ग्रहस्य कन्नडभाषानुवादस्य प्राक्कथने। कन्नडभाषायां लिखितस्य संस्कृतानुवादोऽयम् । पृ.सं.5

2 डा.व्यासनकेरे प्रभञ्जनाचार्याः, छलारीयटीकायाः सम्पादनस्य भूमिकायाम् । कन्नडभाषायां लिखितस्य संस्कृतानुवादोऽयम् ।

जिज्ञासून् प्रति ताः सिद्धीः प्रदर्श्य तन्मनसि तत्त्वज्ञानमहत्त्वमनुभावयितुं चोपायाः । तदेवं तन्त्रशास्त्रं साधकानां सिद्धानां च महोपकारकम् । तन्त्रशास्त्रेऽनारूढासक्तिः कोऽपि तत्त्वतः तत्त्वज्ञानी भवितुं नार्हति । अनधीततन्त्रशास्त्रस्य विदुषः ज्ञानं पुस्तकस्थमेव स्यात् न तु कदापि मत्तकस्थं, अनुभवारूढं च स्यात्' ।

`इदमत्रावधेयम् ।[1] बुद्धिमान् कश्चन पुरुषः सर्वासां दार्शनिकविचारधाराणां विद्वान् स्यान्नाम, अधिमञ्चं जगतः वर्तमानदार्शनिकविचारानधिकृत्य विद्वत्तापूर्णं गवेषणात्मकं सारगर्भितं च भाषणं कुर्यान्नाम । एतादृशासदृशसामर्थ्योपेते पुरुषे कीदृशस्यापि परिवर्तनस्य वा संस्कारस्य अपेक्षा न भवति । परन्तु, तन्त्रशास्त्रस्याध्ययने क्रियमाणे तु नैतादृशी स्थितिः । पुरुषः इदमधीय परिवर्तते । तन्त्रं ज्ञातुं स्वीयं बौद्धिकतारूपमावरणमुन्मुच्य स्वीये स्वरूपे स्थितिः नितान्तमावश्यिकी तथा प्रथमाधिकारश्च भवति । यावत् पुरुषः न परिवर्तते तावत्तन्त्रं न जानाति ।' - इति ।

एतेषां वचसां परिशीलनेन इदं तावत् ज्ञायते यत् तन्त्रविद्या न केवलं पुस्तकस्था विद्या कण्ठस्था वा विद्या, किन्तु अनुभवमारोढव्या तदर्थं आचरणपथमानेतव्या च काचन विद्या अस्ति - इति ।

अत एव सुभाषितप्रायं किञ्चन वचनं तत्र तत्रोल्लिख्यते -

`अन्यान्यशास्त्रेषु विनोदमात्रम् (विवादमात्रं)
न तेषु किञ्चिद् भुवि दृष्टमस्ति ।
चिकित्सितज्योतिषतन्त्रवादाः
पदे पदे प्रत्ययमावहन्ति ॥' - इति ।

---

1 अभिनवगुप्ताचार्यरचितस्य श्रीतन्त्रालोकस्य हिन्दीभाष्यकाराः सम्पादकाश्च सन्तः डा. परमहंसमिश्रमहोदयाः स्वीये प्राक्कथने यदलिखुः हिन्दीभाषया लिखितस्य तस्य संस्कृतानुवादोऽयम् । श्रीतन्त्रालोकः सम्पूर्णानन्दविश्वविद्यालयः, वारणासी, पृ.सं. 9

`सन्तु यावन्ति तावन्ति वा शास्त्राणि। तेषां पंक्तिरन्या। वैद्यकज्योतिषतन्त्रशास्त्राणां पंक्तिरन्या। अन्यशास्त्रेष्वधीतेषु शास्त्रविनोदेन कालयापनं स्यात्, उदितेषु संशयेषु विवादः परं उर्वरितः स्यात् । एषां त्रयाणां दशा परं भिन्ना। अत्र सन्ति भूयांसः सन्तस्तज्ज्ञाः येऽनुभूय सविश्वासं विषयान् ख्यापयन्तः शास्त्रेषु विश्वासं वर्धयन्ति' - इति अस्याः सूक्तेराशयः।

तन्त्रशास्त्रमधिकृत्याधिकं वचनात् प्राक् तन्त्रं नाम किम् ? तन्त्रशास्त्रमित्यत्र तन्त्रशब्दः कस्मिन्नर्थे प्रयुज्यते ? इति आदौ विवेचनीयम् ।

कोशेषु तन्त्रशब्दार्थः

`तन्त्रं प्रधाने सिद्धान्ते तन्तुवाये परिच्छदे' (अ.को. 3-3-184) इत्यमरकोषः।

`तन्त्रं कुटुम्बकृत्ये स्यात् सिद्धान्ते चौषधोत्तमे।
प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे।
श्रुतिशाखान्तरे हेतावुभयार्थप्रयोजने।
इति कर्तव्यतायां च' इति मेदिनीकोषः।

`तन्त्रं स्वराष्ट्रव्यापारे तन्तुवाने परिच्छदे।
शास्त्रौषधान्नमुख्येषु प्रयोगेऽध्वरकर्मणाम् ।
एकस्यैवोभयार्थत्वे कुटुम्बव्यापृतावपि ॥' - इति वैजयन्तीकोषः।

प्रायः समानविषयेषु वाचस्पत्य-शब्दकल्पद्रुम-शब्दार्थकौस्तुभाख्येषु कोषेषु अष्टाविंशातिरर्थाः[1] कथिताः। कतिपयानामेव प्रयोगः प्रदर्शितः। विस्तरभिया तत्सर्वमत्र न दर्शितम् । कोषानां परिशीलनेन शास्त्रविशेषे तन्त्रशब्दोऽस्तीति तु परिज्ञायते। तत् शास्त्रं तन्त्रशास्त्रमिति व्यवह्रियते।

---

1 एतौ वाचस्पत्य-शब्दकल्पद्रुमौ प्रसिद्धौ कोषौ। अन्तिमः पूर्वौ अनुसृत्य रचितः संस्कृत-कन्नडशब्दकोषः। षड्भागात्मकः अयं कोषः संस्कृतप्रेमिणां कन्नडभाषाज्ञानां महान् निधिः।

तन्त्रग्रन्थे तन्त्रशब्दार्थः

तन्त्रशब्दव्युत्पत्तिमभिदधत्यां श्रीमध्वाचार्यैः भागवततात्पर्ये उल्लिखितायां विष्णुसंहितायां कथितम् -

सर्वार्था येन तन्यन्ते त्रायते च भयाज्जनान् ।
इति तन्त्रस्य तन्त्रत्वं तन्त्रज्ञाः परिचक्षते ।। - इति। (वि.सं. 2-10)

अस्य आशयः एवमस्ति - तन्त्रशब्दे `तन्' एवं `त्र' इति भागद्वयमस्ति। तत्र तन् इति भागस्य अर्थः `सर्वार्था येन तन्यन्ते' इति। त्र इति भागस्य अर्थः `त्रायन्ते च भयाज्जनाः' इति। एवं च तन् = इष्टप्रापकं, त्र = अनिष्टनिवर्तकं शास्त्रं तन्त्रशास्त्रमिति भावः सिद्ध्यति। मनुष्यजीवने इष्टप्राप्त्यनिष्टनिवृत्तिभ्यां पृथक् किमस्त्यभिलषणीयम् ?

0.1.2 तन्त्रशास्त्रस्य महत्त्वम्

शास्त्राणामुद्देश्यं ज्ञानम् । अर्जितस्य ज्ञानस्योपयोगः कथं करणीयः ? ज्ञानस्य अन्वयः कुत्र ? इति जिज्ञासा सर्वस्यापि कदाचिन्नूनं भवति। आधुनिककाले न्यूटन्, ऐन्स्टीन् इत्यादिविज्ञानिभिर्विहितानां आविष्काराणां जीवने उपयोगः (Application) अस्तीति महत्त्वमस्ति। तथा तत्वज्ञानस्य (Philosophy) उपयोगः (Application) कुत्र ? कथम् ? इति विचिकित्सा सर्वानपि साधकान् कदाचित् बाधते। यथा अधुना Applied Science इति प्रयोगभागः ज्ञानभागस्य सार्थक्यं समर्थयते तथा Applied Philosophyभूतं तन्त्रशास्त्रं शास्त्रीयज्ञानस्य प्रयोगभागः सत् तस्य सार्थक्यमादधाति। आधुनिकविज्ञानस्य मूलभूतनियमानामन्वयेन गृह-यन्त्र-वाहनादिनिर्माणं भवति। तेन च तेषां नियमानां महत्त्वं स्फुटं भवति। तथैव शास्त्रज्ञानस्य अन्वयेन किं साधनीयम् ? कथं साधनीयमित्येतत् तन्त्रशास्त्रेण प्रदर्श्यते ।[1]

[1] डा.व्यासनकेरे प्रभञ्जनाचार्यैः तन्त्रसारसङ्ग्रहस्य छलारीयव्याख्यासम्पादनस्य भूमिकायाम् । पृ.सं.14।

0.1.3 तन्त्रशास्त्रस्य विषयः, प्रयोजनं प्रस्तुतता च

भगवत्तत्वं, तत्प्रतिपादका विविधा मन्त्राः, तत्पूजाक्रमः, तद्देवालयनिर्माणविधिः, देवालयेष्वर्चनप्रणाली इत्येते एकविधाः तन्त्रशास्त्रविषयाः। तथा हि प्रकृतशोधप्रबन्धे सम्पादनाय स्वीकृतायां गुर्वर्थदीधितौ द्वितीयश्लोकस्य `तेन पृष्टः' इति भागस्य व्याख्यानावसरे तन्त्रग्रन्थे उत्तरिताः प्रश्नाः एवं सङ्गृहीताः - `सर्वोत्तमः सकलगुणपूर्णः कः? किं तत्र प्रमाणम्? जप्या मन्त्राश्च के? तत्प्रतिपाद्यश्च कः? कथं तद्ध्यानमनुष्ठेयम्? पूज्यश्च कः? पूजा च कथं कार्या? अज्ञानां पूजायाः साक्षात् कर्तुमशक्यत्वेन प्रतिमायामेव कर्तव्यत्वात्तदर्थं प्रतिमा कार्या। तन्निर्माणविधिश्च कः? किं तल्लक्षणम्? `अप्रतिष्ठितबिम्बस्य पूजनं सिद्धिहानिकृ'दित्युक्तेः अवश्यं प्रतिष्ठा कार्या। सा च कथं कर्तव्येत्यादि...' इति।

अपरश्च यमनियमाद्यष्टाङ्गोपेतः योगः, योऽद्य समग्रप्रपञ्चे भारतीययोगदानत्वेन प्रथितः, सोऽपि तन्त्रशास्त्रस्य विषयः। तथा हि नेत्रतन्त्राख्ये शैवतन्त्रे -
`अष्टाङ्गेन तु योगेन प्राप्नुयान्नान्यतः क्वचित्।' (अधिकरणम् 8 श्लोकः 9) इति।

एवं द्विविधा विषयास्तन्त्रग्रन्थेषु प्रतिपाद्यन्ते।

सामान्यजनान् प्रति तन्त्रशास्त्रप्रदर्शिता साधनपद्धतिः किंरूपा? तदनुष्ठाने कियान् यत्नोऽपेक्ष्यते? तल्लभ्यं फलं कीदृशम्? नित्यजीवने तस्य कथं प्रस्तुतत्वम्? इतिप्रश्नानामुत्तरं प्रदर्शयितुं विष्णुसंहितायास्त्रिंशपटलस्यायं भाग उदाह्रियते। तत्रतत्रैव उद्धृतभागानामाशयः सङ्गृह्यते।

`अथ वक्ष्यामि सङ्क्षेपाद् योगं भागवतं परम्।
यदन्यैरश्रुतं पूर्वं हितानां परमं हितम्॥ 1॥'

इति श्रोतृमनआनुकूल्याय वक्ष्यमाणविषयप्रदर्शनरूपा प्रतिज्ञा।

`युक्ताहारविहारस्तु युक्तचेष्टः समाहितः।

योगं भागवतं नित्यमभ्यसेन्नियतात्मवान् ॥ 2 ॥

पञ्चकालविभागज्ञो मितभाषी मिताशनः ।

कामक्रोधादिजिद्भक्तः समलोष्टाश्मकाञ्चनः ॥ 3 ॥

समयाचारसंयुक्तो जपध्यानपरायणः ।

एकान्ते विजने स्थाने निवाते शब्दवर्जिते ॥ 4 ॥

बद्ध्वा योगासनं मौनी योगं युञ्जीत योगवित् ।

पूजयित्वा हरिं, पूजां तत्रैव प्रतिपादयेत् ॥ 5 ॥'

- इति कायिक-वाचिक-मानसिकक्रियारूपयोगस्य ज्ञान-भक्ति-वैराग्यरूपसाधनानां च निरूपणम् । यद्यप्येतेंऽशाः प्राथमिकस्तरीयसाधकैरसाध्याः, तेषामपि यथा मार्गदर्शनं स्यात् तथाऽग्रे उपवर्णितमपि, तथापि उन्नतस्तरीयसाधकस्य स्थितिरत्रोपवर्णिता येन प्राथमिकानामपि लक्ष्यनिर्धारणं स्यात् इति ।

`किङ्करत्वेन चात्मनं कृताञ्जलिरधोमुखः ।

न याचेत फलं किञ्चित् प्रसन्नो दास्यति स्वयम् ॥ 6 ॥

जानात्येव हि कालं स भक्तिपूजागुणागुणान् ।

प्रसन्नस्त्वनुगृह्णीयात् त्वरया न कदाचन ॥ 7 ॥

न त्वेव नानुगृह्णीयाज्जन्मान्तरशतेष्वपि ।

कर्मणां पच्यमानानामपरेषां परिक्षये ॥ 8 ॥

प्रकाशयति भक्तानां हरिः कुर्वन्ननुग्रहम् ।'

- अत्र भागे साधकस्य भगवतश्च सम्बन्धः कीदृश इत्युपवर्णितम् । भगवति स्वामित्वभावः, स्वात्मनि दास्यभावः, रक्षत्येवेति विश्वासः इत्येतेंऽशाः कथिताः ।

`ततस्तु सम्पदेवास्य पुरस्तादुपलक्ष्यते ॥ 9 ॥

क्षीयन्तेऽस्यारयो नित्यं वर्धन्ते सम्पदः स्वयम् ।

फलं त्वयत्नाद् भूयः स्यान्नश्यन्ति व्याधयः स्वयम् ॥ 10 ॥

न क्वचिच्चास्य संक्लेशो वर्धन्ते पशवः प्रजाः ।

दीर्घं चास्य भवेदायुर्जायन्ते सुभगाः प्रजाः ॥ 11 ॥

प्रशंसन्ति जनाश्चैनं चोरयेयुर्न दस्यवः ।

अनुपद्रवमैश्वर्यं चिरं तिष्ठत्ययन्त्रितम् ॥ 12 ॥

धर्माद्यभिमुखी धीः स्यादधर्मादिपराङ्मुखी ।

सुखेनैवोपरान्तश्च पुण्यकाले भविष्यति ॥ 13 ॥

जन्मोत्कृष्टकुले भूयो भक्तिश्च पुनरच्युते ।

उत्कृष्टतम एव स्यात् तथा जन्मनि जन्मनि ॥ 14 ॥

अक्लिष्टमष्टधैश्वर्यं तत्प्रसादाद् भविष्यति ।

विहरेदिच्छया दीर्घं निर्वाणं वा तथाप्नुयात् ॥ 15 ॥'

- रोचनार्थं फलश्रुतिरिति भागवतोक्तदिशा तन्त्रशास्त्रोक्तमार्गानुसरणे प्राप्यं फलमत्र निरूपितम् । धर्मार्थकाममोक्षाख्याः पुरुषार्थाः, अर्थकामेष्वपि विविधा विचित्राः लभ्यन्ते इति प्रतिपादयन्नयं भागः `ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे । धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥' (म.भा. 18-5-49) इति भारतवचनस्य व्याख्यानरूपोऽस्ति ।

इतः परमेकादशश्लोकानामर्थः साधकैः शनैःशनैर्मननीयः । मनश्शुद्धेः सुसूक्ष्माणि रहस्यान्यत्र प्रदर्शितानि । हितैषी वत्सलो गुरुः पार्श्वे उपविश्योपदिशतीव विष्णुसंहिता अत्र भक्तान् बोधयति -

`तस्मात् कार्यो विवेकोऽत्र गुणदोषा यथा स्थिताः ।

चिन्तयेदखिलान् दोषानेकान्ते शुद्धमानसः ॥ 19 ॥

कामकोपादिभिर्मुक्तम् मनः शुद्धं भविष्यति ।
अभ्यासेन भवेच्छुद्धिर्मनसो योगवर्त्मनि ॥ 20 ॥'

- गुणदोषानां पृथक्कृत्य दर्शनं विवेकः । सः आश्रितः कामक्रोधादीन् मनोदोषानपाकरोति । तदपि न तत्क्षणात्, किन्तु कालक्रमेण पुनःपुनरभ्यासेनैव ।

`शुद्धे मनसि तद्भक्तिर्जायते तस्य निश्चला ।
तस्यां समुपजातायां तत्वे चेतोऽवतिष्ठते ॥ 21 ॥'

- मनःशुद्धेः भक्तिराविर्भवति ।

`रागद्वेषपरीतस्य विफलं तत्वदर्शनम् ।
तस्मात्तौ पूर्वमुत्सार्यौ तत्वं सम्यग्दिदृक्षुणा ॥ 22 ॥'

- रागद्वेषयोर्वर्जनमनिवार्यम् ।

`पुण्यदेशेषु दृष्टेषु भयेषु मरणेषु च ।
तथा रोगावमानेषु वैराग्यमुपजायते ॥ 23 ॥
मरणादिषु दृष्टेषु स्वयमेव समाहितः ।
बुध्या विवेकमातिष्ठेन्नित्यं वैराग्यकारणम् ॥ 24 ॥
विवेकाज्जायते भक्तिर्वैराग्यं चास्य सर्वदा ।
ततस्तत्वगता बुद्धिर्भविष्यत्यनपायिनी ॥ 25 ॥'

- वैराग्यस्य विविधा उपाया अत्र दर्शिताः । ज्ञानविशेषरूपविवेक-भक्ति-वैराग्यैः भगवत्तत्वे मनः प्रसरतीत्येतदत्र दर्शितम् ।

`न भोगेषु प्रसक्तः स्यान्न कुर्याद् दुर्लभे मतिम् ।

अल्पेन परितुष्टः स्यान्नित्यं भागवतो बुधः ॥ 26 ॥

विपाकं कर्मणामेव पश्येत् पश्यन् प्रियाप्रिये ।
इदं युक्तं इदं नेति नानुशोचेत्कदाचन ॥ 27 ॥

प्रभुत्वं नात्मनः किञ्चिदिति पश्येद् विवेकवान् ।
घोषयेन्नैव कृत्यानि न कुर्यात् सम्भ्रमं क्वचित् ॥ 28 ॥

न चाकाङ्क्षेद् यशः किञ्चिद् देवदेवस्य पूजनात् ।
यथा मनः प्रियेष्वेवं सक्तं देवे च भावयेत् ॥ 29 ॥'

- विहितसेवनमिव निषिद्धपरित्यजनमपि सेव्यमिति निरूपितमत्र ।

`अन्तरायास्तु ये नित्यं योगाभ्यासस्य दूषकाः ॥ 44 ॥
तेषु प्रसज्यमानेषु तत्वदर्शनमाश्रयेत् ।'

- नानाविधानां विघ्नानां प्रधानमस्त्रं किमित्येतदत्र विवृतम् ।

`नातिवेलं सदाभ्यस्येन्न शरीरं च पीडयेत् ॥ 45 ॥
विषयेभ्योऽपि यत्नेन निवर्तेत शनैः शनैः ।'

- जर्झरमङ्कुरं न फलानि प्रसूते, नाप्यद्य प्ररूढं परेद्युः । एवमेव प्रधानं साधनं शरीरं सर्वथा परिरक्षणीयं, विषयभोगः क्रमेण परित्यजनीय इति मननीयो विषयोऽत्र उपदिष्टः ।

`विषया दुस्त्यजाः सेव्या धर्मशास्त्राविरोधिनः ।
बह्वपायत्वेन, योगेन यत्नाद् वेच्छां निवर्तयेत् ॥ 48 ॥

येभ्यो निवर्तमानस्य मनः शुद्धं भवेत् सदा ।
निवृत्तेरभ्युपायश्च शुद्धिरेव परात्मनः ॥ 49 ॥'

- क्रमेण विषयभोगस्त्याज्य इत्येतस्यापूर्वं विवरणं दत्तम् ।

`अशुचीनामसंसर्गाच्चित्तमस्य प्रसीदति ।
प्रसादे निःस्पृहस्यास्य भक्तिर्मुक्तिस्ततो ध्रुवा ॥ 51 ॥'

- शौचस्य महत्त्वं तत्र तत्रोपवर्ण्यते । शौचं कथङ्कारं फलतीत्येतदत्र विवृतम् ।

एवमत्र प्राथमिकानारभ्य सर्वेषामपि सूक्तं मार्गदर्शनं कृतमुपलभ्यते । अत्र प्रदर्शितानां रागद्वेषत्यागादिरूपाणां योगानामवलोकनेन इदमपि स्फुटं भवति यत् पारलौकिके दत्तदृष्टयः इहापि उपकारकाः भवन्ति । ऐहिकजीवनविरोधी न जातुचित् भक्तो भवितुमर्हतीत्यपि सन्देशोऽत्र विष्णुसंहितोपलक्षितेन तन्त्रशास्त्रेण दत्तम् ।

0.1.4 तन्त्रप्रभेदः

तदिदं तन्त्रशास्त्रं सात्विक-राजस-तामसभेदेन त्रिधा भिन्नम् । तत्र सात्विकं तन्त्रं अनर्थदूरां स्वपरहितोभयकारिणीं सफलतरां सिद्धिं विधातुमलम् । दृश्यते हि लोके सात्विकसिद्धिसम्पन्नैः शापानुग्रहशक्त्या शिष्टरक्षणदुष्टशिक्षणे विधीयेते, तद्व्यतिरिक्ततया तामससिद्धिमद्भिः वामाचारादिना क्रियमाणा अनर्थपरम्परा च । क्रमेण एतेषामालम्बनभूताः तन्त्रग्रन्थाः सात्विकराजसतामसभेदेन व्यवह्रियन्ते ।

0.1.5 तन्त्रसारसङ्ग्रहः

सात्विकतन्त्रग्रन्थेषु साक्षात् विष्णुना रचितः तन्त्रसाराख्यः अन्यतमः । अतिविस्तृतोऽयं ग्रन्थः कालव्यालकवलीकृतः, येन जनानां अप्रतीकारा हानिः समापद्यत । तदस्याः परिमार्जनाय श्रीमध्वाचार्यैः तन्त्रसारसङ्ग्रहाख्या कृतिः विरचिता । अस्याः कृतेः परिचायनात् पूर्वं कृतिकर्तॄणां श्रीमध्वाचार्याणां विषये यत् वक्तव्यं तत् द्वितीयभागे कथ्यते ।

0.2 श्रीमध्वाचार्यविरचितः तन्त्रसारसङ्ग्रहः

0.2.1 श्रीमध्वाचार्याः

श्रीमध्वाचार्याः भारतीयदर्शनवाङ्मयप्रपञ्चे प्रथितेषु आचर्येषु अन्यतमाः। श्रीपूर्णप्रज्ञाः आनन्दतीर्थाः इत्यपि एते ख्याताः। एतेषां कालः क्रि.श.1200तः 1279वर्षपर्यन्तम्। कर्णाटकराज्यस्य दक्षिणकन्नडजनपदस्य पाजकनामको ग्रामः एषां जन्मस्थलम्। तस्मिन्नेव जनपदे विद्यमानं उडुपिनामकं क्षेत्रं केन्द्रं कृत्वा एते स्वकार्याणि प्रथयाञ्चक्रुः। एते वेदोपनिषदितिहासपुराणानि नवप्रकाशेन जिज्ञासून् प्रति प्रकटयामासुः। आर्षसाहित्यस्य पुराण-पञ्चरात्र-इतिहासादिरूपं सर्वमपि भागं प्रमाणत्वेनोररीकृत्य सर्वेषामविरोधं सम्पाद्य सर्वेषु समन्वयं संसाध्य एतैः सिद्धान्तः उपस्थापितः। तदेतत्परिलक्ष्य अस्मद्गुरुभिः श्रीविश्वेशतीर्थचरणैः तदातदा `श्रीमध्वाचार्याः समन्वयाचार्याः इति विरुदमर्हन्ति' इति कथ्यते। सोऽयं सिद्धान्तः तत्ववाद इति कदाचित् द्वैतवेदान्त इति च प्रथितः।

एतेषां विषये महान्तः श्री.बि.एन्.के. शर्माणः एवमाहुः[1] - `त्रिषु दर्शनेषु (द्वैत-अद्वैत-विशिष्टाद्वैतदर्शनेषु) द्वैतदर्शनमर्वाचीनम्। अस्य व्याप्तिः सीमिता। तथापि भारतीयतत्वशास्त्रेतिहासे अद्वैतप्रतिभटतया इदमेव दर्शनं प्रधानतः स्थितम्। .... अद्वैतिनां प्रबलतर्काघातं सोढुमपारयन्ति साङ्ख्य-न्याय-वैशेषिकदर्शनानि जर्झरितानि। तदा शून्यवादस्य मायावादस्य च आक्षेपान् परिहृत्य आस्तिकमतस्य प्रमुखप्रमेयं जगत्सत्यत्वं अनेन दर्शनेन साधितम्। .... अस्य दर्शनस्य इतिहासः नूनं भारतीयदर्शनप्रपञ्चे तथा वेदान्तदर्शनप्रपञ्चे च प्रामुख्यं भजते इति सगर्वं वक्तुं शक्यते। इदं दर्शनं आसेतुहिमाचलं विदुषः आकर्षितवदस्ति। न केवलं तावत्, अद्यापि औत्तरेयाः दाक्षिणात्याश्च विद्वन्मणयः पौनःपुन्येन इदं दर्शनं परिशीलयन्ति। तत्परिणामतया

---

[1] `द्वैतवेदान्तवाङ्मय मत्तु इतिहास' इति नाम्ना कन्नडभाषायामनूदिते ग्रन्थे द्वितीयभागे भूमिकायां पृ.सं.1।

खण्डनमण्डनसाहित्ये महती समृद्धिः जाता। तत्रापि मध्वाचार्याणामनन्तरं तन्मार्गवर्तिभिः श्रीजयतीर्थैः (क्रि.श. 1367-1388) तथा श्रीव्यासतीर्थैः (क्रि.श.1460-1539) द्वैताद्वैतवविमर्शः उन्नतस्तरं नीतः।' इति।

एवं श्रीसुरेन्द्रनाथ दासगुप्ता महोदयाः स्वीये History of Indian Philosophy ग्रन्थे भूमिकायाम् एवमलिखन्[1] ` In my opinion Jaya-thirtha and Vyasa-thrtha present the highest dialectical skill in Indian thought. There is a general belief amongst many that monism of Shankara presents the final phase of Indian thought. The realistic and dualistic thought of the Saankhya and yoga had undergone a compromise with monism both in the Puranas and in the hands of the later writers. But the readers of the present volume who will be introduced to the philosophy of Jaya-thertha and perticulerly of Vyasa-thirtha will realize the strength and uncompromising impressiveness of the dualistic position. The logical skill and depth of acute dialectical thinking shown by Vyasa-thirtha stands almost unrivalled in the whole field of Indian thought.' - `श्रीजयतीर्थसदृशाः तथा श्री व्यासतीर्थसदृशाः वाक्यार्थकोविदाः भारतीयवैदुष्यप्रपञ्चे न सन्तीति मम अभिप्रायः। बहवः भारतीयदर्शनेषु श्रीशङ्कराचार्याणां अद्वैतदर्शनमेवान्तिममिति विश्वसन्ति। ते इदं सम्पुटमवश्यं पठन्तु। .... एतत्परिचयानन्तरं भेदवादिनां स्पष्टं पक्षं सुदृढं सामर्थ्यं च ते अवगन्तुं प्रभवन्ति' - इत्यादि।

2005तमे वर्षे प्रकटिते Roy Abraham Varghese नामकेन विदुषा

1 सम्पुटम् 4, पृ.सं.8

लिखिते A Journey from Modern Science to the Mind of God नामके पुस्तके श्रीमध्वाचार्यानधिकृत्य एवमुक्तम् [1]-

` In terms of personal charisma, intellectual rigor and scholarly breadth and depth, Madhvacharya was the most fascinating of the Hindu sage-philosophers and one of the greatest theistic thinkers of all time. He was an Indian Wittgenstein whose rapier-sharp critiques matched his memorable and profound aphorisms. More to the point, he was an intellectual juggernaut who single-handedly reversed the slide toward monism and re-established theism as a dominant force. He was also an accomplished wrestler, mountaineer and singer!'

एवम् एते महानुभावाः श्रीमध्वाचार्याः न केवलं वेदान्ते अनितरसाधारणवैदुष्यसम्पन्नाः किन्तु तर्कव्याकरणादिष्वपि नूतनां विचारप्रणाडीं प्रदर्शितवन्तः । तन्त्रसारसङ्ग्रहस्थविषयाणामवलोकनेन तु तन्त्रे तदन्तर्गते वास्तुशास्त्रे शिल्पशास्त्रेऽपि तेषां अत्यपूर्वा प्रतिभा विद्यते स्मेति निश्चप्रचं ज्ञायते ।

ग्रन्थपरिचयः

श्रीमध्वाचार्याः अपारसागरायमाणं तन्त्रशास्त्रविषयं चतुरध्यायात्मनि चतुःशतश्लोकरूपेऽस्मिन् ग्रन्थे आश्चर्यजनिकया शैल्या समग्रहीषुः । सङ्क्षिप्ततमैः शब्दैः महत्तममर्थं प्रतिपादयन्तमिमं ग्रन्थं विवरीतुं त्रिंशदधिकाः व्याख्याः प्रवृत्ता इत्येतत् अस्य अवश्यव्याख्येयतां सूचयति ।

---

1 पृ.सं.118। इदं पुस्तकं तथा तत्र श्रीमध्वाचार्यविषये उक्तां प्रशंसां चाधिकृत्य www.madhvacharya.com इति Internet Website मध्ये प्रायः सर्वं दर्शितम् !

ग्रन्थनाम

तन्त्रसारसङ्ग्रहः इति नाम्ना, अयं ग्रन्थः तन्त्रसाराख्यस्य कस्यचन ग्रन्थस्य सङ्ग्रहः इति ज्ञायते । कोऽयं तन्त्रसारः इति जिज्ञासायामाचार्यैस्तत्रतत्रैतद्विषये उक्तमस्ति । तथा हि -

ग्रन्थादौ द्वितीयश्लोके एवमुक्तम् -

`विधिं विधाय सर्गादौ तेन पृष्टोऽब्जलोचनः ।
आह देवो रमोत्सङ्गविलसत्पादपल्लवः ॥' - इति (तं.सा. 1-2)

तृतीयाध्यायस्यान्ते एवमभिहितम् -

`तन्त्रमार्गास्तु हरिणा ह्यसङ्ख्याः कीर्तिता अपि ।
तेष्वयं सुगमो मार्गः सफलश्चानुतिष्ठताम् ॥' - इति (तं.सा. 3-139)

अन्यत्रापि -

`ब्रह्मणे कथितात् तन्त्रसारादुद्धृत्य सादरम्
आनन्दतीर्थमुनिना कृतो ग्रन्थोऽयमञ्जसा ॥' (तं.सा.4-158)

`यावतो ह्यननुष्ठाने कर्मपूर्तिर्न विद्यते ।
तावत् समस्तं कथितमस्मिंस्तन्त्रे यथाविधि ॥' इति (तं.सा.3-140)

एभिर्वचनैरेवं ज्ञायते - सृष्टौ बह्व्यः अवस्थाः सन्ति। तत्र ब्रह्माण्डसृष्टेः प्राक् चतुर्मुखस्य सृष्टिः एका अवस्था । भगवान् विष्णुः चतुर्मुखं सृष्ट्वा अग्रेतनं सर्जनं विधातुं आदिदेश । तदा ब्रह्मा सृष्टिविषये सृष्ट्यर्थमपेक्षितायाः विशिष्टशक्त्याः विषये, तदर्जनोपायविषये च विष्णुं प्रार्थयामास । तदा विष्णुः ब्रह्माणं यद् बोधयामास तस्य सङ्कलनं तन्त्रसार इति कथ्यते । न केवलं सृष्ट्यादौ किन्तु अन्यदापि भगवान् तत्र तत्र अन्यान्यान् तन्त्रमार्गमुपदिशतीति तेषां सर्वेषां गणने तन्त्रग्रन्था असङ्ख्या भवन्ति। परन्तु,

तेषु ग्रन्थेषु कथिता अर्थाः कष्टेनानुष्ठेया भवन्ति। मन्दाधिकारिणो न प्रभवन्त्यनुष्ठातुम् । अतः सुगमतया यत्र तन्त्रमार्गसम्बन्धिनोऽर्थाः प्रतिपादिताः तादृशो ग्रन्थो भवति तन्त्रसारः। किञ्च, `न ह्यन्तोऽनन्तपारस्य कर्मकाण्डस्य चोद्धव।' (भा. 11-27-6) भागवते भगवता कृष्णेनोक्तदिशा तन्त्रग्रन्थोक्तानि पूजामन्त्रजपादीनि कर्माणि बहुव्यापृतानि। तत्र जपे, पूजायां, होमे, देवालयनिर्माणादौ च अन्ततः यावदवश्यं कर्तव्यं तावत् अस्मिन् तन्त्रसारे गदितम् । तस्य सङ्ग्रहात्मको ग्रन्थः तन्त्रसारसङ्ग्रहः।' - इति।

ग्रन्थसङ्ख्या, अध्यायादिविभागश्च

अस्मिन् ग्रन्थे चतुरध्यायी अस्ति। आहत्य चतुःशताधिकाः श्लोकाः सन्ति। तत्र आनुष्टुभश्लोकेषु चतुर्भिरेव पादैर्भूयेत इति नियमाभावात्, यथाविषयं क्वचित् द्वौ पादौ, क्वचित् षट् पादा अपि सम्भवन्ति। कुत्र चत्वारः पादाः। कुत्र षट् पादाः। कुत्र पादद्वयम् इत्यत्र विषयः प्रधानतया नियामकः, क्वचित्तु अगतिका गतिः।

गुर्वर्थदीधितिव्याख्यायां श्लोकसङ्ख्या न लिखिता। केवलं अध्यायान्ते अध्यायसमाप्तिः सूचिता। अतः प्रचलितेष्वेव कश्चन श्लोकक्रमोऽनुसरणीयः। अस्मिन् शोधप्रबन्धे हृषीकेशतीर्थीयपाठानुसारेण श्लोकसङ्ख्या दत्ता।

गुर्वर्थदीधितौ अधिकः श्लोकः

अयं कश्चन आश्चर्यकरो विषयः यत् गुर्वर्थदीधितिपाठानुसारेण तन्त्रसारसङ्ग्रहे एकः श्लोकः अधिकः भवति। श्रीकरमन्त्रव्याख्यानावसरे गुर्वर्थदीधित्यां अयं श्लोकः श्रीकरमन्त्रध्यानश्लोकतया पठितः -

`आदित्यचन्द्रावपि चक्रशङ्खौ शङ्खप्रसूनाख्यनिधी दधानः।
द्वाभ्यां कराभ्यां वसु तर्पयन्नःस्वाङ्कस्थलक्ष्मीः गरुडांससंस्थः ॥' (तं.सा.4-9)

प्रचलितपाठेषु मुद्रितव्याख्यानेषु वा अयं श्लोकः न पठ्यते । छलारीयटीकायां अयं श्लोकः `श्रीकरमन्त्रस्य ध्यानविशेष उक्तस्तन्त्रे' इत्यवतार्य ग्रन्थान्तरसम्बन्धित्वेन उल्लिखितः । तदेवं प्रचलितसर्वपाठानुसारेणायं श्लोकः मूलानन्तर्गतः । गुर्वर्थदीधितेः सर्वासां मातृकाणामनुसारेण मूलान्तर्गतः । कथं तर्हि निर्णयः ?

गुर्वर्थदीधितौ उपचत्वारिंशत्स्थले तन्त्रसारसङ्ग्रहस्य पाठान्तराण्युल्लिखितानि । एकस्मिन् सन्दर्भे तु बहुकोशेषु न दृश्यते इति कोषोऽप्युल्लिखितः, तदाधारेण पाठनिर्णयोऽपि कृतः । तथा हि, `रामावृत इति औत्तरीयकोशेषु पाठः ।' (तं.सा.3-46) `तत्र `समोन्नते दक्षिणत' इति पाठो बहुकोशेष्वदर्शनात् कल्पित इति प्रतिभाति ।' (तं.सा.3-46) - इति । परन्तु, प्रकृतस्य श्रीकरमन्त्रध्यानश्लोकस्य विषये तैः किमपि नोक्तमित्येतदाश्चर्यकरम् ।

गुर्वर्थदीधितिकृतां पक्षे संवादः कोऽपि स्याद्वा जिज्ञासायाः परिहारतया विद्वद्भिः सि.आर्.प्रदीपसिंहाचार्यैरपूर्वः विषयः कथितः । तेषां समीपे पितृपैतामहः हस्तलिखितग्रन्थागारोऽस्ति । तस्मिन् ग्रन्थालये तन्त्रसारसङ्ग्रहस्य हस्तलिखितपुस्तकद्वये अयं ध्यानश्लोको लिखितः - इति ।

एवं च, एतद्ध्यानश्लोकसहितः रहितश्चेति पाठद्वयसम्भावनं एव युक्तियुक्तमिति प्रतिभाति ।

ग्रन्थस्य विषयाः

भूमिकायाः प्रथमाध्याये दर्शिताः प्रायः सर्वेऽपि तन्त्रशास्त्रसम्बन्धिनः विषयाः तन्त्रसारसङ्ग्रहेऽप्युपवर्णिताः । मन्त्र-पूजा-प्रतिष्ठासम्बन्धिनो विषयाः आचतुर्थाध्यायान्तं निरूपिताश्चेत् तन्त्रविषयान्तर्गतः योगभागः चतुर्थाध्यान्ते विवृतः । ग्रन्थस्यास्य विषयाः आदौ विषयानुक्रमण्यां प्रदर्शिता इति अत्र पृथङ्न प्रदर्श्यन्ते । अन्यग्रन्थेषु विस्तरेण विवृताः प्रतिष्ठा-प्रतिमालक्षण-मन्त्रोद्धाररूपा विषया अत्र सङ्क्षिप्ततया सङ्गृहीता इति **अस्य ग्रन्थस्य वैशिष्ट्यम्** ।

0.2.2 तन्त्रसारसङ्ग्रहस्य वैशिष्ट्यम्

श्रीमध्वाचार्याणां चरितं षोडशसर्गात्मके मध्वविजयाख्ये काव्ये ग्रथितवद्भिः श्रीनारायणपण्डिताचार्यैः तत्सङ्ग्रहः प्रमेयनवमालिकाभिधाने द्वात्रिंशच्छ्लोकात्मके विहितः । तत्र अष्टाविंशे श्लोके एवमगदिषुः - `साम्नस्त्रैविक्रमार्याद् व्यरचयदनुभाष्यं शतग्रन्थ-कर्ता' - इति। अत्र शतग्रन्थकर्ता इत्युक्तमतीवाश्चर्यकरम् । एवं त एव मध्वविजये पञ्चदशे सर्गे - `नानासुभाषितस्तोत्रगाथादिकृतिसत्कृतीः ।
त्वयि रत्नाकरे रत्नश्रेणीर्वा गणयन्ति के।।" इति आचार्यैः लघु-लघुतराणां बहूनां रचनं व्यधायीति न्यगादि। श्रीमध्वाचार्यैः सप्तत्रिंशत् ग्रन्था व्यरचिषतेति प्राचीना प्रसिद्धिः। श्रीव्यासतीर्थरचितत्वेन प्रसिद्धे ग्रन्थमालिकास्तोत्रे (स्तोत्रमालिका पृ.सं. 120) सप्तत्रिंशतो गणनं कृतम् । श्रीयादवार्यैः रचिते पद्येऽपि तावतामेव गणनम् । तथा हि तत् पद्यम् -

भाष्याणां दशकं च पञ्चकयुतं तिस्रश्च निर्णीतयो
विष्णोः स्तोत्रयुगं दशप्रकरणं कल्पद्वयं च स्मृतिः ।।
श्रीकृष्णामृततन्त्रसारयमकन्यायावलीदीपनं
येनाकारि सदैव मध्वमुनिराड्द्यात् सुविद्यां मम ॥ (स्तो.मा.पृ.सं. 122)

तदनुसारेणैव दिवङ्गतैः अग्रहारनारायणतन्त्रिभिः सप्तविंशतः ग्रन्थानामेव कन्न-डानुवादः सर्वमूलकन्नडानुवादेषु व्यधायि। तदनु 1969तमवर्षे श्रीबन्नञ्जेगोविन्दा-चार्यैः सप्तशतवर्षेभ्यः कतिपयैरेव यतिभिर्विद्वद्भिश्चावलोकितः श्रीहृषीकेषतीर्थहस्त-लिखितग्रन्थकोषः प्राकाशि। तत्तदन्यप्राचीनकोषानुसारेण तैः चत्वारिंशत् ग्रन्थाः उपलभ्यन्ते इति प्रतिपादितम् । यद्यपि श्रीमध्वग्रन्थाः अधिकाः, तथापि तत्र, सप्त-त्रिंशतः ग्रन्थानां सर्वमूलमिति प्रसिद्धिः, ग्रन्थमालिकादौ तावतामेव नामोक्तेरिति स-माधानं केचिद्वदन्ति।

तद्भवतु नाम सङ्ख्या इयती तावती वा। तेषां ग्रन्थानां मध्ये तन्त्रसारसङ्ग्रहस्य स्थानं कीदृशमिति प्रकृते परिशीलयामः।

मध्वविजये तन्त्रसारसङ्ग्रहस्य प्रशस्तिः

श्रीमन्नारायणपण्डिताचार्यैः (क्रि.श. 13) मध्वविजयनामकमध्वचरितवर्णनपरकाव्ये यथाचरितं नवमे दशमे पञ्चदशे षोडशे च सर्गे मध्वरचितग्रन्थानां विवरणं दत्तम् । तत्रापि विशेषतः पञ्चदशसर्गे बहूनां परिचयः कारितः, वैशिष्ट्यं चोपवर्णितम् । तत्र तन्त्रसारसङ्ग्रहस्य विषये ते एवमभ्यधुः -

कस्तन्त्रसारं सम्प्राप्य न स्यात् पर्याप्तवाञ्छितः ।
अमरैराश्रितच्छायं कल्पद्रुममिवोत्तमम् ॥ (म.वि. 15 - 78) - इति ।

अस्यायमाशयः - लोके हि तापदग्धाः जनाः वृक्षच्छायमाशिश्रिषन्ति। लौकिका वृक्षाः छायादानेन ऊष्मतापनिवारणे एव समर्थाः। अलौकिकः स्वर्गतः कल्पद्रुमस्तु न केवलं आतपवारणे किन्तु अपूर्णकामानां कामनातापवारणेऽपि समर्थः। तमाश्रित्य स्वःस्था देवताः चिन्तादूराः सन्तः स्वापेक्षितानि लभमानाः सुस्था भवन्ति। एवमेव, महीसुरा अपि यदि तन्त्रसारसङ्ग्रहं सम्यगधीयते, अधीत्य चानुतिष्ठन्ति तर्हि तेषामपि वाञ्छाबाधा न स्यात् - इति। अत्र श्लोके `कः पर्याप्तवाञ्छितः न स्यात्' इति प्रश्नस्य सर्वोऽपि पर्याप्तवाञ्छितः स्यादित्यत्र तात्पर्यम् । काकुस्वरेण प्रश्नेन वाऽभिहिता अर्था विशेषशोभां दधति। तथा `आश्रितं देवतावृन्दै'रित्याद्यनुक्त्वा `अमरैराश्रितच्छाय'मिति छायाश्रयणकथनेन समीपगमनादिरुपमाने सश्रद्धपठनादिरुपमेये च ध्वनितः।

वाञ्छापूर्तिप्रकारः

तन्त्रसारसङ्ग्रहेण वाञ्छापूर्तिः कथं भवतीति चेत् इत्थम् । तन्त्रसारसङ्ग्रहे तन्त्रशास्त्रसम्बन्धिनः मन्त्र-पूजादयोऽभ्यधायिषत। तेषां फलमपि तत्र तत्र आचार्यैर्न्यरूपि। तथा हि -

`जपध्यानहुतार्चादीनेवं यः कुरुते सदा ।
धर्मार्थकाममोक्षाणां भाजनं स्यात्स एव हि ॥
सर्वोत्तमं हरिं ज्ञात्वा य एवं भक्तिपूर्वकम् ।
जपध्यानादिभिर्नित्यं पूजयेन्नास्य दुर्लभम् ॥'(तं.सा.1-70,71)

`प्रीयतेऽनेन मार्गेण पूजितो मुक्तिदो भवेत् ।
कामदश्च स्वभक्तानां भगवान् पुरुषोत्तमः ॥'(तं.सा.3-141)

`ध्येयो निजैश्च तनुभिः सकलैरुपेतः
कोलो हरिः सकलवाञ्छितसिद्धयेऽजः ॥'(वराहमन्त्रे तं.सा.4-5)

`त्रय एते महामन्त्राः पुरुषार्थचतुष्टये ।
कल्पवृक्षाः प्रिया विष्णोर्विशेषाज्ज्ञानदायकाः ।'(हंसमन्त्रविषये तं.सा.4-21)

एवं प्रतिमन्त्रं फलान्युक्तानि ।

एवमत्रोक्तमन्त्राणां जपेन, अत्रोक्तविधया देवालयप्रतिष्ठया पूजनेन च वैयक्तिकाः सामूहिकाश्च वाञ्छाः पूर्यन्ते इत्याशयः ।

अपरा वाञ्छा - जिज्ञासा

`इच्छा काङ्क्षा स्पृहेहा तृट् वाञ्छा लिप्सा मनोरथः ।' इति अमरकोशात् वाञ्छाशब्दः इच्छासामान्यवाची । तस्यात्र ज्ञानेच्छारूपजिज्ञासावाचकत्वाश्रयणेऽपरोप्यद्भुतोऽर्थः प्रकटीभवति । तथा हि - आचार्याणामन्ये ग्रन्था यथाशक्त्यधीता इति भावयामः । वेदोपनिषदादीनां तात्पर्यमवगतम् । स्वीयान्यपक्षयोः बलाबले च ज्ञाते । आदौ मध्ये अन्ते वा यदा कदाचित् इयं जिज्ञासा भवत्येव साधकस्य यत् अर्जितस्य ज्ञानस्य कुत्रोपयोगः ? अनेन ज्ञानेन किं प्रयोजनम् ? - इति । तस्योत्तरमस्मिन् ग्रन्थे लभ्यते । अस्य प्राक्कथनस्य प्रथमाध्याये प्रतिपादितरीत्या तन्त्रशास्त्रं हि उपयोगे आनीतं तत्त्वशास्त्रं (Applied Philosophy) भवति । यम-नियमाद्यङ्गकलापा-

नुष्ठानपूर्वकं भक्त्या श्रवण-मनन-निदिध्यासनाख्याङ्गिनामनुष्ठानेनैव प्रसन्नः भगवान् मोक्षं ददातीत्यत्र ग्रन्थे तात्पर्येणोक्तम् ।

तदेवं जिज्ञासारूपवाञ्छायाः पूर्तिरपि समग्रसाधनस्वरूपप्रतिपादकेनानेन ग्रन्थ-राजेन क्रियते इत्यस्मिन्नर्थेऽपि `कस्तन्त्रसारं सम्प्राप्य न स्यात् पर्याप्तवाञ्छितः' इति वाक्यं व्याख्यातुं शक्यते ।

योगदीपिकोक्तं महत्त्वम्

श्रीनारायणपण्डिताचार्यैः योगदीपिका नाम ग्रन्थः रचितः । नामैवास्य सूचयति यदयं ग्रन्थः भगवत्प्राप्तियोगं प्रतिपादयति इति । अस्मिन् ग्रन्थे दश पटलाः सन्ति । तत्र प्रथमपटले योगमार्गे जिगमिषुणा आबाल्ययौवनं किं किं करणीयम्, किं किम-ध्येतव्यमित्यस्य कथनावसरे तैरेवं न्यगादि -

`शनकैः श्रृणुयात्तन्त्रसारसङ्ग्रहमादरात् ॥
अनुतिष्ठेच्च तन्त्रोक्तं शास्त्रं विज्ञानदीपनम् ।

तत्रोदिताञ्जपेन्मन्त्रांस्तद्देवध्यानमाचरेत् ॥
मन्त्रसिद्धस्य तस्याऽशु परमात्मा प्रसीदति ।
ईदृशः पुरुषो योगमर्हत्येव विशेषतः ॥
तत्वदैवान्यनुग्राह्य स सुखी योगमाचरेत् ॥'(यो.दी.1-70तः 73तमश्लोकः)

एषु वचनेषु इमे विषयाः अवधेयाः -

1. तन्त्रसारसङ्ग्रहस्य अध्ययनं करणीयम् ।

2. करणीयमिति न वेगेन करणीयम् । शनकैः यथा अर्थज्ञाने सौष्ठवं स्यात् तथा करणीयम् ।

3. नायं ग्रन्थः केवलमध्ययनार्थः, पारायणमात्रार्थो वा। किन्तु अनुष्ठानार्थश्च। अतः अत्रोक्तं यथाशक्ति अनुष्ठेयम् ।

4. विशेषतः अत्रोक्तान् अष्टमहामन्त्रान्, कृष्ण-वेदव्यासादिमन्त्रांश्च आवर्तयेत् ।

5. तत्त्वमन्त्रविषयेष्वपि अवधानं कार्यम् । देहगततत्तत्तत्वसम्बन्धिरोगे सति तत्तत्तत्वदेवताः प्रसाद्य रोगान्मुक्तिः सुष्ठु साधनीया।

6. `सुखी योगमाचरेत्' इत्यन्ते यदुक्तं तन्मननीयम् । ऐहिकलोकयात्रया दुःखपूर्णयैव भाव्यमिति न नियमः। भगवद्भक्तैः दुःखमग्नैर्भूयेतेत्यपि न नियमः। देवतानुग्रहेण सुखं लब्ध्वा परमात्मप्राप्त्युपायोऽनुष्ठेय इत्यपूर्वा दृष्टिरत्र पण्डिताचार्यैः दत्ता। प्रकटीकृतं च तन्त्रसारसङ्ग्रहस्य बहुमुखं महत्त्वम् ।

मङ्गलाचरणसूचितं महत्त्वम्

श्रीमध्वाचार्यैः मङ्गलश्लोके ग्रन्थप्रतिपाद्यार्थकथनसूचनप्रणाली अनुसृता वर्तते । यथा विष्णुतत्वविनिर्णयस्यादौ

सदागमैकविज्ञेयं समतीतक्षराक्षरम् ।
नारायणं सदा वन्दे निर्दोषाशेषसद्गुणम् ॥ इति मङ्गलमाचर्य
विशेषणानि यानीह कथितानि सदुक्तिभिः ।
साधयिष्यामि तान्येव क्रमात् सज्जनसंविदे ॥ इत्युकतम् ।
तामिमां सूचनामनुसृत्य श्रीजयतीर्थैः अन्यत्रापि तथा व्याख्यातम् । प्रकृते
`जयत्यब्जभवेशेन्द्रवन्दितः कमलापतिः ।
अनन्तविभवानन्दशक्तिज्ञानादिसद्गुणः ॥' - इति मङ्गलम् ।

अत्र नारायणस्य वन्दनं कृतम् । स च नारायणः कमलापतिरिति लक्ष्मीपतित्वेन उल्लिखितः। तस्य अब्जभवेशेन्द्रवन्दितत्वं अनन्तविभवानन्दशक्तिज्ञानादिसद्गुणयुक्तत्वं

चेति विशेषणद्वयमदायि। ब्रह्मरुद्रेन्द्रादयो देवताः नारायणं वन्दन्ते, उपलक्षणतया ध्ययन्ति पूजयन्ति चेति प्रथमविशेषणस्यार्थः। वन्दनं हि पूजाया अन्ते भवतीति वन्दनेन ध्यानपूजादीनां ग्रहणम् । स नारायणः कुतः वन्द्यत इति प्रश्नस्योत्तरतया द्वितीयं विशेषणमुपादायि। भगवति नारायणे अन्तरहिताः विभवानन्दशक्तिज्ञानादयो सद्गुणा वर्तन्ते इति द्वितीयविशेषणस्यार्थः। तत्र आद्याध्यायत्रये यत् भगवतः नानाधिष्ठानेषु साङ्गा पूजा विवृता सा ब्रह्मादिपूजितत्वरूपप्रथमविशेषणेन कथिता। प्रथमाध्याये चतुर्थाध्याये च ये मन्त्रा उक्ताः, यच्च तेषां मन्त्राणां ध्येयदेवतास्वरूपमुक्तं, यदपि तत्रतत्र ध्यानादिना प्रसन्नस्य भक्तेष्टदातृत्वमन्ततो मुक्तिप्रदातृत्वमुपवर्णितं तेषां सर्वेषां सङ्ग्रहः अनन्तविभवानन्दशक्तिज्ञानादिसद्गुणत्वविशेषणेन कृतः।

`तं यथा यथोपासते तथैव भवति' इति प्रसिद्ध्या, तदेतादृशस्य भगवतः उपासकोऽपि विविधान् गुणानाप्नोति, तत्र चेयमितिकर्तव्यता इति श्रवणादि-यमादिरूपः योगमार्गः चतुर्थाध्यायान्ते (4-132) प्रादर्शि।

तदेवं ग्रन्थविषयः श्रीमध्वाचार्यैः मङ्गलपद्ये सुष्ठु ग्रथितः।

तन्त्रसारसङ्ग्रहोक्तः तन्त्रसारसङ्ग्रहमहिमा

रोचनार्थं फलश्रुतिः[1] इति वचनेन श्रोतृणां श्रवणानुष्ठानादौ प्रवृत्त्यर्थं फलकथनं प्रमुखं साधनम् । अनया दृष्ट्या परिशील्यमाने तन्त्रसारसङ्ग्रहे श्रीमध्वाचार्यैः कण्ठतः अस्य ग्रन्थस्य महत्ता कथिता। तथा हि -

`यावतो ह्यननुष्ठाने कर्मपूर्तिर्न विद्यते।
तावत् समस्तं कथितमस्मिंस्तन्त्रे यथाविधि ॥
प्रीयतेऽनेन मार्गेण पूजितो मुक्तिदो भवेत् ।
कामदश्च स्वभक्तानां भगवान् पुरुषोत्तमः ॥'(तं.सा.3-140,141)

---

1 भा.11-3-47

`ग्रन्थोऽयं पाठमात्रेण सकलाभीष्टसिद्धिदः ।
किमु ज्ञानादनुष्ठानादुभयस्मात् पुनः किमु ॥'(तं.सा.4-159)

एवं च, सुगमः सफलः अवश्यकर्तव्यश्च विषयोऽत्र प्रतिपादितः । यस्य कस्यापि ग्रन्थस्य, तत्रापि तन्त्रशास्त्रसम्बन्धिग्रन्थस्येतो किमन्यद्वैशिष्ट्यं भवितुमर्हति ।

यस्य पठनं पारायणमपि महाफलदं किमधिकं वक्तव्यं तस्य विषये ।

0.3 तन्त्रसारसङ्ग्रहस्य इतरव्याख्यानानि

पूर्वं वर्णितदिशा तन्त्रसारसङ्ग्रहस्य यादृशं महत्त्वमस्ति तेन तस्य बहुव्याख्यानसहितत्वं सम्भावितमेव । प्रो.व्यासनकेरे प्रभञ्जनाचार्यैः छलारीयव्याख्यासम्पादनावसरे भूमिकायां तन्त्रसारसङ्ग्रहस्य चतुर्विंशतिव्याख्यानानि माध्वपरम्परायां व्यरचिषतेति निरूपितमस्ति (पु.सं.13) । तानि च तैरेवं प्रदर्शितानि -

1. व्यासतीर्थकृतटीका
2. वादिराजतीर्थकृतटीका
3. वेदवेद्यतीर्थकृतटीका
4. छलारिनरसिंहाचार्यकृता
5. छलारिशेषाचार्यकृततन्त्रसारार्थसङ्ग्रहः
6. बिदरहळ्ळी वेङ्कटपत्याचार्यकृतटीका - गुर्वर्थदीधितिः [प्रकृतः ग्रन्थः ।]
7. तात्पर्यनिर्णयटिप्पणिकर्तृजनार्दनभट्टपुत्रवेदव्यासाचार्यकृतटीका - पदभावप्रबोधिनी
8. विद्याधीशतीर्थशिष्यनृसिंहभिक्षुकृतटीका

9. ताम्रपर्णिआनन्दतीर्थाचार्यकृतटीका - तन्त्ररत्नप्रकाशिका

10. ताम्रपर्णिश्रीनिवासाचार्यकृतटीका तन्त्ररत्नावली

11. बिदरहळ्ळिश्रीनिवासतीर्थकृतटीका

12. श्रीरघुनाथतीर्थ(शेषचन्द्रिकाचार्य)कृतटीका - तत्वकणिका

13. छलारिरामदासाचार्यकृतटीका तन्त्रसारसङ्ग्रहभावार्थचन्द्रिका

14. वासुदेवाचार्यशिष्यआनन्दाचार्यपुत्रअनन्ताचार्यसुतवेङ्कटनरसिंहाचार्यकृतटीका तन्त्रसारार्थविवृतिः

15. वसुधेन्द्रतीर्थकृतटीका

16. मङ्कालिधर्माचार्यकृतटीका

17. श्रीसत्यप्रियतीर्थशिष्ययाडिकीनरसिंहाचार्यकृतटीका

18. रोट्टिवेङ्कटाद्रिकृतटीका

19. पूर्णबोधाचार्यशिष्यवासुदेवकृतटीका - तन्त्रसारार्थचन्द्रिका

20. श्रीमुष्णं सुब्बरायाचार्यकृतटीका

21. जनार्दनभट्टसुततम्मणाचार्यकृतटीका - तन्त्रसारभावबोधिनी

22. गङ्गोदकमिश्रकृतटीका

23. वेदवेद्यतीर्थशिष्यकृतटीका

24. तन्त्रसारसङ्ग्रहविवृतिः - गूढकर्तृका

तत्र 1, 3, 6, 7, 8, 9, 10, 13, 14, 16, 17, 19, 20, 22, 23, 24 तमपुस्तकानि जयतीर्थहस्तलिखितग्रन्थालये सन्ति, पञ्चमं द्वादशं च मुद्रितं, द्वितीय-चतुर्थ-एकादशानि नोपलभ्यन्ते इत्यपि तैर्न्यगादि (पृ.सं. 13 अधष्टिप्पणिः)। तत्र त्रयोविंशपञ्चदशे टीकेऽपि तदनु प्रकाशिते स्तः, ययोः विषये अग्रे विवरिष्यते। एवं च, अद्यत्वे आहत्य चत्वारि संस्कृतव्याख्यानानि प्राकाश्यं नीतानि। तान्यत्र भागे यथाशक्ति परिचाय्यन्ते।

श्रीवसुधेन्द्रतीर्थकृतं व्याख्यानम्

श्रीवसुधेन्द्रतीर्थाः श्रीमन्मध्वाचार्याणां परम्परायां अष्टादशे शतके (क्रि.श. - 1761 पर्यन्तम्) वेदान्तपीठे व्यराजन्त। एतैः चतुःपञ्चाः एवा ग्रन्था व्यरच्यन्तं येषु तन्त्रसारसङ्ग्रहस्य व्याख्यानमन्यतमं प्रमुखं च। इदं व्याख्यानं मन्त्रालयस्थश्रीगुरुसार्वभौमसंस्कृतविद्यापीठेन 1995 तमे संवत्सरे प्राकाशि। गात्रेणेदं व्याख्यानं अन्यल्पम्। तन्त्रसारसङ्ग्रहः 400 ग्रन्थात्मकश्चेत् इदं व्याख्यानं 160 ग्रन्थात्मकम्। तथाप्यस्यास्ति महत्त्वम्। व्याख्याकृतः श्रीपादाः ग्रन्थादौ प्रतिजानन्तः एवं न्यगदिषुः -

श्रीमद्वादीन्द्रतीर्थानां गुरूणां करुणाबलात्।
तन्त्रसारस्य दिङ्मात्रं दर्शयामो यथासुखम्॥ - इति।

अत्र दिङ्मात्रं दर्शयामः इति स्वयं तैः ग्रन्थाल्पता प्रकटीकृता। तर्हि कुतोऽस्य निर्माणमिति जिज्ञासा सम्पादकैः श्रीसाणूरुभीमभट्टप्रभृतिभिः ग्रन्थवैदुष्यं निरूपयद्भिः प्राक्कथने एवं पर्यहार्षि (पृ.सं.8) - 'धटजनुषा चोलिरकारि सिन्धुरिति प्रसिद्धाख्यायिकानुसारेणैभिः बह्वर्थगर्भितस्य तन्त्रसारस्य वैशिष्ट्यं तत्र तत्र सङ्क्षेपेण प्रदर्शितम्। यथा (1) तत्तदध्यायसारांशः अध्यायादौ सङ्ग्रहेण न्यरूपि। (2) शाखाभेदेन पुरुषसूक्तछन्दःप्रदर्शनं कृतम्। (3) देवमनुष्यभेदेन दिग्भेदनिरूपणं कृतम्। (4) यद्यपीदं व्याख्यानं तत्रतत्र केषाञ्चिच्छब्दानामर्थमात्रं बोधयति, तथापि तत्रतत्रायमभिप्रायः, इदं तात्पर्यम्, अयमर्थः इत्येवंरूपेण समग्रप्रघट्टकस्य निष्कृष्टमर्थं वाचकानां

मनःपटले प्रतिबिम्बयति। (5) अपरमिदमेकं वैशिष्ट्यम्, अवशिष्टं तन्त्रान्तरे द्रष्टव्यम्, अवशिष्टं विस्तरग्रन्थे द्रष्टव्यमित्येवंरूपेण पठितृणां तन्त्रान्तरग्रन्थावलोकनकुतूहलमुपजनयति। (6) देवतानां न्यासानुसन्धानरहस्यमपि उल्लिखितम् । (7) दधिवामनमन्त्रनिरूपणावसरे उपलब्धव्याख्यानेषु द्वावेव मन्त्रावुदाहृतौ। अत्र तु "अमृतात्मने नमः" इति तृतीयोऽपि मन्त्रः समासूचितः इत्यपि विशेषः।' - इति।

अद्योपलभ्यमानेषु मुद्रितेषु व्याख्यानेषु इदमर्वाचीनतमम् । एतस्मात् प्राचीनायां गुर्वर्थदीधित्यामस्योल्लेखोऽसम्भवी।

श्री वेदवेद्यतीर्थशिष्यकृता श्रीतन्त्रसारविवृतिः

माध्वपरम्परायां श्रीवादिराजतीर्थानां स्थानमसाधारणम् । तेषां कालः क्रि.श.1480तः 1600पर्यन्तम् । तेषां शिष्याः श्रीवेदवेद्यतीर्थाः। तेषां वन्दनपुरःसरम् इयं व्याख्या प्रवर्तते। तथा हि द्वितीयपद्यम् -

आनन्दतीर्थमुनिमादरतः प्रणम्य श्रीवादिराजयतिमन्वथ वेदवेद्यम् ।
सत्सम्प्रदायमविहाय विचार्य शास्त्रं सत्तन्त्रसारविवृतिं सरलां लिखामि ॥ - इति।

इयं व्याख्या अन्यूनानतिरिक्ता। प्रायः 500ग्रन्थात्मिका। इयं बेङ्गळूरुनगरस्थेन शम्याप्रासप्रकाशनेन विद्वद्भिः सि.आर्. प्रदीपसिंहाचार्यैः संशोध्य क्रि.श. 2000तमे संवत्सरे प्रकाशिता। अस्याः वैशिष्ट्यं संशोधकैः प्राक्कथने एवमभ्यधायि। `इयं श्रीतन्त्रसारविवृतिः बालसुबोधा अन्वर्था। मातृकाप्रतिपाद्यदेवताविवरणावसरे प्रचलितयोः ऋघलृजि शब्दयोः स्थाने ऋद्ध-लृजिर शब्दयोः उल्लेखः, केशवादिचतुर्विंशतिमूर्तीनां लक्षणस्य प्रचलितात् भिन्नरीत्या सङ्ग्रहः, तत्वन्यासे गृहस्थानामपि स्थितिन्यासोऽस्तीति प्रतिपादनम्, षड्विधसरस्वतीभारतीमन्त्रोद्धारः, नैकत्र भिन्नभिन्नसम्प्रदायानामुल्लेखः - एते अस्याः व्याख्यायाः विशेषांशाः' - इति।

एतस्याः लेखकाः गुर्वर्थदीधितिकाराश्च प्रायः समकालीनाः। तयोः वासस्थलेऽपि न निकटे। अतः गुर्वर्थदीधितिकृद्भिः इयं व्याख्या न दृष्टेति सम्भाव्यते। अस्याः विषयाः गुर्वर्थदीधितौ नानूदिताः।

छलारीशेषाचार्यप्रणीतः तन्त्रसारार्थसङ्ग्रहः

अद्य प्रचलितासु तन्त्रसारसङ्ग्रहस्य टीकासु तन्त्रसारार्थसङ्ग्रहाख्या छलारीशेषाचार्यप्रणीता टीका अग्रेसरा। छलारीत्युपाह्वानां शेषाचार्याणां कालः क्रि.श.1670तः अनन्तरम्। एतैः यद्यपि विंशत्यधिकाः ग्रन्थाः विरचिताः[1]। तत्र मन्दोपकारिणीनाम्नी सुमध्वविजयव्याख्या अन्वर्था सती अध्येतृभिरध्यापकैश्च पौनःपुन्येनोपादीयते। द्वितीया तन्त्रसारटीकाऽपि योगेन मन्दोपकारिणी एवास्ति। छलारीया टीका गुर्वर्थदीधितेः अर्वाचीना।

श्रीरघुनाथयतिविरचिता तत्त्वकणिका

माध्वपरम्परायां श्रीव्यासतीर्थानां अनन्यादृशं स्थानमस्ति।
श्रीमध्वः कल्पवृक्षस्तु जयार्यः कामधुक् स्मृतः।
चिन्तामणिस्तु व्यासार्यः मुनित्रयमुदाहृतम् ॥

- इति श्रीमुष्माहात्म्ये पठ्यमानः श्लोकः तेषां कीर्तिं स्थानं सम्माननं च स्फुटयति। एतैः `दशमो मत्समो भवेत्' इति भाविशिष्यविषये उद्घुष्टमित्यैतिह्यम्। श्रीव्यासतीर्थेभ्यः अनु शिष्यप्रशिष्यपरम्परया दशत्वसङ्ख्यां पूरयन्तः श्रीरघुनाथतीर्थाः (क्रि.श. 1700-1755) वेदान्तसाम्राज्ये अभिषिक्ताः। एकस्मिन् जन्मनि एकं शास्त्रमिति प्रथायाः एते अपवादाः। यतो ह्येतैः सूत्रप्रस्थाने, विमर्शनशैल्या काठिन्येन चान्ते अधीयमानायाः श्रीव्यासतीर्थविरचितायाः तात्पर्यचन्द्रिकायाः अवशिष्टः अध्यायद्वया-

1 छ.टी.पृ.सं. 40

त्मको भागः पूरितः । स च ग्रन्थः शेषतात्पर्यचन्द्रिका इति आख्यायते[1] । यथा तर्क-कर्कशत्वेन शेषतात्पर्यचन्द्रिका मेरुप्राया तथा तन्त्रसारसङ्ग्रहस्य तैः विरचिता तत्वकणिकाख्या टीका, बृहतीसहस्रव्याख्यापि स्वीये वाङ्मयभागे मेरुप्राये स्तः । एक एव पुरुषः विभिन्नेषु क्षेत्रेषु समानमहत्त्व-गाम्भीर्य-विद्वत्ता-उपयुक्तता-अपूर्वतादियुतान् ग्रन्थान् कथं निबध्नीयादिति विस्मयावहोऽयं वृत्तान्तः ।

अद्यपर्यन्तं मुद्रितासु तन्त्रसारसङ्ग्रहव्याख्यासु तत्त्वकणिका विस्तृततमा गभीरतमा च । व्यासराजमठेन मुद्रिता । इयं व्याख्या गुर्वर्थदीधितेः अर्वाचीना । श्रीरघुनाथतीर्थानां कालः क्रि.श. 1700तः 1755 । श्रीवेंकटपत्याचार्याणां तु प्रायः क्रि.श. 1616तः प्रारभते । अतः इयं व्याख्या गुर्वर्थदीधितौ नोल्लिखिता ।

श्रीश्रीनिवासाचार्यकृतः गूढार्थसङ्ग्रहः

इयं व्याख्या क्रि.श. 2003 तमे वत्सरे मैसूरुनागरस्थ प्राच्यविद्यासंशोधनालयेन प्राकाशिता । सम्पादकाः श्री ए.वि. नागसम्पिगे महोदयाः भूमिकायाम् एवं वदन्ति - `एतद्ग्रन्थकाराः प्रसिद्धे ताम्रपर्णीवंशे जनिमलभन्तेति ऊह्यते । यतो हि, एते आद्यन्तयोः श्रीविठ्ठलाचार्यान् पितृत्वेन वन्दन्ते । श्रीविठ्ठलाचार्याणां प्रथमे सुताः श्रीआनन्दतीर्थाचार्या सत्तत्वरत्नमालाख्यां माध्ववाङ्मये बहुमान्यां कृतिं व्यररचन्' इति । एते श्री आनन्दतीर्थाचार्या क्रि.श. 1706तः 1726तमवत्सरपर्यन्तमलंकृतश्रीमदुत्तरादिमठपीठानां श्रीसत्यपूर्णतीर्थानां समकालीनाः इति साधारं सत्तत्वरत्नमालायाः सम्पादकाः श्रीरमाकान्त जोशीमहोदयाः निरूपयन्ति[2]। ततोऽपि प्राचीनाः स्युरिति डा.व्यासनकेरे प्रभञ्जनाचार्याः । इयमपि व्याख्या गुर्वर्थदीधितेः अर्वाचीना । गात्रेण इयमपि अल्पा ।

परन्तु, अस्य सम्पादकाः श्रीनागसम्पिगे महाभागाः पुस्तकस्यान्ते तन्त्रसारस-

1 अस्य ग्रन्थस्य ऐदम्प्राथम्येन मुद्रणं बेङ्गळूरुनगरस्थेन पूर्णप्रज्ञसंशोधनमन्दिरेण विहितम् ।

2 स.र.मा.भूमिका पृ.सं.7

ङ्ग्रहसम्बन्धीनि दश चित्राणि प्रदर्शितवन्तः सन्ति। तानीमानि जिज्ञासूनां महते उपकाराय कल्पन्ते। तत्रापि, अतिक्लिष्टानि प्रतिमापरिमाणानि नैकेषु चित्रेषु यत् प्रदर्शितानि तदर्थं सम्पादका नितान्तमभिनन्दनार्हाः।

अर्वाचीनापीयं व्याख्या तत्रतत्र गुर्वर्थदीधित्या सह परिशीलिता। बहुषु स्थलेषु गुर्वर्थदीधितेः वाक्यानि अस्यां व्याख्यायां गोचरीकृतानि। गूढार्थसङ्ग्रहस्य गुर्वर्थदीधितिरुपजीव्या इति निर्णयाय पर्याप्तानि समानवाक्यानि गूढार्थसङ्ग्रहे समुपलभ्यन्ते। अयं विषयः अग्रे इतरव्याख्याभिः गुर्वर्थदीधितेः तुलना इति भागे सोदाहरणं विवरिष्यते।

तन्त्रसारसङ्ग्रहस्य कर्णाटकभाषानुवादाः

- श्री अग्रहार नारायणतन्त्रिणामनुवादः - 1963, उडुपी.
- श्रीबन्नञ्जे गोविन्दाचार्याणामनुवादः - 1956, पावञ्जे गुरुराव् एण्ड् सन्स्, उडुपी. द्वितीयमुद्रणं 1996, हृषीकेशप्रकाशनम्, पलिमारुमठः, उडुपी.
- श्री अद्यपाडि हरिदासभट्टानामनुवादः - 1998, अखिलभारतमाध्वमहामण्डलम्, बेंगळूरु.
- श्री विश्वनन्दनदीर्थाः - पद्यानुवादः, 2006, शम्याप्रासप्रकाशनम्, बेंगळूरु. एतैः तन्त्रसारसङ्ग्रहस्य संस्कृतगद्यानुवादोऽपि रचितः।

0.4 गुर्वर्थदीधितिकाराः श्री वेङ्कटपत्याचार्याः

प्रकृते प्रकाशनाय या गुर्वर्थदीधितिनाम्नी व्याख्या स्वीकृता अस्याः रचयितारः श्रीवंशपल्लीवेङ्कटपत्याचार्याः। एते कर्णाटकराज्यस्य धारवाडजनपदे बिदरहळ्ळीग्रामे तदनु तुङ्गानदीतीरस्थे होन्नाळीग्रामे अन्ते रट्टीहळ्ळिग्रामे च कृतनिवासा आसन्।

एषां पितृपादाः श्रीवंशपल्लीश्रीनिवासतीर्थाः माध्वव्याख्यातृपरम्परायां विशेषतः सम्मान्याः सन्ति। अष्टचत्वारिंशत् ग्रन्थाः येष्वधिकाः टिप्पणिग्रन्थाः, एतैः रचिताः।

पितृचरणक्षुण्णपथानुवर्तिनः श्रीवेङ्कटपत्याचार्याः अपि अत्युपयुक्तां व्याख्यां रचितवन्तः सन्ति।

अथात्र गुर्वर्थदीधित्याः कर्तृणां विषये किञ्चिन्निवेद्यते। ग्रन्थ-तत्कर्त्रोरन्यतरमाहात्म्यपरिचयेनान्यस्य माहात्म्यं विशदीभवति। यथा रामायणरसपुष्टतापरिचयेन महर्षिवाल्मीकेः कविहृदयता, एवं व्याधजीवनात्पराङ्मुखता, क्रौञ्चद्वन्द्ववियोगोत्थशोकस्य श्लोकत्वेन परिणतिरित्यादिनः वाल्मीकिचरित्रस्य परिज्ञानं रामायणस्यावगमने कञ्चन विशेषमादधाति। तत्रापि कस्यचन पुरुषस्य परिचयः तद्वंशस्य वंश्यीयानां च संस्तवेन स्फुटतरो भवति। तद्दृष्ट्याऽत्र गुर्वर्थदीधितेः कर्तृणां वंशं, तेषां पितृपादांश्चाधिकृत्यादौ विवृत्य पश्चात् तेषां परिचयः कार्यते।

0.4.1 श्रीरघूत्तमतीर्थाः

श्रीरघूत्तमतीर्थानारभ्य श्रीवेङ्कटपत्याचार्याणां चरित्रमारम्भणीयम्। एते महानुभावाः माध्वपरम्परायाः उत्तरादिमठे क्रि.श.1557तः 1595पर्यन्तं संस्थानाधिपत्यमवहन्। यद्यप्येतेषां नाम गुर्वर्थदीधितौ नोल्लेखितम्। तथापि श्रीवेङ्कटपत्याचार्यपर्यन्ता या टिप्पणिकारसन्ततिरनुससार तस्या इमे श्रीपादाः स्रोतस्यन्ते। यावदेतेषां विषये वक्तव्यं तावदिदं पद्यं चुलुकीकृत्य वदति -

भावबोधकृतं वन्दे रघूत्तममहागुरुम्।
यच्छिष्यशिष्यशिष्याद्याः टिप्पण्याचार्यसंज्ञिताः॥ - इति।

इयमेषा श्रीवेङ्कटपत्याचार्यपर्यन्ता शिष्यपरम्परा -

श्रीरघूत्तमतीर्थाः - श्रीवेदेशतीर्थाः - श्रीयदुपत्याचार्याः (श्रीयादवार्याः इत्यपि कथ्यन्ते)

- श्रीवंशपल्ली श्रीनिवासतीर्थाः (श्रीयादवार्याणां दशाधिकटिप्पणिकर्तृशिष्येषु अन्यतमाः)

- श्रीवेङ्कटपत्याचार्याः (प्रकृतायाः गुर्वर्थदीधिते रचयितारः)

उपरिदर्शितरीत्या श्रीवेङ्कटपत्याचार्यघटितपरम्परायाः श्रीरघूत्तमतीर्थाः मूलं भवन्ति।

0.4.2 श्रीवेदेशतीर्थाः (क्रि.श.1570-1620)

गुर्वर्थदीधितौ श्रीवेदेशानधिकृत्य मङ्गले एवमुक्तमस्ति -

`वेदेशस्वामिपादानां भजतामिष्टदौ सताम् ।
तच्छात्रशिष्यदासोऽहं चरणावाश्रयेऽन्वहम् ॥' - इति।

अनेन एते श्रीवेङ्कटपत्याचार्याणां परमगुरूणां गुरवः इति ज्ञायते। श्रीश्रीनिवासतीर्थैः स्वीये ग्रन्थे एवमुक्तम् -

`वेदेशतीर्थीयसुपादभक्तश्रीयादवाचार्यगुरूपदिष्टः ।
अर्थो निबद्धोऽत्र विचार्य सद्भिरार्यैरुपेक्ष्यो न भवेदतोऽलम् ॥' (श्रीनिवासतीर्थीया तैत्तरीयविवृतिः ।)

अनेनापि एतेषां स्थानं कीदृशमिति ज्ञायते। श्रीवेदेशतीर्थाः तथा अग्रे परिचाययिष्यमाणाः श्रीयादवार्याः तथा श्रीनिवासतीर्थानां पितृपादाः श्रीकृष्णप्पनायकाश्च सहोदराः। तदेवं श्रीवेदेशतीर्थानां श्रीवेङ्कटपत्याचार्याणां च रक्तसम्बन्धोऽप्यस्ति। विद्यासम्बन्धोऽप्यस्ति। रक्तसम्बन्धः विद्यासम्बन्धस्य कारणं जातः ! श्रीवेदेशतीर्थानामुपरि श्रीयादवार्यादिशिष्याणां भक्तिः अत्यन्तं स्तुत्या। स्वशिष्याणामुपरि श्रीवेदेशतीर्थानां वात्सल्यमपि स्तुत्यतरम् । यतो हि एकत्र स्थित्वा साङ्गम् अनुजान् श्रीयादवार्यान् अध्यापयितुमेतैः सञ्चारादिकमत्याजि इति श्रूयते। अनेनैतेषां तत्वज्ञाननिष्ठत्वं सम्यक् ज्ञायते।

0.4.3 श्रीयादवार्याः (क्रि.श.1580-1630)

श्रीवेङ्कटपत्याचार्यैः आदौ मङ्गलाचरणे श्रीयादवार्यानधिकृत्य एवमुक्तम् -

`यत्पादस्मृतिमात्रेण पाण्डित्यं प्राप्यते नरैः ।

तान्वन्दे यादवाचार्यानस्मद्विद्यागुरोर्गुरून् ॥' तथा ग्रन्थान्तेऽपि एवमुक्तम् -

`श्रीयादवाचार्यसुपादशिष्यश्रीश्रीनिवासार्यगुरूपदिष्टः ।

अर्थो निबद्धोऽत्र विचार्य सद्भिरार्यैरुपेक्ष्यो न भवेदतोऽयम् ॥'

श्रीश्रीनिवासतीर्था अपि परमया भक्त्या एतान् स्तुवन्ति । तथा हि -

`यादवार्यगुरुशिक्षित अर्थः सम्प्रदायमविहाय निबद्धः ।

स तु सुशिक्षितबुद्धिमतामलं प्रवचनाय भवेदुपकारकः ॥' (श्रीनिवासतीर्थीया ऋग्भाष्यटीकाटिप्पणिः ।)

तदेवं श्रीयादवार्याः पितापुत्रयोः न केवलं गुरुपरमगुरुस्थानीयाः किन्तु स्वीयतत्वज्ञानगङ्गायाः गङ्गोत्र्यायमानाः । श्रीयादवार्याणां विद्वत्ता, अध्ययनव्याप्तिः, तपः, भागवतज्ञत्वं, भागवतधर्मनिष्ठत्वं, सम्प्रदायप्रवर्तकत्वं तथा शिष्यवात्सल्यं च तेषाम् एतादृशमतिगौरवपूर्णं स्थानमदापयत् । माध्वपरम्परायामेव एतेषां स्थानं चरित्रं च विशिष्टस्थानं भजते ।

0.4.4 श्रीश्रीनिवासतीर्थाः - श्रीवेङ्कटपत्याचार्याणां पितृपादाः (क्रि.श.1590-1674)

वैष्णववाङ्मयेतिहासस्य प्रधानग्रन्थकर्तृषु श्रीश्रीनिवासतीर्थानां स्थानमनुपमम् । अद्यत्वे यत् प्रमाणपद्धत्यादिः दशप्रकरणमध्यमः तत्वप्रकाशिखा-न्यायामृत-न्यायसुधान्तो ग्रन्थजातः द्वैतवेदान्तविद्यार्थिना अधीयते तत्र सर्वस्यापि ग्रन्थस्य एतद्विरचितटिप्पणिः अवश्यं पठ्यते इत्येतत् तेषां टिप्पणीनां महत्त्वं तेषां तत्वज्ञानसंरक्षणबद्धदीक्षत्वं च स्फुटयति । आरम्भिकाः अभ्यासवः टिप्पणिषु यदि श्रीनिवासतीर्थीया भवति तर्हि तामेव प्रथममाद्रियन्ते इत्यनेन तत्कृतटिप्पणीनां सारल्यं विशदत्वं च

व्यज्यते। अद्य यावत् द्वैतवेदान्तस्य महोन्नतग्रन्थस्य द्वैताद्वैतवेदान्त-कर्कशतर्क-जटिलमीमांसा-सङ्कीर्णव्याकरणरूपतन्त्रचतुष्टयात्मकस्य न्यायामृतस्य अध्ययने एतेषां प्रकाशाख्या टिप्पणिरेव उपजीव्या। एताः व्याख्याः अध्येतृणामध्यापकानां च महान्तमुपकारं तन्वन्त्यः नित्यस्मरणीयाः सन्ति। विद्यावारिधिशोधकार्यार्थं को ग्रन्थः स्वीकृतः ? इति पृष्टः अहं यदा `श्रीनिवासतीर्थानां तनूजैः विरचिता व्याख्या' इति प्रत्यवदं तदा बहुभिः `श्रीनिवासतीर्थतनूजानां चेत् नूनमपूर्वमुपयुक्तं च स्यात्' इति प्रतिक्रिया दत्ता। अनेन शास्त्रवित्सु श्रीनिवासतीर्थानां कियत् सम्मानमस्तीति अनुभवितुं शक्यम् ।

एतैराहत्य अष्टचत्वारिंशद्ग्रन्था विरचिता इति श्रीश्रीनिवासतीर्थकृतिमञ्जर्यभिधे परिचायकग्रन्थे डा.व्यासनकेरे प्रभञ्जनाचार्याः सविवरं वदन्ति। न केवलं ग्रन्थसङ्ख्या, न वा केवलं वेद-उपनिषत् -पुराण-धर्मशास्त्र-तन्त्रशास्त्र-स्तोत्र-प्रकरण-टिप्पणि-सङ्ग्रहादिवाङ्मयप्रकारेषु एभिर्ग्रन्था विरचिता इत्येतदाश्चर्यकरम्, किन्तु, ग्रन्थोद्देश्यमपि आश्चर्यकरम् । एतेषां तत्वोद्योतटीकाटिप्पणिः प्रमाणपद्धतिटिप्पणिश्च श्रीवेदेशीयटिप्पण्याः शेषपूरिका अस्ति। एवं एतेषां न्यायसुधाटिप्पणिरपि श्रीयादवार्याणां टिप्पणेः पूरिका अस्ति। अत एतास्तिस्रः टिप्पण्यः `त्यक्तश्रीनिवासतीर्थीया' इत्येव प्रथन्ते। विद्यार्थिभिर्विद्वद्भिश्च मान्यानामेषां स्थानम् एतेषां प्रभावश्च माध्वपरम्परायामनन्यादृशम् ।

एतद्वंश्यीयाः श्रीबिदिरहळ्ळि कृष्णाचार्याः एवमवादिषुः - श्रीमन्मध्वाचार्याणां सप्तत्रिंशतः ग्रन्थानां तथा श्रीजयतीर्थानां समग्रग्रन्थानां व्याख्याः श्रीरघूत्तमतीर्थैः तथा तच्छिष्यैः श्रीवेदेशतीर्थ-श्रीयादवार्य-श्रीश्रीनिवासतीर्थैः पूरिता। तत्रोर्वरितं तन्त्रसारसङ्ग्रहस्य व्याख्यानं श्रीवेङ्कटपत्याचार्याः अपूरयन् - इति।

अग्रे विवरिष्यमाणरीत्या श्रीश्रीनिवासतीर्थेषु श्रीवेङ्कटपत्याचार्याणां भक्तिरपारा। तेन तेषां प्रभावोऽपि महान् स्यादेव। `आत्मा वै पुत्रनामासि' इति आर्षोक्तिदिशा पुत्रः

पितुरंशः भवति। श्रीवेङ्कटपत्याचार्याणां ग्रन्थावलोकनेन इयमुक्तिः अनयोः पितापुत्रयोर्विषये अत्यन्तमन्वर्था इति वक्तुं शक्यम् ।

0.4.5 श्रीवेङ्कटपत्याचार्याः

अथेदानीं श्रीमध्वाचार्यविरचिततन्त्रसारसङ्ग्रहस्य गुर्वर्थदीधितिनाम्न्याः टीकायाः रचयितृणां श्रीवंशपल्ली वेङ्कटपत्याचार्याणां विषये यथासङ्ग्रहं ग्रथ्यते ।

आकराः

एतेषां चरित्रविषये पृथक् कोऽपि ग्रन्थः रचितो न दृष्टः। एतेषां पितृपादानां श्रीश्रीनिवासतीर्थानां चरित्रनिरूपणपरेषु ग्रन्थेषु एतेषामप्युल्लेखः बहुत्र विहितो दृश्यते। स्वयमेतैः स्वग्रन्थे स्वगुरुपरम्परा उट्टङ्किता, तावदेव। परन्तु, आश्चर्यजनकोऽयं विचारः यत् एतद्वंश्यीयाः अद्य यावदेतेषां स्मरन्ति। न केवलं नाम, किन्त्वेतत्सम्बन्धिचरित्रमपि स्मरन्ति। मया दृष्टेषु सम्भाषितेषु च तद्वंश्यीयेषु उपनवतिवर्षीयाः होन्नाळिग्रामवास्तव्याः श्रीश्रीनिवासाचार्याः, तत्पुत्राः श्रीकृष्णाचार्याः, रट्टिहळ्ळिग्रामौकसः श्रीराघवेन्द्राचार्याः तथा धारवाडनगरकृतनिवासाः श्रीसुब्बण्णाचार्याश्च प्रमुखाः। एभ्य आकरेभ्यः सङ्गृहीता विषया अत्र प्रस्तोष्यन्ते ।

देशः

श्रीवेङ्कटपत्याचार्याणां पितृपादाः श्रीश्रीनिवासतीर्थाः कर्णाटकराज्यस्य धारवाडजनपदस्य बिदरहळ्ळिनामकग्रामे उपसप्ततिवर्षपर्यन्तमवात्सुः। ते क्रि.श.1590तः 1674वर्षपर्यन्तं यदजीवन् तत्र अन्तिमेष्वष्टसु संवत्सरेषु कर्णाटकानां शिवमोग्गजनपदस्य होन्नाळिनामकग्रामे न्यवसन्, तत्पूर्वं त्रिचतुरवत्सरेषु हरिहराख्ये नगरे चावर्तन्त इति तच्चरित्रे श्रूयते। अतः श्रीवेङ्कटपत्याचार्याणां जननं, विद्याभ्यासः, तथा वैवाहिकजीवनादिकं बिदरहळ्ळिग्रामे प्रवृत्तमित्यूह्यते। हरिहर-होन्नाळिग्रामयोरपि वासः नूनं सम्भावितः।[1] परन्तु पितृपादानां दिवङ्गमनानन्तरमन्तिमेषु उपत्रिंशद्वर्षेषु

1 श्रीवंशपल्लीकृष्णाचार्याः इमान् विषयानवदन् ।

तु धारवाडजनपदस्य रट्टिहळ्ळिनामकग्रामे[1] अभूवन्निति निश्चितम् । एतेषां वासगृहं, जप-पूजा-पारायणादितपःस्थानं च बाहुपल्ल्यामद्यापि दरीदृश्यते । साक्षात् वेङ्कटपत्याचार्यवंश्यीयाः श्रीराघवेन्द्राचार्याः सपत्नीकाः तत्रैव वासमकुर्वन् । 2009तमवर्षस्य जनेवरिमासे ते दिवं गताः ।

कालः

श्रीवेङ्कटपत्याचार्याणां कालः प्रायः क्रि.श.1610तः 1700तमवर्षः इति सम्भाव्यते । एतन्निर्णयस्य आधारास्त्वेवं वर्तन्ते -

श्रीनिवासतीर्थानां कालः क्रि.श.1590-1674 इति निर्धारितम्[2]। वेङ्कटपत्याचार्याः स्वपितुः प्रथमतनूजाः । श्रीनिवासतीर्थानां उपविंशे वयसि एते अजायन्तेति स्वीकारे क्रि.श.1610तः 1614पर्यन्तं जन्मकाल इति सम्भाव्यते । प्रायः एतद्वंश्यीयाः अशीत्यधिकवत्सरायुषः इति श्रीबिदरहळ्ळि कृष्णाचार्या वदन्ति । सम्प्रति विद्यमानाः, शोधच्छात्रेण दृष्टाः कृष्णाचार्याणां पितृपादाः परमसम्मान्याः बिदरहळ्ळिश्रीनिवासाचार्याः षडशीतिवर्षीयाः । अतः श्रीवेङ्कटत्याचार्याणामपि अशीत्यधिकायुःकल्पने नास्ति मानविरोधः । एतेषां निर्याणतिथिस्तु परम्परया पुष्यकृष्णषष्ठीति निर्णीतम् । तद्दिनं गुरुसमाराधनदिनत्वेनाद्याप्याचर्यते ।

चरित्रम्

एतेषां चरित्रं समकालीनैः क्वाप्युट्टङ्कितं नोपलभ्यते इति प्राङ्निवेदितम् । तत्र यत् पुष्यमासीयकृष्णपक्षषष्ठीतिथिः एषां निर्याणदिनत्वेन आचर्यते तस्मिन् दिने वेदभागवतादिग्रन्थपारायणं, विदुषामुपन्यासाः, भूरिभोजनादिकं च प्रवर्तते । तदात्वे एषां

1 रट्टि इति कन्नडभाषापदं बाहुवाचकम् । तेन बाहुपल्ली इति संस्कृतनाम भवति । अत एते बाहुपल्ली-वेङ्कटपत्याचार्या इत्यपि कदाचित् तद्वंश्यीयैः व्यवह्रियन्ते । अयं ग्रामः बेङ्गलूरुनगरतः 300कि-लोमीटरदूरे राष्ट्रियमार्गसङ्ख्या4मध्ये हावेरीजनपदस्य राणेबेन्नूरुतालूकतः शिवमोग्ग-शिकारिपु-रमार्गे 20कि.मी.दूरे वर्तते ।

2 श्रीश्रीनिवासकृतिमञ्जरी पृ.सं. 1

चरित्रं महिमा च संस्मर्यते। मध्येमध्ये विच्छेदस्य सम्भावितत्वेऽपि इयमाराधनपद्धतिः तद्वंश्यीयैः सश्रद्धमाचर्यमाणं श्रूयते। अनेन श्रीवेङ्कटपत्याचार्याणां चरित्रसम्बन्धिनः अंशाः मौखिकरूपेण संरक्षिताः इति तु निश्चप्रचम्।

रट्टिहळ्ळिग्रामे एतेषां वासगृहं, काले काले परिष्कृतं सत् वर्तते। गृहात् एककिलोमीटरदूरे तुङ्गभद्रानद्याः उपनदी कुमुद्वतीनाम्नी प्रवहति। तत्तीरे एकान्ते एते तप आचरन्। एतैरधिष्ठितं तत् तपःस्थानं कालवशेन जीर्णावस्थामापेति कतिपयवर्षेभ्यः प्राक् नूतनतया निरमायि। तत्रापि यत्र एते उपाविशन् तत्र तुलसीवृन्दावनं निर्मितम्। एतद्वृन्दावनं संन्यासिनां वृन्दावनमिव दृश्यते। माध्वसम्प्रदाये हि, संन्यासिनां देहस्य अग्निदाहाभावात् भूम्यां स्थापनं क्रियते। तदुपरि च वृन्दावनं निर्मीयते। अत्रापि तद्वदेव वृन्दावनं दृश्यते। परन्तु नैतत् तेषां देहस्थापनस्थलम्, किन्तु तेषां उपवेशनस्थलम्। महात्मभिरधिष्ठितस्थलस्य पावित्र्यरक्षणार्थमेतादृशं वृन्दावनं निर्मितम्।

सन्ततिः

श्रीवेङ्कटपत्याचार्याणां श्रीचिक्काचार्याः, श्रीगुराचार्याः (गुरुराजाचार्याः इत्यस्यापभ्रंशः) तथा श्रीनारप्पाचार्याः (नारायणाचार्याः इत्यस्यापभ्रंशः) इति त्रयः पुत्रा आसन्। तेषां विषये वाङ्मयदृष्ट्या विशेषः न श्रूयते।

ऐतिह्यानि

एतेऽपि स्वपितृवत् नानाशास्त्राणि सभक्तिश्रद्धमध्यैयुः। न केवलं विद्वत्ता किन्तु शमदमादिसम्पत्तिरप्यर्जिता। शास्त्रोक्तरीत्या नानामन्त्राणामुपदेशस्वीचिकीर्षा यदा उत्पन्ना तदा सत्स्वपि समर्थेषु अर्हेषु च पितृपादेषु महातपस्विभ्यः मन्त्रोपदेशः स्वीकरणीयः इति हेतोः पितृपादैरुक्ताः तदानीन्तनेभ्यः उत्तरादिमठाधीशेभ्यः श्रीसत्यनाथतीर्थेभ्यः (क्रि.श.1648-1674) मन्त्रोपदेशं प्रापुः।

एकदा श्रीवेङ्कटपत्याचार्याः श्रीसत्यनाथतीर्थानां दर्शनार्थं मठमव्रजन्। तेषां

`मठे वासकाले एकादशी तिथिः प्राप्ता। वैष्णवेषु तत्रापि माध्वेषु निर्जलोपवासरूपम् एकादशीव्रतं महत्या निष्ठया अनुष्ठीयते। विशेषश्रद्धावन्तः उपवासेन सह रात्रौ जागरणमपि विदधति। एकादशीदिने सायमेते श्रीपादैरादिष्टाः भागवतमहापुराणस्य व्याख्याने प्रवृत्ताः। तत्र तैः

`शब्दस्य हि ब्रह्मण एष पन्था यन्नामभिर्ध्यायति धीरपार्थैः।
परिभ्रमंस्तत्र न विन्दतेऽर्थान् मायामये वासनया शयानः॥' (भा.2-2-2)

इति श्लोकः व्याख्यानायोपात्तः। मायामयादिशब्दघटिततया आपाततः अद्वैतप्रतिपादनभासात् तस्य सप्रमाणविमर्शं व्याख्यानं कृतम्। तच्च व्याख्यानं एकादशीसायङ्कालात् द्वादश्याः ब्राह्मीमुहूर्तपर्यन्तमन्ववर्तत! तेन तुष्टाः श्रीपादाः `द्वितीये द्वितीये द्वितीयेऽद्वितीयः' इति बिरुदरूपेण वचसा अन्वगृह्णन्। भागवतद्वितीयस्कन्धस्य द्वितीयाध्यायस्य द्वितीयश्लोके तैः विद्वत्पराक्रमः प्रदर्शित इति तस्य वचसः आशयः।

कदाचिदेतैः श्रीवेङ्कटाचलक्षेत्रमगामि। तत्रत्यः श्रीनिवासः परमभक्त्या आराधितः। पूजान्ते श्रीनिवासस्य अर्चकैः भगवन्निवेदितं दध्यन्नं स्वीकुर्वन्तु इति वेङ्कटपत्याचार्याः कथिताः। नैवेद्यं स्वीकृत्य आवसथमागत्य दर्शने दध्यन्नगर्भे श्रीभूसहितस्य श्रीनिवासस्य राजतप्रतिमा उपलब्धा! तामितां प्रतिमां भगवदनुग्रहं मन्यमानैराचार्यैः आजीवं तस्मिन्नधिष्ठाने सश्रद्धं पूजादिकं निर्व्यूढम्। सा प्रतिमा अद्यापि तद्वंश्यीयैः `बुत्ति(दध्यन्न)वेङ्कटेश' इति नाम्ना व्यवह्रियमाणा संरक्षिता आराध्यते।

बहुकालपर्यन्तं प्रतिदिनमेतैः रट्टिहळ्ळितः उपपञ्चाशत्किलोमीटरदूरे स्थितं हुब्बळ्ळिनगरं प्रति गत्वा पाठं कृत्वा प्रतिनिवर्त्यमानमासीत्। तावद्दूरस्य एकदिने गमनस्याशक्यतया एते योगसिद्ध्या वायुमार्गेण समचरन् इति प्रथा तद्वंश्यीयेषु वर्तते। तामिमां शक्तिं सवणूरुनामकग्रामस्थः श्रीखण्डेरावनामा भक्तः बहुधा सम्प्रार्थ्य अद्राक्षीत्। यद्दिने स समपश्यत् तदेवान्तिमं दिनम्। तदनु तैः तथा न कृतम् इत्यप्यैतिह्यम्।

इमानि ऐतिह्यानि तद्वंश्यीयाः श्रीश्रीनिवासाचार्याः तथा तत्तनूजाः श्रीकृष्णाचार्याः अब्रुवन् ।

0.4.6 - श्रीवेङ्कटपत्याचार्याणां कृतयः

श्रीवेङ्कटपत्याचार्यैः आहत्य पञ्च ग्रन्था रचिताः । ते च -

1. गुर्वर्थदीधितिः

   प्रकृतं सम्पादनम् ।

2. सूत्रार्थसङ्ग्रहः

   श्रीवेदव्यासप्रणीतब्रह्मसूत्राणां मध्वभाष्यानुसारेण अर्थवर्णनपरः बृहन् ग्रन्थः । एतावत्पर्यन्तमप्रकाशितः । बेङ्गलूरुनगरस्थ-पूर्णप्रज्ञसंशोधनमन्दिरस्य उपनिदेशकैः मद्गुरुवरैः श्रीरङ्गनाथकट्टिमहोदयैः विद्यावारिध्युपाध्यर्थमयं ग्रन्थः सम्पादनायोपात्तः ।

3. तारतम्यनवश्लोकीव्याख्या (भावदीपिका)

   एतेषां पितृपादैः श्रीश्रीनिवासतीर्थैः श्रीमध्वाचार्यप्रतिपादिततारतम्यप्रकाशकं नवश्लोकात्मकं स्तोत्रं रचितम् । तस्य भावदीपिकाख्या विस्तरेण व्याख्या एभी रचिता । अयं ग्रन्थः `समाचार प्रेस्, बेलगाम्, कर्णाटका:' एतैः 1906तम क्रिस्ताब्दे प्रकाशितः ।

4. नखस्तुतिव्याख्या

   अप्रकाशिता ।

5. श्रीश्रीनिवासस्तुतिः

   पितृस्थाने गुरुस्थाने च स्थितान् श्रीश्रीनिवासतीर्थान् प्रथमा-सम्बोधनप्रथ-

मादिसर्वविभक्तिभिः स्तुवद्भिरेभिर्विरचिता इयं स्तुतिः। प्राग्दर्शितचतुर्थग्रन्थप्रकाशकैरेवायमपि ग्रन्थः 1981तमक्रिस्ताब्दे प्राकाश्यं नीतः।

एतैः स्वहस्तेन लिखिता श्रीश्रीनिवासतीर्थविरचिता प्रमाणलक्षणटीकाटिप्पणिः सम्प्रत्यपि होन्नाळिग्रामे श्रीविदरहळ्ळि श्रीनिवासाचार्याणां गृहे अस्ति।

0.5 प्रकृतव्याख्या गुर्वर्थदीधितिः

अयं ग्रन्थः श्रीमध्वाचार्यविरचितस्य तन्त्रसारसङ्ग्रहस्य व्याख्यानरूपः। पितृचरणक्षुण्णपथानुवर्तिनः श्रीवेङ्कटपत्याचार्याः अपि श्रीमध्वाचार्यविरचितस्य तन्त्रसारसङ्ग्रहस्य गुर्वर्थदीधितिनाम्नीं अत्युपयुक्तां व्याख्यां रचितवन्तः सन्ति।

0.5.1 गुर्वर्थदीधितिरचने कारणम्

श्रीवेङ्कटपत्याचार्याः ग्रन्थादौ मङ्गलाचरणादनु प्रतिजानन्तः एवमाहुः - `व्याकरिष्ये वचःशुद्ध्यै तन्त्रसारस्य सङ्ग्रहम्' इति।

एवं ग्रन्थान्ते -

`श्रीयादवाचार्यसुपादशिष्यश्रीश्रीनिवासार्यगुरूपदिष्टः।
अर्थो निबद्धोऽत्र विचार्य सद्भिरार्यैरुपेक्ष्यो न भवेदतोऽयम् ॥' - इति।

आभ्यां वचनाभ्यां गुर्वर्थदीधितिरचने कारणद्वयमूह्यते। प्रथमं वचश्शुद्धिः। द्वितीयं स्वाधिगतसम्प्रदायप्राप्तसुसूक्ष्मार्थानां ग्रन्थे निबन्धनं तद्द्वारा तेषां प्रचारः। यदि कस्यचन ग्रन्थस्य ऐदम्प्राथम्येन व्याख्या रच्यते तत्र वचश्शुद्धिः प्रमुखकारणत्वेन नोच्यते। यत्र तु सत्स्वन्येषु व्याख्यानेषु व्याख्यानान्तरं विरच्यते तत्र वचश्शुद्धिः कारणं भवति। इयं रीतिः वेदान्तिषु बहुधा दृश्यते। अत एव माध्वसम्प्रदायागतश्रीजयतीर्थरचितन्यायसुधादीनां सत्स्वपि विंशत्यधिकेषु व्याख्यानेषु, नूतनार्थाभावेऽपि व्याख्यानान्तराणि रचितानि दृश्यन्ते। प्रकृते गुर्वर्थदीधितिरचनात्प्राक् व्याख्यान्तराण्यासन्। अतः वचश्शुद्धिः कारणत्वेन निर्दिष्टा इति भाति। परन्तु नेयं

व्याख्या केवलं प्राचीनोक्तार्थसङ्ग्रहरूपा किन्तु त्रिंशदधिकस्थलेषु सम्प्रदायप्राप्तार्थग्रथनरूपा च।[1] अतः तन्निबन्धनमपि कारणत्वेनोक्तम् ।

0.5.2 गुर्वर्थदीधितेः सम्पादने उपयुक्ताः मातृकाः

मातृका नाम हस्तलिखितं पुस्तकम् । यथा मातरं विना शिशुः न जन्म लभते। एवं हस्तलिखितपुस्तकं विना संशोधनं वा संशोधितपुस्तकस्य वा नावकाश इति हस्तलिखितं पुस्तकं मातृका इति कथ्यते। माता इव मातृका इति विग्रहः। सादृश्ये तद्धितः कप्रत्ययः।

अस्मिन् सम्पादने आदौ तिस्रः मातृकाः आधृताः। ताश्च -

1. श्रीव्यासनकेरेप्रभञ्जनाचार्यैः स्वीयात् जयतीर्थहस्तलिखितग्रन्थालयात् दत्ता। इयं ज.पाठः इति उल्लिखिता। तृतीयाध्यायभागः अस्यां मातृकायां न लिखितम् । अद्य नोपलभ्यत इति न। लिपिकृतैव न लिखितम् । यतो हि, द्वितीयाध्यायव्याख्या द्वात्रिंशत्तमे पत्रे समाप्ता। त्रयस्त्रिंशत्तमे पत्रे चतुर्थाध्यायव्याख्यैव लिखिता।

2. मैसूरुनगरस्थप्राच्यविद्यासंशोधनालयात् समग्रा मातृका प्राप्ता। इयं मातृका `प्रा' इति सङ्केतिता। अस्याः पाठाः `प्रा. पाठः' इति उल्लिखिताः।

3. श्रीवीरनारायणपाण्डुरङ्गीमहोदयैः विद्याधीशशोधसंस्थानाम्ना हस्तलिखितपुस्तकानि सङ्गृहीतानि। ते एकां मातृकामदुः। अत्र तत्रतत्र कतिचन पत्राणि चतुर्थाध्याये च मध्ये महान् भागः न लब्धः। अस्याः पाठाः वि.पाठाः इति उल्लिखिताः।

4. यदा आसामाधारेण क्वचित्क्वचित्, विशेषतः तृतीयाध्याये पाठनिर्धारणे कष्टं

[1] कुत्रकुत्र साम्प्रदायिकार्थाः प्रदर्शिता इत्येतत् परिशिष्टे सङ्गृहीतम् ।

जातं तदा श्रीव्यासनकेरेप्रभञ्जनाचार्यैः अन्या काचित् मातृका दत्ता या सम-स्यास्थलेष्वेव परिशीलिता। इयं ज1 इति उल्लिखिता।

5. संल्लापावसरे पूर्णप्रज्ञसंशोधनमन्दिरस्य उपनिर्देशकाः श्रीरङ्गनाथकट्टिमहोदयाः मातृकान्तरं बेङ्गळूरुनगरे अस्तीति न्यगदिषुः। तदनुसारेण बेङ्गळूरुवास्त-व्येभ्यः श्रीजहगीरदारमहोदयेभ्यः एका मातृका प्राप्ता। इयं यद्यपि XEROXरूपा। तथाप्यस्याः मूलं ग्रन्थकृद्वंश्यायैः लिखितं पुस्तकमिति तैः न्यगादि। अतः इयं मातृका सादरं निरीक्षिता परिशीलिता च। इयं र इति उल्लिखिता।

6. २००९ जनेवरिमासे मया रट्टिहळ्ळिग्रामः गतः यः ग्रन्थकृतां वासस्थलम्। तदा यदृच्छया तत्रत्यैः इदं स्वयं श्रीवेङ्कटपत्याचार्यैः लिखितमिति प्रथा वर्तते इत्युक्त्वा एका मातृका दर्शिता। परिशीलने कृते तत्र अयमेव ग्रन्थः आसीत्। किञ्च, पत्राणि परितः अनन्तरं योजिताः पङ्क्तयः दृष्टाः। पञ्चषस्थलेषु अत्र शो-धपत्रमस्ति, शोधपत्रद्वयमस्ति इति विलिख्य तत्तदध्यायान्ते इदं अमुकपत्र-सम्बन्धिशोधपत्रमिति लिखितम्। शोधपत्राणां परिमाणम् इतरपत्रापेक्षया अल्पम्। (मया पृष्टाः बहवः हस्तलिखितग्रन्थतज्ज्ञाः अयं शोधपत्रलेखन-क्रमः अदृष्टचरः इत्यवदन्।) एभिः कारणैः सा मातृका श्रीवेङ्कटपत्याचा-र्यैरेव लिखिता इति निर्धार्य तदाधारेणैव अन्ते पाठः दत्तः। इयं मूलमातृका इति उल्लिख्ता। द्वित्रस्थलेषु मूलमातृकायामदृष्टाः पङ्क्तयः अन्यपाठेषु दृष्टाः! ता अपि अधष्टिप्पणित्वेन दर्शिताः।

0.6 गुर्वर्थदीधितेः वैशिष्ट्यम्

अथेदं प्रस्तोतव्यं यत् किमस्यां व्याख्यायां वैशिष्ट्यमस्तीति। तत्रादौ व्याख्या-नाख्यग्रन्थप्रभेदलक्षणाख्यायिका इयं कारिका स्मरणीया -

पदच्छेदः पदार्थोक्तिः विग्रहो वक्ययोजना ।

आक्षेपश्च समाधानं व्याख्यानं षड्विधं स्मृतम् ।। - इति ।

इमानि षट् व्याख्यानलक्षणानि गुर्वर्थदीधितौ कथं निविष्टानीत्यस्य प्रदर्शनाय नास्ति गवेषणायासलेशोऽपि । यदृच्छया यत्किञ्चित् पृष्ठमुद्घाट्यतां तत्रैतानि षट् लक्षणानि गोचरीभवन्ति! नेयमतिशयोक्तिः । भाष्यकृतां, तत्रापि श्रीमध्वाचार्याणां ग्रन्थरचन-प्रकारं विदितवतां नात्राश्चर्यकरं किमप्यस्ति । तत्रापि गुर्वर्थदीधितेः मूलग्रन्थभूतस्य तन्त्रसारसङ्ग्रहग्रन्थस्य सङ्ग्रहग्रन्थत्वेन तन्त्रशास्त्रसम्बन्धित्वेन तन्त्रशास्त्रसम्बन्धिशब्द-भूयिष्ठत्वेन च पदच्छेद-पदार्थोक्ति-विग्रह-वाक्ययोजनानां सुतरामावश्यकता भवति । मूलग्रन्थस्य सङ्क्षिप्ततया च आक्षेपसमाधानरूपविशेषविचाराणामपि नितान्तमवका-शोऽस्तीति प्रतिघट्टमत्र व्याख्यानेऽस्ति षल्लक्षणी । तदतिरिक्ततया कानिचित् वैशि-ष्ट्यान्यत्र प्रदर्श्यन्ते ।

0.6.1 नामनिर्वचनसूचितं वैशिष्ट्यम्

गुर्वर्थदीधितिरिति व्याख्यानस्य नामैव अस्य वैशिष्ट्यं द्योतयति । तदित्थम् -

गुरूणामर्थः गुर्वर्थः । गुर्वर्थस्य दीधितिरिव (प्रकाशिका) = गुर्वर्थदीधितिः - इति अस्य नाम्नः निर्वचनम् । यथा सूर्यादिप्रभा अस्मान् परितः स्थितान् पदा-र्थान् द्योतयति तथेयं व्याख्या गुरुभिरुपदिष्टानर्थान् प्रकटयति । श्रीवेङ्कटपत्याचार्या उपविंशतिस्थलेषु `अयमत्र सम्प्रदायागतोऽर्थः' इति `अत्र गुरुचरणा एवमाहुः' इति वा आरभ्य स्वैः उपदेशपरम्परया अर्जितानपूर्वान् प्रमेयविशेषान् उल्लिखन्ति । एते विषयाः जिज्ञासूनां निधिनिभाः सन्ति । कुत्रकुत्र एतैः साम्प्रदायिकत्वेनोल्लिख्य व्याख्या कृतेत्यस्य पट्टिका परिशिष्टे दत्ता ।

0.6.2 प्राक्तनटिप्पण्यः आकरभूताः

ग्रन्थादौ मङ्गलादनु प्रतिज्ञाकाले श्रीवेङ्कटपत्याचार्याः एवमाहुः -

अथैषां कृपया पूर्वटीकाश्चालोच्य सादरम् ।
व्याकरिष्ये वचश्शुद्ध्यै तन्त्रसारस्य सङ्ग्रहम् ।। - इति ।

अनेन अस्यां व्याख्यायाम् इतरव्याख्यानां सारभूताः विषयाः, अन्यत्र अविद्यमानाः नूत्ना अपि विषयाः विद्यन्ते इति आपातत एव ऊहयितुं शक्यम् । ग्रन्थान्तर्दर्शनेन च नः ऊहः समीचीन इति निश्चेतुं शक्यम् । परन्तु अग्रे विवेचयिष्यमाणरीत्या अद्य-यावत् प्रकटितासु तन्त्रसारसङ्ग्रहव्याख्यासु इयमेव प्राचीनतमा । अतः अस्याः आ-करग्रन्थाः इमे एव इति निर्धारणं न जातम् ।

0.6.3 सूक्तव्याख्यानम्

तन्त्रसारसङ्ग्रहे विविधदेवतामन्त्राणामुल्लेखावसरे पुरुष-विष्णु-अम्भ्रणी-हिरण्यगर्भ-बळित्थेति पञ्चानां सूक्तानामुद्धरणं कृतम् । तेषां सर्वेषां व्याख्यानमत्र दृश्यते । एतानि पञ्च व्याख्यानानि मिलित्वा पृथक् ग्रन्थ एव भवितुमर्हन्ति!

0.6.4 अकारादिवर्णप्रतिपाद्यभगवन्नाम्नां निर्वचनप्रदर्शनम्

अकाराद्येकपञ्चाशद्वर्णानां तन्त्रशास्त्रे प्रमुखं स्थानमस्ति । साधकस्य देहे प्रतिमासु च तेषां न्यासेन शक्तिविशेषः भगवतः सन्निधानविशेषश्च भवतीति तन्त्रशास्त्रे प्रसि-द्धम् । तत्रापि वैष्णवतन्त्रभूते तन्त्रसारसङ्ग्रहे एतेषां वर्णानां प्रतिपाद्याः भगवन्मूर्तयः अज-आनन्दाद्याः हंस-ळाळुकान्ताः प्रथमाध्याये कथिताः । तेषां पञ्चाशतः नाम्नां नि-र्वचनं विश्व-धनञ्जय-अमरादिकोषाणां साहाय्येन गुर्वर्थदीधितौ प्रदर्शितम् । तत्र ङसार-ञम-णात्म-ठरक-ङरकादीनां विद्वद्भिरपि दुर्निर्वचानां नाम्नां निर्वचनमस्या व्याख्याया अनितरसाधारणोऽशः । इदं वर्णदेवतानामनिर्वचनमन्येषु केषुचिदपि व्याख्यानेषु नो-पलभ्यते ।

0.6.5 सर्वेषां मन्त्राणामर्थः प्रकाशितः

तन्त्रसारसङ्ग्रहे उपनवतिमन्त्राः उद्धृताः । तेषां सर्वेषामर्थः प्रकटीकृतः यो जिज्ञासूनां महते उपकाराय कल्पते ।

0.6.6 पितृभक्तिपराकाष्ठा

पूर्वं ग्रन्थनामनिर्वचनविवेचनावसरे दृष्टं यत् श्रीवेङ्कटपत्याचार्यैः गुरूपदिष्टोऽर्थः बहुत्र प्रतिपादित इति । एतेषां वचनरीत्या एतेषां पितृपादाः श्रीश्रीनिवासतीर्था एव एतेषां प्रधाना गुरवः । पितृत्वगुरुत्वमेलनेन तेषु एषामपारा भक्तिरवर्ततेत्यस्य प्रमाणमस्यां व्याख्यायां लभ्यते । एतैः तत्रतत्र अन्यान्यभागव्याख्यानादौ विशेषतः पितृप्रणिपातो विहितः । तद्यथा -

'श्रीमदाचार्यवाक्पङ्केरुहनित्यप्रबोधदः ।
श्रीनिवासार्यतरणिर्भासतां मद्धृदम्बरे ॥' - इति ग्रन्थादौ मङ्गलाचरणे ।

'प्रणम्य श्रीनिवासार्यगुरूणां चरणौ शुभौ ।
करिष्यामि यथाबोधं द्वितीयाध्यायपञ्चिकाम् ॥' - इति द्वितीयाध्यायव्याख्यादौ ।

'प्रणम्य श्रीनिवासार्यगुरूणां पादपङ्कजे ।
तन्त्रसारतृतीयाध्यायार्थं वक्ष्यामि लेशतः ॥' - इति तृतीयाध्यायव्याख्यादौ ।

'संस्मृत्य चरणद्वन्द्वं श्रीनिवासार्यसद्गुरोः ।
हिरण्यगर्भसूक्तार्थः कथ्यते तत्कृपाबलात् ॥' - इति चतुर्थाध्यायमध्ये हिरण्यगर्भसूक्तव्याख्याने ।

'श्रीमदाचार्यसुपादशिष्यश्रीश्रीनिवासार्यगुरूपदिष्टः ।
अर्थो निबद्धोऽत्र विचार्य सद्भिरार्यैरुपेक्ष्यो न भवेदतोऽयम् ॥3 ॥
श्रीश्रीनिवासार्यसूनूत्था तन्त्रसारार्थभासिका ।
सद्वर्गानन्ददात्रीयं भूयाद्दुर्वर्थदीधितिः ॥5 ॥' - इति ग्रन्थान्ते ।

'श्रीमद्यदुपत्याचार्यपूज्यपादाराधकश्रीनिवासाचार्यपूज्यपादानां शिष्येण वेङ्कटपतिना कृतायां गुर्वर्थदीधितौ प्रथमोऽध्यायः समाप्तः ॥' - इति प्रथमाध्यायसमाप्तिसूचक-वाक्ये । एवमन्याध्यायानामन्तेऽपि ।

एषु स्थलेषु, ग्रन्थादौ मङ्गलाचरणावसरे एवं अध्यायसमाप्तिसूचकवाक्येषु च यत् पितृचरणनाम गृहीतं तत् निरीक्षितमेव । परन्तु प्रत्यध्यायमादौ मध्येऽपि क्वचित् ग्रन्थान्ते च यदेतैः पितृचरणस्मरणं व्यधायि तेनैतेषां पितृभक्तितत्परत्वं सम्यक् ज्ञायते । एवमेते भारतीयसंस्कृतेः मुख्यलक्षणभूता पितृगुरुभक्तिः कथं करणीयेत्यत्र निदर्श-नयन्ते ।

0.6.7 ग्रन्थशतोल्लेखः

अस्यां व्याख्यायां न्यूनातिन्यूनं 100ग्रन्थानामुल्लेखः कृतः । उदाहृतग्रन्थसूची परिशिष्टे पृथक् दत्ता ।

0.6.8 पाठान्तरोल्लेखः

गुर्वर्थदीधितौ तन्त्रसारसङ्ग्रहस्य षड्त्रिंशत्पाठान्तराणि प्रदर्शितानि । तत्र श्रीकरम-न्त्रध्यानश्लोकः केवलं गुर्वर्थदीधितावेव मूलग्रन्थान्तर्गतत्वेन परिगृहीतः । अस्मिन् विषये प्राक् भूमिकायाः द्वितीयभागे चर्चितम् ।

0.6.9 कानिचित् विशिष्टव्याख्यानोदाहरणानि

ग्रन्थावतारिका - 1.2

भगवतः सर्वशब्दवाच्यत्वम् - 1.16

केशवादीनामायुधक्रमः - 1.25

विष्णुकूर्मो वायुकूर्मश्च - 1.55

आवाहनादिमुद्राः - 1.59

पञ्चामृतस्नानादि - 1.60

आवरणपूजा, दिक्पाललक्षणानि - 1.65

अनुयागविधिः - 1.68

`द्विविधो हि सतिसिद्धान्तः' - 1.74

प्राणायामे विशेषः - 2.6

अग्निसंस्कारः - 2.20

उरःप्रमाणम् - 3.16 [अयं विषयः कन्नडभूमिकायां विवृतः]

ध्वनिभेदेने शिलाभेदविचारः - 3.40,44

सङ्क्षिप्तबलिदानम् - 3.44

वास्तुपुरुषविचारः - 3.64

होमसमये निष्कास्याः - 3.83

तेजोमयप्रतिमा - 3.100

तत्वाभिमानिनः - 3.135

तन्त्रसारसङ्ग्रहमहिमा - 3.139

श्वाससङ्ख्या - 4.22

पञ्चविधाः आहाराः - 4.28

तात्पर्यवृत्तिः नाम का? - 4.54

प्राणाग्नेरेव वाचकम्' - 4.66

तन्त्रफलानुभवः - 4.66

गुरवः कतिविधाः - 4.101,130

कीदृशं ज्ञानं मोक्षासाधनम् - 4.105

सृष्टिस्थितिलयन्यासक्रमः - 4.119

यन्त्रतल्लेखनप्रकारौ - 4.125

ध्यानधारणस्वरूपम् - 4-131,153

शास्त्रावमर्शनं द्विविधम् - 4.138

मुक्तौ वृद्धिह्रासौ कीदृशौ ? - 4.138

षण्णां पद्मानां स्थानभूतानि षणमण्डलानि - 4.149

वासनामयवस्त्वंशे अपरोक्षस्यैव ध्यानस्य ब्रह्मांशे परोक्षत्वम् - 4.153

भक्तेरावश्यकता - 4.156

एतद्ग्रन्थ-ग्रन्थान्तरविरोधपरिहाराः - 1.37, पुरुषसूक्ते प्रथममन्त्रः, 2.11, 3.18,25, 4.22,66,106

0.7 इतरव्याख्याभिः सह तुलना

प्राक् तृतीयभागे दर्शितरीत्या सत्स्वपि विंशत्यधिकेषु व्याख्यानेषु तन्त्रसारसङ्ग्रहस्य अधोनिर्दिष्टानि पञ्चव्याख्यानानि मुद्रितानि उपलभ्यन्ते । प्रकृतया गुर्वर्थदीधित्या सह तेषां नाम अधः दर्शितम् । ग्रन्थकर्तृणां कालोऽपि तत्रैवावरणे दत्तः। कालविषये विवरणं प्रागेव दर्शितम् ।

- श्रीवेङ्कटपत्याचार्यकृता गुर्वर्थदीधितिः (क्रि.श.1618-1708)
- श्री वेदवेद्यतीर्थशिष्यकृता श्रीतन्त्रसारविवृतिः (प्रायः श्रीवेङ्कटपत्याचार्याणां समकालीनाः)
- छलारीशेषाचार्यप्रणीतः तन्त्रसारार्थसङ्ग्रहः (क्रि.श.1670तः अनन्तरम्)
- श्रीरघुनाथयतिविरचिता तत्त्वकणिका (क्रि.श.1700-1755)
- श्रीश्रीनिवासाचार्यकृतः गूढार्थसङ्ग्रहः (क्रि.श.1700तः अनन्तरम्)
- श्रीवसुधेन्द्रतीर्थकृतं व्याख्यानम् (क्रि.श.1761)

एवं चात्र उपलभ्यमानग्रन्थकर्तृषु श्रीवेङ्कटपत्याचार्याः एव प्राचीनाः। केवलं श्रीवेदवेद्यतीर्थशिष्याः तथा छलारीशेषाचार्याः एतेषां समकालीनाः। तत्र श्रीवेदवेद्यतीर्थशिष्याणां ग्रन्थः सङ्ख्यया अल्पः। तस्य परिशीलने च तयोर्मध्ये एकस्य विषयाणामन्यस्मिन् अनुवादः न दृश्यते। एवमेव श्रीरघुनाथयतिविरचितग्रन्थस्थविषया अपि भिन्ना वर्तन्ते।

0.7.1 श्रीछलारीशेषाचार्याणां व्याख्यानेन सह तुलना

गुर्वर्थदीधिति-छलारीययोः टीकयोः हस्तप्रतिषु सङ्कीर्णता जाता। मैसूरुनगरस्थप्राच्यसंशोधनालयस्य गुर्वर्थदीधितिसम्बन्धित्वेन चिह्नितेषु द्वादशसु हस्तप्रतिषु त्रयः छलारीयसम्बन्धिनः ! एवमेव जयतीर्थहस्तलिखितग्रन्थालयेऽपि द्वयोः गुर्वर्थदीधितिमातृकयोः तृतीयाध्यायः परं छलारीयटीकीयः उपलभ्यते ! गुर्वर्थदीधितौ मङ्गलाचरणादनु प्रतिज्ञाकरणकाले पठ्यमानः श्लोकः वि.पाठे छलारीयः पठ्यते। तथा हि -

`अथैषां कृपया पुर्वटीकाश्चालोच्य सादरम्।
व्याकरिष्ये वचःशुद्ध्यै तन्त्रसारस्य सङ्ग्रहम् ॥' - इति गुर्वर्थदीधितिः।

`बहुज्ञैर्बहुटीकाभ्यो बुध्यारोहार्थमञ्जसा।
मध्वोक्ततन्त्रसारार्थसङ्ग्रहः क्रियते मया ॥' - इति छलारीया।

आभिः सङ्गतिभिः इदं तु निश्चेतुं शक्यं यत् पाठकैः द्वयोरपि टीकयोर्विषये समानः आदर आस इति।

विषयाणां परिशीलने तु इतोऽपि मोहः जायते। उभयत्रापि उपरि दर्शितरीत्या समानविधा प्रतिज्ञा दृश्यते। `केचित्तु' `अन्ये तु' `इति सम्प्रदायः' इत्यादिरूपेण विविधपक्षाणामुल्लेखः उभयत्रापि समानः। क्वचित् प्रथमाध्यायतृतीयश्लोके उभयोरपि

विषयः समानः। वाक्यानि तु भिन्नानि। क्वचित् 4-3श्लोके छलारीयविषयः गुर्वर्थदीधितौ केचिदिति अनूदितः। क्वचित् 1-22श्लोके छलारीयविषयः गुर्वर्थदीधितौ केचिदित्यनूदितः, गुर्वर्थदीधितिविषयः छलारीये केचिदित्यनूदितः! क्वचिदियं व्याख्या विस्तृता, क्वचित्सा।

तत्र उभयोरपि मूलम् मूलानि वा व्याख्यानं/व्याख्यानानि स्युः इति सम्भावनमेव उचितमिति भाति। यतो हि, यदि गुर्वर्थदीधितौ छलारीयविषयाः अनूदिताः इति पक्षः स्वीक्रियते तर्हि, समकालीनत्वेऽपि प्राचीनैः श्रीवेङ्कटपत्याचार्यैः सप्तत्यधिकवयसि विंशत्यधिकवयसां श्रीछलारीशेषाचार्याणां व्याख्या अनूदिता इति गुरुकल्पना आश्रयणीया भावति। तदपेक्षया श्रीछलारीशेषाचार्यैः गुर्वर्थदीधितिविषयाः अनूदिताः इति पक्षः ज्यायान्। तत्पक्षपोषकतया समानविषयत्वं यद्यपि छलारीये दृश्यते। परन्तु समानशब्दत्वं न दृश्यते। समानशब्दत्वेन भाव्यमिति नियमानङ्गीकारेऽपि गुर्वर्थदीधितेः साम्प्रदायिकाः अपूर्वा विषयाः छलारीये नानूदिता इत्यनेन छलारीयस्य गुर्वर्थदीधितेश्च परस्परनिरपेक्षेण रचितत्वं युक्तम्। किन्तु सामानान्यव्याख्यानमूलकत्वं भवति इति तु निश्चितम्।

0.7.2 श्रीश्रीनिवासाचार्यकृतेन गूढार्थसङ्ग्रहेण सह तुलना

अत्र ततस्तत उद्धृतानि उभयोः व्याख्ययोः कतिपयवाक्यानि प्रदर्श्यन्ते -

गु.दी. - झाटिता द्राविता अरयो येन स झाटितारिः। `ञकारो गायके प्रोक्त' इति धनञ्जयात् ञं वेदादिना स्वगायकं मानयतीति ञमः। ञः गर्गरध्वनिः। तेन मीयत इति ञमः। `अव स्वराती'ति श्रुतेः। (तं.सा.1-8)

गू.सं. - झाटिता निर्जिता अरयो येन स झाटितारिः। ञेन गर्गरध्वनिना मीयत इति ञं गायकं मानयतीति वा। (तं.सा.1-8)

गु.दी. - अष्टाक्षस्य कृद्धमहावीरद्युसहस्रैः सहिताश्च ते उल्काश्चतुर्थ्यन्ताः शब्दाः हृदादीनि हृदादिशब्दवाच्यभगवद्रूपपञ्चक प्रतिपादका इति यावत्। प्रतिपाद्यप्र-

तिपादकयोरैक्योक्तिस्तु `अहं यं वै लोकः प्रथमा महानाम्नी'त्यादाविव ज्ञेया। (तं.सा.1-32)

गू.सं. - कृद्धमहावीरद्युसहस्रशब्दैः सहिताश्च ते उल्कशब्दाश्च ते तथोक्ताः। चतुर्थ्यन्ता एते कृद्धादयः शब्दाः हृदादीनि हृदादिशब्दवाच्यानि यानि भगवद्रूपाणि तत्प्रतिपादकत्वात् हृदादीनि हृदादिशब्दवाच्यभगवद्रूपपञ्चकप्रतिपादका इति यावत्। अत्र प्रतिपाद्यप्रतिपादकयोः ऐक्योक्तिः `अहं यं वै लोकः प्रथमा महानाम्नी'त्यादाविव द्रष्टव्या। (तं.सा.1-32)

एवं समग्रग्रन्थे तत्र तत्र गुर्वर्थदीधितिवाक्यानि किञ्चिद्व्यत्यासेन पठ्यन्ते। अत्राविद्यमाना अपि विषया दृश्यन्ते। तत्रतत्र अत्रानुद्धृतानि सर्वमूलवाक्यान्यपि दृश्यन्ते।

एतत्सर्वस्मिन् परिशील्यमाने गूढार्थसङ्ग्रहस्य गुर्वर्थदीधितिः उपजीव्या इति निश्चेतुं शक्यते।

0.8 उपसंहारः

भौतिकदृष्ट्या सागरजीविनः देहावयवरूपोऽपि शङ्खः भारतीयसंस्कृतौ महालक्ष्मीसन्निधानभाजनतया समादृतः। तत्रापि दक्षिणावर्तशङ्खस्य ततोऽप्यतिमहत्त्वं वर्णितम्। तस्य विषये काचन कथा श्रूयते[1]। कश्चन सुधाकारः सागरतीरे लभ्यं शुक्तिशङ्खादिकं चूर्णीकृत्य, वह्निना भस्मसात् विधाय, सुधां सम्पाद्य जीवति। तेन कदाचित् दक्षिणावर्तशङ्खः अदृश्यत। अन्यशङ्खवत् तमपि पेष्टुमयतत। परन्तु, दृढतरत्वात् तस्य तथा कर्तुं स नापारयत्। अलं श्रमेणेति तं स चिक्षेप।

पतितं तं शङ्खोपजीवी वणिक् ददर्श। तस्य दुर्लभत्वं जानन् स विना विलम्बं तमानीय आपणे विक्रयणाय समस्थापयत्। इतरवस्त्वपेक्षया अधिकं मूल्यं च निरधारयत्।

1 म.वि.9 - 30तमश्लोकादारभ्य वर्णिता।

तदनु कश्चन धार्मिको राजा मूल्येन तं क्रीत्वा गृहमानीय प्रतिदिनं सवैभवं यथोचितं लक्ष्मीनारायणं प्रपूज्य इह धनकनकगजाश्वादिसमृद्धिं, पुत्रपौत्रादिसौभगं शत्रुजयादिभाग्यं चानुभूय परत्राप्युत्तमान् लोकानाप - इति सा कथा।

अस्यां कथायां महिमविशेषवान् शङ्खः, तस्य त्रिविधाः उपयोक्तारश्च दृश्यन्ते। तत्र शङ्खस्थाने भारतीयज्ञानसन्ततिः तत्रापि विश्वतोमुखप्रयोजनवती तन्त्रज्ञानसम्पत् विभाव्यते चेत् तत्समक्षं त्रिविधा जना दृश्यन्ते। केचन अध्यात्मगन्धशून्याः शीघ्रमर्थकरीभिः लौकिकविद्याभिः सन्तोल्य इमां विद्यां दूरे कुर्वन्ति। अपरे केचन, तत्र महत्त्वबुद्धिं धारयन्तोऽपि तां विद्यां पुस्तकरूपेण पीठे संस्थाप्य, कुङ्कुमाक्षतादिना सम्पूज्य कवाटे स्थापयन्ति, अथ वा, तया जीवनं यापयन्तः अर्थैकदत्तदृष्टयः केवलं मस्तके धरन्ति। न कदापि आत्मसात् कर्तुमिच्छन्ति। अल्पा अपि केचन तामेतां विद्यां श्रुत्वा, मत्वा (सम्यक् विचार्य), हृदये स्थापयन्ति। तद्दर्शितरीत्या चरन्तः मनोबलं सम्पाद्य लौकिकीमुन्नतिमपि लभन्ते, अलौकिकीं शान्तिं समृद्धिमपि प्राप्नुवन्ति।

साम्प्रतिके जीवने मनुष्यः क्रमेण अधिकस्वार्थी, अधिकभोगमग्नः, अल्पपरहितेच्छुः विस्मृतप्राय-परमात्मा च वर्तते। अत एव तस्य दुःखम् अतृप्तिः असन्तुष्टिश्च क्रमेणाभिवर्धन्ते। तदेतादृश्यां परिस्थितौ अस्मत्प्राचीनैराविष्कृता तन्त्रपद्धतिः सुखाय कल्पते।

0.9 जनसामान्योपयोगिनः तन्त्रविषयाः

मया तन्त्रशास्त्रसम्बधिनोऽस्य ग्रन्थस्य सम्पादनाय बहुवारं पठनेन इमे अंशाः सामान्यजनोपयोगिनः भवेयुरिति भातम्।

- गृहे सर्वोऽपि प्रतिदिनं अन्ततः दश-पञ्चदशनिमेषपर्यन्तं इष्टदेवतापूजनं स्वोचितधर्माचरणं च कुर्वीत।

- यत्कुरुते तत् श्रद्धया कुर्वीत।

- यत् श्रद्धया कुरुते तत् ज्ञात्वा कुर्वीत ।
- एतदर्थं समर्थं ज्ञानिनं गुरुं समाश्रयेत ।
- बाह्यपूजावत् मानसध्यानमपि अनुतिष्ठेत् ।
- बाह्यप्रतिमासु तथा अन्तर्मनसि तेजोरूपमधिष्ठानं तत्र प्रकाशरूपं चिन्मयं परमात्मानं ध्यातुं प्रयत्नः कार्यः ।
- तदेतेषामङ्गतया गेहे, देहे पूजोपकरणेषु च शौचं सम्पादयेत् ।
- अहं कः ? कुतः आगतवान् ? किं जीवनलक्ष्यम् ? जीवने किमनित्यम् ? किं शाश्वतम् ? - इत्यादीनां प्रश्नानामुत्तरं मनसि चिन्तयेत् ।
- व्यष्टिरूपेण अनुष्ठानमिव, गृहस्तरे, कुटुम्बस्तरे, वीथी-ग्रामादिस्तरे समष्टिरूपेणापि चिन्तनं, धर्माचरणं च विधेयम् ।
- एतदनुकूलाः संस्काराः बाल्यादेव प्ररोहणीयाः । तदर्थं नित्यकर्मसु बालानामपि भागस्वीकरणं कल्पयेत् ।

0.10 अन्तनिवेदना

अन्ते इदं वक्तुमभिलषामि यत्, तन्त्रशास्त्रसम्बन्धिनः श्रीमध्वरदिचग्रन्थस्य व्याख्यायाः सम्पादनावकाशः अस्मत्प्राचीनानां पुण्यवशादेव लब्धः । विद्वद्विद्यार्थिसमुदये श्रीवंशपल्लीश्रीनिवासतीर्थानां (श्रीबिदरहळ्ळीश्रीनिवासतीर्थानां) स्थानं सुमहत्, तेषामुपकारः निष्क्रेतुमशक्यः । तेषां तनुजानां श्रीवंशपल्लीवेङ्कटपत्याचार्याणां कृतिरेका प्राकाश्यं नीयत इति तु महतः प्रमोदस्य कारणम् । अस्मिन् कर्मणि यथाशक्ति प्रयत्नो विहितः ।

सर्वान्ते जिज्ञासूनां पुरत इयं कृतिरिदानीं समर्पिता ।

कृतज्ञतासमर्पणम्

सादरप्रणतयः

- महातपस्विनां शिष्यवत्सलानां अन्वर्थनाम्नां परमगुरूणां **श्रीविद्यामान्यतीर्थश्रीचरणानां** चरणयुगलयोः सादरप्रणतयः समर्प्यन्ते ।

- स्वचरितैः स्मारितव्यासतीर्थानां राजर्षीणां करुणासागराणां प्रतिभाम्बुधीनां लोकोत्तरचेतसां गुरूणां **श्रीविश्वेशतीर्थानां** पादकमलयोः सभक्तिनतयः समर्प्यन्ते ।

- आबाल्यं मां पाठित-काव्य-न्याय-द्वैतवेदान्तेभ्यः न्याय-व्याकरण-वेदान्त-साहित्येषु विद्वन्मान्येभ्यः श्रीराघवेन्द्रगुरुकारुण्यभाजनेभ्यः मार्गदर्शकेभ्यः **श्रीसुविद्येन्द्रतीर्थश्रीचरणेभ्यः** सकार्तज्ञाः प्रणामाः समर्प्यन्ते ।

- गुर्वर्थदीधितौ उल्लिखितानां अनुपलब्धाकराणां बहूनां वचनानां मूलसूचनेनानुगृहीतवतां तपःस्वाध्यायनिरतानां **श्रीविश्वनन्दनतीर्थानां** चरणारविन्दयोः नतिततिः समर्प्यते ।

कृतज्ञताः

- पूर्णप्रज्ञविद्यापीठस्य उपकुलपतिभ्यः संस्कृतक्षेत्रे भीष्मायमानेभ्यः एतत्प्रबन्ध-निर्माणे आवश्यकसूचनाः दत्तवद्भ्यः **प्रो.के.टि.पाण्डुरङ्गि महाभागेभ्यः,**
- विद्वद्वलये आदरणीयेभ्यः तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य मानितविश्व-विद्यालयस्य भूतपूर्वकुलपतिभ्यः **प्रो.डि.प्रह्लादाचार्येभ्यः,**
- श्रीवेङ्कटपत्याचार्यवंशोद्भवेभ्यः ग्रन्थकृत्सम्बन्धिचरित्रादिविषयविवरणेन उप-कृतवद्भ्यः होन्नाळिवास्तव्येभ्यः **श्रीबिदरहळ्ळिश्रीनिवासाचार्येभ्यः** , तत्तनूजेभ्यः **श्रीकृष्णाचार्येभ्यः** तथा तद्वंश्यीयेभ्यः रट्टिहळ्ळिकृतनिवा-सेभ्यः **श्रीराघवेन्द्राचार्यदम्पतिभ्यः** ,
- प्रथमवयः आरभ्य वात्सल्येन प्रेम्णा च मादृशेषु परश्शतेषु स्वीयविद्याधारां वर्षितवद्भ्यः स्वनामधन्येभ्यः मान्येभ्यः पूर्णप्रज्ञविद्यापीठस्य अध्यापकेभ्यः **दि. श्रीअणण्याचार्य-श्रीहयवदनपुराणिक-श्रीकेशव बायरिआचार्य-श्रीविठ्ठलदास भट्टाचार्य-श्री डि.रामचन्द्राचार्-दि.श्री अनन्त त-न्त्रिआचार्य-श्रीहरिदास भट्टाचार्य-श्रीवेङ्कटेश बायरिआचार्य-श्री-विष्णुमूर्ति मञ्जित्तायाचार्य-श्रीके.एन्.गुरुराजाचार्य-श्री गुरुप्रसा-दाचार्य-श्रीवेङ्कटेश देशपाण्डेआचार्य-श्रीरामविठ्ठलाचार्य-श्रीबद-रीनारायणाचार्य-श्रीमुरलीधर भट्टाचार्य-श्रीरङ्गनाथ कट्टिआचार्य-श्रीशङ्करनारायण अडिगाचार्य-श्रीअनन्तकृष्ण उप्पार्णाचार्य-श्री-सूर्याचार्य-श्रीगुरुराज मठदाचार्यमहोदयेभ्यः,**
- आदौ मातृकां प्रदाय शोधप्रबन्धे उपक्रामितवद्भ्यः जयतीर्थहस्तलिखितग्रन्था-लयस्थापकेभ्यः परश्शतग्रन्थनिर्माण-सम्पादनप्रथितयशोभ्यः भूमिकासम्बन्धि-

विषयचर्चया अन्यान्यविधाभिश्च उपकृतवद्भ्यः **डा.व्यासनकेरे प्रभञ्जनाचार्येभ्यः,**

- पूर्णप्रज्ञसंशोधनमन्दिरस्य निदेशकेभ्यः युवसु सदा मार्गदर्शनशीलेभ्यः, शोधप्रबन्धेऽस्मिन् नैकप्रकारैः मार्गदर्शनं कृतवद्भ्यः, आवश्यकसूचनाः दत्तवद्भ्यः **डा.ए.वि.नागसम्पिगेमहोदयेभ्यः,**

- मातृकादानेन उपकृतवद्भ्यः, मध्येमध्ये आवश्यकसूचनाः दत्तवद्भ्यः सम्प्रति जयपुरसंस्कृतविश्वविद्यालये दर्शनविभागाध्यक्षेभ्यः मित्रमणिभ्यः **श्रीवीरनारायण पाण्डुरङ्गि महोदयेभ्यः**

- प्रकाशनात्पूर्वं ग्रन्थमवलोक्य आवश्यकसूचनाः दत्तवद्भ्यः मित्रवर्येभ्यः **डा. सत्यनारायणाचार्येभ्यः, डा.श्रीनिवास वरखेडिमहोदयेभ्यः, श्री एच्.पि.नागराजमहोदयेभ्यः, श्री सि. आर्. प्रदीपसिंहाचार्येभ्यः**

- मातृकादानेन महान्तमुपकारं विहितवद्भ्यः **मैसूरुनगरस्थप्राच्यविद्यासंशोधनालयाधिकारिभ्यः,** बेङ्गलूरुश्रीनगरनिवासिभ्यः **श्रीजहगीरदारमहोदयेभ्यः, श्री सि. आर्. प्रदीपसिंहाचार्येभ्यः**

- ग्रन्थकृतां ग्रामं रट्टिहळ्ळिं महता श्रमेण मूलमातृकां Scan कृत्वा दत्तवद्भ्यः **श्रीनिधिमहोदयाय**

- सज्जीकृतस्य ग्रन्थस्य LATEX इति तन्त्रांशे सुलभतया सुन्दरतया च प्रकाशनाय तथा नानाविधतन्त्रांशोपयोगे साहाय्यमाचरितवद्भ्यः **श्रीनिधि-वेदगर्भश्रीनिवास-एन् गुरुप्रसादमहोदयेभ्यः**

- उल्लेखानामाकरान्वेषणेन नानाविधसूचनाभिश्चोपकृतवद्भ्यः **श्रीमतीमीरा ताडपत्रि तथा श्रीश्रीश राव्-महोदयेभ्यः**

- मूलमातृकातः अतिशुद्धपाठानामुद्धारे सहकृतवद्भ्यः **श्रीभीमसेनाचार्य-श्रीरामचन्द्राचार्येभ्यः तथा सुधाविद्यार्थिने जयतीर्थाय**
- **मातापितृभ्यः** तथा, कार्येऽस्मिन् सहकृतवद्भ्यः अन्येभ्यः **मित्रेभ्यः, हितचिन्तकेभ्यः**

सप्रश्रयं कृतज्ञताः समर्प्यन्ते ।

शुभान् ध्यायन्ति ये कामान् गुरुदेवप्रसादजान् ।
इतरानात्मपापोत्थान् तेषां विद्या फलिष्यति ॥

(तं.सा. ४-१०३)

सङ्क्षिप्तनामसूची

(अ.को.)	अमरकोशः
(अ.पु.)	अग्निपुराणम्
(अणु.भा.)	अणुभाष्यम्
(अनु.क्र.)	अनुक्रमणिका
(अनु.व्या.)	अनुव्याख्यानम्
(अभि.)	अभिधानम्
(आ.उ.भा.)	आथर्वणोपनिषद्भाष्यम्
(आ.पु.)	आदित्यपुराणम्
(आप.)	आपस्तम्भः
(ई.उ.)	ईशावास्योपनिषत्
(ऋ.भा.)	ऋग्भाष्यम्
(ऋ.सं.)	ऋक्संहिता
(ऐ.उ.)	ऐतरेयोपनिषत्

(ऐ.भा.)	ऐतरेयभाष्यम्
(क.नि.)	कर्मनिर्णयः
(का.उ.)	काठकोपनिषत्
(का.उ.भा.)	काठकोपनिषद्भाष्यम्
(के.उ.)	केनोपनिषत्
(के.स्तु.)	श्रीवादिराजयतिकृतकेशवादिस्तुतिः
(गी.ता.)	गीतातात्पर्यम्
(गी.ता.उ.)	गीतातात्पर्योदाहृतम्
(गी.भा.)	गीताभाष्यम्
(गु.दी.सू.पाठान्तरम्)	गुर्वर्थदीधितिसूचितं पाठान्तरम्
(छा.उ.)	छान्दोग्योपनिषत्
(छा.भा.)	छान्दोग्यभाष्यम्
(तं.भा.)	तन्त्रभागवतम्
(तं.सा.)	तन्त्रसारः
(त.प्र.)	तत्वप्रदीपः
(ता.नि.)	महाभारततात्पर्यनिर्णयः
(तै.उ.)	तैत्तरीयोपनिषत्
(तै.भा.)	तैत्तरीयोपनिषद्भाष्यम्
(धा.पा.)	धातुपाठः [पाणिनीयः]
(ना.प.उ.)	नारदपरिव्राजकोपनिषत्
(नि.)	निरुक्तम्
(निघ.)	निघण्टुः
(न्या.दी.)	न्यायदीपिका
(न्या.सु.)	न्यायसुधा

(प.मा.)	पद्यमाला
(प.रा.)	पञ्चरात्रम्
(पा.सं.)	पाद्मसंहिता
(पा.सू.)	पाणिनीयसूत्रम्
(पु.सू.)	पुरुषसूक्तम्
(प्र.ल.)	प्रमाणलक्षणम्
(बृ.उ.)	बृहदारण्यकोपनिषत्
(बृ.भा.)	बृहदारण्यकोपनिषद्भार्यम्
(ब्र.सू.)	ब्रह्मसूत्रम्
(ब्र.सू.भा.)	ब्रह्मसूत्रभाष्यम्
(भ.गी.)	भगवद्गीता
(भा.)	भागवतम्
(भा.ता.)	भागवततात्पर्यम्
(म.भा.ता.नि.)	महाभारततात्पर्यनिर्णयः
(मनु.)	मनुस्मृतिः
(य.प्र.क.)	यतिप्रणवकल्पः
(या.पु.सू.)	याजुषपुरुषसूक्तम्
(यो.दी.)	योगदीपिका
(वा.पु.द.वा.स्तो.)	वामनपुराणान्तर्गतदधिवामनस्तोत्रम्
(वि.)	विश्वकोशः
(वि.स.ना.स्तो.)	विष्णुसहस्रनामस्तोत्रम्
(वि.ती.)	विष्णुतीर्थीयम्
(वि.पु.)	विष्णुपुराणम्

(श्वेता.उ.)	श्वेताश्वतरोपनिषत्
(ष.प्र.)	षट्प्रश्नोपनिषत्
(ष.प्र.भा.)	षट्प्रश्नोपनिषद्भाष्यम्
(स.र.मा.)	सत्तत्वरत्नमाला
(स.स्मृ.)	सदाचारस्मृतिः
(स्तो.मा)	स्तोत्रमालिका
(ह.वं.)	हरिवंशः

1

तन्त्रसारसङ्ग्रहे प्रथमोऽध्यायः

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः तन्त्रसारसङ्ग्रहः

प्रथमोऽध्यायः

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीवेङ्कटेशाय नमः ॥

हरिः ओम् ॥

1.1 मङ्गलाचरणम्

जयत्यब्जभवेशेन्द्रवन्दितः कमलापतिः ।
अनन्तविभवानन्दशक्तिज्ञानादिसद्गुणः ॥ 1 ॥

॥ अथ श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य
श्रीमतन्त्रसारसङ्ग्रहस्य श्रीवेङ्कटपत्याचार्यकृता टीका गुर्वर्थदीधितिः ॥

श्रीमद्वेदव्यासाय नमः । श्रीमदानन्दतीर्थभगवत्पादाचार्यवर्यगुरुभ्यो नमः । निरन्तरायोऽस्तु । श्रीरस्तु ।[1]

[1] प्रा.पाठे श्रीलक्ष्मीवेङ्कटेशाय नमः ॥ ज.पाठे श्रीगुरुभ्यो नमः ॥ हरिः ओम् ॥

सुजनमनोरथदानकामधेनू नृहरिच्चरणावभिष्टवीमि भक्त्या ।
यदुमुनिवरकृष्णयोश्च पादौ बहुमतिजयराजयोश्च सद्वन्द्यौ[1] ॥ 1 ॥

वेदेशस्वामिपादानां भजतामिष्टदौ सताम् ।
तच्छात्रशिष्यदासोऽहं[2] चरणावाश्रयेऽन्वहम् ॥ 2 ॥

यत्पादस्मृतिमात्रेण पाण्डित्यं प्राप्यते नरैः ।
तान्वन्दे यादवाचार्यानस्मद्विद्यागुरोर्गुरून् [3] ॥ 3 ॥

श्रीमदाचार्यवाक्पङ्केरुहनित्यप्रबोधदः ।
श्रीनिवासार्यतरणिर्भासतां मद्धृदम्बरे ॥ 4 ॥

अथैषां कृपया पूर्वटीकाश्चालोच्य सादरम् ।
व्याकरिष्ये वचःशुध्द्यै तन्त्रसारस्य सङ्ग्रहम् [4] ॥ 5 ॥

---

1 `-जयराजयोरपीड्यौ' इति वि.पाठः । अत्र, यदवश्च मुनयश्च = यदुमुनयः । यदुमुनीनां वरौ = यदुमुनिवरौ । यदुमुनिवरौ च तौ कृष्णौ च = यदुमुनिवरकृष्णौ । तयोरिति विग्रहः । यदुकृष्णः यदुकुलोत्पन्नः वसुदेवसुंतरूपी भगवान् । मुनिवरकृष्णः वासिष्ठकृष्णत्वेन प्रथितः वेदव्यासरूपी भगवान् । तयोः पादौ अभिष्टवीमि इत्यन्वयः । बहुमतिरिति अत्र पूर्णप्रज्ञापरनामधेयाः श्रीमदानन्दतीर्थाः विवक्षिताः, ये व्याचिख्यासितग्रन्थस्य कर्तारः । जयराजशब्देन च श्रीजयतीर्थाः विवक्षिताः । एते महानुभावाः श्रीमदानन्दतीर्थानामष्टादशग्रन्थानां टीकाः विलिख्य द्वैतसिद्धान्तपरम्परायां टीकाकृत्पादाः इत्यपि प्रथिताः ।

2 तेषां = श्रीवेदेशतीर्थानां छात्राः = श्रीयादवाचार्याः । [श्रीयादवाचार्याणां स्तुतिः अग्रिमश्लोके पृथग्विहिता ।] तेषां शिष्याः = श्रीश्रीनिवासतीर्थाः, ये प्रकृतग्रन्थकृतः पितृपादाः गुरवश्च । तेषां दासः = सुतत्वात् शिष्यत्वाच्च सेवक इत्यर्थः ।

3 अस्माकं = प्रकृतग्रन्थकृतां श्रीवेङ्कटपत्याचार्याणां विद्यागुरोः = श्रीश्रीनिवासतीर्थानां गुरुभूतानित्यर्थः । अग्रे चतुर्थाध्यायीय-138तमश्लोकव्याख्यावसरे ग्रन्थकारैरेवमुक्तम् - विस्तरस्त्वस्मत्परमगुरुयादवाचार्यकृतसुधाटिप्पण्यां द्रष्टव्यः - इति ।

4 `बहुज्ञैर्बहुटीकाभ्यो बुद्ध्यारोहार्थमञ्जसा । मध्वोक्ततन्त्रसारार्थसङ्ग्रहः क्रियते मया ॥' इति वि.पाठः । परन्त्वयं छलारीशेषाचार्यकृतस्य तन्त्रसारार्थसङ्ग्रहस्य श्लोकः । अन्यदीयग्रन्थस्य समग्रश्लोकः अन्यत्र लिखित इति अत्याश्चर्यकरम् ।

अथ सर्वज्ञचूडामणिः परमकारुणिकः श्रीमदानन्दतीर्थार्यवर्यो भगवत्प्रतिपादकमन्त्रजपतत्पूजाहोमादेर्ज्ञानद्वारा सकलपुरुषार्थसाधनप्रसादहेतुतया सर्वैरनुष्ठेयत्वात् तदर्थं जपादिसन्मार्गे प्रवर्तमानानां यावदननुष्ठाने ज्ञानं न भवति तावत्समस्तमपि निखिलसद्धिताय निरूपयितुं विष्णुतन्त्रसारसङ्ग्रहाख्यं[1] ग्रन्थं चिकीर्षुः स्वयं निरन्तरायोऽपि स्वभावादेव कृतं कमलापतिस्तुतिरूपं मङ्गलं शिष्यशिक्षायै ग्रन्थादौ निबध्नाति - **जयतीति ॥ कमलापतिर्जयति** उत्कृष्टो वर्तते । अर्थान्तरोत्कर्षार्थो जयिरकर्मकः । `जयेर्जयाभिभवयोः' इत्यभियुक्तवचनात् [2]।

निखिलवाङ्मनसनियामिकायाः रमायाः ग्रन्थारम्भेऽभिवन्द्यतासूचनाय **कमलापतिः** इति विशेष्यं निरदिक्षत् । तत्स्तुतेः पृथगकरणं तु तस्या अत्यन्तरङ्गप्रियत्वज्ञापनार्थम् । `अत्यन्तरङ्गं यत् तस्मान्न हरेः पृथगीरिता । श्रीः स्वरूपविभेदेऽपि' इति बृहद्भाष्ये (बृ.भा.अ3-शाकलब्राह्मणम्) पृथगवचने निमित्तोक्तेः ।

नन्वितरपरित्यागेनास्यैव कुतो वन्द्यत्वमित्यतः सर्वस्वभक्तेष्टदातृत्वेन प्रसिद्धायाः कमलायाः पतिरित्यनेनेष्टत्वस्याभिहितत्वात् सर्वशास्त्रार्थभूतस्य तस्याधिकृतत्वस्य सिद्धत्वात् । विशिष्टत्वे हेतुभूतं विशेषणद्वयमाह - **अब्जभवेति । अनन्तेति च ॥ अब्जभवो** ब्रह्मा, **ईशो** रुद्रः, **इन्द्रः** पुरन्दरस्तैः **वन्दितः** अभिवन्दितः स्तुतश्च[3]। सर्वदेवताधीश्वरत्वेन प्रसिद्धब्रह्मरुद्रेन्द्रवन्द्यत्वे तदितरवन्द्यत्वं कैमुत्येनैव सेत्स्यतीति तन्मात्रग्रहणम् । अब्जभवपदस्य प्राक्प्रयोगोऽभ्यर्हिततया । `अभ्यर्हितं पू-

---

[1] अत्र विष्णुशब्दयोजनेन नाम लिखितम् । तथा प्रसिद्धिः यद्यपि नास्ति । तथापि `अथ विष्णूदिते तन्त्रसारे' इत्यग्रे[4-1] आचार्यैः कथितं मनसि निधायैवमुक्तमिति भाति ।

[2] मायावादखण्डनटीकायामुद्धृतम् । तत्वोद्योतगुरुराजीये [मा.रा.सं.स.द्वितीयभागः पृ.सं.390] इदं देववचनमित्युक्तम् । अयं कः देवः इति न ज्ञातम् । `आद्येऽर्थेऽसावकर्मकः । उत्कर्षप्राप्तिराद्योऽर्थः, द्वितीयेऽर्थे सकर्मकः ॥' इति शेषः । सिद्धान्तकौमुदौ ``जि अभिभवे [धा.पा.947] । अभिभवो न्यूनीकरणं न्यूनीभवनं च । आद्ये सकर्मकः । शत्रून् जयति । द्वितीये त्वकर्मकः । अध्ययनात्पराजयते । अध्येतुं ग्लायतीत्यर्थः ।' इत्युक्तम् । प्रकृते तत् विवरणं नान्वेति ।

[3] वदि अभिवादनस्तुत्योरिति धातुपाठादिदमर्थद्वयम् ।

र्वम्' इति स्मरणात्[1]। न च ब्रह्मादिवन्दितत्वमसम्भावितमित्याह - **कमलापतिरिति॥** तथा च कामतो ब्रह्मरुद्रादिपददातृत्वादिना श्रुतिप्रसिद्धाया[2] रमायाः पतित्वेन तदधीनब्रह्मादिवन्द्यत्वं नासम्भावितमिति भावः। अनन्तत्वं विभवत्वं च प्रत्येकमानन्दादीनां विशेषणम्। न विद्यते अन्तो येषां ते अनन्ताः विविधं भवनं येषां ते विभवाः[3]। तथा च भगवद्गुणाः प्रत्येकमप्यमितगुणरूपक्रियाद्यात्मका इत्युक्तं भवति। तदुक्तं - 'सर्वे सर्वगुणात्मानः सर्वकर्तार एव च' इति। **विभवो** महैश्वर्यं वा। **शक्तिः** सामर्थ्यम्। आदिपदेन तेजःप्रभृतीनां ग्रहणम्। अनन्ताश्च ते विभवानन्दशक्तिज्ञानादयश्च त एव सन्तः निर्दुष्टाः गुणा यस्येति विग्रहः।[4] गुणानां निर्दुष्टत्वं नामाल्पत्वपारतन्त्र्यादिदोषासमानाधिकरणत्वम्। अत्राद्यविशेषणे सर्वोत्तमत्वेन वन्द्यत्वमभिप्रेतमिति न रमायामतिव्याप्तिः ॥1॥

1.2 उपोद्घातः

ननु यत् प्रमाणत्वे सतीष्टसाधनतावबोधकं तदेवारम्भणीयम्। अस्य च कथमारम्भणीयतोपयोगिप्रामाण्यादीत्याशङ्कां परिहर्तुं तन्त्रसारागतिप्रकारं वदन्नाप्तिमूलतां दर्शयति - **विधिमिति॥**

विधिं विधाय सर्गादौ तेन पृष्टोऽब्जलोचनः।
आह देवो रमोत्सङ्गविलसत्पादपल्लवः ॥ 2 ॥

---

1 अल्पाच्तरं पूर्वमिति 2-2-34तमे पाणिनिसूत्रे इत्थं वार्तिकक्रमः "लघ्वक्षरं पूर्वम्। अभ्यर्हितं च' इति। एवं च अभ्यर्हितं पूर्वमित्यर्थानुवाद इति ज्ञेयम्।

2 अम्भ्रणीसूक्ते 'यं कामये तं तमुग्रं कृणोमि' इत्यादिमन्त्रेषु प्रसिद्धिरत्राभिमता। इदं च सूक्तमग्रे चतुर्थाध्याये 'स्वदृष्टं सूक्तमखिलम्' इति 56तमे श्लोके लक्ष्मीमन्त्रतया कथितम्। तत्र प्रकृतगुवर्थदीधितिग्रन्थकृता समग्रं सूक्तं व्याख्यातम्।

3 अत्र भवशब्दः भावार्थक इति द्योतनाय भावार्थे प्रसिद्धल्युडन्तभवनशब्देन विग्रहः प्रादर्शि।

4 अत्र मूलमातृकायामदृष्टमेकं वाक्यं ज.पाठे अस्ति। तच्च - चैत्यवन्दनकाकदन्तपरीक्षाग्रन्थव्यावृत्त्यर्थं पदद्वयम् - इति। अत्र पदद्वयमित्यनेन अब्जभवेति अनन्तविभवेति च ग्राह्यम्।

विधिं विरिञ्चं विधायेत्यनेन पुत्रत्वोक्त्या श्रोत्रानुकूल्यं[1], तद्धि वक्तुः प्रेमास्पदत्वं तत्वज्ञानयोग्यत्वं च। विरिञ्चिस्तु हरेः प्रेमविषयः। अनादितः सर्वदोषविहीनत्वेन तत्वज्ञानयोग्यश्चेति सुप्रसिद्धम् । ननु श्रोतुर्विरिञ्चस्यानुकूलत्वेऽपि इन्द्रविरोचनवत् सहश्रोतुरयोग्यत्वादन्यथोपदेशः किं न स्यादित्यतस्तदा विरिञ्चेतरेषां सृष्टिरेव नेत्याशयेनाह - **सर्गादाविति॥** प्रसङ्गानुकूल्यं दर्शयति - **तेन पृष्ट इति॥** सर्वोत्तमः सकलगुणपूर्णः कः? किं तत्र प्रमाणम् ? जप्या मन्त्राश्च के? तत्प्रतिपाद्यश्च कः? कथं तद्ध्यानमनुष्ठेयम् ? पूज्यश्च कः? पूजा च कथं कार्या? अज्ञानां पूजायाः साक्षात्कर्तुमशक्यत्वेन प्रतिमायामेव कर्तव्यत्वात् तदर्थं प्रतिमा कार्या। तन्निर्माणविधिश्च कः? किं तल्लक्षणम् ? `अप्रतिष्ठितबिम्बस्य पूजनं सिद्धिहानिकृत्' इत्युक्तेः अवश्यं प्रतिष्ठा कार्या। सा च कथं कर्तव्येत्यादि नानाप्रकारेण स्वयं जानताऽपि विशेषज्ञानाय स्थापनाय वा सकललोकानुग्रहेच्छया तेन विरिञ्चेन पृष्ट इत्यर्थः। तथा च निष्प्रयोजनस्य प्रश्नायोगाच्छ्रोतुः प्रयोजनोद्देशरूपं प्रसङ्गानुकूल्यमनेन सिध्यति।

उपदेशकाले उपदेष्टुः प्रसादाभावे उपदिष्टं न फलवद्भवति। यथोक्तं - `नातिप्रसन्नहृदयो यद्द्याद्गुरुरप्यसौ। न तत्सत्यं भवेत्' इति तात्पर्यनिर्णये (म.ता.नि.1-125)। अत आह - **अब्जलोचन इति॥** प्रसादेन अब्जवद्विकसितलोचन इत्यर्थः। अनेन करणविशेषस्य पटुत्वोक्त्या सर्वकरणपाटवं लक्ष्यते। अब्जलोचनशब्दो हि भगवत्येव प्रसिद्धः। यथोक्तमैतरेयभाष्ये - ` प्रसिद्धश्च पुण्डरीकाक्ष इति भगवान्नारायणः' (ऐ.भा.प्रघट्टक2-अध्याय1-खण्ड1)। `पुण्डरीकेक्षणो विष्णुः सहस्राक्षः सुराधिपः' इति(ऐ.भा.प्रघ्ट्टक3-अध्याय2-खण्ड3)। अन्यच्च प्रसादज्ञापकमाह - **रमोत्सङ्गेति॥ उत्सङ्गे** अङ्के। स्त्रीसन्निधानेन प्रसादो भवतीति लोकन्यायेनोक्तम् । वस्तुतस्तु भगवतो न रमायाः अतिशयोऽस्ति। अन्यानपेक्षस्वरूपभूतनित्याभिव्य-

1 दर्शितमिति शेषः।

क्तज्ञानादिविशिष्टत्वादित्याह - **देव इति ॥** गत्याद्यर्थस्य दीव्यतेः पचाद्यच् [1]। तेन `मुख्यामुख्ययोर्मुख्ये सम्प्रत्ययः' इति न्यायेनोक्तलक्षणसार्वज्ञ्यसिद्ध्या विवक्षितार्थतत्वज्ञानम् ।

अयमाशयः - वाक्यप्रामाण्यं तावन्निर्दोषतया सम्भवति। निर्दोषता चापौरुषेयतयाऽऽप्तिमूलतया च। आप्तिश्च वक्त्राद्यानुकूल्यमेव। आप्तिमूलत्वात् तन्त्रसारस्य प्रामाण्यसिद्धिः। प्रमादाज्ञानविपर्ययाणां वक्तरि नारायणेऽसम्भवात् । विप्रलम्भस्य श्रोतृदोषभूततत्वज्ञानायोग्यत्ववक्रप्रेमानास्पदत्वनिबन्धनस्य तदभावेनाभावनिर्णयात् । अपहासस्य श्रोतुः प्रयोजनानुद्देशाख्यप्रसङ्गदोषनिबन्धनस्य तदभावेनाभावनिश्चयात् । ब्रह्मादिप्रेक्षावत्प्रवृत्तिविषयत्वेनेष्टसाधनतावबोधकत्वं च सिध्यति। अतस्तन्त्रसारस्यारम्भणीयतेति ॥2 ॥

1.3 प्रणवलक्षणं तन्माहात्म्यं च

किमाहेत्यतो वक्ति - **अहमित्यादिना ॥**

अहमेकोऽखिलगुणो वाचकः प्रणवो मम ।
अकाराद्यतिशान्तान्तः सोऽयमष्टाक्षरो मतः ॥ 3 ॥

अहमेको मुख्यः सर्वोत्तम इत्यर्थः। अखिलगुणपूर्णत्वे किं मानमित्यतः सदागमः सर्वोऽपीत्याशयेन प्रथमतः प्रणवः प्रमाणमित्याह - **वाचक इति ॥ प्रणवः** ॐकारः उक्तविशेषणयुक्तस्य मम **वाचकः** अभिधायकः गुणपूर्णत्वाभिधायक इति यावत् । तत्प्रकारस्तु - `ओतत्ववाची ह्योङ्कारो वक्त्यसौ तद्गुणोतताम्' (अनु.व्या.1-1-9)। `ओमशेषगुणाधारः' (ऋ.भा.अ1-सू1-श्लो2) इत्यादिनाऽवगन्तव्यः। **एकः**

---

[1] `नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' [पा.सू.3-1-134] इति पाणिनिसूत्रस्य एकदेशानुवादोऽयम् । यद्यपि गणपाठे पचादिगणे दिव्धातुः न पठितः। तथापि तस्याऽकृतिगणत्वात् दिव्धातोरपि अजिति भावः।

सर्वमन्त्रेषु प्रधानः प्रणव इति वा। यथोक्तं - ` स सर्वमन्त्रोपनिषद्वेदबीजसन्तानम्' इति (भा.12-6-6) भागवते। प्रणवोऽष्टमूर्तिप्रतिपादकोऽपीति वक्तुं तस्याष्टाक्षरोपेतत्वमाह - **अकारादीति** ॥ **सोऽयं** प्रणवः **अष्टाक्षरः** अष्टौ अक्षराणि यस्मिन्स तथोक्तः। अष्टाक्षरत्वस्य विवरणम् - **अकारादीति ॥** अकार आदौ अतिशान्तः अन्ते यस्य स तथा। अकारोकारमकारनादबिन्दुघोषशान्तातिशान्तभेदेनाष्टाक्षरो **मतः** संमतः। ते च नादादयो वर्णाः मन्त्रशास्त्रे प्रसिद्धाः।

ननु प्रणवस्याष्टाक्षरत्वं न सम्भवति। नादादीनामक्षरत्वे पञ्चाशदक्षरापेक्षयाऽधिकाक्षरापत्तेरिति चेन्न। भूताकाशगुणध्वनिभिरस्मदादिव्यङ्ग्यानां पञ्चाशत्त्वेऽप्यनन्तमात्रान्तमुदाहरन्ति यम्'[1] इत्यादिषु अभियुक्तैर्मातृकापदव्यवहारात् नादादीनामनन्तानामस्मदादिध्वन्यव्यङ्ग्यानाम् अक्षराणामभ्युपगमे बाधकाभावात्। `वर्णत्रयम्' इत्युत्तरग्रन्थे [तं.सा.1-35] वर्णत्रयस्यैव न्यासमभिधाय नादादीनां न्यासाकथनं तु पृथगुच्चारणाविषयत्वादिति सम्प्रदायविदः।

केचित्तु नादादयो नाक्षरशब्दवाच्यपञ्चाशद्वर्णान्तर्गतास्तथापि नादादिष्वक्षरधर्मेषु `अष्टाक्षरो मतः' (तं.सा.1-3) इत्यक्षरशब्दप्रयोग औपचारिकः। न च वाच्यमेवं हि नादादीनां तुर्यादिवाचकत्वानुपपत्तिरिति। अक्षरधर्मस्य स्वरस्य वाचकत्ववदुपपत्तेः। अत एव `वर्णत्रयम्' इति वर्णत्रयस्यैव न्यासः। अन्यथा नादादीनामपि तत्कथनप्रसङ्गादित्याहुः। `अशीत्युत्तरसहस्रवर्णानामभावाच्च तत्स्थविष्णुरूपाण्येव तत्सङ्ख्यानि' इत्यैतरेयभाष्ये तृतीयारण्यकाष्टमखण्डव्याख्यापरेऽभिहितं च (ऐ.भा.प्रघट्टक2-अध्याय8-खण्ड2) ॥3 ॥

अथ प्रणवाक्षरैर्वाच्यमूर्तीराह - **स इति ॥**

---

1 पूर्णश्लोकः एवं विद्यते - अनन्तमात्रान्तमुदाहरन्ति यं त्रिमात्रपूर्वं प्रणवोच्चयं बुधाः। तदाभवद्भाविचतुर्मुखाकृतिर्जपाधिकारी यतिरस्य सूचितः ॥ - इति। म.वि. 4-32।

स विश्वतैजसप्राज्ञतुरीयात्मान्तरात्मनाम् ।
परमात्मज्ञानात्मयुजां मद्रूपाणां च वाचकः ॥ 4 ॥

सः सप्रभेदः प्रणवः अकाराद्यंशैर्विश्वाद्यष्टमूर्तीनां वाचकः । न केवलं ममेति चार्थः । यद्यपि भगवन्मूलरूपप्रतिपादकत्वमात्रेणाष्टमूर्तिप्रतिपादकत्वमपि सेत्स्यति । तद्रूपाणां सर्वथा भेदाभावात् । तथापि भेदप्रतिनिधिविशेषस्य विद्यमानत्वेन विशिष्योक्तिरुपपन्नेति ध्येयम् ।

`कृष्णो रामो नृसिंहश्च वराहो विष्णुरेव च ।
परञ्ज्योतिः परं ब्रह्म वासुदेव इति क्रमात् ॥
अकारादेस्तथा शान्तातिशान्तस्य देवताः'

-इति[1] प्रणवकल्पोक्तपक्षान्तरसमुच्चयार्थो वा चशब्दः । यद्वा चशब्दः अकाराद्यष्टाक्षरवाच्यानुक्तमूर्तिविशेषसमुच्चायकः । तत्प्रकारस्तु -

`सृष्टिकर्ता ब्रह्मनामा योऽसृजच्चतुराननम् ।
अन्तर्यामी विरिञ्चस्य सोऽकारार्थो जनार्दनः ॥

वैकुण्ठलोक आस्ते स द्वितीयवपुषा हरिः।
उकारवाच्यः स विभुर्नृसिंहो रुद्रनामकः॥

एतत्त्रियात्मकं विष्णुं प्रणवोऽयं त्रियात्मकः ।
एकं पृथगिवाचष्टे बिन्दुर्वक्त्यनिरुद्धकम् ॥

प्रद्युम्नाद्यान्नादपूर्वाः सर्वान्नारायणात्मकान् ।

---

1 यतिप्रणवकल्पः श्लो.5,6 ।

पद्मनाभादिका एव मूर्तीर्नारायणोत्तराः ।

प्रणवोऽयं वदत्यष्टौ तस्मान्नान्याभिधायकः'

(ऐ.भा.प्रघट्टक2-अध्याय2-खण्ड8) इति ऐतरेयभाष्योक्ततत्वसाराख्यप्रमाणादवगन्तव्यः । `न वा एकेनाक्षरेण' इत्युक्तेर्न परमात्मेत्यत्र[1] छन्दोभङ्गः शङ्कनीयः । `ज्ञानयुजाम्' इति पाठे नामैकदेशानुवादो भीम इतिवत् [2] ॥ 4 ॥

1.4 पञ्चाशन्मातृकामूर्तयः

मातृकामन्त्रा अपि गुणपूर्णत्वे प्रमाणमित्याशयेन तत्प्रतिपाद्यपञ्चाशन्मूर्तयः प्रणवप्रतिपाद्यमूर्त्यभिव्यक्ता इत्याह - **तद्रूपेति** ॥

तद्रूपभेदाः पञ्चाशन्मूर्तयो मम चापराः ।
पञ्चाशद्वर्णवाच्यास्ता वर्णास्तारार्णभेदिताः ॥ 5 ॥

तद्रूपैर्विश्वादिरूपैः भिद्यन्ते विश्लिष्यन्त इति **तद्रूपभेदाः ममापराः** चाजाद्याः **पञ्चाशन्मूर्तयः** पञ्चाशद्वर्णैर्वाच्याः । सन्तीति शेषः ।[3]

अथ प्रणवाष्टाक्षरेभ्यः पञ्चाशद्वर्णानामभिव्यक्तिमाह - **वर्णा इति** ॥ पञ्चाशद्वर्णाः **तारार्णभेदिताः** तारार्णैः प्रणवाक्षरैः भेदिताः सञ्जातभेदास्तेभ्यो व्यक्ता इति यावत् । `तदस्य सञ्जातं तारकादिभ्य इतज्' इति (पा.सू.5-2-36) इतच्प्रत्ययः । **अन्ये तु -तारार्णभेदिता** इति प्रणवाक्षरव्याख्यानत्वेन स्थिता इत्यर्थः । पञ्चाश-

---

1 परमात्मज्ञानात्मयुजामित्यत्र इत्यर्थः ।

2 नामैकदेशे नामग्रहणमिति न्यायः अत्र अभिप्रेतः । भीम इत्येतत् भीमसेनेति नाम्नः एकदेशः । तथा ज्ञानात्मा इत्यस्यैकदेशः ज्ञानेतीति भावः ।

3 अत्र मूलमातृकायामविद्यमानमेकं वाक्यमन्यत्र पठ्यते - `यद्वा पञ्चाशदक्षराणां मूर्तयः अपराः नारायणाष्टाक्षरप्रतिपाद्यमूर्तयश्च तद्रूपभेदा इत्यर्थः ।' - इति

न्मन्त्राः अजादिमूर्तिप्रतिपादकाः ताराष्टाक्षरव्याख्यानरूपत्वेन तत्प्रतिपाद्यान् विश्वादीनपि प्रतिपादयन्तः प्रणवप्रतिपाद्यं गुणपूर्णं नारायणं प्रतिपादयन्तीति भावः - इत्याहुः ॥5॥

अष्टभ्यो वर्णेभ्यः कथं पञ्चाशतां व्यक्तिरित्यत आह - **द्विरष्टेति॥**

द्विरष्टपञ्चकचतुःपञ्चेत्येवाष्टवर्गगाः ।

द्विरष्टौ च, पञ्चानां वर्गाणां समूहः पञ्चकं च, चत्वारश्च पञ्च चेत्येवम् **अष्टवर्गगाः** अष्टवर्गस्थाः एते प्रणवाष्टाक्षरेभ्यो व्यक्ता इति पूर्वेण सम्बन्धः । अष्टवर्गाश्चैवम् । अकारादिविसर्जनीयान्तैः षोडशस्वराक्षरैरेको वर्गः प्रणवगताकारेण व्यक्तः । `कादयो मावसानाः स्पर्शाः'[1] इति सञ्ज्ञया पञ्चभिःपञ्चभिः[2] स्पर्शैः कवर्ग-चवर्ग-टवर्ग-तवर्ग-पवर्गेति पञ्चवर्गाः उकार-मकार-नाद-बिन्दु-घोषाख्यप्रणवाक्षरेभ्यः क्रमाद्व्यक्ताः । यरलवाख्यैरन्तस्स्थैश्चतुर्भिरपरो वर्गः स तु शान्ताद्व्यक्तः । ळसहितैः शषसहाख्यपञ्चभिरेको वर्गः स प्रणवस्यातिशान्ताख्याक्षराद्व्यक्त इति । एतेन अष्टमूर्तिभिः पञ्चाशतां मूर्तीनां व्यक्तिरप्यनेन क्रमेणेति सूचितं भवति । प्रणवाक्षरादेवैतेषां व्यक्तिरुक्ता भागवते । `ततोऽभूत्त्रिवृदोङ्कारः' (भा.12-6-4) इत्युक्त्वा `ततोऽक्षरसमाम्नायमसृजद्भगवानजः । अन्तःस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम्' इति (भा.12-6-8) ।

केचित्तु - द्विरष्टेति वर्गद्वयमुच्यते । एकैकवर्गस्याष्टवर्णात्मकत्वं द्रष्टव्यम् । पञ्चकेति पूर्ववत् । चतुःपञ्चेति नवाष्टाक्षरात्मा[3] एको वर्ग - इति वदन्ति ।

एवेत्यनेन -

`रूपशक्तेरभून्नादः सर्वव्यापी ह्यनाहतः ।

1 ल.सि.कौ. सञ्ज्ञाप्रकरणम् ।
2 पञ्चभिरिति एकवारं ज.पाठे ।
3 चतुःपञ्चेति नव, अष्टाक्षरात्मा' इति पदच्छेदोऽत्र विवक्षितः ।

नादाद्विनिर्गतो बिन्दुर्बिन्दोर्जाता कला ततः ॥

कलाशक्तेरभूदाद्यः स्वरस्तस्मात्स्वरात्त्रयः ।
तद्विकाराः स्वराः सर्वे जीवरूपाश्च षोडश ॥

शक्तेः पञ्चाङ्गतः पञ्चवर्गाः पञ्चाक्षरात्मकाः ।
कादयस्ते शरीराख्याः सम्भूता जीववर्जिताः ॥

शक्तेश्च सप्तधातुभ्यः सम्भूताः सप्त यादयः ।
शक्तिप्राणाद्धकारश्च क्षकारश्चोभयात्मकः ॥
पञ्चाशदिति विख्याताः' इति शारदाग्रन्थोक्तोत्पत्तिर्नेति सूचयामास ।

न च - `स्पर्शास्तस्याभवन्जीवात् स्वरा देहात्प्रजज्ञिरे । ऊष्माण इन्द्रियेभ्यश्च अन्तस्स्था बलतो विभोः' इति (भा.ता.3-13-46) तृतीयस्कन्ध-त्रयोदशाध्यायतात्पर्योदाहृतब्राह्मपुराणवाक्येऽन्यथा कथनात् तद्विरोधः स्वयूथ्याच्छङ्क्यः । तस्य चतुर्मुखसकाशादवान्तराभिव्यक्तिमपेक्ष्य प्रवृत्तत्वादत्रोक्तस्य च ब्रह्माण्डाद्बहिरोङ्कारादभिव्यक्तिमपेक्ष्य प्रवृत्तेरिति ॥ छ ॥

पञ्चाशन्मूर्तय इत्युक्तम् । कास्ता पञ्चाशन्मूर्तय इत्यतस्ता आह - अज इति ॥

अज आनन्द इन्द्रेशावुग्र ऊर्ज ऋतम्भरः ॥ 6 ॥
ॠघलृशौ लॄजिरेकात्मैर ओजोभृदौरसः ।[1]
अन्तोऽर्धगर्भः कपिलः खपतिर्गरुडासनः ॥ 7 ॥
घर्मो ङसारश्चार्वङ्गश्छन्दोगम्यो जनार्दनः ।
झाटितारिर्ञमष्टङ्की ठलको डरको ढरी ॥ 8 ॥

1 लॄजरेकात्मेति गु.दी.सू.पाठान्तरम् ।

णात्मा तारस्थभो दण्डी धन्वी नम्यः परः फली ।
बली भगो मनुर्यज्ञो रामो लक्ष्मीपतिर्वरः ॥ 9 ॥
शान्तसंवित् षड्गुणश्च सारात्मा हंसळाळुकौ ।
पञ्चाशन्मूर्तयस्त्वेता ममाकारादिलक्षकाः ॥ 10 ॥

जनिरहितत्वाद् **अजः** ।

आनन्दरूपत्वाद् **आनन्दः** ।

परमैश्वर्यवत्त्वाद् **इन्द्रः** । `इदि परमैश्वर्ये' (धा.पा.63) इति धातुः ।

`ईकारेणोच्यते लक्ष्मीः' इति वचनादीं लक्ष्मीं शास्तीति **ईशः** ।

उं रुद्रं ग्रसतीति **उग्रः** । दैत्यानां क्रूररूपत्वाद्वा ।

`ऊर्ज बलप्राणनयोः' इति (धा.पा.1550) धातोः **ऊर्जः** बलचेष्टावान् ।

ऋतं सत्यं जगद् बिभर्तीति **ऋतम्भरः** । ऋतुम्भर इति पाठे तल्लक्षितं कालं बिभर्तीत्यर्थः । विभक्त्यलोपादलुक्समासोऽयम् ।

`ॠकारो दनुजप्रसूः' इति धनञ्जयात् ॠं दनुं घारयति `घृ क्षरणदीप्त्योः' इति (धा.पा.1096) धातोर्दीपयत्यन्तः क्लेशयति पुत्रहननेनेति **ॠघः** ।

`ऌकारो देवमाता स्यात्' इति धनञ्जयाल्लृरदितिः तस्याः शं सुखं यस्मात्स **ऌशः** ।

`ॡकारः पूर्वदेवानां जननी स्मर्यते बुधैः' इति धनञ्जयात् ॡं दितिं पुत्रहननेन जयतीति **ॡजिः** । `जेता जश्च समाख्यात' इति अभिधानात् ॡज इत्येव स्यात् तथापि `तृतीयोऽतिशाय' इति सूत्रादिकारः । ॡजरेकात्मेति पाठे तु लाति जयति ऋच्छति च सर्वमित्यर्थो द्रष्टव्यः ।

एकात्मा मुख्यस्वामी ।

`ऐकारः स्यान्महेश्वर' इति धनञ्जयादैकारवाच्यं रुद्रं रमयतीति **ऐरः** ।

ओजः सामर्थ्यं बिभर्तीति **ओजोभृत्** ।

औ ब्रह्मा। `औकार उच्यते ब्रह्म' इति धनञ्जयात् । स रसो वीर्यमपत्यं यस्य स **औरसः ।**

अन्तयति नाशयतीति **अन्तः ।**

आसमन्ताद्दद्धाः ब्रह्मादयो गर्भे यस्येति **अर्धगर्भः ।**

सुखरूप इति कः। पाल्यते जगदनेनेति पिः। लीयते जगदनेनेति लः। ततः कर्मधारयः। `सुखादनन्तात् पालनाल्लीयनाच्च तं वै देवं कपिलमुदाहरन्ति' इति श्रुतेः (गीताभाष्ये अ.10 श्लो.26 उदाहृतबाभ्रव्यशाखावचनम्)।

खानामिन्द्रियाणां पतिरिति **खपतिः ।**

गरुडवाहनत्वाद् **गरुडासनः ।**

शत्रुसन्तापनाद् **घर्मः ।** `घर्मः स्यादातपे ग्रीष्म' इति विश्वः।

`ङकारो विषयः स्मृत' इति धनञ्जयात् ङा विषयास्तेषु सारो वरो **ङसारः ।**

चारूणि सुन्दराण्यङ्गानि यस्य स **चार्वङ्गः ।**

छन्दोभिर्ज्ञायत इति **छन्दोगम्यः ।**

न जायत इति जनः, नञः परनिपातः, अर्दयति च संसारमिति **जनार्दनः ।** `स नासीत्सोऽर्दयति' इति श्रुतेः[1]।

झाटिता द्राविता अरयो येन स **झाटितारिः ।**

`ञकारो गायके प्रोक्त' इति धनञ्जयात् ञं वेदादिना स्वगायकं मानयतीति **ञमः ।** ञः गर्गरध्वनिः। तेन मीयत इति ञमः। `अव स्वराति' इति श्रुतेः[2]।

पाषाणदारणकारणमायुधं टङ्कः। तद्वान् **टङ्की ।**

`ठो महेशः समाख्यातः। ल इन्द्रे लवणे लः स्यात्' इति धनञ्जयात् ठलयोः रुद्रेन्द्रयोः कं सुखं यस्मात्स **ठलकः ।** ठकल इति पाठे ठकौ रुद्रब्रह्माणौ लातीति

1 `स भूतः स जनार्दनः। स ह्यासीत् स नासीत् सोऽर्दयति' इति गी.भा.10-8उदाहृता बाभ्रव्यश्रुतिः।

2 ऋ.सं.8-69-9। इयं श्रुतिः कर्मनिर्णये व्याख्याता।

व्याख्येयम् । `कं सुखं परिकीर्तितम्' इति धनञ्जयः।

`बृहद्धनौ च डः प्रोक्तस्तथा चन्द्रस्य मण्डले ।' `रश्च रामेऽनले वज्रे ।' `कः प्रकाश उदाहृत' इति धनञ्जयात् डं चन्द्रमण्डलं रोऽग्निस्तयोः कः प्रकाशो यस्मात्स **डरकः** ।

ढं निर्गुणं मुक्तसमुदायं रमयतीति ढरश्चतुर्मुखः । सोऽस्यास्ति परिचारकतयेति **ढरी** ।

`निर्गुणे ढः प्रकीर्तित' इति धनञ्जयः।

णात्मा सुखरूपः । `णश्च निर्वृतिवाचक'[1] इत्यभिधानात् ।

तारयत्यनिष्टनिचयमिति **तारः** ।

`शिलोच्चये थकारः स्यात्' इति धनञ्जयात् थं शिलोत्तमं गोवर्धनं बिभर्तीति **थभः** ।

दण्डो यष्टिर्गोचारणादिक्रीडायामस्यास्तीति **दण्डी** ।

धनुष्मत्त्वात् **धन्वी** ।

सर्ववन्द्यत्वात् **नम्यः** ।

पिपर्तीति **परः** पूर्णः । `पॄ पालनपूरणयोः' इतिधातोः (धा.पा.1086) पचाद्यच् । `परः स्वो हरिरुद्दाम इति नामचतुष्टयम् । विष्णोर्गुह्यं तु यो वेद सर्वपापैः प्रमुच्यत'[2] इति वचनात् विष्णुरेव परः।

फलदातृत्वात् **फली** ।

बलवत्वात् **बली** ।

समग्रैश्वर्यादिरूपत्वाद् **भगः** ।

अवबोधरूपत्वात् **मनुः** । `मनु अवबोधन' इति धातोः (धा.पा.1471)।

इज्यते पूज्यते सर्वैरिति **यज्ञः** । `यज देवपूजे'ति धातोः (धा.पा.1002)।

रमत इति रः । न विद्यते मा परिच्छेदो यस्येत्यमः । रश्चासावमश्च **रामः** । रमयतीति

---

1 अभिधानग्रन्थस्थत्वेनोक्तमिदं वचनं महाभारते उद्योगपर्वणि उपलभ्यते । तत्रत्यः पूर्णश्लोकः इत्थं वर्तते - कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । कृष्णस्तद्भावयोगाच्च कृष्णो भवति शाश्वतः ॥ म.भा.5-68-5।

2 10-2-18 भा.ता.नि. उदाहृतप्रकाशिकावचनम् ।

वा । `आनन्दरूपो निष्परीमाण एष लोकश्चैतस्माद्रमते तेन राम'[1] इति श्रुतेः ।

लक्ष्मीस्वामित्वात् **लक्ष्मीपतिः** ।

व्रियत इति **वरः** ।

शान्ता सुखरूपा संवित् यस्यासौ **शान्तसंवित्** ।

ऐश्वर्यादिषड्गुणयुक्तत्वात् **षड्गुणः** ।

सार उत्कृष्ट आत्मा देहो यस्य स **सारात्मा** । `आत्मा देहे धृता'विति वचनात् ।

हन्ति जानाति च सर्वमिति हम् । `हन हिंसागत्योः' इति धातोः (धा.पा.1012) । सारत्वात्सः ।

`ळकारश्चामृते स्मृत' इति धनञ्जयात् ळौ मुक्तौ आळू ब्रह्मेन्द्रौ तयोः कं सुखं यस्मात्स **ळाळुकः** । `आकारस्तु पितामहे' । `इन्द्रे विरोचने चैव ळुर्ळाह्वाने प्रकीर्तित' इति च ।

इत्येताः मम **पञ्चाशन्मूर्तयः** अकारादयः प्रणवभेदाः **लक्षकाः** लक्षणवत्तया प्रतिपादकाः, मल्लक्षणप्रतिपादका इति यावत्, यासां तास्तथा अकारादिवाच्या देवता इत्यर्थः । वर्णाभिव्यक्तिकथनप्रकरणे संयुक्ताक्षरस्य पृथगभिव्यक्त्यभावात् क्षकारस्यात्रानुक्तिः । कषवर्णद्वयात्मकस्य क्षस्य पुरुषसिंहाकृतिर्देवतेति ज्ञेयम् । `नृसिंहः क्षस्य देवता' इति वक्ष्यमाणत्वात् (तं.सा.2-3) । ॥ छ ॥

एतेषामेव स्वरोष्मस्पर्शभेदेनाधिपतिदेवताभेदस्तु `सर्वे स्वरा इन्द्रस्यात्मानः सर्वे ऊष्माणः प्रजापतेरात्मानः सर्वे स्पर्शा मृत्योरात्मानः'[2] इति छन्दोगश्रुत्या

`ऐश्वर्यादिन्द्रनामा तु वायुः स्वरपतिः स्मृतः ।
ऊष्माधिपस्तु भगवान्विष्णुरेव प्रजापतिः ॥
मृत्युनामाऽथ संहाराद्रुद्रः स्पर्शाधिपः स्मृत' (छ.भा.2-2-15) इति तद्भाष्याच्च

---

1 गीताभाष्ये अ.10 श्लो.31 उदाहृतशाण्डिल्यशाखावचनम् ।

2 छ.2-2-15 ।

द्रष्टव्यः ॥6-10॥

1.5 नारायणाष्टाक्षरव्याहृतिमन्त्रौ

इदानीं प्रणवाष्टाक्षरेभ्यो नारायणाष्टाक्षरस्य व्यक्तिं वक्ति - **नारायणेति॥**

नारायणाष्टाक्षरश्च ताराष्टाक्षरभेदवान् ।
आद्यैस्तारचतुर्वर्णैर्भिन्ना व्याहृतयः ... ॥ 11 ॥

तरत्यनेनानिष्टनिचयमिति[1] **तार** ओङ्कारस्तस्य यानि **अष्टाक्षराणि** अकाराद्यतिशान्तान्तानि तेभ्यः सञ्जातभेदवानित्यर्थः। मन्त्राक्षराणां न्यूनाधिकसङ्ख्यां वारयत्यष्टाक्षर इत्यनेन। प्रणवाक्षरचतुष्टयाच्चतसृणां व्याहृतीनामभिव्यक्तिमाह - **आद्यैरिति॥** `अकः सवर्णे दीर्घ' (पा.सू.6-1-102) इति सवर्णदीर्घः। अकार आद्यो येषां ते आद्यास्तैः **तारस्य** प्रणवस्य चतुर्भिर्वर्णैरकारोकारमकारनादैः समासव्यासयोगतश्चतस्रो व्याहृतयो **भिन्नाः** व्यक्ता इत्यर्थः ॥11॥

व्याहृतीनां प्रतिपाद्यानाह - **अनिरुद्धेति॥**

........................,.............. क्रमात् ।[2]
अनिरुद्धादिकास्तासां देवता व्युत्क्रमेण वा ।
ताश्चतुर्मूर्तयस्त्वेव द्वादशार्णपदोदिताः ॥ 12 ॥

अनिरुद्धप्रद्युम्नसङ्कर्षणवासुदेवाः **तासां** व्याहृतीनां क्रमाद्देवताः। संन्यासिभिर्ध्यानादेर्व्युत्क्रमेणैव कर्तव्यत्वादनिरुद्धादिक्रमो गृहीतः। इतरविवक्षया त्वाह - **व्यु-**

---

1 `तरन्त्यनेन-' इति प्रा.पाठः।

2 यद्यपि क्रमादिति प्रतीकं न धृतम् । तथाप्यस्य अग्रे अन्वयात् अत्रैव योजनं कृतम् ।

त्क्रमेण वेति ॥ उक्तक्रमापेक्षया **व्युत्क्रमेण** विपरीतक्रमेण वस्तुतः क्रमेण वासुदेवादिक्रमेणेति यावत् । उक्तातिदेशसौकर्याय द्वादशाक्षरपदप्रतिपाद्यमूर्तीस्तावदाह - **ता इति ॥** अर्णशब्दो वर्णशब्दपर्यायः । **ता एव चतुर्मूर्तय** अनिरुद्धाद्याः **द्वादशार्णमन्त्रस्य** वासुदेवद्वादशाक्षरमन्त्रस्य **पदैरुदिताः** तद्वाच्याः पददेवता इति यावत् ॥ 12 ॥

1.6 वासुदेवद्वादशाक्षरमन्त्रः

द्वादशाक्षरमन्त्रस्य मन्त्रद्वयादभिव्यक्तिमाह - **नारायणेति ॥**

नारायणाष्टाक्षराच्च व्याहृतिभ्यस्तथैव च ।
विभेदो द्वादशार्णानां केशवाद्याश्च देवताः ॥ 13 ॥

नारायणमन्त्रस्य यदष्टाक्षरं तस्माद्व्याहृतिभ्यश्च **द्वादशार्णानां** वासुदेवमन्त्रस्य द्वादशार्णानां **तथैव** नारायणाष्टाक्षरादेरिव **विभेदः** अभिव्यक्तिरित्यर्थः[1]। द्वादशवर्णमूर्तीराह - **केशवाद्या इति ॥** दामोदरान्ता आदिशब्दग्राह्याः । तथा च केशवादिदामोदरान्ताः द्वादशवर्णदेवताश्च । न केवलमनिरुद्धाद्याः पददेवता इति चार्थः ॥ 13 ॥

गायत्रीव्यक्तिमाह - **नारायणेति ॥**

नारायणाष्टाक्षराच्च व्याहृतित्रिगुणात्पुनः ।
वेदमाता तु गायत्री द्विगुणा द्वादशाक्षरात् ॥ 14 ॥

---

1 इयं पङ्क्तिः समचिह्नसहिततया प्रा.पाठे एवं लिखिता - `नारायणमन्त्रस्य यदष्टाक्षरं तस्माद्व्याहृतिभ्यश्च द्वादशार्णानां= वासुदेवमन्त्रस्य द्वादशार्णानां तथैव= नारायणाष्टाक्षरादेरिव विभेदो=ऽभिव्यक्तिरित्यर्थः' इति ।

नारायणाष्टाक्षरात् **व्याहृतित्रिगुणाच्च** त्रिगुणितव्याहृतिभ्य इति यावत् । पुनश्च व्याहृतेस्तत्पठितॄणां ब्राह्मण्यसम्पादकत्वेन वेदपोषकत्वाद्वाऽशेषवेदव्याख्येयत्वाद्वा **वेदमाता** गायत्री भेदिता।[1] एतेन समासव्यासयोगेन चतुरात्मव्याहृतेश्चतुर्वारमावृत्तौ षोडशत्वात्तैर्नारायणमन्त्रगताष्टवर्णैश्चेत्येतैश्चतुर्विंशतिभिः गायत्रीवर्णा भेदिता इत्युक्तं भवति ।

अथवा व्याहृतिर्व्याहरणमुच्चारणमिति यावत् । तेन **त्रिगुणात्** त्रिगुणितात् त्रिवारमुच्चारितात् पुनःपुनर्व्याहरणेन त्रिगुणीकृतादित्यर्थः । नारायणाष्टाक्षरस्य त्रिवारं व्याहरणे चतुर्विंशत्यक्षरत्वं भवति । तस्मान्नारायणाष्टाक्षराद्गायत्री चाभिव्यक्ता । न केवलं वासुदेवद्वादशाक्षरो मन्त्र इति चार्थः ।

एवं त्रिगुणान्नारायणाष्टाक्षराद्गायत्री भेदितेत्युक्त्वा व्याहृतिमात्रेणापि तद्व्यक्तिमाह - **पुनरिति ॥** पुनरित्यनन्तरं व्याहृतित्रिगुणादित्यनुवर्तते । अत्र व्याहृतिशब्देन तद्गतवर्णा गृह्यन्ते । तथा च **त्रिगुणैः** व्याहृतिगताष्टवर्णैर्गायत्री व्यक्तेति भावः । यद्वा त्रिगुणादिति बुध्या विवेकेन सर्वत्र सम्बध्यते । त्रिगुणान्नारायणाष्टाक्षरात् चशब्दात्त्रिगुणात्प्रणवाष्टाक्षरात् त्रिगुणाद्व्याहृत्यक्षराच्च गायत्री जातेत्यर्थः ।द्वादशाक्षरादिति पञ्चमी ल्यब्लोपनिमित्ता। द्वादशाक्षरमपेक्ष्य द्विगुणा चतुर्विंशत्यक्षरेत्यर्थः । यथोक्तं वाराहे - `महाव्याहृतिहीना या चतुर्विंशतिवर्णका । गायत्री सैव गायत्री प्रोच्यते विबुधैरिह' इति[2]। इह अष्टमहामन्त्रप्रयोगे । तेन `अष्टाविंशत्यक्षरा च गायत्री समुदाहृता' तथा `तारव्याहृतिसंयुता सहशिरा गायत्र्युपास्या परा' इत्याद्युक्तीनां निरासः । `तत्सवितुर्वरेण्यम्' इत्यत्र (ऋ.सं.3-61-10) त्स इत्यस्य तकारसकारसंश्लेषात्मकत्वेन वर्णद्वयं तत्रेति चतुर्विंशतित्वं मन्तव्यम् । **केचित्तु** ण्य इत्यत्र णकारयकारात्मकतया तत्र वर्णद्वयं द्रष्टव्यमित्याहुः । **अपरे तु** प्रचोदयादित्यत्र यकारात्परं तकारग्रहणमिति

---

1 मूलमातृकायामदृष्टमेकं वाक्यमन्यत्र पठ्यते । तच्च - यद्वा वेदरूपात् त्रिवर्णानां द्वितीयजन्महेतुत्वेन माता चेत्यर्थः- इति ।

2 वाराहे चातुर्मास्यप्रकरणे 8-7

वदन्ति। द्विगुणादिति पाठे **द्विगुणितात्** द्विवारमुच्चरितात् द्वादशाक्षरादपि गायत्री व्यक्तेत्यर्थः। वेदमातेति विशेषणमितरगायत्रीव्यावृत्त्यर्थम् ।[1] ॥ 14 ॥

1.7 गायत्रीमन्त्रपुरुषसूक्तसकलवेदाभिव्यक्तिः

गायत्रीवाच्यमूर्तीराह[2] - **चतुर्विंशतिरिति** ॥

चतुर्विंशन्मूर्तयोऽस्याः कथिता वर्णदेवताः ।
तद्भेदः पौरुषं सूक्तं वेदाः पुरुषसूक्तगाः ॥ 15 ॥
वैदिकाः सर्वशब्दाश्च तस्मात्सर्वाभिधोऽस्म्यहम् ।
पञ्चाशद्वर्णभिन्नाश्च सर्वशब्दा अतोऽपि च ॥ 16 ॥

अस्या गायत्र्याः केशवाद्याः चतुर्विंशतिमूर्तयः कथिताः। नन्वेकस्याश्चतुर्विंशतीनां[3] देवतात्वं कथमित्यत उक्तं - **वर्णेति** ॥ तथा च वर्णदेवतात्वेनैव तद्देवतात्वमिति भावः। ॥ **तद्भेदा इति** ॥ **पौरुषं** पुरुषप्रतिपादकं वर्गत्रयात्मकं सूक्तं **तद्भेदः** तस्याः गायत्र्याः सकाशाद्भिद्यते अभिव्यज्यत इति तद्भेदः। **वेदाः पुरुषसूक्तगाः** तद्व्याख्यानतया स्थिता इत्यर्थः। यद्वा त्रिवर्गात् पुरुषसूक्तात् गच्छन्ति

---

1 मूलमातृकायामदृष्टमेकं वाक्यमन्यत्र पठ्यते। तदिदम् - अथवा व्याहृतित्रिगुणादित्यत्र विद्यमानं त्रिगुणादिति पदं बुध्या विविक्तमाकृष्यते। एवं च त्रिगुणान्नारायणाष्टाक्षराद्गायत्री व्यक्तेत्यर्थः। द्वादशाक्षरादित्युक्तं द्वादशाक्षरं विशिनष्टि - **व्याहृतित्रिगुणादिति** ॥ व्याहृत्यपेक्षया त्रिगुणाद्द्वादशाक्षरात् द्विगुणा गायत्री व्यक्तेत्यर्थः। पूर्वं नारायणाष्टाक्षरसहितव्याहृतिभिर्द्वादशाक्षरोत्पत्तिरुक्ता। इदानीं व्याहृतित्रिगुणद्वादशाक्षरादित्युक्त्या केवलं त्रिगुणितव्याहृतेरपि द्वादशाक्षरोत्पत्तिरभिहिता भवतीति ज्ञेयम् । - इति।

2 `गायत्रीवर्णदेवता आह' इति छलारीया। अत्राप्यनुपदमेव `तथा च वर्णदेवतात्वेनैव तद्देवतात्वम्' इत्युक्तम् । मन्त्रप्रतिपाद्यस्तु अग्रे `विश्वामित्रस्तु सन्ध्यार्थे' इति 41तमश्लोके वक्ष्यते।

3 "विंशत्याद्याः सदैकत्वे' इति कोशात् `विंशतेः' इति पाठेन भाव्यमिति भाति।

उद्गच्छन्तीति पुरुषसूक्तगाः त्रयो वेदाः इत्यर्थः । **॥ वैदिका इति ॥** न केवलं वेदाः, किन्तु वैदिकाः वेदसम्बन्धिनः संस्कृता इति यावत् । सर्वे शब्दा वेदेभ्योऽभिव्यक्ता इत्यर्थः । यद्वा न केवलं वेदाः किन्तु वैदिकाः सर्वशब्दाश्च पुरुषसूक्तगा इति पूर्वेणान्वयः । मन्त्रप्रकरणत्वेऽप्यस्य `तेन पृष्ट' (तं.सा.1-2) इत्यत्र भगवद्वाचकप्रमाणमात्रप्रश्नस्याभिप्रेतत्वात् तदनुरोधेनात्र वेदाद्युत्पत्त्युक्तिरिति ध्येयम् । तदनुसारेणैव फलमाह - **तस्मादिति ॥** मद्वाचकप्रणवव्याख्यानरूपाष्टाक्षरव्याहृत्यादेः परम्परया सर्वशब्दानामपि व्याख्यानरूपत्वादिति भावः । निमित्तान्तरमाह - **पञ्चाशदिति ॥** अपिरभिव्याप्तौ । सर्वपदप्राप्तासङ्कोचव्यञ्जनमपेरर्थः । एवं च **सर्वशब्दा अपि** पञ्चाशद्वर्णभिन्ना वर्णाश्च भगवदभिधायकास्ततश्च सर्वाभिध इत्यन्वयः । न केवलं सर्वे वैदिकाः शब्दाः भगवद्वाचकाः किन्तु दधिमथनगजबृंहितादिघोषाः स्वरा अपि नादादिरूपत्वेन भगवद्वाचका इति सूचनार्थं चशब्दः । `सर्वा वाचश्च घोषाश्च विष्णोर्नामेति कीर्तिताः' इति बृहद्भाष्योक्तेः(बृ.भा.अ1-सप्तान्नब्राह्मणम्) । तेषां भगवदभिधायकताप्रकारस्तु कर्मनिर्णये दर्शितः ।

`दध्नो मथनशब्दश्चाप्यन्तर्नादस्वरूपतः ।
भीषकत्वं हरेर्ब्रूयादन्तर्नादो हि भीषणे ॥

गजबृंहितमप्येवं धिकारसहितं वदेत् ।
स्वरितेन समायोगात् धिकृतौ स्वरितो यतः' इत्यादिना[1]।

`गर्गरगोधापिङ्गादीनां घोषा अपि नादमात्रव्यञ्जकत्वेन भगवद्वाचका एवेत्याह ।' `गर्गर इति पादभूषणमहामत्रकदधिपात्रहस्तिहस्तानां नाम' इति च कर्मनिर्णये[2]। तत्रैव व्याख्यातं चैतट्टीकाकारैः - `ननु वर्णा एव वाचकाः न घोषास्ते तु वर्णानां व्यञ्जका एव ।

---

1 क.नि.पृ.सं.163
2 क.नि.पृ.सं.163

तत्कथमुच्यते घोषा वाचका' इति । न च वाच्यं वाचकवर्णव्यञ्जकत्वेनोपचारादियमुक्तिरिति, गर्गरादिघोषाणामकारादिव्यञ्जकत्वस्याप्यभावादित्यत उक्तं - नादेति ॥ नादो नाम वर्णो मन्त्रशास्त्रे प्रसिद्धः । अकाराद्यव्यञ्जकत्वेऽपीति मात्रशब्दार्थः' - इति । यद्यपि स्वराणां पदवाक्यावयववर्णधर्मत्वमेव न पृथक् प्रयोगस्तथापि पृथगर्थाभिधायकत्वाद्वाचकत्वम् । यथोक्तमृग्भाष्ये -

`दार्ढ्यमेवानुदात्तार्थ उदात्तस्योच्चता तथा ।
नीचता स्वरितस्यार्थः प्रचयस्य यथास्थितः ॥
समाहारेऽखिला अर्थाः स्वरार्थानामियं स्थितिः' इति (ऋ.भा.श्लो.98) ।

तत्प्रकारस्तु स्वरार्थानां पदवाच्यार्थ-वाक्यवाच्यार्थविशेषणत्वान्वयं कृत्वा बोद्धव्यः । तथा हि । `अग्निमीळे' (ऋ.सं.1-1-1) इत्यत्र ईळे इत्यस्य पदकाले उभयोर्वर्णयोरप्यनुदात्तत्वाददितिदृढं स्तौमीति । संहिताकाले तु प्रथमवर्णस्य स्वरितस्वरत्वात् तस्य च नीचार्थत्वात् प्रचयस्य यथास्थितार्थकत्वात् यथास्थितं नीचोऽहं स्तौमीति । ननु ऋग्वेदब्राह्मणादौ उदात्ताद्यनुच्चारणात्तेषामपशब्दत्वाद्ब्राह्मणादिपारायणे पुण्यं न स्यात् । प्रत्यवायश्च स्यात्, पदावयववर्णादित्यागे प्रत्यवायवत् `मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह'[1] इत्यादिवचनादिति चेत् न । अत्रेत्थं सम्प्रदायविद उपदिशन्ति - मूलवेदे अनादितः केषाञ्चिद्ब्राह्मणादीनां यथास्थितोदात्तादिमत्त्वेन पाठाभावादादिसृष्टौ भगवता तथैव ब्रह्मादीन् प्रत्युपदेशेन तादृशब्राह्मणादिपारायणस्य पुण्यजनकत्वाभ्यनुज्ञानात् पुण्यजनकत्वम् । `मन्त्रो हीन' इति वचनं तु मन्त्रे पठ्यमानस्वरवर्णत्यागे प्रत्यवायपरम् । ब्राह्मणस्य तु मन्त्रपदवाच्यसंहिताया अन्यत्वात् । इदं सर्वं काण्वादीनां ब्राह्मणादिषु उदात्तादिस्वरपाठाज्ज्ञायत इति ॥ छ ॥ वर्णविशेषयुक्तवेदवाक्येषु मूर्तिविशेषाणां प्रतिपाद्यत्वं चानुसन्धेयम् । तथा चोक्तं छान्दोग्यभाष्ये द्वितीयाध्याये

1 ऋग्भाष्यटीकोदाहृतम् ।

`हुङ्कारसहिते वाक्ये प्रद्युम्नस्तु सदा स्थितः ।
आकारयुक्ते वाराहः वासुदेवः प्रसंयुते ॥
नारायणस्तथोद्युक्ते प्रतियुक्तेऽनिरुद्धकः ।
उपयुक्ते नृसिंहश्च नीति सङ्कर्षणस्तथा ॥
अभावे यावदेते स्युस्तावत् तद्दैवतं स्मृतम् ।
एवं सप्तविधं विष्णुं य उपास्ते सदा विभुम् ॥
वाङ्नामा भगवांस्तस्य भवेत्सर्वार्थदोहकृत्' इति (छा.भा.2-8-1) ॥ 15,16 ॥

1.8 उक्तमन्त्राणाम् ऋषिच्छन्दोदेवताविचारः

`यो ह वा अविदितार्षच्छन्दोदैवतेन' इत्यादिश्रुत्या[1] `ततो देवर्षिछन्दांसि सम्यगेव विचारयेत् । मृत्युः स्याद्देवताज्ञाने छन्दोहीने[2] तु निष्फलम्' इत्यादिस्मृत्या च ऋष्याद्यज्ञानेऽनर्थोक्तेर्व्याहृतिगायत्रीव्यतिरिक्तानामुक्तप्रणवादिसर्वमन्त्राणां मुख्यऋषिदेवते आह - **ऋषिरित्यादिना ॥**

1 `यो ह वा अविदितार्षच्छन्दोदैवतब्राह्मणेन मन्त्रेण यजति याजयति वाऽध्यापयति स्थाणुं वर्च्छति गर्ते वा पद्यते प्र वा मीयते पापीयान् भवतीति तस्मादेतानि मन्त्रे विद्या[न्या]त्' इति समग्रवाक्यम् । इदं सामवेदीयब्राह्मणवाक्यं प्रथमसूक्तव्याख्यासमाप्तौ ऋ.भा.टीकायामुदाहृतम् । `ऋषिर्मन्त्रद्रष्टा। तस्येदमार्षम् । ऋषिदृष्टत्वमिति यावत् । छन्दो गायत्र्यादि। दैवतं मन्त्रप्रतिपाद्यदेवता। ब्राह्मणम् । ब्राह्मणपदेन तद्व्याख्येयो मन्त्रार्थो लक्ष्यते। मन्त्राणां तत्तत्कर्मणि विनियोगोऽपि लक्ष्यते।' इति छलारीनरसिंहाचार्यविरचितायां टीकाविवृतौ आर्षच्छन्दोदैवतब्राह्मणपदानि व्याख्यातानि। ईशावास्यप्रथममन्त्रभाष्यटीकायामपि इदं वाक्यमुदाहृतम् । तत्रत्यश्रीवादिराजीयप्रकाशिकायामन्यव्याख्यासु ऋग्भाष्यटीकायाः अन्यटिप्पणिषु चेदं वाक्यं विस्तरेण व्याख्यातम् । ऋष्यादिज्ञानस्यात्यावश्यकत्वादेव खलु `अस्य श्रीगायत्रीमन्त्रस्य विश्वामित्रऋषिः । सवितृरूपी नारायणो देवता। दैवी गायत्री छन्दः । जपे विनियोगः' इत्यादिरूपः सन्ध्यावन्दनादौ पठनसम्प्रदायः।

2 देवता+अज्ञाने इति पदच्छेदः। छन्दोहीने' इति स्थले `छन्दोज्ञाने' इति छलारीयतन्त्रसारटीकायां दृश्यते। तस्मिन् पाठे `छन्दसः अज्ञाने' इत्यर्थः विवक्षितः।

ऋषिश्च देवतैकोऽहं तारादीनां विशेषतः ।
छन्दो मदीया गायत्री ताराष्टाक्षरयोर्मता ॥ 17 ॥

यद्यपि वक्ष्यमाणसर्वमन्त्राणामपि ऋषिर्देवता च हरिरेव । तथापि तेषामन्येऽप्यमुख्यऋषयो वर्तन्ते नैतेषाम् । अतो **विशेषत** इत्युक्तम् । **तारादीनां** महामन्त्राणाम् **अहम्** अन्तर्यामी ऋषिर्देवता च **एको** मुख्योऽहमेवेत्यर्थः । यद्वा एकस्य ऋषिदेवतात्वे कथमित्यत उक्तं - **विशेषत इति ॥** भेदप्रतिनिधिविशेषत इत्यर्थः । इदानीं प्रणवाष्टाक्षरयोश्छन्द आह - **छन्द इति ॥** गायत्र्याश्छन्दसो लक्ष्मीसरस्वत्यौ देवते । तत्र ताराक्षरयोः **मदीया गायत्री** लक्ष्म्यभिमन्यमाना गायत्री छन्दः । तत एव दैवी गायत्री छन्द इति प्राञ्चः । तदाह विष्णुतीर्थस्मृतौ - `गायत्री यत्र दैवी स्यात् तत्र श्रीः परिकीर्तिता' इति । `गायत्री नाम ब्रह्माणी दैवी लक्ष्मीः प्रकीर्तिता । इन्द्राणी त्रिष्टुभा चैव जगती सर्वदेवता' इति च[1] ॥ 17 ॥

1.9 उक्तमन्त्राणां ध्येयदेवतास्वरूपविचारः

`अङ्गन्यासं तथा ध्यानं सम्यगेव समभ्यसेत् । न्यासहीनं[ने] हरेदायुर्ध्यानहीनं तु निष्फलम्' इति स्मृतौ ध्यानाद्यभावेऽनर्थावगमाद्ध्यानं तावत्क्रमेणाह - **उद्यदित्यादिना ॥**

उद्यद्भास्वत्समाभासश्चिदानन्दैकदेहवान् ।
चक्रशङ्खगदापद्मधरो ध्येयोऽहमीश्वरः ॥ 18 ॥
लक्ष्मीधराभ्यामाश्लिष्टः स्वमूर्तिगणमध्यगः ॥ 19 ॥
ब्रह्मवायुशिवाहीशविपैः शक्रादिकैरपि ।

1 छन्दस्तदभिमानिदेवताविचारः ऋग्भाष्ये द्रष्टव्यः ।

सेव्यमानोऽधिकं भक्त्या नित्यनिश्शेषशक्तिमान् ॥ 20 ॥

विधिं प्रति भगवद्वाक्यरूपत्वादहमित्युक्तिः । उद्यदादित्यसदृशप्रकाशः । **चित्** ज्ञानम् **आनन्दः** सुखं तावेव **एकः** केवलोऽभिन्नश्चिदानन्दैकः । स चासौ देहश्चेति कर्मधारयान्मतुप् । चक्रशङ्खगदापद्मानि करैर्धत्त इति चक्रादिधरः । वामदक्षभागस्थश्रीधराभ्यामाद्यावरणभूताभ्यां समालिङ्गितः । **स्वमूर्तीनां** कृद्धोल्कादीनामष्टानां वासुदेवादीनां चतुर्णां केशवादीनां द्वादशानां मत्स्यादीनामपि तावतां[1] द्वितीयाद्यावरणभूतानां **गणस्य** सङ्घस्य मध्ये स्थितः । ब्रह्मवायुशिवशेषगरुडैः षष्ठावरणभूतैः । स्वस्वदिक्स्थैः लोकपालैः शक्रादिभिः सप्तमावरणभूतैः अधिकं यथा तथा भक्त्या सेव्यमानो नित्याशेषविषयशक्तिमानहं ध्येय इत्यर्थः । तथा चानेन वक्ष्यमाण (तं.सा.1-63) सकलावरणदेवतोपेतत्वमुक्तं भवति । ताराष्टाक्षरयोरित्युपक्रमात् तयोरेवेदं ध्यानम् ॥18-20 ॥

तच्च ध्यानमृष्यादिन्यासपूर्वकं कार्यम् । तदाहोत्तरतन्त्रे -

`आदावृष्यादिविन्यासं कृत्वा ध्यानं समाचरेत्' इति ।

तत्स्थानानि मन्त्रदेवप्रकाशिकायाम् -

`ऋषिर्गुरुत्वाच्छिरसैव धार्यः छन्दोऽक्षरत्वाद्रसनागतं स्यात् ।
धियाऽवगन्तव्य तया सदैव हृदि प्रतिष्ठा मनुदेवताया' इति ।

नारायणमन्त्रस्याष्टवर्णदेवतामूर्तीनां विश्वादीनां ध्यानमाह - **मूर्तय इति ॥**

**मूर्तयोऽष्टावपि ध्येयाश्चक्रशङ्खवराभयैः ।
युक्ताः प्रदीपवर्णाश्च सर्वाभरणभूषिताः ॥ 21 ॥**

---

[1] ज.पाठे तावतामिति पदं चिह्नित्वा पार्श्वे द्वादशेति शब्दः लिखितः । अग्रे [तं.सा.1-62] वक्ष्यमाणदिशा मत्स्यादिदशभिः अनन्तविश्वरूपयोः मेलनेन द्वादशत्वं बोध्यम् ।

अष्टौ अष्टावपि **मूर्तयः** विश्वाद्याः प्रदीपवद्वर्णो यासां ताः प्रदीपवर्णाः ॥21॥

अजादिमूर्तिध्यानमाह - **तादृग्रूपा इति॥**

तादृग्रूपाश्च पञ्चाशज्ज्ञानमुद्राभयोद्यताः ।
टङ्की दण्डी च धन्वी च तत्तद्युक्तास्तु वामतः ॥ 22 ॥

पञ्चाशत् अजाद्याः **तादृग्रूपाः** मूलमूर्तिसदृशाः। तेन लक्ष्मीधराभ्यामाश्लिष्टाश्चतुर्भुजाश्च उद्यद्भास्वत्समानवर्णा इत्यर्थः। प्रदीपवर्णाः सर्वाभरणभूषिताश्चेत्यर्थ इत्येके। तादृग्रूपा इत्यनेन मूलरूपवद्गदापद्मप्रसक्तौ तत्प्रतिनिधित्वेन ज्ञानाभयमुद्रायुतत्वं द्रष्टव्यमित्याह - **ज्ञानेति॥** ऊर्ध्वबाहुद्वये चक्रशङ्खौ। अधोबाहुद्वये गदापद्मस्थाने ज्ञानाभयमुद्रे ज्ञेये। **केचित्तु** ज्ञानमुद्राभयोद्यता इत्यनेन पञ्चाशन्मूर्तीनां द्विभुजत्वं ज्ञायत इत्याहुः। इदानीं पञ्चाशत् ज्ञानमुद्राभयोद्यता इत्युक्तस्यापवादमाह - **टङ्कीति॥** पञ्चाशन्मूर्तीनां मध्ये टङ्की दण्डी धन्वी चेति त्रयो रूपविशेषाः वामतः वामहस्ते **तत्तद्युक्ताः** टङ्कदण्डधनुराख्यायुधयुक्ताः। दक्षिणकरे ज्ञानमुद्रैवेति द्रष्टव्यम् । तथा च पञ्चाशन्मूर्तीनां चतुर्भुजत्वमेव। चक्रशङ्खज्ञानमुद्राऽभयमुद्रेत्यायुधचतुष्टयं सप्तचत्वारिंशन्मूर्तीनाम् । टङ्क्यादिमूर्तित्रये त्वयं विशेषः। भुजद्वये चक्रशङ्खौ वामकरे टङ्कादि दक्षिणकरे ज्ञानमुद्रैवेति निष्कर्षः। अपरे तु दक्षिणकरे ज्ञानमुद्राऽभयमुद्रा वेति विकल्पमाहुः ॥22॥

व्याहृतिचतुष्टयद्वादशाक्षरपदप्रतिपाद्यवासुदेवादिरूपचतुष्टयस्य ध्यानप्रकारमाह - **वासुदेवादिका इति॥**

वासुदेवादिकाः शुक्लरक्तपीतासितोज्ज्वलाः ।
चक्रशङ्खगदाब्जेतः प्रथमो मुसली हली ॥ 23 ॥

सशङ्खचक्रस्त्वपरस्तृतीयः शार्ङ्गबाणवान् ।
सशङ्खचक्रस्तुर्यस्तु चक्रशङ्खासिचर्मवान् ॥ 24 ॥

वासुदेवः शुक्लः, सङ्कर्षणो रक्तः, प्रद्युम्नः पीतः, अनिरुद्धो नील इति क्रमाच्छुक्लादिवर्णैरुज्वला भासमाना इत्यर्थः । उक्तं चैतन्माधवस्तवराजे -

`षट्कोणचक्रगं नीलं भगवन्तमनुस्मरेत् ।
त्रिकोणचक्रगं रक्तं भगवन्तमनुस्मरेत् ॥

पश्चान्मूर्ध्नि करं न्यस्य स्थितं वरुणमण्डले ।
चतुर्दले स्फाटिकाभं स्मृत्वा चामृतवृष्टिभिः' इत्यादि ।

नचात्र

`ऋक्प्रोक्तो लोहिताकारो वासुदेवः परः पुमान् ।
स एव सूर्यलौहित्ये प्राच्यरश्मिषु संस्थितः ॥

सङ्कर्षणः शुक्लवर्णो यजुर्वेदोदितः प्रभुः ।
शुक्लवर्णे च सूर्यस्य दक्षरश्मिषु च स्थितः ॥

प्रद्युम्नः श्यामवर्णस्तु सामवेदोदितः प्रभुः ।
प्रत्यग्रश्मिषु सूर्यस्य श्यामवर्णेषु च स्थितः ॥

अनिरुद्धस्तु नीलश्च इतिहासपुराणयोः ।
अथर्ववेदे चोक्तः सन्नुदग्रश्मिषु संस्थितः ॥

सुकृष्णे सूर्यरूपे च मध्ये नारायणः प्रभुः ।
ऊर्ध्वरश्मिषु संस्थश्च प्रोद्यदादित्यसप्रभः' इति तृतीयाध्यायछान्दोग्यभाष्येण,

(छा.भा.3-1-4)

`शुक्लं तु वासुदेवाख्यम् अनिरुद्धं सुनीलकम् ।

साङ्कर्षणं पिङ्गलं स्यात् प्राद्युम्नं हरितं तथा'

इति[1] बृहद्भाष्येण च नानावर्णोक्तेर्विरोधः शङ्क्यः। व्यूहान्तरविवक्षयोपपत्तेरिति सम्प्रदायात्।

तथा च तत्र **प्रथमो** वासुदेवश्चक्रादियुक्तचतुर्बाहुः। **अपरः** सङ्कर्षणः, सचक्रशङ्ख इत्युक्तेर्मुसलहलयोः सकाशाच्चक्रशङ्खयोः प्रथमत्वम्, वामदक्षिणाधोभुजाभ्यां मुसलहले बिभ्रदित्यर्थः। **तृतीयः** प्रद्युम्नः शार्ङ्गबाणवान् अधस्तनकरद्वये, ऊर्ध्वभुजद्वये सशङ्खचक्रः। **तुरीयः** चतुर्थोऽनिरुद्धः। `चतुरश्छयतावाद्यक्षरलोपश्च' इति[2] वचनात् चतुरशब्दात् छप्रत्यये तस्य इयादेशे चलोपे तुरीय इति रूपम् ॥23,24॥

इदानीं गायत्र्यक्षरमूर्तीनां केशवादीनां चक्रादिभिरायुधचतुष्टयैरेव विशेषलक्षणानि निरूपयति - **केशव इत्यादिना**॥

केशवो मधुसूदनः सङ्कर्षणदामोदरौ।
सवासुदेवः प्रद्युम्नो दक्षोच्चकरशङ्खिनः ॥ 25 ॥

विष्णुमाधवानिरुद्धपुरुषोत्तमाधोक्षजाः।
जनार्दनश्च वामोच्चकरस्थितदरा मताः ॥ 26 ॥

गोविन्दश्च त्रिविक्रमः सश्रीधरहृषीकपः।
नृसिंहश्चाच्युतश्चैव वामाधःकरशङ्खिनः ॥ 27 ॥

वामनः सनारायणः पद्मनाभ उपेन्द्रकः।

---

1 बृ.भा.अ4-शारीरब्राह्मणे `तस्मिन् शुक्लमुत नीलमाहुः' इति मन्त्रव्याख्यावसरे।

2 इदं `षट्कतिपयचतुरां थुक्' इति 5-2-51तमपाणिनिसूत्रे पठितं वार्तिकम्

हरिः कृष्णश्च दक्षाधःकरे शङ्खधरा मताः ॥ 28 ॥

शङ्खचक्रगदापद्मधराश्चैते हि सर्वशः ।

क्रमव्युत्क्रमपद्मादिगदादिव्युत्क्रमस्तथा ॥ 29 ॥

अर्धक्रमः सान्तरश्च षड्षु षड्वरिपूर्विणाम् ।

केशवाद्याः षट् दक्षोच्चकरे शङ्खयुक्ताः । विष्णवाद्याः षट् वामोच्चकरशङ्खिनः । गोविन्दाद्याः वामाधःकरशङ्खिनः । वामनाद्याः दक्षाधःकरशङ्खिनः । नन्वेतेन शङ्खमात्रधारिणः एकभुजाश्चतुर्भुजत्वेऽप्यन्येषु निरायुधा इति प्रतीयते । तथा षण्णां षण्णां परस्परं भेदेऽपि तेषुतेष्वपि कथमवान्तरभेद इति न प्रतीयते । अत आह - **शङ्खेति ॥ एते** केशवादयः **सर्वशः** सर्वेऽपि शङ्खचक्रगदापद्मधराः । **॥ क्रमेति ॥** एतेषु केशवादिषु षड्षुषड्षु अरिपूर्विणां चक्रगदापद्मानां क्रमः । व्युत्क्रमः । **पद्मादिक्रमः** पद्ममारभ्य क्रमः । एतैः सहितः **गदादिव्युत्क्रमः** गदामारभ्य व्युत्क्रमः । गदायाः आदित्वेन व्युत्क्रम इति यावत् । **अर्धक्रमः सान्तरः** चशब्दात् क्रम इति बुध्या विवेकेनानुवर्तते । तस्य विशेषणमेतत् । अन्तरेण व्यवधानेन सहितः क्रमः । शङ्खश्चक्रमिति क्रमो गदापद्माभ्यां व्यवहित इत्यर्थः । शङ्खस्योक्तस्थानेष्वेव नियतत्वादरिपूर्विणामित्युक्तम् । एते षट् प्रकाराः क्रमात् ज्ञातव्याः । चक्रगदापद्मानीति क्रमः । पद्मगदाचक्राणीति व्युत्क्रमः । पद्मं चक्रं गदेति पद्मादिक्रमः । पद्मगदाचक्राणीति करणे व्युत्क्रमत्वमेव स्यात् ।न तु सान्तरत्वम् । तथा च सङ्गृह्याहुः -

शाचगोपी शपोगीच शपंचांगं शगंचपम् ।

शचपंगं शगंपंच दक्षिणोर्ध्वकरक्रमात् ॥

के'म'सं'दा'वसु'प्रद्यु'वि'मानी[1]पुर्वधो'जनाः ।

---

1 यद्यपि अनिरुद्धस्य सञ्जिघृक्षितत्वात् अनि इति ह्रस्वेन भाव्यम् । तथापि `अपि माषं मषं कुर्यात्

गो'त्रि'श्री'हृ'नृसिंहाच्यु'वा'[1]ना'पोपे'ह'कृ'क्रमाद् - इति ।[2]

केशवादि चतुर्विंशतिमूर्तिध्यानं वादिराजयतिकृते चतुर्विंशतिमूर्ति स्तोत्रे चानेनैव प्रकारेणोक्तम् -

`अधरं दक्षिणं हस्तमारभ्यैव प्रदक्षिणम् ।
मूर्तिभेदान् हरेर्वक्ष्ये भवबन्धविमुक्तये ॥
श्रीमत्पङ्कजशङ्खचक्रगदया सम्भूषिते केशवे
शङ्खाम्भोजगदासुदर्शनधरे नारायणे सर्वदा ।
भक्तिर्मेऽस्तु गदारिशङ्खजलजैर्युक्ते दृढा माधवे

छन्दोभङ्गं न कारयेत्' इति न्यायाद्वा `उपसर्गस्य घञ्यमनुष्यस्य बहुलात्' [पा.सू.6-3-112] इति सूत्रे बहुलग्रहणात् अघञि क्तेऽपि अनीरुद्ध इति दीर्घाद्वा शक्यसमाधेयः ।

1 वाशव्देनात्र वामनो ग्राह्यः वासुदेवस्य पूर्वं वास्विति असंशयं गृहीतत्वात् ।

2 मूलमातृकायामेव "के'म'सं'दा'" इति सचिह्नं लिखितम् । अत्र श्लोकानुसारं चतुर्विंशतिमूर्तिक्रमस्त्वित्थम् - केशव-मधुसूदन-सङ्कर्षण-दामोदर-वासुदेव-प्रद्युम्न-विष्णु-माधव-अनिरुद्ध-पुरुषोत्तम-अधोक्षज-जनार्दन-गोविन्द-त्रिविक्रम-श्रीधर-हृषीकेश-नृसिंह-अच्युत-वामन-नारायण-पद्मनाभ-उपेन्द्र-हरि-कृष्णाः इति। अयं श्लोकयोर्भावः - अत्र शङ्खचक्रगदापद्मशब्दानामाद्याक्षराणि छन्दोनुसारं विविधस्वरयोजनेनोपात्तानि। उदाहरणाय ग-गा-गो-गंशब्दाः गदाशब्दसूचनेन गदां वदन्ति। गमित्यत्रानुस्वारः पद्मम्, पद्म इत्यादौ सन्धिनियमानुसारं ङ्ञादिरूपत्वमाप्तः। तथा च शचगोपी इत्यस्य शङ्ख-चक्र-गदा-पद्मानीत्यर्थः। एवंरूपाः षट् समुदायाः निर्दिष्टाः। केमसन्देत्यादिना अग्रे निर्दिष्टेषु केशव-मधुसूदनादिषु षण्णांषण्णां चत्वारः समुदयाः करणीयाः। तत्र प्रथमेषां केशवादीनां दक्षिणोर्ध्व-वामोर्ध्व-वामाधो-दक्षिणाधःक्रमेण शङ्खाद्यायुधानि ज्ञेयानि। तदनु द्वितीयषट्कान्तर्गतानां विष्णुमाधवादीनां वामोर्ध्व-वामाधो-दक्षिणाधो-दक्षिणोर्ध्वक्रमेण आयुधानि ज्ञेयानि। एवमग्रेऽपि वामाध आरभ्य दक्षिणाधश्चारभ्य द्वयोः षट्कयोः अयमेवायुधक्रमः योजनीयः - इति। इदमप्यत्रावधेयम् - अग्रे उल्लिखिते श्रीवादिराजयतिविरचितस्तोत्रे केशवस्यायुधानि पद्म-शङ्ख-चक्र-गदाक्रमेणोक्तानि। अत्र तु शङ्ख-चक्र-गदा-पद्मक्रमेण। तत्र किंकृतो भेद इति जिज्ञासायामिदं समाधानम् - स्तोत्रे दक्षिणाधःक्रम आश्रितः। अस्मिन् सङ्ग्रहे दक्षिणोर्ध्वक्रमः - इति।

गोविन्दे वरचक्रधारिणि गदाफुल्लाब्जशङ्खान्विते ॥ 1 ॥

कौमोदक्यरविन्दशङ्खविदधच्चक्रं च विष्णुर्मुदा
चक्राङ्को मधुसूदनो दधदसौ शङ्खाब्जकौमोदकीः ।
नित्यं पद्मगदारिशङ्खसहितश्चित्ते मम त्रिक्रमो
युक्तस्तिष्ठतु शङ्खचक्रगदया पद्मी सदा वामनः ॥ 2 ॥

वन्दे श्रीधरमब्जचक्रगदया शङ्खेन चालङ्कृतं
नित्यं पाहि गदारिपङ्कजदरान् बिभ्रद्धृषीकेश माम् ।
शंङ्खाब्जारिगदाधराद्य कुरु मे श्रीपद्मनाभाभयं
श्रीदामोदरमब्जशङ्खगदिनं सारिम् प्रपन्नोऽस्म्यहम् ॥ 3 ॥
कौमोदक्युरुशङ्खपद्मसदरिः सङ्कर्षणः शर्मदो
भूयात्सोऽग्र्यगदादरारिकमली श्रीवासुदेवोऽस्तु मे ।
प्रद्युम्नश्च रथाङ्गकम्बुगदया युक्तोऽब्जपाणिर्मुदे
चक्री चारुगदी सशङ्खकमलो देवोऽनिरुद्धोऽस्तु मे ॥ 4 ॥

देवेशः पुरुषोत्तमोऽरिकमलः शङ्खी गदी चिद्वपु-
र्बिभ्रत्पद्मगदोरुशङ्खमरिणा साकं सदाऽधोक्षजः ।
चक्राम्भोजगदादराङ्कितचतुर्बाहुर्नृसिंहः सुखम्
दद्यादद्य ममाच्युतः पृथुगदापद्मारिशङ्खी परः ॥ 5 ॥
साब्जारिः स जनार्दनोऽस्तु सदयः शङ्खी गदी मे सदा
मूर्ध्नोपेन्द्रमहं नतोऽस्मि सदरं युक्तं गदार्यम्बुजैः ।
वन्दे शङ्खसुदर्शनाम्बुजगदापाणिं हरिम् मुक्तये
कृष्णं शङ्खगदाब्जचक्रिणमलं भक्त्या समभ्यर्चये ॥ 6 ॥[1] - इति ॥25-29. ॥

1 श्रीवादिराजयतिकृतकेशवादिचतुर्विंशतिमूर्तिस्तुतिः ।

1.10 मन्त्रवर्णोत्पत्तिक्रमविचारः

ननु प्रणवाद्या मन्त्राः क्रमेणोक्ताः, अग्रे च क्रमेण वक्ष्यन्ते । वर्णसमुदायात्मका हि मन्त्राः । तेषु च कालिको आनन्तर्यरूपो दैशिकश्च क्रमो न युक्तः नित्यत्वात् व्याप्तत्वाच्च । एवं तद्वाच्यभगवन्मूर्तीनामपि । तथा च `वर्णास्तारार्णभेदिताः' (तं.सा.1-5) `नारायणाष्टाक्षरश्च ताराष्टाक्षरभेदवान्' (तं.सा.1-11) `तद्रूपभेदाः पञ्चाशन्मूर्तय' (तं.सा.1-5) इत्यादिना क्रमोक्तिरयुक्तेत्याशङ्क्य समाधत्ते - **वर्णानामिति ॥**

> **वर्णानां देवतानां च नित्यत्वान्न क्रमः स्वतः ॥ 30 ॥**
> **व्यक्तिक्रमं ब्रह्मबुद्धावपेक्ष्य क्रम उच्यते ।**

यद्यपि तथापीत्यध्याहार्यम् । नित्यत्वादित्युपलक्षणम् । व्याप्तत्वाच्चेत्यपि द्रष्टव्यम् । अन्यथा दैशिकक्रमाशङ्का स्यात् । यथोक्तं तत्वनिर्णयटीकायां[1] - `वर्णास्तावन्नित्यत्वात्सर्वगतत्वाच्च स्वतः क्रमशून्याः' इति । ब्रह्मबुद्धावित्यधिकरणसप्तमीबलात्[2] स्थितमिति लभ्यते । क्रमपदस्य बुध्या विविक्तस्य तेन सम्बन्धः । **नित्यत्वात्** अनादिनित्यत्वादित्यर्थः । अन्यथोत्पत्तौ क्रमशङ्का स्यात् । तथा च यद्यपि वर्णानां नित्यत्वाद्व्याप्तत्वाच्च **स्वतः** स्वभावतः **क्रमः** कालिको दैशिको वा नास्ति । तथापि सर्वमन्त्राणां ब्रह्मा ऋषिरतः स एव द्रष्टा । स चैकानन्तरमपरं मन्त्रं दृष्टवान् । अतो मन्त्राणां ब्रह्मबुद्धौ यत्प्रथममभिव्यक्तं तदेव प्रथमं, यत् तदनु तद्द्वितीयमिति बुद्धिक्रमजन्यो मन्त्रवर्णेषु परापरब्रह्मबुद्धौ व्यक्तीभावक्रममपेक्ष्यैव मन्त्रेष्वपि क्रम उच्यते, विष्णूदिते तन्त्रसारेऽपि कथ्यत इत्यस्माभिरपि तथैव क्रमो मन्त्रेषूच्यत इत्यर्थः । तथा च ब्रह्मबुद्धौ कश्चन क्रमस्तद्धर्मभूतोऽस्तीत्याशयः । तथा च मन्त्रेष्विव वेदेष्वपि पूर्वं विद्यमानमेव जीवानां योग्यतातारतम्यक्रमवद्देशकालाद्युपाधिरहितं स्वाभाविकं क्रमं

---

1 प्रथमपरिच्छेदे वर्णनित्यत्ववादे पुराणप्रमाणोदाहरणे ।

2 "आधारोऽधिकरणम्'[पा.सू.1-4-45]"सप्तम्यधिकरणे'[पा.सू.2-3-36]इति सूत्राभ्यामित्यर्थः ।

ब्रह्मबुद्धिर्विषयीकरोतीति वा `वियत्पादीयसुधा'नुसारेणानियतविशिष्टानुपूर्वीकाणामपि वैदिकवर्णानामर्थावबोधनशक्त्याविर्भावो वा व्यक्तिरिति नित्यक्रमवत्पदसन्दर्भात्मकत्वमेव वाच्यमिति प्रतिभाति। तथा **देवतानां** शक्तिरूपतया स्थितानां भगवद्रूपाणामैश्वर्यकृतं **व्यक्तिंक्रम** लोकव्यक्तिक्रममपेक्ष्य क्रम उच्यत इत्यर्थः।

ननु `तद्रूपभेदा' (तं.सा.1-5) इति वाक्यानन्तरं `वर्णास्तारार्णभेदिता' (तं.सा.1-5) इति वाक्यम् । अतस्तदनुसारेण प्रधानत्वाच्च `देवतानां वर्णानाम्' इति वक्तव्ये `वर्णानां देवतानाम्' इति कथमुक्तमिति चेत्सत्यं, वर्णानां क्रम उक्तरीत्या ब्रह्मबुद्धौ व्यक्तिक्रममपेक्ष्य घटते। देवतानां न तद्वत्क्रमो घटते, तस्य भेदव्याप्तत्वात् । भेदस्य चेश्वररूपेष्वसम्भवाद् । अतोऽचिन्त्यैश्वर्यघटितविशेषकृत एव क्रमो न वर्णक्रमवदिति ज्ञापनाय प्रथमं वक्तव्यमपि देवतानामित्येतत्पश्चादुक्तम् ।

केचित्तु व्यक्तिक्रममित्यस्येत्थमाशयं वर्णयन्ति। तत्तद्वर्णादिविषयकबुद्धिक्रम एव वर्णपदादिक्रमः। नातिरिक्तोऽस्ति। न च वर्णक्रमस्य श्रावणतयाऽनुभूयमानत्वाद्बुद्धिगतक्रमस्य श्रावणत्वासम्भवः। बुद्धेः साक्षिवेद्यत्वेन साक्ष्युपनीतस्यैव तस्य वर्णेषु श्रोत्रेण भानाङ्गीकारादित्याशयेनाह - **व्यक्तिक्रममिति** ॥ ब्रह्मबुद्धौ व्यक्तिक्रममपेक्ष्य वर्णसमुदायात्मके मन्त्रे क्रम उच्यत इति। तेषां `क्रमस्तु वर्णधर्म' इति सुधाविरोधः स्पष्टः ॥30. ॥

1.11 उक्तमन्त्राणामङ्गन्यासादिकथनम्

एतेषां मन्त्राणामाद्यस्य प्रणवमन्त्रस्याङ्गन्यासमाह - **समासेति** ॥

समासव्याससयोगेन व्याहृतीनां चतुष्टयम् ॥ 31 ॥
सत्यं चाङ्गानि तारस्य प्रोच्यन्ते ....।

भूर्भुवःसुवरिति प्रत्येकमुच्चारणं **समासः** सङ्कोचः मिलितास्तिस्रो **व्यासः** विस्तारस्तेषां **योगः** सम्बन्धस्तेनाङ्गचतुष्टयं सत्यमित्येकमिति प्रणवस्य पञ्चाङ्गानि

प्रोच्यन्ते अङ्गन्यासमन्त्रा इति प्रोच्यन्ते इति यावत् । चशब्दादेतैरेवाङ्गुलिन्यासोऽपि कार्य इति समुच्चिनोति । तदुक्तं `अङ्गुलीषु च विन्यस्येदङ्गमन्त्रेण वै क्रमात्' इति । अत्र ॐ ॐ ॐ इत्याद्यन्तोङ्कारसाहित्येन प्रणवजपः कार्य इति सम्प्रदायविदः । मन्त्रार्थस्तु देशतः कालतः गुणतः ओततत्वादोम् । सर्वस्वामित्वेन सर्वत्र प्रविष्टत्वादोम् । सर्वभिन्नत्वान्निर्दोषत्वादः । सर्वोत्कृष्टत्वादुः । सर्ववेदादिमेयत्वात् ज्ञानरूपत्वाद्वा म इति वर्णत्रयात्मकोङ्कारार्थो[1] ज्ञेयः ॥ छ ॥

अस्मिन्प्रणवमन्त्रे यतीनामेवाधिकारो नेतरेषाम् । `प्रणवो यतिनामेव गृहिभिर्ज्ञायते न स' इति वाराहवचनात् । `जपाधिकारी यतिरस्य सूचितः' इति नारायणपण्डिताचार्यवचनाच्च(म.वि.4-32) ।

अत्र **केचित् ।** गृहस्थस्य प्रणवनिषेधः पुनश्चरणे द्वादशसहस्राधिकजपे च । न पुनर्मन्त्रमात्रे ।

`गृहस्थाद्यास्तथा शुद्धाः पौनश्चरणिकं विना ।
नित्यमेव जपं कुर्युः प्रणवस्य विधिं शृणु' इति

शौनकवचनादिति । अत एव मध्वविजयवाक्यस्य सुष्ठु उचितः पुनश्चरणे द्वादशाधिकजपे चोचित इत्यर्थः । अपरे तु मन्यन्ते । प्रणवस्य स्वरूपेण साम्येऽपि ध्येयदेवताभेदेन भिन्नत्वम् । यथा रामषडक्षरस्य[2]रामयोर्ध्यानभेदेन भिन्नत्वम् । यथा वा ऋषिभेदेन गायत्र्याः । तथा चैकादशतात्पर्ये प्रणवमाहात्म्येऽनेकत्वं प्रणवमन्त्रस्योक्तम् ।

`त्रिमात्रमादितः कृत्वा यावच्चानन्तमात्रकाः ।
प्रणवास्ते विभेदेन ह्यनन्ताः परिकीर्तिता'[3] इति ।

---

1 ओमाङोश्चेति पाणिनिसूत्रात् वर्णत्रयात्मक+ओङ्कार इत्यत्र वृद्धिं बाधित्वा पररूपम् ।

2 अत्र प्रा.पाठे "=4' इति चिह्नितम् । तच्च रामषडक्षरमन्त्रस्य चतुर्थाध्यायगततत्वसूचनाय ।

3 11-21-41 भा.ता. उदाहृतं प्रणवमाहात्म्यवचनम् ।

तस्मात् तन्त्रसारोक्ते सर्वस्याप्यधिकारः। प्रणवकल्पोक्ते यतेरेवाधिकारः। तत एवानन्तमात्रान्तमित्यत्र पण्डिताचार्यैः प्रणवोच्चयमिति विशेषितः प्रणवः। अत एव वराहवचने प्रणवः प्रणवविशेष इत्यर्थ इति ॥31.॥

1.12 अष्टाक्षरमन्त्रः

इदानीमष्टाक्षरस्य पञ्चाङ्गन्यासाङ्गुलिन्यासावाह - **अष्टाक्षरस्येति ॥**

.... अष्टाक्षरस्य च।
क्रुद्धमहावीरद्युसहस्रसहितोल्ककाः ॥ 32 ॥

चतुर्थ्यन्ता हृदादीनि पृथग्रूपाणि तानि च।
विष्णोरेवात्यभेदेऽपि तदैश्वर्यात् तदन्यवत् ॥ 33 ॥

चक्रशङ्खवराभीतिहस्तान्येतानि सर्वशः।
मूलरूपसवर्णानि कृष्णवर्णा शिखोच्यते ॥ 34 ॥

अष्टाक्षरस्य क्रुद्धमहावीरद्युसहस्रैः सहिताश्च ते उल्काश्चतुर्थ्यन्ताः शब्दाः **हृदादीनि** हृदादिशब्दवाच्यभगवद्रूपपञ्चकप्रतिपादका इति यावत्। प्रतिपाद्यप्रतिपादकयोरैक्योक्तिस्तु `अहं यं वै लोकः प्रथमा महानाम्नी' इत्यादाविव ज्ञेया[1]। चशब्दादङ्गानि प्रोच्यन्त इत्यस्यानुकर्षः। अङ्गुलिन्यासा वा सूचिताः। यथोक्तं नारायणीये-

`क्रुद्धोल्कश्च महोल्कश्च वीरोल्को द्युल्क एव च।
सहस्रोल्कश्चतुर्थ्यन्तैरेभिरङ्गुलिषु न्यसेत् ॥
पूर्वमङ्गुष्ठपूर्वासु पञ्चाङ्गानि ततो न्यसेत्' इति।

---

1 ऐतरेयब्राह्मणस्येदं वाक्यं कर्मनिर्णये उद्धृत्य व्याख्यातम्। `वाच्यवाचकयोरैक्यव्यपदेशः "अयं वै लोकः प्रथमा महानाम्नी" इत्यदौ दृष्टः' इति [1-1-1] तत्वप्रकाशिकाछाया अस्मिन् वाक्ये दृश्यते।

चतुर्थ्यन्ता इत्युपलक्षणम् । स्वाहान्ताश्चेत्यपि ग्राह्यम् ।

कृद्धोल्कादिशब्दव्युत्पन्नार्थस्तु - कृत् क्रोधः तं हन्ति प्रापयतीति क्रोधाभिमानी दुर्योधनस्तद्विषये उल्क इवाचरतीति कृद्धोल्कः कृष्णः । महतोरुलयो रुद्रेन्द्रयोः कं यस्मादसौ महोल्कः । `ल इन्द्रे लवणे ल' इति धनञ्जयः[1]। वीराणामृजूनामुत्कृष्टं ल-ममृतं कामयति ददामीति प्रतिजानीत इति वीरोल्कः । `लकारश्चामृते स्मृत' इति ध-नञ्जयः । `कै गै रै शब्द' इति धातुः[2]। द्युलोकोपलक्षितसर्वलोकानाम् उल्केव प्र-काशकः । अत्र दीर्घाभावश्छान्दसः । अन्यथा `अकः सवर्णे दीर्घ' (पा.सू.6-1-101) इति दीर्घे द्यूल्क इति भवेत् । सहस्रसङ्ख्याकाः उल्कोपमाः कान्तिविशेषाः यस्येति स-हस्रोल्क इति बोध्यः[3]।

॥ **तानीति** ॥ **तानि** कृद्धोल्कादीनि विष्णोः **पृथक्** पूर्वोक्ताजादिभ्यो भिन्नानि रूपाणि । नन्ववताराणामभेदात्कथं पृथगित्युक्तिरित्यत आह - **अत्यभेदेऽपीति** ॥ अत्यन्ताभेदेऽपि तदन्यवत्प्रतिभासन्ते । तत्र हेतुः **तदैश्वर्यादिति** ॥ **तस्य** वि-ष्णोः **ऐश्वर्यात्** अचिन्त्यशक्तेरित्यर्थः । कृद्धोल्कादीनां ध्यानमाह - **चक्र इति** ॥ **एतानि** कृद्धोल्कादीनि **सर्वशः** सर्वाणि चक्रादिहस्तानि **मूलरूपसवर्णानि** उ-द्यद्भास्वत्समाभासानि । तस्यापवादमाह - **कृष्णवर्णेति** ॥ **शिखा** शिखायां स्थित-त्वात् शिखाशब्दवाच्या वीरोल्काख्या मूर्तिः कृष्णवर्णोच्यते । यद्वा सर्वेषां कृद्धोल्का-दीनाम् उद्यद्भास्वद्वर्णत्वे समेऽपि **शिखा** केशपाशः कृष्ण एवेत्यर्थः ॥32-34 ॥

प्रसङ्गात्केशवादीनां वर्णमाह - **चतुर्विंशदिति** ॥

चतुर्विंशन्मूर्तयश्च मूलरूपसवर्णकाः ।

---

1 अत्र उकारः रुद्रवाचक इति पृथगेव वक्तव्यम् । अग्रे चतुर्थश्लोके `उद्धृतम् उकारवाच्यः स वि-भुर्नृसिंहो रुद्रनामकः॥' इति ऐतरेयवाक्यमत्र विवक्षणीयम् ।

2 क्रमेण धा.पा. 916,917,909 ।

3 अस्य कृद्धोल्कादिशब्दव्युत्पन्नार्थस्तु इति प्राक्तनेनान्वयः ।

1.13 प्रणवमन्त्रः

प्रणवमन्त्रस्य वर्णन्यासस्थानमाह - **आदीति ॥**

आदिवर्णत्रयं नाभिहृच्छिरस्सु यथाक्रमम् ॥ 35 ॥
न्यसनीयं च तद्वर्णदेवताध्यानपूर्वकम् ।

अकारोकारमकाराणीति वर्णत्रयं नाभिहृच्छिरस्सु-[1] अवर्णदेवता विश्वः, उवर्णदैवतं तैजसः, मकारस्य प्राज्ञ इति, विश्वादिवर्णदेवताध्यानपूर्वकं देवताक्षरस्थानानां क्रममनतिक्रम्य न्यसनीयम् । नादादीनां पृथगुच्चारणाविषयत्वादवर्णत्वाद्वा तन्न्यासानुक्तिरिति ज्ञेयम् ॥35 ॥

मूलमन्त्रस्य अक्षरन्यासस्थानान्याह - **पदिति ॥**

पज्जानुनाभिहृदयवाङ्नासानेत्रकेषु च ॥ 36 ॥
अष्टाक्षराणां न्यासः स्याद् .... ।

केषु चेति चशब्दादङ्गुलीषु च न्यासः स्यात् । तदुक्तं नारायणीये -

`दक्षादिवामतर्जन्यन्ताङ्गुलीनां त्रिपर्वसु ।
ज्येष्ठाग्रेण क्रमात्तारुरुद्धानष्टाक्षरान्न्यसेत्' इति ।[2]

---

1 अत्र अग्रे च आधुनिकानां "-,' चिह्नानां स्थाने मातृकासु दण्डो दृश्यते । अध्येतृसौकर्याय अत्र चिह्नानि अङ्कितानि ।

2 तारुरुद्धानित्यस्य तारसहितानित्यर्थः ।

अयं च पादादिसंहृतिक्रमो यत्यपेक्षयैव। गृहिभिस्तु शिरआदिन्यास एवानुष्ठेय इति सम्प्रदायः। तथा च ॐ नमो नारायणायेति मन्त्रप्रयोगः। अत्र उक्तवक्ष्यमाणसर्वमन्त्रेष्वङ्गन्यासादिप्रकारो **गुरुचरणरचितमन्त्रोद्धारे** द्रष्टव्यः।[1] विस्तरभिया नेहोच्यते। मन्त्रार्थस्तु - सत् चित् आनन्द आत्मेति गुणचतुष्टयमपि नारायणशब्दार्थः। तथा हि अदोषाश्रयत्वान्नारायणः। सर्वचेतनापेक्षितज्ञानानन्दाश्रयत्वात्, सर्वचेतनसङ्घस्य स्वामित्वेनाश्रयत्वाच्च नारायणः। तस्मै तत्प्रीत्यर्थं तदुद्देशेनेति यावत्, **नमः** तनुमनःप्रभृतीनां भगवत्प्रवणत्वमस्त्विति ॥36. ॥

1.14 व्याहृतिमन्त्रः

व्याहृतिमन्त्रस्य ऋष्यादीनाह - **व्याहृतीनामिति ॥**

.... व्याहृतीनां प्रजापतिः।
मुनिश्छन्दस्तु गायत्री देवता भगवान् हरिः ॥ 37 ॥

हरिर्देवता। नन्वनिरुद्धादीनां देवतानां पूर्वमुक्तत्वात् हरेस्तद्देवतात्वं कथमिति चेत् सत्यम्। अनिरुद्धादिचतूरूपी हरिरित्यस्यार्थस्य विवक्षितत्वात् ॥37 ॥

व्याहृतिप्रतिपाद्यमूर्तिध्यानमाह - **उद्यदिति ॥**

उद्यदादित्यवर्णश्च ज्ञानमुद्राभयोद्यतः।

अधोभुजयोः ज्ञानमुद्राभयमुद्रे। ऊर्ध्वभुजद्वये तु चक्रशङ्खाविति चतुर्भुजत्वं ज्ञेयम्। कश्चित्त्वत्र मुद्राद्वयस्यैवोक्तत्वाद्विभुजत्वमेवेत्याह।

---

[1] अत्र ग्रन्थकृता स्वपितृचरणानां श्रीश्रीनिवासतीर्थाचार्याणां मन्त्रोद्धारनामको ग्रन्थः विवक्षितः। अयं ग्रन्थः अद्यावधि न मुद्रितः। जयतीर्थहस्तलिखितग्रन्थालये वर्तते। अस्मिन् विषये "तन्त्रसारसङ्ग्रहः छलारीव्याख्यासमेतः" अस्य पुस्तकस्य प्राक्कथनं द्रष्टव्यम्। 303ग्रन्थात्मकः। [एकः ग्रन्थः=32स्वराक्षराणि।]तन्त्रसारसङ्ग्रहोक्तसर्वमन्त्राणां न्यासादि-ऋष्यादिप्रतिपादकः।

ननु `वासुदेवादिकाः शुक्लरक्तपीतासितोज्ज्वलाः ।
चक्रशङ्खगदाब्जेतः प्रथमो मुसली हली' इत्यादिना (तं.सा.1-23) वासुदेवादिचतुर्णां अन्यथा ध्यानस्योक्तत्वात् तद्विरोध इति चेत् न। तत्र चतुर्णां पृथक् ध्यानोक्ताव-प्यत्र चतूरूपविशिष्टस्य हरेर्ध्यानाभिधानात् । अत एव तत्र वासुदेवादिकाः इति बहु-वचनम् । अत्र तु देवता भगवान् हरिरित्येकवचनम् ।

पञ्चाङ्गन्यासमाह - **तारेणेति ॥**

तारेण व्याहृतीभिश्च ज्ञेयान्यङ्गानि पञ्च च ॥ 38 ॥
नाभिहृत्केषु सर्वेषु चतस्रो व्याहृतीर्न्यसेत् ।

व्याहृतीभिः व्यस्तसमस्ताभिश्चतसृभिः । व्याहृतिभिर्न्यासान्तरं वक्ति - **नाभीति ॥** नाभिहृदयशिरस्सु सर्वाङ्गेषु च चतस्रो व्याहृतीर्न्यसेत् । पूर्णत्वाद्भूः । `भू बहा'विति (धा.पा.1845) धातोः । बहुः पूर्णतायाम् । भूत्या वरत्वाद् भुवः । अनन्तसुखत्वा-त्स्व इति मन्त्रार्थः ॥

अत्र `भूरिति ऋग्भ्यः भुवरिति यजुर्भ्यः स्वरिति सामभ्य' (छा.उ.4-17-3) इति छान्दोग्यचतुर्थाध्यायान्तिमखण्डोक्तरीत्या ऋगादिवेदाभिमानिचतुर्मुखहरवायुभ्यो व-राणां वराहनृसिंहकपिलानां च क्रमाद्व्याहृतित्रयवाच्यत्वमनुसन्धेयम् । उक्तं च त-द्भाष्ये -

`अग्निर्नासिक्यवायुश्च सूर्यो लोकरसास्त्रयः ।
अग्ने रसस्तु ऋग्वेदमानी ब्रह्मा प्रकीर्तितः ॥

नासिक्यवायोस्तु रसो यजुर्वेदात्मको हरः ।
सामवेदाभिमानी तु वायुः सूर्यरसः स्मृतः ॥
वराहसिंहकपिलास्तेषां भूरादिनामका' (छा.भा.4-17-3) इति ॥38. ॥

1.15 द्वादशाक्षरमन्त्रः

अथ वासुदेवद्वादशाक्षरमन्त्रस्य ऋष्यादीनाह - **द्वादशार्णस्येति ॥**

द्वादशार्णस्य जगतीच्छन्दोऽन्यत्तारवत्स्मृतम् ॥ 39 ॥

अच्छवर्णोऽभयवरकरो ध्येयोऽमितद्युतिः ।
पदैर्व्यस्तैः समस्तैश्च ज्ञेयान्यङ्गानि पञ्च च ।
अष्टाक्षराणां स्थानेषु बाह्वोरूर्वोश्च विन्यसेत् ॥ 40 ॥

अन्यत् ऋषिमात्रं **तारवत्** प्रणवमन्त्रवत् ।

ध्यानमाह - **अच्छेति ॥** धवलवर्णः **अमितद्युतिः** अपरिच्छिन्नकान्तिः । पञ्चाङ्गान्याह - **पदैरिति ॥** मन्त्रस्योङ्कारादिभिश्चतुर्भिः पदैः समस्तेन पञ्चाङ्गानि । अयं वक्ष्यमाणः सर्वोऽपि न्यासः तत्तद्वर्णदेवताध्यानसाहित्येनैवेति, `न्यसनीयं च तद्वर्णदेवताध्यानपूर्वकम्' इति (तं.सा.1-36) पूर्वोदाहृतस्मृत्या ज्ञेयम् ।

वर्णन्यासमाह - **अष्टाक्षराणामिति ॥** स्थानेषु पादमारभ्य कान्तेषु । [1]अवशिष्टचतुर्वर्णानां न्यासस्थानमाह - **बाह्वोरिति ॥** विन्यसेत् द्वादशाक्षरवर्णानिति शेषः । तथा च ॐ नमो भगवते वासुदेवायेति मन्त्रप्रयोगः । मन्त्रार्थस्तु - समग्रैश्वर्यादिगुणवत्त्वाद्भगवान् । तस्मै । वासुदेवाय । आच्छादयति सर्वमिति वासुः । `वस आच्छादने' (धा.पा.1023) इत्यतः उण् । वसति सर्वत्र इति वा । वस निवास इत्यत उण् । क्रीडादिगुणवत्त्वाद्देवः । तस्मै नम इति । `छादयामि जगद्विश्वं भूत्वा सूर्य इवाम्बुभिः । सर्वभूताधिवासश्च वासुदेवस्ततोऽस्म्यहम्' इति (गी.भा.उ.मो.ध.10-38) गीताभाष्योदाहृतमोक्षधर्मवचनात् । विश्वं समस्तं भूत्वा प्राप्येति तदर्थः ॥39,40 ॥

---

1 अत्र शिरः इति कशब्दार्थः प्रा.पाठे पार्श्वे लिखितः ।

1.16 ब्रह्मगायत्रीमन्त्रः

गायत्र्या ऋष्यादीनाह - **विश्वामित्रस्त्विति ॥**

विश्वामित्रस्तु सन्ध्यार्थे तदन्यत्र प्रजापतिः ।
मुनिर्देवस्तु सवितृनामा स्रष्टृत्वतो हरिः ॥ 41 ॥
प्रोद्यदादित्यवर्णश्च सूर्यमण्डलमध्यगः ।
चक्रशङ्खधरोऽङ्कस्थदोर्द्वयो ध्येय एव च ॥ 42 ॥

सताराश्च व्याहृतयो गायत्र्यङ्गानि पञ्च च ।
दोः पत्सन्धिषु साग्रेषु नाभिहृन्मुखकेषु च ॥ 43 ॥
वर्णन्यासश्च कर्तव्यः .... ।

सन्ध्यार्थे सन्ध्योपासनाङ्गगायत्र्याः विश्वामित्र ऋषिः । **तदन्यत्र तु** अष्टमहामन्त्रप्रविष्टगायत्रीजपे तु **प्रजापतिः** ब्रह्मा । हरिः **देवः** देवता । `सविता देवता । अग्निर्मुखम्'[1] इत्याद्युपनिषद्विरोधशान्त्यै सवितृशब्दं हरौ निर्वक्ति - **स्रष्टृत्वत इति ॥** अत्र गायत्र्याः प्रजापतिर्मुनिरिति वक्तव्यम् । सत्यम् । तावत्येवोक्ते `विश्वामित्र ऋषिः'[2] इत्यादिवाक्यविरोध इति शङ्का स्यात् । तद्विरोधपरिहाराय वाक्यगतिं वक्तुं `विश्वामित्रस्तु सन्ध्यार्थे' (तं.सा.1-41) इत्युक्तम्, न तु प्रकृताभिप्रायेणेति द्रष्टव्यम् । ध्येयदेवतालक्षणमाह - **प्रोद्यदिति ॥** सूर्यमण्डलमध्यग इत्येव सम्बन्धः । उपरितनभुजाभ्यां शङ्खचक्रधरः । अङ्कस्थितोत्तानपाणिद्वयः । ओङ्कारसहितव्याहृतिचतुष्टयैः पञ्चाङ्गान्याह - **सताराश्चेति ॥** अक्षरन्यासमाह - **दोः-**

1 म.ना.उ.सन्ध्योपासनमन्त्रप्रकरणम् ।
2 म.ना.उ.सन्ध्योपासनमन्त्रप्रकरणम् ।

पदिति॥ अग्रसहितेषु दक्षिणवामभुजपादसन्धिषु नाभौ हृदि मुखे के च **वर्ण-न्यासः** गायत्रीवर्णन्यासः कार्यः। प्राणायामप्रकारस्तु `गायत्र्या दशतारकैः' इति द्वितीयाध्याये (तं.सा.2-5) वक्ष्यते। मन्त्रप्रयोगस्तदर्थश्च प्रसिद्धः[1] ॥ 41-43. ॥

1.17 मातृकामन्त्रपुरुषसूक्तमन्त्रयोरङ्गन्यासादिनिरूपणम्

प्रणवमन्त्रे प्रोक्तानृष्यादीन् मातृकामन्त्रस्य पुरुषसूक्तस्य चातिदिशति - **तार-वदिति॥**

> .... तारवन्निखिलं स्मृतम् ।
> पञ्चाशदक्षराणां च पुंसूक्तस्यापि सर्वशः ॥ 44 ॥
> अनुष्टुभश्च त्रिष्टुप् च छन्दोऽस्य त्रिष्टुभोऽपि वा ।

पञ्चाशदक्षराणां मातृकामन्त्राणां **निखिलम्** ऋषिर्देवता छन्दोऽङ्गन्यास-श्चेति सर्वं **तारवत्** प्रणवमन्त्रस्येव स्मृतम्। अन्तर्यामी ऋषिर्नारायणो देवता दैवी गायत्री छन्दः सत्यान्तान्यङ्गानि तादृग्रूपा इति ध्यानम्। तारवदित्येतत्पुंसूक्तस्यापी-त्यत्रापि सम्बध्यते। **सर्वशः** सर्वस्य पुंसूक्तस्य **निखिलं** छन्दोव्यतिरिक्तमृष्यादिकं तारवत् स्मृतमित्यर्थः। पुरुषसूक्तस्य छन्द आह - **अनुष्टुभ इति॥**

[2] षोडशसङ्ख्याकऋगात्मकस्यास्य पुरुषसूक्तस्य मध्ये पञ्चदशर्चामनुष्टुभश्छन्दांसि। यज्ञेन यज्ञमित्यन्त्यायाः त्रिष्टुप्छन्दः। अत एवानुष्टुभ इति बहुवचनं त्रिष्टुबित्येकवचनम्।

---

1 विश्वामित्रगायत्रीमन्त्रार्थः ऋग्भाष्ये आदौ "ओमशेषगुणाधार" इत्यादिनाऽभिहित इत्याशयः स्यात्।

2 इत आरभ्य आपुरुषसूक्तव्याख्यानसमाप्ति ज.पाठे नास्ति। च्युतसंयोजनसूचकः हंसपादस्तु दृ-श्यते। तेनोह्यते यत् लिपिकृता जानतैव तन्त्रसारटिप्पणिमात्रकामेन त्यक्तमिति।

अत एवानुक्रमणिकायां ``नारायण ऋषिः पुरुषो देवताऽनुष्टुप्छन्दः अन्त्या त्रिष्टुप्छन्दः'[1] इत्युक्तम् । पुंसूक्तस्य षोडशऋगात्मकत्वनियमस्तु ऋक्शाखिनामेव। याजुषाणां तु अष्टादशसङ्ख्याकऋगात्मकत्वम् । तेषां पक्षेऽप्याद्यपञ्चदशसङ्ख्याकानामनुष्टुभ इति पूर्ववदेव। इतरासां त्रिष्टुभः छन्दांसीत्याह - **छन्दांसि त्रिष्टुभोऽपि वेति॥** वाशब्दो व्यवस्थितविकल्पे । ऋक्शाखिनां पक्षे त्रिष्टुप् छन्दः । याजुषाणां पक्षे त्रिष्टुभ इति ॥ 44. ॥

अयमत्र पुरुषसूक्तार्थः। षोडशर्चमिदं सूक्तं वर्गत्रयात्मकम् । तत्र

`जगृहे पौरुषं रूपं भगवान् महदादिभिः ।
सम्भूतं षोडशकलमादौ लोकसिसृक्षये'त्युक्तदिशा (भा.1-3-1)

पुरुषरूपाद्ब्रह्माण्डादिसृष्टिं `तस्माद्विराडजायत'[2] इत्यादिना वक्तुं `न च कर्तुः करणम्' इति (ब्र.सू.2-2-43) सूत्रोक्तरीत्या हस्तपादादिमच्छरीरहीनस्य स्रष्टृत्वायोगात् तदुपयोगितया दिव्यविग्रहवत्त्व[त्त्वादि]महिमानमादावाह - **सहस्रशीर्षेति** प्रथममन्त्रेण। पुरुषशब्दो हि `स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो नैनेन किञ्चनासंवृतम्' इति श्रुतौ[3] पूर्षु देहेषु पुरि हृदये शयो वर्तमान इति। `भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुष' (भा.2-4-23) इति द्वितीये एकादशस्कन्धे च सर्वान्तर्यामितया पुरुषपदवाच्यत्वोक्तेः। `पुरुषविधमपि चैनमधीयत'[4] इति सूत्रकृत्ता पुरुषसूक्तसमाख्यया वैश्वानरविद्यायाः वैष्णवत्वोक्तेश्च विष्णौ मुख्यः।

---

1 अनु.क्र.10-90। आकरे `सहस्रशीर्षा षोळश नारायणः पौरुषमानुष्टुभं त्रिष्टुवन्तं तु' इति पठ्यते। तस्यार्थानुवादोऽयमिति भाति।

2 पु.सू.5। इत आरभ्य अग्रे सर्वत्र पु.सू. इत्युल्लिख्य दत्ताः सङ्ख्याः ऋग्वेदीयपुरुषसूक्तसम्बन्धिन्यः ज्ञेयाः।

3 बृ.उ. 2-5-18। गी.भा.उदा.8-8।

4 ब्र.सू.1-2-26. अत्र सूत्रस्यैकदेशो निर्दिष्टः, तावत एव प्रकृतोपयोगात् । समग्रसूत्रं तु "शब्दादिभ्योऽन्तःप्रतिष्ठानेति चेन्न तथा दृष्ट्युपदेशादसम्भवात्पुरुषविधमपि चैनमधीयते"।

सहस्रशब्दोऽत्रानन्तवाची । `परमो हरिरादिरनादिरनन्तोऽनन्तशीर्षोऽनन्ताक्षोऽनन्तवाहुरनन्तगुण'[1] इति श्रुतेः । तथा चानन्तानि शीर्षाणि अनन्तान्यक्षीणि अनन्ताः पादा यस्य स तथा । अनन्तशीर्षादिरित्यर्थः । पादशव्दस्य `सङ्ख्यासुपूर्वस्ये'त्यन्तलोपः (पा.सू.5-4-140) । नन्वेवम् `अशरीरः प्रज्ञात्मा' इत्यादिश्रुत्या `अरूपवदेव हि तत्प्रधानत्वात्' इति (ब्र.सू.3-2-14) सूत्रेण च विरोध इति चेत्, न । श्रुत्यादेः प्राकृतशरीराभावपरत्वात् । `विकरणत्वान्नेति चेत्तदुक्तम्' इति (ब्र.सू.2-1-32) सूत्रेणापि पाणि पादादिकरणाभावेन स्रष्टृत्वानुपपत्तिमाशङ्क्याप्राकृतकरणानामुक्तेश्च । अतोऽस्य पुरुषस्य प्रकृत्यतीतत्वादप्राकृतविग्रहोऽयं पुरुष इति भावेन तस्य प्रकृत्यतीतत्वमाह -

स भूमिमिति ॥ `यत्किञ्च जगत्यां जगत्' इति (ईश.उ.1) ईशावास्ये जगतीशव्दस्येवात्र भूमिश्ब्दः सर्वाधारत्वसाम्येन वा, भवत्यत्र जगदिति भवतेरौणादिक मिकन्प्रत्ययान्ततया योगेन वा प्रकृतिपरः । प्रकृतिमिति वाच्ये भूमिमित्युक्तिर्भूम्युपलक्षितपञ्चभूतात्मकोऽपि विग्रहो लौकिकानामिव नेति वक्तुम् । भूतातीतत्वस्यापि प्रदर्शनाय । सः पुरुषः भूमिं प्रकृतिं पञ्चभूतानि वा अत्यतिष्ठत् अतिक्रम्यावर्तत । सर्वदा तदतिक्रान्तस्तदस्पृष्ट एव वर्तत इत्यर्थः । `आदित्यवर्णं तमसः परस्तात्' इति श्रुतेः (श्वेता.उ. 3-8) । अतीत्यातिष्ठदित्यत्र कियद्दूरमित्याकाङ्क्षायामुक्तं दशाङ्गुलमिति । दशाङ्गुल्यः परिमाणमस्येति दशाङ्गुलम् । `दशेति वै सर्वम्' इत्यैतरेयश्रुतौ[2] सर्वसङ्ख्यानां दशसङ्ख्यान्तर्भावस्योक्तेरपरिमितदेशकालव्यवधानेनात्यतिष्ठदित्यर्थः । कस्मिन्नपि देशे काले च प्रकृत्यनतिक्रमो नेति भावः । तत्र हेतुः विश्वतो वृत्वेति । भूमिमित्यन्वेति । प्रकृतिं विश्वतः सर्वत्र वहिरन्तः वृत्वा आवृत्य । प्रकृतेः सत्तापरिमाणादिप्रदत्वहेतुना प्रकृतिं व्याप्येत्यर्थः । तां वशीकृत्येति यावत् । अतोऽत्यतिष्ठदिति । तथा च भाष्यं `प्रकृत्यादिप्रवर्तकत्वेन तदुत्तमत्वादरूपवदेवा' इति (ब्र.सू.भा.3-2-1) । एतेन प्राक्पुरुषपदेन सर्वप्राणिहृदयगुहास्थत्वेनान्तर्यामितया पुरुषत्वोक्त्या प्राप्ताऽव्या-

---

1 1-2-26 ब्र.सू.भा. उदाहृतं चतुर्वेदशिखावचनम् ।

2 ऐत.2प्र.-2अ.-4ब्रा.-4मं. ।

स्तत्वशङ्काऽप्यपास्ता ॥

यद्वा `तेनेदमावृतं विश्वं वितस्तिमधितिष्ठता' इति (भा.2-6-15) द्वितीयस्कन्धे षष्ठाध्याये, `वितस्तिमात्रं हृदयमास्थाय व्याप्नुते जगत्' इति (भा.ता.2-6-15) तत्तात्पर्योक्तगारुडस्मृत्या चोक्तरीत्या दशाङ्गुलं दशाङ्गुलपरिमाणं वितस्तिमात्रपरिमितं प्राणिनां हृदयं स पुरुषः अध्यतिष्ठत्[1] अधिष्ठितवान् । कथम् ? **भूमिं** प्रकृत्यादिजगत् **विश्वतः** सर्वत्र वृत्वा आवृत्य व्याप्येति यावत् । व्याप्तिमविहायैव हृदयदेशमाश्रितवानित्यर्थः । `एष म आत्माऽन्तर्हृदये ज्यायान् पृथिव्या' (छा.उ.3-2-9) इति श्रुतेरिति ॥ छ ॥

एवं पूर्वमन्त्रे सर्वकारणप्रकृतिनियन्तृत्वादिमहिमोक्तः । द्वितीयमन्त्रे प्राकृतसर्वनियन्तृत्वादिमाहात्म्यमाह - **पुरुष एवेदं सर्वमिति ॥ इदं** प्रमाणप्रमितं **भूतम्** अतीतं यत् **यच्च भव्यम्** आगामि । यच्च भवदित्युपलक्ष्यम् । वर्तमानमित्यर्थः । यदित्युक्तेस्तदिति लभ्यते । तत् **सर्वं पुरुष एव** राजा राष्ट्रमितिवत् पुरुषाधीनमेव । `यदधीना यस्य सत्ता तत्तदित्येव भण्यत' इति स्मृतेः, `पुरुष एवेदं सर्वं भूतं भव्यं भवच्च यत् । इत्युच्यते तदीयत्वान्न तु सर्वस्वरूपत'[2] इति प्रथमे बृहद्भाष्योक्तभारतवचनाच्च ।

ननु कथमस्य सूक्तस्य विष्णुप्रतिपादकता `यत्पुरुषेण हविषेति' (पु.सू.6) `अबध्नन् पुरुषं पशुम्' इत्यादिना (पु.सू.15) पशुपुरुषस्यैवात्र प्रतिपाद्यत्वप्रतीतेः । `पुरुष एवेदं सर्वम्' (पु.सू.2) इत्युक्तसर्वात्मकत्वस्य देहयोगवशाद्भूतभव्यत्वादेश्च पशाविव विष्णावयोगाच्च । न च तत्प्रतिपादनं व्यर्थम् । तस्य पशुपतेर्महादेवस्य प्रीतिहेतुत्वादिति चेत् न । `सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादि' (पु.सू.1) ति `एष ह्येवा-

---

1 अत्यतिष्ठदिति मन्त्रेऽस्ति । पूर्वोदाहृतप्रमाणे अधितिष्ठतेत्यस्ति । तत् प्रकृतोपयोगितया अध्यतिष्ठदिति विवृतमिति भाति ।

2 बृ.भा.अ1-अव्याकृतब्राह्मणे `अथ योऽन्यां देवतामुपास्ते' इति वाक्यव्याख्यावसरे ।

चिन्त्यः परः परमो हरि' (ब्र.सू.भा.1-2-26) रित्येतत्सूक्तप्रतीकपूर्वं तस्य वैष्णवत्वोक्तिपरश्रुतिविरोधात् । `यथा हि पौरुषे सूक्ते विष्णुरेवाभिधीयत' (ब्र.सू.भा.1-2-26) इति स्कान्दस्मृत्या च विरोधात् ।

`यथा हि पौरुषं सूक्तं विष्णोरेवाभिधायकम् ।

न तथा सर्ववेदाश्च वेदाङ्गानि च नारद' इति (ब्र.सू.भा.1-2-26)

स्मृतावितरव्यवच्छेदपूर्वकं वेदादिभ्योऽतिशयेन विष्णोरेव पुरुषसूक्तप्रतिपाद्यत्वोक्त्या तन्मध्यगतस्य `यत्पुरुषेण हविषे' (पु.सू.6) त्यादेरन्यथाव्याख्येयत्वाच्च । तथा च व्याख्यास्यामः । `पुरुष एवेदं सर्वम्' इत्यत्र (पु.सू.2) विष्ण्वसाधारणलिङ्गश्रवणाच्च । तथा हि । सुधोक्तरीत्या `पत्यादिशब्देभ्य' (ब्र.सू.1-3-43) इत्यत्र टीकोक्तरीत्या च भूतभव्यादिकं संसारिप्राणिजातम्, तेषां देहद्वारा भूतजातत्वाद्युपपत्तेः, पुरुष एव पुरुषाधीनमेव । **यत्** यस्मात् । **अन्नेन** द्वितीयार्थे तृतीया । अन्नमदनीयं मरणशीलं संसारिजीवजातम् **अतिरोहति** अतिक्रामति । अमुक्ताधिपतिरिति यावत् । तस्मात् **अमृतत्वस्य** भावभवित्रोरभेदात् मुक्तवर्गस्यापीशानः । उतशब्दोऽप्यर्थः । संसारे स्वाधीनं जगद्यदि मुक्तौ स्वाधीनतां जह्यात् तदा प्रेक्षावांस्तान्न मोचयेत् । अतो मुक्तावपि तदधीनमेवेति पुरुष एवेदमिति पूर्वार्धोक्तममुक्तेशत्वं यदन्नेनेत्यन्नहेतुतयाऽनूद्य उतेति वाक्ये मुक्तवर्गेशानत्वं विधीयत इत्येवार्थो न सर्वात्मकत्वं येन पशुपुरुषोऽत्रोच्यत इति । मुक्तामुक्तस्वामित्वस्य `मुक्तानां परमा गतिः' (वि.स.ना.श्लो.2) `अमृतस्यैष सेतुः' (आ.उ.2-6) `मुक्तोपसृप्यव्यपदेशात्' इति (ब्र.सू.1-3-2) श्रुतिसूत्रादिभिर्विष्ण्वेकनिष्ठत्वेन तल्लिङ्गत्वात् । `सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात्' इति (भा.2-6-17) द्वितीयस्कन्धेऽन्नेनेत्येतदन्नमिति हेतुतयाऽनूद्य सोऽमृतस्येशान इति मुक्तेशत्वोक्तेश्च ॥ छ ॥

एतावानस्य महिमेति तृतीया । अस्यामृचि प्रागुक्तं मुक्तवर्गेशानत्वं कथमित्यतो मुक्तप्राप्यलोकेशत्वमहिमोच्यते । **अस्य** पुरुषस्य सहस्रशीर्षत्वविश्वव्या-

पित्वमुक्तामुक्तसर्वनियन्तृत्वादिरूपप्रागुक्तो **महिमा एतावान्** इति काकुः स्वरः, एतावानेव नेत्यर्थः । किन्त्वित्यत आह - **अतो ज्यायानिति ॥ अतः** प्रागुक्तमहिम्नोऽपि **ज्यायान्** ज्ञानानन्दबलैश्वर्याप्राकृतलोकेशत्वादिभिर्ज्यायान् श्रेष्ठः । कथमित्यतो व्यनक्ति - **पाद इति ॥ अस्य** प्रकृतस्य पुरुषनाम्नो हरेः **विश्वा** विश्वानि । `सुपां सुलुक्' इत्यादिसूत्रेण (पा.सू.7-1-39) प्रथमाविभक्तेराकारादेशः । **भूतानि** चेतनाचेतनवस्तूनि जीवराशिरेव वा **एकः पादः** एकोंऽशः । तदीयज्ञानानन्दबलैश्वर्यादिमाहात्म्यस्य चतुर्धा विभक्तस्य चतुर्थो भागो यावान् तावदानन्दबलाद्युपेतानि[1] सर्वभूतानीत्यर्थः । एतच्चतुर्गुणपरिमितज्ञानानन्दादिमान् हरिरिति यावत् । भिन्नमेव विश्वं तत्पादपरिमितसामर्थ्यं पादतयोच्यते । `पाद इत्येकदेशपरिमितं चतुर्भागबलवद्भिन्नं च' इति (ब्र.सू.भा.1-1-26) भाष्यात् । एतच्च `बुध्यर्थः पादवत्' इति (ब्र.सू.3-2-34) सूत्रोक्तदिशा अपरिमितज्ञानानन्दादिमतो हरेर्महिम्नो बुध्यारोहार्थमेवोक्तं ध्येयम् । `ज्ञापनार्थाय लोकस्य यथा राजेव देवराट्' इति[2]स्मृतेः । तर्हि विश्वचतुष्टयसमो हरिरित्यागतमिति न वाच्यं, यतोऽत्र पादशब्देन विश्वं विष्णुसामर्थ्यैकदेशपरिमितमित्युच्यते । न चतुर्थांशपरिमितम् । कुत एतत् ? `सुवर्णं कोशम्' इति[3] श्रुतौ अमृतस्य मुक्तेः पूर्णां तां विष्णोः कलामेकदेशपरिमितामाचक्षते । पादपदेन[4] पुरुषसूक्ताद्यागमाः । `यतः सा पदं चतुर्भागसाम्यं न लेभे किल' इति (ब्र.सू.भा.टी.1-1-27) स्फुटमभिधानात् । **अस्य** पुरुषस्यामृतं देहतोऽपि नाशरहितं **त्रिपात्** पादत्रयं नारायणो वासुदेवो वैकुण्ठ इति रूपत्रयम् । **दिवि** चित्प्रकृत्यात्मकत्वेन द्योत्यमाने, एकवचनं बहुवचनार्थे । लोकत्रयविवक्षायां लक्षयोजनोच्छ्रितान्तरिक्षादुपरितनलोकानां द्युशब्दार्थत्वेनान्तरिक्षादुपरितनत्वेन वा द्युशब्दवाच्येषु क्रमाच्छ्वेतद्वी-

---

1 तावज्ज्ञानानन्दादिबलोपेतानि इति प्रा.पाठः ।

2 3-2-34 ब्र.सू.भा. उदाहृतं पाद्मवचनम् ।

3 ब्र.सू.भा.उ.1-1-26 । मूलतः इदं 3-11तै.आ.वचनम् ।

4 सुवर्णं कोशमितिश्रुतिगतपादशब्देनेत्यर्थः ।

पानन्तासनवैकुण्ठाख्यलोकेषु तिष्ठतीत्यर्थः ।

`भिन्नपादाः सर्वजीवास्तस्य सादृश्यमात्रतः ।
स्वरूपपादा विष्णोस्तु त्रयो हि दिवि संस्थिताः ॥
नारायणो वासुदेवो वैकुण्ठ इति ते त्रयः' इति छान्दोग्यभाष्योक्तेः
(छा.भा.3-12-1) ।

`सुदर्शनास्त्रं भगवान् प्रायुङ्क्त दयितं त्रिपात्' इति (भा.3-20-22) तृतीयस्कन्धोक्तरीत्या त्रिपाच्छब्दस्य विष्ण्वैकनिष्ठत्वान्नान्यस्यात्र प्रतिपाद्यतेति ज्ञेयम् ॥ छ ॥

त्रिपादूर्ध्व उदैत्पुरुष इति चतुर्थी ॥ पूर्वं विश्वा भूतानीति भिन्नजीवराशेरौपचारिकपादत्वमुक्तम् । अत्र पुनर्मुख्यमेव चतुर्थपादं तस्य प्रागनुक्तचतुर्थपादस्थितत्वादिमहिमान्तरं चोच्यते । त्रयः पादा अस्येति **त्रिपात्** प्रागुक्तरूपत्रयवान् पुरुषः । दिवीति पदं पञ्चम्यन्तत्वेन विपरिणम्यानुवर्तते । पृथिव्यन्तरिक्षरूपलोकद्वयोपलक्षणमेतत् । **दिवः** द्युलोकोपलक्षितलोकत्रयात् **ऊर्ध्वो** बहिः बहिष्ठश्वेतद्वीपादिलोकत्रये **उदैत्** नित्योदितो वर्तत इत्यर्थः । सार्वकालिकोऽयं लङ् । **अस्य** पुरुषस्य **पादः** स्वरूपभूतं पुनरपरं रूपम् **इह** प्रागुक्तभिन्नपादेषु रूपेषु भूतेषु तन्नियामकत्वेन **अभवद्** वर्तत इत्यर्थः । तदुक्तं द्वितीयस्कन्धतात्पर्ये - `अनन्तासनवैकुण्ठनारायणपुराणि तु । त्रीणि धामानि विष्णोस्तु त्रिलोकाद्बहिरेव तु' इति (भा.ता.2-6-19) ।

यद्वा दिव इत्यनुवृत्तस्य द्युभ्य इत्यर्थः । ऊर्ध्व इत्यस्योन्नत इत्यर्थः ।

`पृथिव्यां द्यौर्महामेरुराकाशे सूर्यमण्डलम् ।
दिवीन्द्रसदनं चैव तत्परे तु दिवः पर'[1] इति

[1] 3-2-4 छा.उ.भा. उदाहृतं सत्तत्ववचनम् ।

छान्दोग्यभाष्योक्तस्मृत्या द्युशब्दवाच्येभ्यः मेरुसूर्यमण्डलेन्द्रसदनेभ्यः क्रमात् श्वेतद्वीपानन्तासनवैकुण्ठानामुन्नतत्वेन तत्स्थ[तत्रस्थ]नारायणवासुदेववैकुण्ठाख्यत्रयात्मकतया त्रिपात्पुरुषः **ऊर्ध्वः** द्युभ्यः उन्नतः **उदैत्** सदा उदितोऽभिव्यक्तो वर्तत इत्यर्थः। एवं च लोकत्रयविवक्षयाऽन्तरिक्षादुपरितनेषु लोकेषु श्वेतद्वीपादिषु स्थितत्वेन पूर्वं द्युस्थत्वोक्तावपि इह स्मृत्युक्तद्युशब्दार्थेभ्यः ऊर्ध्वत्वोक्तिरविरुद्धा। तदाह सूत्रकारः `उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्' (ब्र.सू.1-1-27) इति। श्वेतद्वीपादौ नित्याभिव्यक्ततयाऽवस्थानं देवादीनां सेवाद्यर्थं तत्प्राप्तय इति ज्ञेयम्। `नारायणपरा देवा एवं तान्प्राप्नुवन्ति च' इति (भा.ता. 2-6-19) तात्पर्योक्तेः। पादोऽस्येत्यस्य तु

`स एवान्यस्वरूपेण शक्रलोकसमीपगः।
इज्यो यज्ञपुमान्नामा ज्ञानिनां गृहिणां पदम्॥

यतीनां ध्रुवलोकस्थो वनिनां मेरुमध्यगः।
आदित्यमण्डलस्थस्तु ज्ञानिनां ब्रह्मचारिणाम्' इति[1]

ब्रह्माण्डस्मृत्युक्तरीत्या **अस्य** त्रिपात्पुरुषस्य पुनः **पादः** अन्यद्रूपम् **इह** दिवि त्रिलोक्यन्तः मेरुसूर्यमण्डलेन्द्रलोकसमीपस्थवैश्वानरलोकध्रुवलोकेषु चतुर्षु क्रमाद्वानप्रस्थब्रह्मचारिगृहस्थयतिभिर्ज्ञानिभूतैः पूज्यः सन् तेषामाश्रयतया **अभवत्** अवर्तत सदा वर्तत इत्यर्थः। महिमान्तरमाह - **तत इति॥** तत इत्यनन्तरं ज्यायानित्यनुकर्षो वा, पादोऽस्येत्यादिनोक्तहेतुतया तत इत्यनुवादो वा, पूर्वोक्तमाहात्म्यादपि ज्यायान् त्रिपात्पुरुष इति वा, ततो हेतोरिति प्रागुक्तोपसंहारो वा **॥ विष्वगिति॥** विविधं स्रष्टुमञ्चतीति वा, विविधस्थानेषु श्वेतद्वीपादिषु सुष्ठु अञ्चति व्यक्ततया तिष्ठतीति वा, सूर्यमण्डलादिविविधस्थानेषु ज्ञानिवानप्रस्थप्रभृतिभिः सुस्तुततया रूपान्तरेणावस्थिततया वा विष्वक्शब्दितः त्रिपात्पुरुषः विविधप्रजासु सुरनरतिर्यगादिसर्वप्राणिषु

---

1 2-6-19 भा.ता. उदाहृतं ब्रह्माण्डवचनम्।

अक्रामत् आक्रान्तवान् । तत्र सर्वत्र व्याप्तो वर्तत इत्यर्थः । किञ्च **साशनानशने अभि ।** साशनं चानशनं च साशनानशने । अनशना देवाः । साशनास्तदितरविद्वज्जना ऋष्यादयः । एकवचनं समुदायाभिप्रायम् । तदुभयसमुदायम् **अभि** प्रति अभिव्याप्येति यावत् । **व्यक्रामत्** विशेषेणाऽक्रम्य स्थितवानिति । तदुक्तं द्वितीयस्कन्धतात्पर्ये - 'त्रिपात्स एव भगवान् सर्वप्राणिषु संस्थितः । निरन्नेषु च विद्वत्सु त्रिदशेष्वितरेषु च' इति[1] । यद्वा विष्वक् त्रिपात् पुरुषः **साशनानशने** चेतनाचेतनेऽभिव्याप्य तन्नियन्तृतयेति यावत्, व्यक्रामदित्येकान्वयतया योज्यम् ॥ छ ॥

तस्माद्विराळजायतेति पञ्चमी ॥ छ ॥ महिमान्तरमुच्यते । **तस्मात्** प्रागुक्तमहिमावतः पुरुषात्, स्वर्णमयतया विशेषेण राजत इति विराड्वदितं ब्रह्माण्डम् **अजायत** आरभ्यत । ततो **विराजः** अण्डाद् **अधि** अण्डमभिव्याप्य विराण्णामा **पुरुषः** चतुर्मुखोऽजायत । तथा विराण्णामा ब्रह्मा **तस्मात्** पुरुषाद्धरेः नाभिपद्माद्रूपान्तरेणाजायत भौतिकदेहेन्द्रियादियुक्तः सन्नुदभूदित्यर्थः । **तस्मात्** कारणाद् **विराजः** चतुर्मुखात् **पुरुषः** पूर्वप्रकृतपुरुषशब्दमुख्यार्थो हरिरित्यधिक इत्यावृत्य योज्यम् । **स जातः** चतुर्मुखः पश्चाज्जात इति योज्यम् । **भूमिं** भूम्युपलक्षितसर्वलोकस्थशङ्करपूर्वकाशेषजीवजातम् । **अथो पुरः** पूर्वं जातं ब्रह्माण्डं तदभिमानिनश्च **अत्यरिच्यत** अतिरिच्यावर्तत, तेषामधिपतिरभूदित्यर्थः । तदुक्तं तात्पर्ये -

'तस्माद्धरेरण्डमभूदण्डादपि चतुर्मुखः ।
स विराण्णामकस्तस्मादधिको हरिरेव तु ॥
अण्डाज्जातस्य तस्यान्यद्रूपं पद्मादभूद्धरेः ।
तदोभयात्मको जज्ञे ब्रह्मा लोकपितामहः ॥
तदैव सोऽतिरिक्तोऽभूत् शर्वपूर्वावरान् जनान्' इति (भा.ता. 2-6-19) ।

---

1 2-6-20 भा.ता. उदाहृतम् अध्यात्मवचनम् ।

पौरुषे सूक्ते प्रथमो वर्गः ॥ छ ॥

द्वितीयवर्गे आद्या ऋक् **यत्पुरुषेण हविषेति** (पु.सू.6) ॥ छ ॥ तदा बाह्ययज्ञसाधनानामभावात् तत्सिध्यर्थं मानसयज्ञेन भगवन्तमाराधितवन्तो देवा इत्युच्यते । **यत्** यदा। येन पुरुषेणेति वा। तथात्वे तमित्यग्रेतनतच्छब्देनान्वयः। **पुरुषेण हविषा** मनसा सङ्कल्पितेन चतुर्मुखाख्येन पशुरूपेण हविषा **यज्ञं** विष्णुमुद्दिश्य `यज्ञो विष्णुर्देवता' इति श्रुतेः[1]। **यज्ञं** यागकर्मेत्यप्यर्थः। देवा **अतन्वत** अकुर्वत। तदा **अस्य** यज्ञकर्मणो **वसन्तो** वसन्तर्तुः **आज्यमासीत्** आज्यत्वेन सङ्कल्पितवन्तः। एवमग्रेऽपि। ग्रीष्मर्तुरिध्म आसीत् । शरदृतुः पुरोडाशरूप हविरासीदित्यर्थः।

अथ द्वितीया- **सप्तास्यासन्निति। अस्य** मानसयज्ञस्य गायत्र्यादिसप्तच्छन्दांसि परिधय **आसन्** अभवन् । आहवनीयाग्नेस्त्रयः परिधयः इतरवेदिगतास्त्रयः आदित्यश्च सप्तमः परिधिः परिधिप्रतिनिधिरूपः। `यः पुरस्तात्परिदधात्यादित्यो ह्येवोद्यन्पुरस्ताद्रक्षांस्यपहन्ति' इति श्रुतेः। एते आदित्यसहिताः सप्त परिधयः सप्तच्छन्दोरूपाः। तथा समिधः **त्रिःसप्त** त्रिगुणितसप्तसङ्ख्याकाः एकविंशतिः कृताः। `द्वादशमासाः पञ्चर्तवो त्रयः इमे लोकाः असावादित्य एकविंशः' इति श्रुतेः एकविंशतिपदार्थाः त्रिःसप्त समिधः इध्मत्वेन कृताः। **यत्** यदा देवा **यज्ञं** विष्णुं प्रति तमुद्दिश्य मनसा यज्ञं **तन्वानाः** कुर्वाणाः **पशुं** पशुत्वेन भावितं **पुरुषं** चतुर्मुखम् **अबध्नन्** यूपे नियोजितवन्तः। तदा सप्तास्यासन्निति योजना। अस्य मन्त्रस्य एतत्सूक्तोपान्त्यत्वेन बह्वृचां पाठेऽपि पाठक्रमादर्थक्रमस्य बलवत्त्वेन तदर्थस्यात्र सङ्गतत्वाद्याजुषाणामत्रैव पाठाच्चायं मन्त्रोऽत्र व्याख्यातः।

बह्वृचां पाठक्रमे तु **तं यज्ञमिति** ऋक् द्वितीया। **तं यज्ञं बर्हिषि प्रौक्षन्निति। यज्ञं** यज्ञसाधनभूतम् । यूपे मनसा बन्धनात्पशुत्वेन कल्पितं वा,`स जात' (पु.सू.5)

---

1 1-1-26 ब्र.सू.भा. उदाहृता।

इत्यादिना प्रसक्तं वा पुरुषम् । मनसा **बर्हिषि** दर्भसंस्तरे । यद्वा बर्हिरिति यज्ञनाम । यज्ञे **प्रौक्षन्** अद्भिः सेचितवन्तः । `उक्ष सेचने' (धा.पा.657) । सेचनपर्यग्निकरणादिसंस्कारं कृतवन्तः । परमपुरुषव्यावृत्त्यर्थमुक्तम् **अग्रतो जातं पुरुषमिति ।** हरेः प्रथमतो जातमित्यर्थः । **तेन** पुरुषरूपेण पशुना । ये **देवाः साध्या ऋषयश्च** ते सर्वे । यज्ञमित्यनुषङ्गः । **यज्ञम्** इज्यत्वेन हेतुना यज्ञनामकं प्राक् पुरुषपदेन प्रकृतं विष्णुम् **अयजन्त** आराधितवन्तः । यद्वा

राष्ट्रिय संस्कृत संस्थान ग्रन्थालय 23655 जयपुर

`विष्णुं रुद्रेण पशुना ब्रह्मा ज्येष्ठेन सूनुना ।
अयजन्मानसे यज्ञे पितरं प्रपितामहः'[1] इति

चतुर्थगीताभाष्योक्त्याऽत्र मन्त्रेषु पशुपुरुषो रुद्रो ध्येयः । ब्रह्मा यजमानः देवा ऋत्विजः ।

ततश्चायमर्थः । विराजोऽधि पुरुष इत्यस्य **विराजः** चतुर्मुखात् **अधि** `रुद्रं समाश्रिता देवाः' इत्युक्तेर्देवादिभ्योऽधिकः सन् **पुरुषो** रुद्रोऽजायतेत्यप्यर्थो ध्येयः । अधीत्युक्तिः ज्येष्ठसूनुत्वसूचनाय । स जात इत्यादेर्यथासम्भवं पूर्ववदर्थः । यत्पुरुषेण रुद्ररूपेण हविषा देवा ब्रह्मादय इति वा । ब्रह्मेत्युपलक्ष्य ब्रह्मा देवाश्चेति वा । पुरुषं जातमग्रत इत्यस्य अग्रतो जातं पुरुषं रुद्रं चतुर्मुखाद्देवेभ्यः प्रथमतो जातं ज्येष्ठपुत्रमित्यर्थः । शिष्टं प्राग्वत् ॥ छ ॥

तृतीया **तस्माद्यज्ञात्सर्वहुत** इति । मानसयज्ञेनाराधिताद्यज्ञनामकात्पुरुषाद्ब्राह्मयज्ञसाधनादिपदार्था जाता इत्युच्यते । सर्वैर्हूयते हविरादिदानेनाराध्यते सर्वैरुपजीव्यत इति वा **सर्वहुत् ।** `हु दानादनयो' (धा.पा.1083) रित्यतः क्विप् । `ह्रस्वस्य पिति कृति तुक्' इति (पा.सू.6-1-71) तुक् । **तस्मात्सर्वहुतः यज्ञात्** यज्ञनामकाद्धरेः सकाशात् । तथा सर्वैः हूयते आहूयते भगवान् अस्मिन् यज्ञे स यज्ञः **सर्वहुत् ।** तादृशात् **तस्मात्** प्राक्प्रकृतान्मानसयज्ञान्निमित्तात् **पृषदाज्यं** दधि-

---

1 गी.भा.उदा.4-25. अत्र ब्रह्मकृतमानसयज्ञविचारः प्रस्तूयते ।

मिश्रितं यज्ञसाधनमाज्यं द्रव्यं **सम्भृतं** सम्पादितमुत्पन्नमित्यर्थः । तथा **वायव्यान्** वायुदेवताकाञ्छ्वेतपश्वादीन् अन्तरिक्षाद्वायुना पतितान्कूर्मादीन्वा । **आरण्यान्** अरण्ये भवान् हरिणप्रभृतीन् । ये च **ग्राम्याः** ग्रामे भवाः गवाश्वादयस्तांश्च पशून् **चक्रे** कृतवान् । स यज्ञनामा सर्वहुत्पुरुष इति विपरिणामेनान्वयः ॥ छ ॥

तस्माद्यज्ञात्सर्वहुत इति चतुर्थऋक्[1] ॥ छ ॥ यज्ञसाधानद्रव्योत्पत्तिमुक्त्वा मन्त्रोत्पत्तिरथोच्यते । सर्वहुतः यज्ञादिति प्राग्वत् । **ऋचो जज्ञिरे ।** `जनी प्रादुर्भावे' (धा.पा.1149) । तद्बुद्धिस्थाः सृष्टिकाले ब्रह्मादीन् प्रत्युच्चारिता इत्यर्थः । **सामानि जज्ञिरे, छन्दांसि** गायत्र्यादीनि **जज्ञिरे** भगवदुच्चारणेन व्यक्तिमगमन्नित्यर्थः । यजुरजायतेत्यप्येवं ध्येयम् । `तदुत्पत्तिवचश्चैव भवेद्व्यक्तिमपेक्ष्य तु ।' `अवान्तराभिमानानां देवानां वा व्यपेक्षया' इत्युक्तदिशा[2] अवान्तरऋगाद्यभिमानिदेवानां जन्मापेक्षया वा जज्ञिर इत्याद्युक्तिरितिध्येयम् ।

`सर्ववेदाभिमानित्वात् श्रीर्ब्रह्माणी च भारती' (ऋ.भा.श्लो.38) इत्युक्तश्रीदेव्याः नित्यत्वादवान्तरेत्युक्तम् । छन्दोभिमानिन्यस्तु

`गायत्री बृहती चैव ताः सर्वा गरुडस्तथा ।
ब्रह्माण्यनुष्टुबिन्द्राणी त्रिष्टुप्स्वाहेति चोच्यते ।' (ऋ.भा.श्लो.41) इत्यादिना ऋ-

---

1 चतुर्थी ऋक् इति वि.पाठः ।

2 विष्णुतत्त्वविनिर्णये वेदानां श्रुत्यादिशब्दवाच्यत्वे हेतुकथनावसरे उदाहृते ब्रह्माण्डवचने । समग्रपाठस्त्वित्थम् - `तदुत्पत्तिवचश्चैव भवेद् व्यक्तिमपेक्ष्य तु ।
चेतनस्य जनिर्यद्वदुच्यते सर्वलौकिकैः ॥
पुराणानि तदर्थानि सर्गेसर्गेऽन्यथैव तु ।
क्रियन्तेऽतस्त्वनित्यानि तदर्थाः पूर्वसर्गवत् ॥'
`वेदानां सृष्टिवाक्यानि भवेयुर्व्यक्त्यपेक्षया ।
अवान्तराभिमानानां देवानां वा व्यपेक्षया ।
नानित्यत्वात, कुतस्तेषामनित्यत्वं स्थिरात्मनाम् ॥' इति ब्रह्माण्डे ॥ - इति ।

ग्भाष्योक्तदिशा ध्येयाः ॥ छ ॥

पञ्चमी **तस्मादश्वा अजायन्तेति।** पुनरत्र बाह्याश्वमेधादियागसाधनानि द्रव्याणि प्राक् सामान्यत उक्तान्यप्यत्र विशिष्योच्यन्ते। **तस्मात्** प्रागुक्तात् यज्ञनामकात्पुरुषाद् **अश्वा** अजायन्त। **ये के चोभयादतः** ऊर्ध्वाधोभागयोरुभयत्र दन्तवन्तोऽश्वतरीगर्दभप्रभृतयस्ते व्यजायन्त। गावोऽपि तस्माज्जज्ञिरे। अजा अवयश्च तस्माज्जाताः। तस्मादित्यनेकवारोक्तिरन्यस्य स्वातन्त्र्येण हेतुत्वनिरासाय तात्पर्यद्योतनार्था[1]। हेत्याश्चर्ये प्रसिद्धौ वा ॥ छ ॥ इति द्वितीयो वर्गः ॥

तृतीयवर्गे आद्या **यत्पुरुषं व्यदधुरिति** ॥ छ ॥ पूर्वं सामान्यतो मानसयज्ञाराधितात्पुरुषाद्बाह्ययज्ञसाधनादिपदार्थजनिमुक्त्वा अङ्गेभ्यः सृष्टान् प्रश्नपूर्वकमाह - **यदित्यादिना** ॥ **यत्** यं यदिति वा। **पुरुषं व्यदधुः** देवा यज्ञमतन्वतेति प्रागुक्तमानसयज्ञे विशेषेणोद्देश्यतया अदधुर्धृतवन्तः मनसा ध्यातवन्तः। तदा **कतिधा** केन प्रकारेण **व्यकल्पयन्** विकल्पितवन्तः मनसा विविधतया कल्पितवन्तः। **किं** किञ्चनकाङ्गत्वेन ध्यातवन्तः? इत्यर्थः। तदेव किञ्चिद्व्यनक्ति - **मुखमिति॥ अस्य** पुरुषस्य मुखं **किमासीत्?** किञ्चनकमुच्यते? **बाहू च कौ?** किञ्चनकावुच्येते? **ऊरू च कौ?** किञ्चनकावुक्तौ? **पादाविति।** कावित्यनुषज्यते। किञ्चनकावुच्येते इत्यर्थः ॥ छ ॥

द्वितीया **ब्राह्मणोऽस्य मुखमासीदिति** ॥ छ ॥ पृष्टस्योत्तरमत्रोच्यते। **अस्य पुरुषस्य मुखं ब्राह्मण आसीत्** मुखाद्ब्राह्मणजात्याक्रान्त आसीदुदपद्यतेत्यर्थः। `स ब्राह्मण्याभिमानवान् ब्रह्म' इति (बृ.भा. अ1-अव्याकृतब्राह्मणम्)। `क्षत्रजात्यभिमानी तु पवनः' (बृ.भा. अ1-अव्याकृतब्राह्मणम्) इति। `वैश्यजात्यभिमानी च नासिक्यो वायुरूर्जितः। शूद्राभिमानी च निर्‌ऋतिः' इति (बृ.भा. अ1-अ-

---

1 अभ्यासस्य तात्पर्यलिङ्गगणपठितत्वादिति भावः। स च गणः `उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये' इति प्रदर्शितः [ब्र.सू.भा.1-1-4]।

व्याकृतब्राह्मणम्) प्रथमेऽव्याकृतब्राह्मणे बृहद्भाष्योक्तदिशा तत्तज्जात्यभिमानी वाऽत्र ब्राह्मणादिशब्देन ग्राह्यः[1]। **बाहू** बाहुभ्यां **राजन्यः** क्षत्रियः **कृतः** उत्पन्नः। वैश्य इति यत् तत् **ऊरू** ऊरुभ्यां जातम् । **यद्वैश्यः** यो वैश्यः **तत्** सः ऊरुभ्यां जात इति वा। **पद्भ्यां** पादाभ्यां शूद्रः अजायतेत्यर्थः। पद्ध्यामित्याद्युक्ति-बलात् सर्वत्रोक्तदिशा पञ्चमी ध्येया।

`यस्माद्यज्जायते चाङ्गाल्लोकवेदादिकं हरेः ।

तन्नामवाच्यमङ्गं तद्यथा ब्रह्मादिकं मुखम्' इति (ब्र.सू.भा.1-2-26)

नारदीयवचनोक्तरीत्याऽभेदोक्तिसमाधिर्ध्येयः ॥ छ ॥

---

[1] अत्र बृहदारण्यकभाष्यस्य वाक्यत्रयमुदाहृतम् । उपनिषद्वाक्यानि तेषां भाष्यं चात्रार्थसौष्ठवायो-ल्लिखितानि - `तदेतद् ब्रह्म क्षत्रं विट् शूद्रस्तदग्निनैव देवेषु ब्रह्माऽभवद् ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रः' इत्युपनिषत् ।

`बृहत्त्वात् सर्ववर्णानां ब्राह्मणः परिकीर्तितः ।
क्षतत्राणात् क्षत्रियश्च त्रिषूनत्वात् विशः स्मृताः ॥
ऊनवाची हि विड्वब्दः शुभे दत्ते त्रिभिर्यतः ।
रमते स ततः शूद्रः स ब्राह्मण्याभिमानवान् ॥
ब्रह्माग्निना सहैवाऽस्ते देवेष्वथ नरेषु च ।
ब्राह्मणेन सहैवाऽस्ते ब्रह्मा शुभचतुर्मुखः ॥
क्षत्रजात्यभिमानी तु पवनो देवराजभिः ।
सुपर्णशेषरुद्राद्यैर्मानुषेषु च राजभिः ॥
वैश्यजात्यभिमानी च नासिक्यो वायुरूर्जितः ।
वस्वादिभिः सहैवाऽस्ते देवेष्वथ नरेषु च ॥
विड्भिः शूद्राभिमानी च निरृतिर्देवतासु च ।
नासत्ययोः पृथिव्याश्च शूद्रेष्वेव तु मानुषे ॥'

इति च तद्भाष्यम् । इमानि च वाक्यानि ब्रह्माण्डपुराणस्थानीति भाष्ये उक्तम् ।

तृतीया **चन्द्रमा मनसो जात इति** ॥ छ ॥ अत्र तु देवसृष्टिरुच्यते। मनस इति पञ्चमी। अस्येति पुरुषवाचिपदमाकृष्यते। ततश्चास्य मनसोऽस्य **चक्षोः** चक्षुषोऽस्य मुखाद् इत्यादिरूपेणान्वेति। प्राग्ब्राह्मणो मुखादित्युक्तम्। नैतावदेव किन्तु इन्द्रश्चाग्निश्चाजायतेति प्रत्येकमन्वयः। **प्राणात्** श्वासात् वायुरजायत। `श्वासैजदळकव्रात इति भागवते भगवतः श्वासोक्तेः[1]। **वायुः** मुख्यवायुः प्रवहो वा ॥ छ ॥

चतुर्थी **नाभ्या आसीदिति** ॥ छ ॥ देवसृष्टिरुक्ता पूर्वत्रात्र तु लोकसृष्टिरुच्यते। नाभ्या इत्यपि पञ्चमी। अत्रान्तरिक्षादिपदैः साभिमानिलोकग्रहः। **समवर्तत** अजायतेत्यर्थः। पद्भ्यां भूमिः समवर्तत। श्रोत्राद्दिशः समवर्तन्तेत्यर्थः। **तथा** पद्भ्यां भूमिरित्यादिवत्। **लोकान्** भूम्यन्तरिक्षद्युलोकेभ्योऽन्यान् पातालादीनेकादश लोकान् पादतलाद्यङ्गजातत्वेन **अकल्पयन्** देवाद्याः `पातालमेतस्य हि पादमूलम्' इति भागवतोक्तेः(भा.2-1-26)।

सप्तास्यासन्निति पञ्चमी ऋक् `ग्रीष्म इध्मः शरद्धविः' (पु.सू.6) इत्यनन्तरमेव सङ्गतत्वात् तत्रैव व्याख्याता। अत्रैव व्याख्येयत्वपक्षे तु, प्रागुक्तयज्ञसाधनावशिष्टसाधनान्याहेति गमनिका ज्ञेया ॥ छ ॥[2]

षष्ठी **यज्ञेन यज्ञमयजन्तेति** (पु.सू.16) ॥ छ ॥ यज्ञकरणेन देवाः पुरुषार्थभाजो जाता इत्युच्यते। देवत्वयोग्याः मनुष्याः ज्ञानकर्मात्मकेन **यज्ञेन यज्ञं** भगवन्तं पुरुषमयजन्त। **ततः** तेन ज्ञानपूर्वककर्मणा **तानि** दैवतानि स्वस्वपदेषु प्रथमानि मुख्यानि **धर्माणि** धारकाणि। `धृञ् धारण' (धा.पा.900) इति धातुः। **ते** देवत्वयोग्या मनुष्याः ज्ञानपूर्वकभगवदाराधनरूपयज्ञेन देवत्वं प्राप्य स्वस्वपदस्थाः सन्तः तपनवर्षणादिना मुख्यतो लोकनियामका आसन्नित्यर्थः। **ते** पुनः

---

1 `श्वासैजदळकव्रातमिश्रश्रीकर्णदाडिमम्। विद्रुमाधरभासेषच्छोणायितसुधास्मितम् ॥ भा.12-8-23 ॥ इति समग्रश्लोकः।

2 गमनिकाशब्दार्थः प्रा.पाठे उपरि एवं लिखितः - "=गतिर्गमनिका व्याख्येत्यमरः=' । मूलमातृकायामदर्शनात् लिपिकृल्लिखित इति निश्चीयते।

महिमानो महात्मानो देवाः स्वस्वपदाधिकारावसाने **नाकम्** अकं सुखविरोधि दुःखं तन्नेति नाकं, नञो लोपाभावः, नसमासो वा, पूर्णसुखात्मकं मोक्षं **सचन्ते** , `षच समवाये' (धा.पा.997) , प्राप्नुवन् । हेति प्रसिद्धौ । **यत्र** मोक्षे **पूर्वे** पूर्वस्मिन् कल्पे । यद्वा पूर्व इति प्रथमा । पूर्वतनाः पूर्वकल्पे मुक्ता इति यावत् । **साध्याः** साध्यादिदेवाः **सन्ति,** तन्नामकमिति पूर्वेणान्वयः । पौरुषे सूक्ते तृतीयो वर्गः ॥ छ ॥

अत्र सूक्ते यजुःशाखायां `तथा लोका अकल्पयन्' इति (पु.सू.14) मन्त्रानन्तरं मन्त्रद्वयं पठ्यते ।

`वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचिन्त्य धीरो नामानि कृत्वाभिवदन् यदास्ते ॥
धाता पुरस्ताद्यमुदाजहार शक्रः प्रविद्वान् प्रदिशश्चतस्रः ।
तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यत' इति ।

यः **धीरः** धीमान्, बुद्धिमानिति यावत् । **सर्वाणि रूपाणि** वाच्यार्थभूतवस्तूनि **विचिन्त्य** निर्माय **नामान्यपि कृत्वाभिवदन्** तैर्नामभिर्व्यवहरन् **आस्ते** नामरूपात्मकं प्रपञ्चं कृत्वा य आस्ते **एतं महान्तं** देशकालगुणापरिच्छिन्नम् । **तमसः** प्रकृतेः **पारे** दूरे **स्थितं** प्रकृतिबन्धहीनम् । **आदित्यवर्णं** प्रकाशमानं पुरुषमहं जानामीति मन्त्रद्रष्टृवचनम् ।

धाता चतुर्मुखः **पुरस्तात्** पूर्वं **यं** पुरुषं प्रागुक्तमहिमवन्तम् **उदाजहार** उदाहृतवान् इन्द्रादिदेवान्प्रत्युपदिदेश । **शक्रः** इन्द्रः **प्रविद्वान्** प्रकर्षेण जानन् **चतस्रः प्रदिशः** तत्रत्यजनान् प्रति **उदाजहार** सर्वदिक्षु प्रख्यापितवान् । **तं** पुरुषम् **एवं** सहस्रशीर्षत्वादिमहिमवत्त्वप्रकारेण । **इह** लोके **विद्वान्** जानन् **अमृतो** मुक्तो भवति । **अन्यः पन्थाः** ज्ञानादन्यो मार्गः उपायो **अयनाय** मोक्षाय **न विद्यते** नास्ति । तदाह सूत्रकारः `विद्यैव तु निर्धारणात्' इति (ब्र.सू.3-3-48) ॥

छ ॥ इति तन्त्रसारटीकायां पुरुषसूक्तार्थः समाप्तः ॥ छ ॥

1.18 विष्णुषडक्षरमन्त्रनिरूपणम्

मन्त्राणामतिरहस्यत्वाद्विष्णुमन्त्रं सङ्केतेनोद्धरति - **विष्णुशब्द इति ॥**

विष्णुशब्दश्चतुर्थ्यन्तो हृदयेतः षडक्षरः ॥ 45 ॥

तारवत्सर्वमस्यापि श्यामो ध्येयो हरिः स्वयम् ।

वर्णा एव षडङ्गानि षणयोर्भेदयोगतः ॥ 46 ॥

पज्जानुनाभिहृन्नासाकेषु न्यासश्च वर्णशः ।

मन्त्रशास्त्रे हृदयशब्दस्य नमःशब्दे रूढिः[1]। **हृदयेतः** नमःशब्दयुक्तः । तथा च `विष्णवे नमः' इति मन्त्रनिष्पत्तिः । **अस्य** विष्णुमन्त्रस्यापि **सर्वम्** ऋष्यादिकं तारवत् । **श्यामः** इन्द्रनीलसमाभासो मेघश्यामो वा । विष्णुमन्त्रस्य षडङ्गन्यासमाह - **पदिति ॥** ननु वर्णपञ्चकस्य षडङ्गन्यासः कथमित्यत आह - **षणयोरिति ॥ भेदो** विश्लेषस्तदाख्योपायतः **वर्णशः** षड्भिर्वर्णैः पादादिषु न्यास इत्यर्थः । सर्वव्यापित्वाद्विष्णुः । `विष्लृ व्याप्तौ'वित्यतः (धा.पा.1095) क्नुः । विष् अस्मात् क्नुप्रत्यये `लशक्वतद्धिते' (पा.सू.1-3-8) इति ककारलोपे `रषाभ्यां नो णः समानपदे' (पा.सू.8-4-1) इति नस्य णत्वे कित्त्वाद्गुणाभावे च विष्णुरिति रूपम् ॥ सर्वहृदयेऽन्तर्नियामकत्वेन प्रविष्टत्वाद्वा विष्णुः । `विश प्रवेशन' (धा.पा.1425) इत्यतः क्नुः षत्वं च । `व्याप्तौ मे रोदसी पार्थ' इत्यादि[2] मोक्षधर्मवचनात् । तस्मै तदुद्देशेनेति यावत् । नमः मनआदेः प्रावण्यमस्त्विति मन्त्रार्थः ॥45,46. ॥

---

1 `हृदयेन इत्यस्य नमःशब्देन' इति 4-8-6भा.ता. ।

2 10-25 गी.भा.उ.मो.ध.वचनम् ।

1.19 अष्टमहामन्त्रमहिमवर्णनम्

एवमष्टमहामन्त्रानुक्त्वा तत्रादरजननाय तन्माहात्म्यकथनपूर्वकमुपसंहरति - **एते त्वित्यादिना ॥**

एते तु सर्वमन्त्राणां मूलमन्त्रा विशेषतः ॥ 47 ॥
एतज्ज्ञानात्समस्तं च ज्ञातं स्याच्छब्दगोचरम् ।
एतज्जपात्समस्तानां मन्त्राणां जापको भवेत् ॥ 48 ॥

एते प्रणवाद्याः अष्टमन्त्राः **सर्वमन्त्राणां** पीठावरणदेवतामन्त्राणां तथा वराहादिमन्त्राणां **मूलमन्त्राः** व्याख्येयमन्त्रा इत्यर्थः । सर्वे मन्त्रा अष्टमहामन्त्रव्याख्यानरूपा इति भावः । यद्वा **मूलमन्त्राः** कारणमन्त्राः । अष्टमन्त्रजपादेव सकलमन्त्रजापको भवतीत्यर्थः । **विशेषतः** मुख्यतः । एतेषामष्टमहामन्त्राणां **ज्ञानाद्** अर्थज्ञानात् **शब्दगोचरं** सकलशब्दविषयः **समस्तम्** अनन्तगुणपूर्णं ब्रह्म ज्ञातं स्यादित्यर्थः । शब्दगोचरमिति नपुंसकतोपपत्ति`र्न तच्छब्दगोचरम्' इतिभाष्यटीकायां व्युत्पादिताऽनुसन्धेया[1]। अथवा समस्तं ज्ञातप्रायमित्यर्थः । समस्तमन्त्रार्थज्ञानफलमष्टमहामन्त्रार्थज्ञानफलेऽन्तर्भवतीति भावः । अत्र येन क्रमेण प्रणवादीनामङ्गान्यभिहितानि स एव क्रमो जपे ज्ञेयः । तथा च सङ्ग्रहः -

`प्रणवोऽष्टौ व्याहृतयो द्विषड्वावित्रमातृकाः ।

---

1 ब्र.सू.भा.1-1-5 । अत्र टीकापङ्क्तिरेवमस्ति - " "त्रयी न श्रुतिगोचरा" इति गोचरशब्दस्य विशेष्यलिङ्गतयाऽऽर्षप्रयोगा"न्न तच्छब्दगोचर"मिति युक्तम् " इति । गोचरशब्दस्य पुल्लिङ्गेतरतया प्रयोगविषये न्यायसुधा-तात्पर्यचन्द्रिका-तत्वप्रकाशिकाभावदीपयोश्चर्चितम् । तत्र "निर्गतं मनसो वाचो यदि तत् स्यादगोचरम्" इतीक्षत्यधिकरणानुव्याख्यान्यायसुधायां विचारः एवमस्ति - "गवां ज्ञानानां चरो वृत्तिरस्मिन्निति गोचरम् । विषय इति यावत् । तेन नपुंसकोपपत्तिः" इति । ईक्षत्यधिकरणचन्द्रिका-भावदीपयोर्विचारो विस्तरभियाऽत्र नोल्लिखितः ।

पौरुषं वैष्णवं चेति जपे क्रम उदाहृतः' इति ।

अथ जपकाले सुदर्शनमुद्रया प्राकारतया स्थितवह्निध्यानपूर्वकं दिग्बन्धनं कृत्वा गुरूणां नतिं कुर्यात् । नतिर्वक्ष्यते चतुर्थाध्याये `स्मृत्वा गुरुम्' इत्यादिना (तं.सा.4-106) । मूलगुरवः पञ्चरात्रे योगदीपिकायां च -

`व्यासं च भारतीं वाणीं विधिं वायुं रमां तथा ।
ततो नारायणं मूलगुरूनाहुर्विपश्चितः'[1] इति ।

गुरुनमस्कारक्रमस्त्वस्मदाचार्यकृते **मन्त्रोद्धारे** ज्ञेयः ।[2]

नमनात्पूर्वं करशुद्धिरुक्ता -

`मणिबन्धे प्रकोष्ठे च कूर्परे हस्तसन्धिषु ।
तत्पृष्ठपार्श्वयोश्चैव करशुद्धिरुदाहृता' इति ।

प्रकोष्ठे विस्तृतकरेऽन्तर्भागे ।

---

1 अग्रे उदाहृते ग्रन्थकृत्पितृचरणविरचिते मन्त्रोद्धारेऽपि अयं श्लोकः योगदीपिकास्थत्वेन वर्णितः । अद्योपलभ्यमानपाठेऽयं श्लोकः नोपलभ्यते ।

2 अत्र ग्रन्थकृता आचार्यत्वेन स्वपितृचरणाः श्रीश्रीनिवासतीर्थाचार्या विवक्षिताः. तद्विरचिते मन्त्रोद्धारे गुरुनमस्कारक्रमः इत्थमुपवर्णितः - `ओम् । "स्मृत्वा गुरु"मित्याद्यनुसारेण [तं.सा.4-106 ।] गुरवो नमस्कार्याः । मूलगुरवो योगदीपिकोक्ताः । "व्यासं च भारतीं वाणीं विधिं वायुं रमां तथा । ततो नारायणं मूलगुरूनाहुर्विपश्चितः" इति । तथा चैवं क्रमः - श्रीगुरुभ्यो नमः ॥ परमगुरुभ्यो नमः ॥ श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥ श्रीवेदव्यासाय नमः ॥ श्रीनारायणाय नमः ॥ लक्ष्म्यै नमः ॥ ब्रह्मणे नमः ॥ वायवे नमः ॥ सरस्वत्यै नमः ॥ भारत्यै नमः ॥ तत्तन्मन्त्रदेवताभ्यो नमः ॥ मोक्षप्रदश्रीवासुदेवाय नमः ॥' मन्त्रोद्धारग्रन्थविषये पूर्वं 1-36तमश्लोकव्याख्यानपाददिप्पण्यां कथितम् । तत्रैव द्रष्टव्यम् ।

`प्रकोष्ठो विस्तृतः कर' इति विश्वः ।

`कूर्परो जानुनि प्रोक्तः कफोणावपि कूर्पर' इति च ॥ छ ॥

तत्वन्यासमातृकान्यासयोः क्रमस्तु - वैष्णवमन्त्रजपे प्रथमं तत्वन्यासस्तदनन्तरं मातृकान्यासः, वक्ष्यमाणवचनेभ्यः । तथा हि गौतमीये -

`प्रथमं वैष्णवे मन्त्रे तत्वानां न्यसनं स्मृतम् ।
एकपञ्चाशद्वर्णानां न्यसनं च ततः परम्' इति ।

पाद्मसंहितायां च -

`आदावष्टाक्षरे मन्त्रे तत्वन्यासं समाचरेत् ।
पश्चादजादिमन्त्राणां न्यसनं परिकीर्तितम्' इति ।

क्षीरनिधिनिबन्धे पञ्चरात्रे -

`तत्वन्यासं पुरा कुर्यात् सर्वसिद्धिमभीप्सुकः ।
मातृकान्यासमपरं तथोक्तविधिनाऽऽचरेत्' इति ।

यत्तु योगदीपिकायां -

`सताराश्च लिपीर्न्यस्येदलीके परितो मुखम्' इति (यो.दी.2 - 71)

समग्रं मातृकान्यासमुक्त्वा तत्वन्यासस्य पाश्चात्यं, यश्च पाञ्चरात्रे

`कृत्वा तु मातृकान्यासं तत्वन्यासं ततः परम्' इति,

तद्गुरुसम्प्रदायाल्लक्ष्म्याद्यन्यमन्त्रजपे पूर्वं मातृकान्यासः पश्चात् तत्वन्यास इति व्यवस्थया वा ज्ञेयम् । न्यासप्रशंसा कुलार्णवे -

`यो न्यासकवचच्छन्नो मन्त्रं जपति तं प्रिये ।
दृष्ट्वा विघ्नाः पलायन्ति सिंहं दृष्ट्वा यथा गजाः' इत्यादि ॥47,48 ॥

1.20 भगवत्पूजाकथनम्

पूजाया जपपूर्वकत्वाज्जपानन्तरं पूजाप्रकारं निरूपयति - **पूज्यश्चेति ॥**

पूज्यश्च भगवान्नित्यं चक्राब्जादिकमण्डले ।
अचले हृदये वापि चले वा केवलस्थले ॥ 49 ॥

चक्राब्जमादिर्यस्य तच्च तन्मण्डलं च तस्मिन् **चक्राब्जादिकमण्डले** । एकवचनं जात्यपेक्षया । आदिपदेन भद्रकादीनि मण्डलानि ग्राह्याणि । न केवलं ध्येय इति चार्थः । चशब्दात्प्रतिमादिष्विति वा । मण्डलोपरि प्रतिमां संस्थाप्य तत्रत्यं हरिम् पूजयेत् । प्रतिमाभावसमये केवलमण्डले हरिमावाह्य पूजयेत् । जलादिप्रायपाठात् हृदये मानसोपचारैः । जले अर्घ्यादिभिर्गन्धपुष्पादिभिश्च । आदिपदादग्नौ । **चले** प्रवासोपयुक्तचलप्रतिमायाम् । शालग्रामादौ वा । वाशब्दाद् **अचले** स्थिर इत्यपि योज्यम् । `चलाचलेति द्विविधा' इत्येकादशवचनात् (भा.11-27-13) । **केवलस्थले** शुद्धस्थले । अथवा **केवलस्थले** उच्छिन्नस्वयंव्यक्तप्रतिमास्थले । `कलौ स्थानानि पूज्यानि' इत्युक्तत्वात् । अत्रादौ रहसि मानससर्वपूजां कृत्वा पीठदेवताः सम्पूज्य प्रतिमायां बिम्बमूर्तिमावाह्य पूजयेदित्यार्याः । तथा हि योगदीपिकायाम् -

`अथाचान्तः पुरो विष्णोरुपविष्टः स मान्त्रिकः ।
अप्गन्धकुसुमैरन्यैः' इत्यारभ्य (यो.दी.3-1)
`पुष्पाञ्जलिं त्रिशः कृत्वा मनसाऽनुप्रसादयेत्' इति (यो.दी.3-9) मानसपूजोत्तरं `बहिरर्चेत्ततो विष्णुं पुरस्तात्पीठदेवता' इति प्रतिमापूजा उक्ता[1] (यो.दी.3 - 9) ॥49 ॥

---

1 अत्रोल्लिखितः योगदीपिकायाः तृतीयपटलसम्बन्धी भागः अत्र प्रदर्श्यते - `अथाचान्तः पुरो विष्णोरुपविष्टः स मान्त्रिकः ।
अब्गन्धकुसुमैरन्यैः कुर्यादात्मार्चनं हृदि ॥ 1 ॥

1.21 पीठपूजा

पीठपूजायां गुर्वादितेवतापूजाप्रकारं वदन् सव्यत्वादेर्मध्यसापेक्षत्वात् तदाह - अष्टाक्षरेणेति ॥

अष्टाक्षरेण सम्पूज्य प्रथमं देवतां पराम् ।
मध्ये सव्ये गुरूंश्चैव दक्षिणे सर्वदेवताः ॥ 50 ॥
पुनः सव्ये सर्वगुरूनाग्नेयादिषु च क्रमात् ।

ब्रह्मरन्ध्रे सुषुम्नायां सुषुम्नाकिरणद्युति ।
अर्चयेत्पीठदेवादीन् मध्ये मूलं समर्चयेत् ॥ 2 ॥

दक्षिणे गुरवः पार्श्वे सम्पूज्याः सर्वदेवताः ।
सव्ये तु सर्वगुरवो दक्षिणे हरिमेधसः ॥ 3 ॥

मध्ये पूज्याः सर्वपीठदेवता एवमेव तु ।
अनन्तो योगपीठात्मा मन्त्रास्ते चार्धशः स्वयम् ॥ 4 ॥

हृत्पद्मविष्टरासीनमुद्यदर्कोज्ज्वलप्रभम् ।
सम्भाव्य चार्घ्यपाद्याद्यैरञ्चेदगन्धपुष्पकैः ॥ 5 ॥

श्रियं भुवं वासुदेवानन्तेन्द्राद्यावृतीरपि ।
धूपदीपावथाऽमुद्य त्रिशः पुष्पैश्च पूजयेत् ॥ 6 ॥

गलितैरमृतस्यन्दैश्छिन्नभश्चन्द्रमण्डलात् ।
सश्रीकपरिवाराय नैवेद्यं विष्णवेऽर्पयेत् ॥ 7 ॥

सम्प्रीतिपूजां त्रिः पुष्पैस्तथा धूपादिमुद्रया ।
पुनश्च पुष्पाञ्जलिभिस्त्रिस्त्रिः कृत्वा प्रसादयेत् ॥ 8 ॥

पुष्पाञ्जलिं त्रिशः कृत्वा मनसा तु प्रसादयेत् ।
वहिरञ्चेत्तथा विष्णुं पुरस्तात्पीठदेवताः ॥ 9 ॥'।

प्रथमं परां देवतां परात्मानम् **अष्टाक्षरेण** अष्टाक्षरोच्चारणपूर्वकं `परदेवतायै नमः' इत्येवंरूपेणेति यावत् । **मध्ये** यत्र पीठं कल्प्यं तत्स्थानमध्ये सम्पूज्य पीठमध्ये नारायणं पूजयेत् । परदेवतयाऽत्राऽगत्योपवेष्टव्यमस्ति तदर्थं पीठं रचयामीत्यनुसन्धानं कुर्यादिति यावत् ।[1] वक्ष्यमाणपीठदेवतामध्ये वा। प्रतिमामध्य इति वा। पूर्वं[2] स्वहृदयमध्य इति वा। देवस्य सव्ये पीठाद्बहिर्गुरून् वायुं पूजयेदिति वक्ष्यमाणमत्रानुकृष्यते। दक्षिणे **सर्वदेवताः** विष्णुब्रह्मरुद्रान् । **पुनः सव्ये सर्वगुरून्** सनत्कुमारादीन् सम्पूजयेत् । तदुक्तं पाद्मतन्त्रे -

`अर्चयेद्गन्धपुष्पाद्यैः पीठपार्श्वे तु सव्यके ।
वायुमाद्यगुरुं लोके पीठपार्श्वे तु दक्षिणे ॥
ब्रह्माणं विष्णुमीशं च समाराध्य तथोत्तरे ।
सनत्कुमारं सनकं सनन्दनसनातनौ' इति ।

केचित्तु, गुरून् वाय्वादिस्वगुरून् देवतापूजार्थंताननुज्ञाप्येत्यर्थः । अत्र देवतानामर्चकत्वे वाय्वादेः साक्षाद्गुरुत्वं मनुष्याणामर्चकत्वे गुर्वन्तर्यामित्वेन गुरुत्वमिति ज्ञेयम् । **सर्वदेवताः** नवकोटिदेवताः । ब्रह्मवाय्वोर्निमित्तद्वयसद्भावादुभयत्रोक्तिर्न विरुद्धा। **सर्वगुरून्** सनकादीन् । **अन्ये** स्वगुरून् साक्षात्स्वगुरुमारभ्य सर्वगुरूनिति वर्णयन्ति ॥50. ॥

योगपीठस्य पादाधोदेवता आह - **गरुडमिति ॥**

गरुडं व्यासदेवं च दुर्गां चैव सरस्वतीम् ॥ 51 ॥

1 अत्र प्रा.पाठे पार्श्वे एवं लिखितम् - "=अविद्यमानकरणं विद्यमानस्मृतिस्तथा। उभयं रचनं प्रोक्तमिति तृतीयतात्पर्योक्तरीत्या रचनपदार्थो ज्ञेयः ।=' अन्यपाठयोरदर्शनात् अत्रापि पार्श्वे दर्शनात् लिपिकृता लिखितमिति भाति ।

2 मानसपूजायामित्यर्थः ।

आग्नेयादिकोणेषु क्रमेण गरुडादयः पीठपादाधोदेवताः पूज्याः। तदुक्तमन्यत्र -

`अव्यक्तं नियतिं चैव कालदं विष्णुमेव च।
आग्नेयादिचतुर्दिक्षु स्वभावेषु समर्चयेत् ॥
एतानप्यङ्घ्रिरूपांश्च पीठाधःस्थांश्च संस्मरेत्' इति।

अस्यार्थः - अव्यक्तिर्दुर्गा। नियतिः सरस्वती। कालदो गरुडः। विष्णुर्व्यासः। स्वभावेषु स्वेषां स्थानेषु आग्नेयादिषु अङ्घ्रिरूपान् पीठाधस्तादङ्घ्रिरूपान् पीठाधोभागरूपान् तद्गतान् स्मरेदिति ॥51॥

पीठपादोर्ध्वदेवताः फलकदेवताश्चाह - **धर्ममिति ॥**

**धर्मं ज्ञानं च वैराग्यमैश्वर्यं चैव कोणगान् ।
तदन्तः पूर्वदिक्पूर्वमधर्मादींश्च पूजयेत् ॥ 52 ॥**

यथोक्तम् पाद्मे[1] -

`धर्मादयः पादरूपाः पीठस्य फलकाः परे' इति।

परे अधर्मादय इत्यर्थः। **धर्मं** धर्माभिमानिनं तत्प्रभृतीन् **कोणगान्** आग्नेयादिकोणगान् पूजयेत्। **तदन्तः** कोणयोरन्तर्मध्ये। पूर्वदिक् पूर्वं यथा स्यात् तथा। पूर्वादिदिक्षु देवस्यैव पूर्वादिदिक्ष्विति सम्प्रदायः। मनुष्यप्राच्यादीति **अपरे**। **अधर्मादीन्** अधर्माज्ञानावैराग्यानैश्वर्याभिमानिदेवान्। धर्मादीनां रूपविशेषमाह सारसङ्ग्रहे -

[1] परन्त्वयं श्लोकः विष्णुतीर्थीयसन्न्यासपद्धतौ तृतीयाध्याय95तमश्लोकत्वेनोपलभ्यते। तस्मिन् ग्रन्थे पद्मपुराणादुल्लिखितमिति निश्चेतुं लिङ्गं नास्ति।

`धर्मं वृषतनुं रक्तवर्णमादौ प्रपूजयेत् ।

सिंहाकारं ततो ज्ञानं श्यामवर्णं समाहितः ॥

भूताकारं च वैराग्यं पीतवर्णं यजेत्ततः ।

कृष्णवर्णं गजाकारमैश्वर्यं साधु पूजयेत् ॥

अधर्मादींश्च पीठस्य चित्रगात्राधिपांस्ततः' इति ॥52 ॥

ननु धर्मादिप्राप्त्यर्थत्वेन तत्पूजनस्यावश्यकत्वेऽपि नाधर्मादिपूजनस्यावश्यकतेत्यत आह - **अपूजिता इति ॥**

अपूजिता अधर्मादिदातारस्ते तथाभिधाः ।

निर्ऋतिश्चैव दुर्गा च कामो रुद्रश्च देवताः ॥ 53 ॥

यमवायुशिवेन्द्राश्च ज्ञेया धर्मादिदेवताः ।

तथाभिधाः अधर्माद्यभिधावन्तस्तेऽपूजिताश्चेदधर्मादिदातारः स्युरतस्तेऽपि अवश्यं पूज्या इत्यर्थः। अधर्मादेर्देवता आह - **निर्ऋतिरिति ॥** धर्मादिदेवता आह - **यमेति** ॥53. ॥

पादफलकयुतं ध्यातं पीठं पृथग्विधाय परमपुरुषादीन् पूजयेदित्याह - **परम इति ॥**

परमः पुरुषो मध्ये शक्तिराधाररूपिणी ॥ 54 ॥

कूर्मोऽनन्तश्च पृथिवी क्षीरसागर एव च ।

श्वेतद्वीपो मण्टपश्च दिव्यरत्नमयो महान् ॥ 55 ॥

पद्ममेतत्त्रयं देवी रमैव बहुरूपिणी ।

परमात्मा **मध्ये** गर्भोदकमध्ये । सनवावरणब्रह्माण्डमध्य इति वा । अन्ये तु पीठमध्य इति वर्णयन्ति । **आधाररूपिणी शक्तिः** तन्नाम्नी रमा पीठस्याधोभागे पूज्येति शेषः । **शक्तिः** चिच्छक्तिश्चेत्यपि द्रष्टव्यम् ।

`शक्तिराधारशक्तिश्च चिच्छक्तिश्चेति शक्तयः ।

कूर्मादयश्च पीठाधः पूजनीया यथाक्रमम्' इत्यादिवसिष्ठवचनात्पञ्चसंस्कारे ।

कूर्मो विष्णुकूर्मो वायुकूर्मश्च । **अनन्तः** शेषः । यथोक्तं बृहद्भाष्ये प्रभञ्जने -

`स एष कूर्मरूपेण वायुरण्डोदके स्थितः ।

विष्णुना कूर्मरूपेण धारितोऽनन्तधारकः'[1] इति

कूर्मरूपेण विष्णुना धारित इत्यनुवादबलाद्विष्णुरपि कूर्मरूपी वर्तत इति विधिर्लभ्यते । न च `बृहदण्डवोढा' इति भगवत्पादवचने कूर्मरूपिणो विष्णोर्ब्रह्माण्डाधारत्वकथनेन बहिष्ठत्वलाभाद्गर्भोदकस्थत्वं कथमिति वाच्यम् । भगवतः कूर्मरूपद्वयाङ्गीकारात् । न च कल्पकाभावः ।

`बिभर्त्यण्डं हरिः कूर्मस्त्वण्डे चाप्युदकं महत् ।

उदके कूर्मरूपस्य वायुः पुच्छं समाश्रितः'[2] इति

द्वितीयब्राह्मणबृहदारण्यकोपनिषद्भाष्यवचनात् । **पृथिवी** पञ्चभूतावरा तदभिमानिनी भूः ।[3]

`वायोः पुच्छं समाश्रित्य शेषस्तु पृथिवीमिमाम् ॥

बिभर्ति तस्यां च जगदिदं सर्वं प्रतिष्ठितम्' इति[4] वैभववचनात् ।

---

1 बृ.भा. अ1- द्वितीयेऽश्वमेधब्राह्मणे प्रभञ्जनाख्यग्रन्थवचनम् ।

2 बृ.भा. प्रथमाध्याये द्वितीयेऽश्वमेधब्राह्मणे वैभवाख्यग्रन्थवचनम् ।

3 `कूर्मोऽनन्तश्च पृथिवी क्षीरसागर एव च' इतिमूलगतपृथिवीशब्दार्थविवरणपरमिदं वचनम् ।

4 बृ.भा. प्रथमाध्याये द्वितीयेऽश्वमेधब्राह्मणे वैभवाख्यग्रन्थवचनम् ।

क्षीरसागरो वरुणः दिव्यरत्नमयो महान् मण्टपश्च पूज्यः। तस्मिन्मण्टपे पूर्वपूजितं पीठं निधाय तत्र षट्कोणमष्टदलं पद्मं पूजयेत् । तथा हि तन्त्रतिलके -

`चतुःकोणं तु पीठं स्यात् षट्कोणं तस्य मध्यतः ।

तन्मध्येऽष्टदलं पद्मं तत्र पद्मेशमर्चयेत्' इति ।

पद्ममित्यनन्तरमितिशब्दोऽध्याहार्यः। **इत्येतत्त्रयं** श्वेतद्वीपो मण्टपः पद्ममिति त्रयं **बहुरूपिणी** विविधस्वरूपिणी। विकाराभावकथनाय **देवीति**। क्रीडादिगुणसम्पन्ना **रमैव** रमात्मकमेव। कन्दं नालं पद्ममिति त्रयमिति बौद्धपरामर्शो वा।

`परब्रह्मैव मध्ये वै क्रमादुत्तरमुत्तमम् ।

आधारशक्तिं कूर्मं चाप्यनन्तं पृथिवीं तथा ।

कन्दं नालं तथा पद्मं क्षीरसागरमेव च' इति (वि.ती.3 - 96) विष्णुतीर्थीयवचनात् ॥54,55. ॥

लक्ष्म्यात्मकपद्मस्यारेषु पूज्यानाह - **सूर्येति** ॥

सूर्यसोमहुताशाश्च पद्मे श्रीस्त्रिगुणात्मिका ॥ 56 ॥

पद्मे तस्य षडरेष्वित्यर्थः। सूर्यसोमहुताशाः **त्रिगुणात्मिका** श्रीभूदुर्गात्मिका रमा चेत्येते पूज्या इत्यर्थः। तत्र श्रीभूमी पार्श्वयोर्दुर्गा तु पृष्ठभागे इति **केचित्**। अत्रैकमेव षडरं पद्मं तत्कर्णिकायां सूर्यादिमण्डलानि उत्तरोत्तरं पूज्यानीति सम्प्रदायविदः। यथाह विष्णुतन्त्रे -

`कर्णिकामध्यदेशे तु सूर्यसोमाग्निमण्डलम् ।

सशक्ति मण्डलं च' इति।

`एतान्वै मण्डलाधीशानुपर्युपरि पूजयेत्' इति च ॥56॥

पीठसोपानरूपं चतुर्दिक्षु पूज्यं रूपचतुष्टयमाह - **आत्मेति ॥**

आत्मान्तरात्मपरमज्ञानात्मानश्च मूर्तयः ।

आत्माद्या मूर्तयः स्वरूपभूताः पीठसोपानरूपाश्चतुर्दिक्षु चत्वारः पूज्याः । 'सोपानदेवताः पूज्या आत्माद्या दिक्चतुष्टये' इति वचनात् । **केचित्तु** आत्मादयः पद्मोपरि चतुर्दिक्ष्ववस्थिताः ज्ञातव्याः । तदुक्तं पञ्चरात्रे -

'आत्मानमन्तरात्मानं परमात्मानमेव च ।
ज्ञानात्मानं तथा पूज्यपद्मे पूर्वादिदिक्क्रमाद्' इत्याहुः ।

अथ पद्मपत्रेषु पूज्यदेवता आह - **विमलेति ॥**

विमलोत्कर्षिणी ज्ञाना क्रिया योगा तथैव च ॥ 57 ॥

प्रह्वी सत्या तथेशानाऽनुग्रहा चेति शक्तयः ।
अष्टदिक्षु च मध्ये च स्वरूपाण्येव ता हरेः ॥ 58 ॥

विमलाद्यनुग्रहान्ता नव शक्तयोऽष्टदिक्षु मध्ये चेति स्थाननवकेषु पूज्या इत्यर्थः । एताश्चामरहस्ता इति विशेषोऽवगन्तव्यः । तथा च वासिष्ठे -

'गृहीतचामरा दिव्या विमलाद्याश्च शक्तय' इति ।

ताः किं भिन्ना नेत्याह - **स्वरूपाण्येवेति ॥** ताः विमलाद्याः शक्तयो हरेः स्वरूपाण्येव । ता इति वदता स्त्रीरूपा इत्युक्तं भवति । 'स्त्रियः सतीः' इति[1] मन्त्रात् । एवकारोऽयोगव्यावृत्यर्थः । तेन भिन्ना अपि तन्नामका उत्तमजीवाः पीठे पूज्याः सन्ति ।

[1] ऋ.सं.1-164-16 । स्तामुभे पुंस आहुः इति मन्त्रस्योत्तरार्धम् ।

तत्रायं विवेकः - विमलादिशब्दवाच्यं भगवन्तं तत्समीपे तन्नामिकां रमां तन्नामकजीवांश्च पूजयेदिति। अत एव मूले स्वरूपाण्येवेत्युक्तम् । न तु हरेरेव स्वरूपाणीति। तथा च एवकारः प्रसिद्ध्यर्थकः यथोक्तं षष्ठस्कन्धतात्पर्ये -

` विमलाद्यास्तु शक्तयः।
विष्णोः स्वरूपभूता यास्ताभ्यस्तन्नामिकाः पराः ॥

जायन्ते तत्प्रसादेन ताश्च पीठे प्रपूजयेत् ।
तद्भिन्नजीवास्तस्यैव प्रसादात् तत्समीपगाः' (भा.ता.6-4-27) इति।

ताश्चेति समुच्चयेन स्वरूपाणामपि पीठे पूज्यताभिधानात् ॥57,58 ॥

पीठपूजानन्तरं कर्तव्यमाह - **ततोऽनन्तमिति ॥**

ततोऽनन्तं योगपीठस्वरूपं पूजयेद्धरेः ।

हरेः **योगपीठस्वरूपं** तल्पाकारमनन्तं पूजयेदित्यन्वयः। तदुक्तं सारसङ्ग्रहे -

`तल्पाकारं ततोऽनन्तं पीठमध्ये समर्चयेत्' इति ॥

पीठरचनाप्रकारस्तु ब्रह्माण्डे -

`सपादं चतुरस्रं च पीठं तन्मध्य एव च।
षट्कोणं तस्य मध्ये च चतुरस्रं तथैव च ॥

तन्मध्येऽष्टदलं पद्मं तन्मध्येऽनन्तमण्डलम् ।
एतादृशं हरेः पीठं ध्यात्वा तत्रत्यदेवताः ॥

आवाहनादिभिश्चैव पूजनीया नृभिः सदा' इति ॥ छ ॥

अनन्तपूजानन्तरं कार्यमाह - **तत्रेति ॥**

तत्रावाह्य हरिम् .... ।

तत्र अनन्तयोगपीठे । स्थापितप्रतिमायां वा[1] हरिमावाह्यार्घ्यादिकं दत्वा पूजयेदिति सम्बन्धः । आवाहनप्रकारस्तु विष्णुतीर्थीये -

\`आवाहयेद्धरिम् तस्मिन्नादित्यादात्मनोऽथवा ।
आदित्यः स्यात्परार्थे तु स्वयमर्थं तथाऽऽत्मनः ॥

स्वागतं परया भक्त्या' इति[2]।

\`आवाहनं स्थापनं च सान्निध्यं सन्निरोधनम् ।
संमुखीकरणं चैव ह्यवकुण्ठनमेव च' इति[3]

स्मृत्युक्ता आवाहनादिषण्मुद्राः प्रदर्शयेत् ।

तासां नाम लक्षणं च कपिञ्जलसंहितायाम् -

\`उत्तानौ तु करौ कृत्वा किञ्चित्सङ्कुचिताङ्गुली ।
आवाहनी समाख्याता काश्यप द्विजसत्तम ॥

अधोमुखी कृता सैव प्रोक्ता स्थापनकर्मणि ।
आश्लिष्टमुष्टियुगला प्रोन्नताङ्गुष्ठयुग्मका ॥

सन्निधाने समुद्दिष्टा मुद्रेयं तत्ववेदिभिः ।
अङ्गुष्ठगर्भिणी सैव सन्निरोधे समीरिता ॥

---

1 अनन्तयोगपीठस्थापितप्रतिमायां चेति वि.पाठः ।

2 वि.ती.3 - 99 । \`ततोऽर्घ्याद्यैः प्रपूजयेत्' इति अवशिष्टः पादः ।

3 प.मा. 66

संमुखो सुमुखाविष्टः स्पृष्टा या च परस्परम् ।
अञ्जली नाम सा प्रोक्ता, सुमुखीकरणं स्मृतम् ॥

सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी ।
अवकुण्ठनमुद्रेयमभितो भ्रामिता मता' इति ।

स्वयंव्यक्तादिस्थिरप्रतिमाविषये आवाहनविधिस्तत्रैव -

`पात्रमेकं जलैः पूर्णं गन्धपुष्पादि सेचयेत् ।
आवाहयेत्ततो देवं जितन्तेनेति मन्त्रतः ॥

मूलबिम्बा द्विजश्रेष्ठाः पात्रमध्ये समाह्वयेत् ।
सेचयेत् प्रतिमामूर्ध्नि तेन मन्त्रेण देशिकः ॥

नावाहयेदेकबिम्बे[1] सुरसिद्धैश्च कारिते ।
ऋषिभिर्मनुजैश्चापि स्थापिते निश्चले हरौ ॥

उक्तं तत्प्रोक्षणं यत्तु तदेवावाहनं हरेः' इति ।

अथ देवस्याङ्गे अङ्गुलिन्यासं विना तत्वन्यासादि कुर्यात् । यथोक्तं परमपुरुषसंहितायां -

`हस्तन्यासादृते देवे मन्त्रन्यासं समाचरेत्' इति ।

ततोऽर्घ्याद्युपचारक्रममाह - अर्घ्यं पाद्यमित्यादिना ॥

.... चार्घ्यं[2] पाद्यमाचमनीयकम् ॥ 59 ॥

---

1 स्थिरबिम्बे इत्यर्थः स्यात् ।

2 यद्यपि प्रतीकधारणे चकारः न स्वीकृतः । तथापि अन्वये चकारस्य स्वीकारात्, तस्य पूर्वमनन्वयाच्च अत्रैव तस्य निर्देशः कृतः ।

मधुपर्कं पुनश्चाचां स्नानं वासो विभूषणम् ।
उपवीतासने दत्वा गन्धपुष्पे तथैव च ॥ 60 ॥

चतथाशब्दा अन्योन्यसमुच्चये । अर्घ्यं पाद्यमाचमनं मधुपर्कं पुनराचमनं दत्वेत्यनुवादबलात्तानि पात्राणि तत्तद्द्रव्यैर्जलेनाभिपूर्य मन्त्रेणाभिमन्त्र्य तत्तत्पात्रस्थं जलमुद्धरन् तत्तन्मन्त्रेणार्घ्यादीनि मध्ये मध्ये आचमनं च दद्यादिति विधिर्लभ्यते । `स्रवत्यनोङ्कृतं ब्रह्म' इत्यर्थवादबलात्[1] विधिर्लभ्यते इत्युक्तं सुधायाम्[2]। तदाह वसिष्ठसंहितायां -

`सौवर्णानि च पात्राणि रौप्याण्यत्र प्रयोजयेत् ।
पात्राणामप्यभावे तु शङ्ख एव विशिष्यत' इति ।
`स्नानं पञ्चामृतस्नानं शुद्धोदस्नानमेव च ।
स्वस्य धर्मानुवाकेन'[3]

इत्येकादशस्कन्धोक्तैः पञ्चसूक्तैर्दत्वा पूर्णकुम्भेन मूलमन्त्रेण तद्विहिताजादिमन्त्रैर्वा अभिषेकः कार्यः इति शेषः ।

`विशेषमन्त्रानादेशे मूलमन्त्रः प्रशस्यते' (यो.दी.2-81) इति योगदीपिकावचनाद्विशेषमन्त्रानुक्तिस्थले मूलमन्त्रो ज्ञायते । सम्प्रदायबलादजादिमन्त्रैरिति च । अत्र मध्ये कलशार्चनमप्यनुसन्धेयम् । `महानद्यां महातीर्थे न त्यजेत्कलशार्चनम्' इति पञ्चरात्रे आवश्यकत्वोक्तेः । कलशार्चनप्रकारस्तु द्वितीयेऽध्याये वक्ष्यते ।

---

1 न्या.सु.उदाहृतं वचनम् ।

2 न्यायसुधाजिज्ञासाधिकरणे "सर्वत्रानुगतत्वेन पृथगोङ्क्रियतेऽखिलैः" इत्यनुव्याख्यानव्याख्यावसरे एवमभिहितम् - ""स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते" इति श्रौतार्थवादसामर्थ्यात्सर्वास्वपि ब्रह्मविद्यास्वाद्यन्तयोरोङ्कारस्योहः कर्तव्य इति गम्यते ।" - इति ।

3 भा.11-27-29,30 । `स्वस्य धर्मानुवाकेन महापुरुषविद्यया । पौरुषेणापि सूक्तेन धामनीराजनादिभिः ॥' इति समग्रश्लोकः ।

वासो वस्त्रं विभूषणमुपवीतमासनं गन्धं पुष्पं च दत्वा समर्प्येत्यर्थः।

पञ्चामृतस्नानफलं पाद्मे -

`कपिलाक्षीरमादाय शङ्खे कृत्वा जनार्दनम् ।
यज्ञायुतसहस्रस्य स्नापयित्वा लभेत्फलम् ॥

अन्यस्याः सम्भवं क्षीरं शङ्खे कृत्वा जनार्दनम् ।
यज्ञायुतसहस्रस्य स्नापयित्वा लभेत्फलम् ॥

क्षीराद्दशगुणाद्दध्नो घृतं चैव दशोत्तरम् ।
घृताद्दशगुणं क्षौद्रं स्वादूनि च तथोत्तरम् ॥

पुष्पोदकं च रत्नोदं वर्तते च दशोत्तरम् ।
मन्त्रोदकं च गन्धोदं तथैव ऋषिसत्तम ॥

इक्षूरसं चूतरसं दशवाजिमखैः समम् ।
तथैव तीर्थनीरं तु फलं यच्छति भूमिप' इति ।

अथ नित्यं शुद्धोदकस्नानकाले स्नानादिमुद्रां प्रदर्शयेत् । यथोक्तं कपिञ्जलसंहितायाम् -

`पूर्ववन्मुष्टिमुद्रा तु अङ्गुष्ठेन तु वेष्टिता ।
स्नानमुद्रेति विज्ञेया सैव मुक्तकनिष्ठिका ॥
गन्धमुद्रेति विज्ञेया विमुक्तानामिका च सा ।
वस्त्रमुद्रेति विज्ञेया' इति ।

देवस्य स्नानकाले शङ्खादिवाद्यं यः कुरुते तस्य पुण्यफलं पाद्मे -

`स्नानकाले तु कृष्णस्य शङ्खादीनां च वादनम् ।
कुरुते ब्रह्मलोके तु वसते ब्रह्मवासरम् ॥

वादित्राणामलाभे तु घण्टानादं करोति यः ।
तस्य विष्णुः प्रसन्नः स्यात् सर्ववाद्यमयो यतः ॥

स्नानार्चनक्रियाकाले घण्टानादं करोति यः ।
पुरतो वासुदेवस्य तस्य पुण्यफलं शृ'ण्वित्यादि

स्नानोत्तरं वस्त्रं विष्णुगायत्र्या दद्यादिति पाद्मसंहितायाम् -

`दद्याद्वै विष्णुगायत्र्या वस्त्रे द्वे धौतनिर्मले'[1] इति ।

विभूषणयज्ञोपवीतयोस्तन्मुद्रां प्रदर्शयेत् । तल्लक्षणं कपिञ्जलसंहितायाम् -

`मध्यमाङ्गुष्ठशिरसोः संहतिर्योगपर्वणि ।
यज्ञोपवीतमुद्रा सा इति[2] सर्वत्र पूजिता ॥

तथाऽङ्गुष्ठकनिष्ठाभ्यां ज्ञेयाऽलङ्कारमुद्रिका' इति ।

तत आसने उपविष्टाय गन्धपुष्पे दद्यात् ।

`श्रीखण्डं कुङ्कुमं वापि तुलसीकाष्ठचन्दनम् ।
कर्पूरागरुसंमिश्रं दत्वा माधवलोकभाक्' इति पाद्मे गन्धप्रशंसा ।

पुष्पप्रशंसा च तत्रैव -

`जात्यादीनि सुपुष्पाणि तुलसीमिश्रितानि च ।
दत्वा पुण्यमवाप्नोति महच्च हरितुष्टिदम्' इति ॥ छ ॥

---

1 पा.सं.चर्यापादे तृतीयाध्याये 159तमश्लोकः ।

2 सन्ध्यभावः आर्ष इति भाति ।

अत्र मूलानुक्तायुधपूजा च भागवतादिग्रन्थान्तरानुसारेण ग्राह्या । तथा हि भागवते -

`सुदर्शनं पाञ्चजन्यं गदासीषुधनुर्हलान् ।

मुसलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत्' इति (भा.11-27-26) ।

तत्तद्देवतास्वरूपमभिमानिनश्च श्रीमद्भारततात्पर्यनिर्णये -

`पूर्वं हरेश्चक्रमभूद्धि दुर्गा तमःस्थिता श्रीरिति यां वदन्ति ।

सत्वात्मिका शङ्खमथो रजःस्था भूर्नामिका पद्मभूद्धरेर्हि ॥

गदा तु वायुर्बलसंविदात्मा शार्ङ्गं च विद्येति रमैव खड्गः ।

दुर्गात्मिका सैव च चर्मनाम्नी पञ्चात्मको मारुत एव बाणः ॥

एवं स्थितेष्वेव पुरातनेषु वराद्रथाङ्गत्वमवाप कामः' इति

(म.भा.ता.नि.3.73-75) ।

`त्वत्कण्ठगं कौस्तुभमास धाता' इति च (म.भा.ता.नि.10-33) ।

हलाद्यभिमानिनो ग्रन्थान्तरे द्रष्टव्याः । एतानि देवस्य दक्षिणोर्ध्वबाहुमारभ्य प्रादक्षिण्येन पूजयेत् । तस्यायं क्रमः - ॐ दुं दुर्गात्मकचक्राय नमः । ॐ श्रीं श्र्यात्मकशङ्खाय नमः । ॐ वाय्वभिमानिन्यै गदायै नमः । ॐ भूम्यात्मकपद्माय नमः । ओं विद्यात्मकशार्ङ्गाय नमः ।[1] पञ्चात्मकवाय्वभिमन्यमानबाणेभ्यो नमः । हलाय नमः । मुसलाय नमः । विरिञ्चाभिमन्यमानकौस्तुभाय नमः[2]। मालात्मिकायै श्रियै नमः । श्रीवत्सरूपश्रीलक्ष्म्यै नम इति ॥60 ॥

1 इत आरभ्य `ओं' इति प्रा.पाठे न लिखितम् । नापि सूचितम् । ज.पाठे वि.पाठे च एकधा एव ओङ्कारः लिखितः । पूर्वत्रोक्तत्वात् अत्र त्यागे च कारणादर्शनात् स्वयमूह्यमिति भाति ।

2 कौस्तुभरूपस्थितविरिञ्चाय नमः इति ज.पाठे ।

1.22 आवरणपूजा

अथावरणपूजां कुर्यादित्याह - **लक्ष्मीधरे इत्यादिना सपरिग्रहानित्यन्तेन** ॥

लक्ष्मीधरे यजेत् तत्र पार्श्वयोरुभयोर्हरेः ।
हृदयादींस्तथेन्द्रादिदिक्ष्वस्त्रं कोणकेषु च ॥ 61 ॥

वासुदेवादिकान् दिक्षु केशवादींस्ततः परम् ।
मत्स्यकूर्मवराहांश्च नारसिंहं च वामनम् ॥ 62 ॥

भार्गवं राघवं कृष्णं बुद्धं कल्किनमेव च ।
अनन्तं विश्वरूपं च तद्बहिः पूजयेत्क्रमात् ॥ 63 ॥

अनन्तब्रह्मवाय्वीशान् वीशं चाग्रे प्रपूजयेत् ।
वारुणीं चैव गायत्रीं भारतीं गिरिजामपि ॥ 64 ॥

कोणेषु वीन्द्रवामे च सौपर्णीं पूजयेदपि ।
इन्द्रादीञ्छेषविध्यन्तान् सभार्यान् सपरिग्रहान् ॥ 65 ॥

प्रथमावरणमाह - **लक्ष्मीधरे यजेदिति** ॥ अत्र धराशब्देन रमारूपं पृथिवीरूपं च ग्राह्यम् । तत्र योगपीठोपरि। तत्र विवेकमाह - **पार्श्वयोरिति** ॥ हरेः **उभयोः** वामदक्षिणयोः पार्श्वयोर्लक्ष्मीधरे **यजेत्** पूजयेत् । तत्रायं विवेकः - लक्ष्मीं भगवतो वामपार्श्वे धरां दक्षिणपार्श्वे यजेदिति। पार्श्वयोरिति द्विवचनेनोभयोर्लाभेऽपि विजातीयपार्श्वद्वयलाभायोभयोरित्युक्तम् । `मर्त्यानामहनी उभे' (भा.3-12-10) इतिवत् ।तथा च तृतीयतात्पर्ये -

`यत्रोभयोः सशब्दः स्यात् तत्र द्विवचनेऽप्युभे' (भा.ता.3-12-10) इति। यत्र वाक्ययोरुभयोर्विजातीययोरिति शेषः। सशब्दः एक एव शब्दः प्रयुक्तः स्यात् तत्र द्विवचने प्रयुक्तेऽपि विजातीयग्रहणाय उभे इति पुनः प्रयोक्तव्यमेव। अन्यथा सजातीयद्वयग्रहणमात्रेण द्विवचनपर्यवसानेऽपेक्षितस्य विजातीयद्वयस्य बोधो न स्यादिति भाव इति तदर्थः।

तयो रूपविशेषो हारीते -

`चिन्तयेद्दक्षिणे पार्श्वे लक्ष्मीं काञ्चनसन्निभाम्।
पद्महस्तां विशालाक्षीं दुकूलवसनां शुभाम्॥
वामे दूर्वादलश्यामां चित्राभरणभूषिताम्।
चिन्तयेद्धरिणीं देवीं नीलोत्पलधरां शुभाम्' इति।

इदानीं द्वितीयावरणमाह - **हृदयादीनिति॥ इन्द्रादिदिक्षु** पूर्वपश्चिमदक्षिणोत्तरासु। `प्राच्याः प्राणास्तथेन्द्राद्या' (षट्प्रश्न.भा.1-4) इति षट्प्रश्नभाष्यवचनात्, **हृदयादीन्** हृद्ययनादित्यादिव्युत्पत्त्या हृदयादिषु न्यस्यमानमन्त्रप्रतिपाद्यत्वाद्वा हृदयादीन् क्रुद्धोल्कादीन् क्रुद्धोल्कमहोल्कवीरोल्कद्युल्केति चतुरः यजेत्। **कोणकेषु** आग्नेयादिषु **अस्त्रं** सहस्रोल्कनामकभगवद्रूपमेव यजेत्। तत्क्रमस्तु पीठाद्बहिः पूर्वादिदिक्षु `उद्यदादित्यवर्णाय शङ्खचक्रवराभयहस्ताय सश्रीकाय क्रुद्धोल्काय नमः' इत्यादि। अस्मिन्नावरण एवाऽग्नेयादिकोणेषु `कृष्णवर्णाय चक्रशङ्खवराभयहस्ताय सश्रीकाय सहस्रोल्काय नमः' इति द्रष्टव्यः।

तृतीयावरणमाह - **वासुदेवादिकानिति॥ दिक्षु** पूर्वादिदिक्षु। वासुदेवप्रद्युम्नसङ्कर्षणानिरुद्धान् यजेत्। क्रुद्धोल्कादिभ्यो बहिरिति शेषः। वासुदेवादीनां मायाजयाकृतिशान्तिनाम्न्यः क्रमाच्छक्तयः आग्नेयादिविदिक्षु पूज्या इत्यपि द्रष्टव्यम्। यथोक्तं हारीते -

`वासुदेवश्चक्रपाणिः प्रद्युम्नाद्यास्त्रयस्तथा ।

दिक्षु सम्पूजनीयाश्च शक्तिस्तेषां विदिक्षु च' इति ।

अथ चतुर्थावरणमाह - **केशवादीनिति ॥ ततः परं** वासुदेवादिभ्यो बहिर्मेषादिराशिषु केशवादीन् द्वादश यजेत् ।

`वासुदेवादिकान् दिक्षु केशवादींश्च राशिषु ।

मेषादिष्वथ मत्स्यादीन् बहिरावरणं ततः' (यो.दी.3-28)

इति योगदीपिकावचनात् । केशवादिद्वादशमूर्तयः शक्तियुताः पूज्या इति हारीते -

`श्रीर्लक्ष्मीः कमला पद्मा पद्मिनी कमलालया ।

रमा वृषाकपी धन्या वृद्धिर्यज्ञाप्यथेन्दिरा' इत्याद्युक्त्वा

`एवं सशक्तयः पूज्याः केशवाद्याः सुरेश्वराः' इति ।

तत्रायं प्रयोगप्रकारः -

`शङ्खचक्रगदापद्मधरायोद्यदादित्यवर्णाय वामभागस्थितश्रीदेवीसहिताय केशवाय नमः' इत्यादिप्रकारेण पूर्वाद्येकैकस्यां दिशि द्वे द्वे मूर्ती कोणेष्वेकैका मूर्तिरिति द्वादशमूर्तीनां विभागो द्रष्टव्यः । तदुक्तम् -

`द्वन्द्वशो दिक्षु सम्पूज्य कोणेष्वेकैकमेव च' इति पञ्चरात्रे ।

केचित्तु केशवादीनित्यत्र चतुर्विंशतिमूर्तीरपि गृहीत्वा दिक्षु कोणेषु च तिस्रस्तिस्र इति वदन्ति । अत्र मूलं मृग्यम् ।

अथ पञ्चमावरणमाह - **मत्स्येति ॥ तद्बहिः** केशवादिभ्यो बहिः केशवादीनामावरणतयेति यावत् । मत्स्यादीन् विश्वरूपान्तान् द्वादश क्रमात् पूजयेत् । अत्रापि दिशि द्वेद्वे कोणेष्वेकैकेति विवेको द्रष्टव्यः । मत्स्यादिलक्षणं पाद्मसंहितायाम्

- भगवानुवाच `मत्स्यादिदशमूर्तीनां लक्षणं कथ्यतेऽधुना' इत्यादिना । तदत्र विस्तरभिया न कथ्यते ।

अथ षष्ठावरणमाह - **अनन्तमिति ॥ अनन्तः** शेषः **ब्रह्मा** चतुर्मुखः **वायुः** मरुत् **ईशो** रुद्रः तान् **वीशं गरुडं चाग्रे** हरेरग्रे प्रपूजयेत् । **वारुणीं** शेषभार्याम् । **गायत्रीं** ब्रह्मभार्याम् । **भारतीं** वायुभार्याम् । **गिरिजां** रुद्रभार्याम् । **कोणेषु** आग्नेयादिषु क्रमात्पूजयेत् । गरुडपत्न्याः पूजास्थानमाह - **वीन्द्रवामे चेति ॥**

अथ सप्तमावरणमाह - **इन्द्रादीनिति ॥ सपरिग्रहान्** सायुधान् । सवाहनानित्यपि द्रष्टव्यम् । **इन्द्रादीन्** इन्द्राग्नियमनिरृत्यतिवरुणवायुकुबेरेशानान् शेषविध्यन्तानपि पूजयेदिति सम्बन्धः । अत्र वायुः प्रधानवायोः सूनुरिति सम्प्रदायविदः । यथाऽह तात्पर्यनिर्णये -

`प्रधानवायोस्तनयं तु वायुं कोणाधिपं' त्विति[1]।

अधोभागे शेषः, ऊर्ध्वं चतुर्मुखस्तथा योगदीपिकोक्तेरिति साम्प्रदायिकाः शेषविध्योः पूजास्थलमाहुः । वस्तुतस्तु शेषविध्योः पूजास्थलं नारदोक्ताष्टाक्षरदीपिकायाम् -

`अनन्तं वरुणस्यापि निरृतेर्मध्यतो यजेत् ।
इन्द्रेशानयोर्मध्ये ब्रह्माणं वै प्रपूजयेत् ॥
सर्वानभिमुखान् विष्णोः कृताञ्जलिपुटानपि' इति ।

इन्द्रादीनामायुधादिविशिष्टानां चिन्तना तत्रैव -

`पीतः सहस्रनयनो मत्तैरावतवाहनः ।

1 ता.नि.20-127 ।

चित्रालङ्कारमालाढ्यो वज्री ध्येयः सुरेश्वरः ॥ 1 ॥

प्रोत्तप्तकनकप्रख्यो मेषपृष्ठं समाश्रितः ।

त्रिनेत्रः शक्तिभृद्वह्निः स्मर्तव्यो ज्वलदाननः ॥ 2 ॥

तीक्ष्णशृङ्गमहिषोत्तमस्थितः कालमेघचयकालविग्रहः ।

दण्डपाणिरपि भूषणोज्वलश्चिन्त्यतां पितृपतिस्त्रिलोचनः ॥ 3 ॥

धूम्रमूर्तिरतिभीषणाकृतिर्हस्तसंस्थितमहासिशोभितः ।

त्र्यक्षणो ज्वलदमेचकाम्बरः स्मर्यतां नरगतो निशाचरः ॥ 4 ॥

इन्दुकुन्दधवलो महामणिप्रोज्वलाभरणमालमण्डितः ।

पाशशोभितकरो जलेश्वरः श्लक्षणो मकरवाहनो मतः[1] ॥ 5 ॥

धूमधूम्रवपुषं त्रिलोचनं पाणिपल्लवगदाङ्कुशाङ्कितम् ।

वायुमायुरधिपं शरीरिणामम्बरीषहरिणा[2] स्थितं स्मरेत् ॥ 6 ॥

चिन्तयामलविलोचनद्वयं राजताद्रिरुचिरं निशाकरम् ।

तुङ्गवल्गिततुरङ्गमास्थितं सर्वतारकपतिं नभःस्थितम् ॥ 7 ॥

शान्तशूलविलसत्कराम्बुजं शङ्करं शशभृता विभूषितम् ।

राजताद्रिनिभमङ्कसंस्थया कान्तया सहितमीश्वरं स्मरेत् ॥ 8 ॥

क्षीरसागरनिभं फणामणिज्योतिराततवियद्वितानकम् ।

नागवाहनमशेषवन्दितं शेषमुद्यतरथाङ्गमर्चयेत् ॥ 9 ॥

हंसवाहमरविन्दधारिणं हेमवर्णमजमादिपूरुषम् ।

---

1 मकरवाहनोत्तमः इति प्रा.पाठः ।

2 यद्यपि हरिणशब्दस्य अकारान्तत्वात् हरिणस्थितमिति भवेदिति भाति। तथापि अग्रे उत्तरदिक्स्थितचन्द्रवर्णने "तुरङ्गमास्थित"मिति आस्थितशब्दोऽस्ति। तदनुसारेणाऽत्रापि हरिणमास्थितमित्यर्थ ऊह्य इति भाति।

चिन्तयेदपि सरोजसम्भवं सृष्टिहेतुममलद्युतिमीड्यम्' इति ।

तथा च `किरीटादिभूषिताय पीतवर्णाय सुराधिपतये शचीसहिताय वज्राभयहस्ताय ऐरावतवाहनाय सपरिवाराय श्रीविष्णुपार्षदाय नमः' इत्यादिप्रयोगो द्रष्टव्यः । एवं लक्ष्मीधरे प्रथमावरणत्वेनाङ्गीकृत्य सप्तावरणानि गुरुचरणसम्प्रदायपरम्पराप्राप्तानि ॥ छ ॥

अत्र केचिदाहुः[1]- `लक्ष्मीधरे यजेत् तत्र' इति मूले (तं.सा.1-61) लक्ष्मीधरयोः पीठे हरेः पार्श्वे पूज्यत्वकथनेन लक्ष्मीधरयोः पीठ एव पूजा नत्वारणत्वेन। अन्येषां कृद्धोल्कादीनां बहिरावरणत्वेनेति ज्ञापितम् । तथा च क्रुद्धोल्कादि प्रथमावरणम् । वासुदेवादि द्वितीयम् । केशवादिदामोदरान्तद्वादश तृतीयावरणम् । सङ्कर्षणादि चतुर्थमावरणम् ।

`श्रीर्लक्ष्मीः कमला पद्मा पद्मिनी कमलालया ।
रमा वृषाकपी धन्या वृद्धिर्यज्ञाप्यथेन्दिरा ।
शक्तयः केशवादीनां सम्प्रोक्ताः परमे पदे ।
हिरण्या हरिणी सत्या नित्यानन्दा त्रयी सुखा ।
सुगन्धा सुन्दरी विद्या सुशीला च सुलक्षणा ।
सङ्कर्षणादिमूर्तीनां शक्तयः समुदाहृताः ।
एवं सशक्तयः पूज्याः केशवाद्याः सुरेश्वराः' इति हारीतोक्तेः । मूले केशवादीनित्यत्र चतुर्विंशतिमूर्तीनामपि सुग्रहत्वात् ।

मत्स्यादि पञ्चमावरणम् । अनन्तादि षष्ठमावरणम् । इन्द्रादि सप्तममिति ॥ छ ॥

अपरे तु सङ्कर्षणाद्यावरणमकृतं चेत् पक्षे विष्णुतीर्थीयोक्तावरणं कुर्यात् । तदुक्तं तत्रैव -

---

[1] प्रा.पाठे अधष्टिप्पणितया एवं लिखितं - पञ्चसंस्कारकर्तारो रङ्गपतितीर्थाः। एतेषां विषये अग्रे 3.93तमश्लोकस्यआधष्टिप्पणिर्दृश्यताम् ।

`अनन्तं विश्वरूपं स्याच्छङ्खपद्मनिधी यजेत् ।

दक्षे वामे ध्वजं पृष्ठे गरुडं पुरतो हरेः ।

शङ्खचक्रगदाब्जानि यजेद्दिक्ष्वायुधानि च' इति । (वि.ती.3-101,102)

इदं मत्स्याद्यावरणानन्तरं यजेत् । अयं तत्क्रमः - देवस्य दक्षिणे पद्मनिधये नमः । सव्ये शङ्खनिधये नमः । पृष्ठे ॐ ध्वजाय नमः । पुरतो गरुडाय नमः । इन्द्रादिदिक्षु ॐ शङ्खाय नमः । ॐ चक्राय नमः । गदायै नमः । पद्माय नम इति तत्तन्मन्त्रेण यजेत्[1]। तथा च मूलोक्तं मत्स्यादि चतुर्थमावरणं मूलानुक्तं विष्णुतीर्थीयोक्तं पञ्चममन्यत्तु सप्तममिति वर्णयन्ति ॥61,65 ॥

आवरणपूजानन्तरं कृत्यमाह - **धूपेति ॥**

धूपदीपौ ततो दत्वा नैवेद्यं मूलमन्त्रतः ।

ततः आवरणदेवतानां पुष्पान्तपूजानन्तरं `नैवेद्यं मूलमन्त्रतो दत्वा' इति (तं.सा.1-66) वचनमनुक्तमन्त्रे मूलमन्त्रो ज्ञेय इत्येतदर्थम् । नारायणाष्टाक्षरस्य मूलमन्त्र इति सञ्ज्ञा । नैवेद्यं **मूलमन्त्रतः** मूलमन्त्रेण नैवेद्यं प्रोक्ष्य तत् स्पृष्ट्वा मूलं जप्त्वा नैवेद्यं समर्पयेत् । तदुक्तं विष्णुतीर्थीये[2] -

`प्रोक्ष्य तीर्थेन मूलतः ।

मूलमन्त्राद्धविः स्पृष्ट्वा जपेदष्टोत्तरं शतम्' इति (यो.दी. 3-39) ।

अथ नैवेद्यनिवेदन समये होमार्थमभिलषितमन्नमाज्यं वा पृथक्कृत्य नैवेद्येन सह स्थापयेदिति द्रष्टव्यम् । तदुक्तं योगदीपिकायाम् -

1 अत्र गदायै नम इत्यादौ ओङ्कारः न दृश्यते । सः अध्याहार्यः ।

2 परन्त्विदं वाक्यं योगदीपिकायामस्ति, विष्णुतीर्थीये नास्ति । लेखकप्रमादः सम्भाव्यते ।

`विभजेत् संस्कृते पात्रे होमार्थं सविभागत' (यो.दी.3 - 37) इति ।

अथ पूजाङ्गमनुयागमाह - **अनेनेति ॥**

अनेन क्रमयोगेन जुहुयात् संस्कृतेऽनले ॥ 66 ॥

अनेन क्रमयोगेन पीठपूजादिक्रमलक्षणोपायेन **संस्कृतेऽनले** अग्नौ जुहुयात् । पीठदेवानामावरणदेवानां चात्र जुहुयादित्युक्त्वा होमे सङ्ख्यानुक्तेरेकैकस्य देवस्यैकैका आहुतिरित्येकसङ्ख्या ग्राह्या । तदुक्तं सारसङ्ग्रहे -

`पीठावरणदेवानामेकैकामाहुतिं यजेत्' इति । यथा सिद्धस्य हविषोऽग्नये स्वाहेत्यत्रैकैवाहुतिस्तथेहापि ।

अयं भावः - अग्निं प्रतिष्ठाप्य, षोडशक्रियाः कृत्वा, पीठपूजां कृत्वा, तत्र परशुराममावाह्य, पाद्यादिकं दत्वा, स्नापयित्वा, वाससी दत्वा, गन्धपुष्पादिभिः पूजयित्वा, आवरणपूजां कृत्वा, धूपदीपौ दत्वा, आज्येन द्रव्येण जुहुयादिति ॥ 66 ॥

होमः कतिसङ्ख्याकः ? मन्त्रश्च कः ? किमङ्गं तस्येत्यत आह - **पुष्पाञ्जलिश्चेति ॥**

पुष्पाञ्जलिश्च होमश्च मूलेनाष्टोत्तरं शतम् ।
सकृत्सकृत् पुष्पमन्यैर्होमस्तस्य चतुर्गुणः ॥ 67 ॥

चावन्योन्यसमुच्चये । अष्टोत्तरशतं पुष्पाञ्जलिः होमश्च कार्य इति शेषः । अनेन पुरतः पुष्पाञ्जलिरनन्तरं होम इति सूचयति । **अन्यैः** नारायणाष्टाक्षरमन्त्रादन्यैः प्रणवादिसप्तमन्त्रैर्वाराहादिभिश्चेत्यर्थः । सकृत्पुष्पं चतुर्वारं होमः । `अस्य गोर्द्वितीयोऽन्वेष्टव्य' इतिवत् मूलमन्त्रसदृशानामेवान्यपदेनोपस्थितिः ॥ छ ॥

ततश्चायमनुयागविधिः। विधिना विहिते आग्नेयादिदिक्स्थे कुण्डे गोमयाद्यैरलङ्कृते स्थण्डिले वा `चतुष्कपर्दा युवतिः' इत्यैतरेयभाष्ये[1] भाषितलक्ष्मीमन्त्रेण श्रियमावाह्य ज्वलितमग्निं प्रणवेन प्रतिष्ठाप्य

`एह्यग्न इह होता निषीदादब्ध सुपुर एता भवा नः।

अवतां त्वा रोदसी विश्वमिन्वे यजामहे सौमनसाय देवान्' इति (ऋ.सं.1-76-2) `चत्वारि श्रृङ्गा' इति (ऋ.सं.4-58-3) च ऋचाऽग्निमावाह्य स्वशाखोक्तविधिनाऽग्निं संस्कृत्यान्वाधानं कृत्वा विष्णोरुत्पन्नस्य विष्णुवीर्यात्मकस्य नारायणादिसमस्तदेवानां हविःप्रापणसमर्थस्य यज्ञपुरुषस्य वैष्णवत्वसिद्ध्यर्थं

`गर्भाधानं पुंसवनं सीमन्तो वैष्णवो बलिः।
जातकं नाम निष्क्रान्तिरन्नप्राशनचौलकम् ॥

उपनीतिर्महानाम्नी महाव्रतमतः परम्।
उपनिषच्च गोदानं समावर्तविवाहकम्'

इति प्रमाणोक्तान् गर्भाधानादिषोडशसंस्कारान् पृथग्व्याहृतिभिः करिष्ये। अग्निं वायुं सूर्यं प्रजापतिं चेत्येताः प्रायश्चित्तदेवताः आज्येन, साङ्गेन कर्मणा सद्यो यक्ष्ये इति सङ्कल्प्य गर्भाधानादिकर्मणे `भूः स्वाहा भुवः स्वाहा सुवः स्वाहा भूर्भुवःसुवः स्वाहा' इत्यादिरूपेण षोडश संस्कारान् कृत्वा ततोऽग्नौ पीठपूजां विधाय अभीष्टदेवतां परशुरामं वा आवाह्य `अङ्गारवर्णमभितोऽण्डबहिः प्रभाभिर्व्याप्तं परश्वधधनुर्धरमेकवीरम्। ध्यायेदजेशपुरुहूतमुखैः स्तुवद्भिरावीतमात्मपदवीं प्रतिपादयन्तम्' इति (तं.सा.4-34)

---

1 ऋ.सं.10-114-3। ऐ.भा. द्वितीयप्रघट्टके सप्तमाध्यायान्ते इयम् ऋक् व्याख्याता। इमानि तानि भाष्यवचनानि -

`चतु :शिखण्डां तु रमां द्विरूपो भगवान् हरि:।
परमानन्दरूपत्वात् सुपर्ण इतिनामक:।
रमयामास तस्यां च निषण्ण: सर्वदैव स:।' - इति

ध्यात्वा पीठस्थिताग्निस्थितदेवयोः समानकाले धूपदीपौ दत्वा नैवेद्यं दत्वा होमार्थमभिलषितमन्नमाज्यं वा संस्कृते पात्रे परिगृह्य होमकर्मणि मन्त्राणां स्वाहान्ततानियमात् `परदेवतायै लक्ष्मीनारायणाय स्वाहा' इत्यादिक्रमेण स्वाहान्तैर्मन्त्रैः पीठावरणदेवताभ्यः एकैकामाहुतिं हुत्वाऽथ मूलमन्त्रेणाष्टोत्तरशतं पुष्पाञ्जलिं हरौ समर्प्याऽष्टोत्तरशतं जुहुयात् । ततः प्रणवादिसप्तमहामन्त्रै रेकैकवारम् हुत्वा पुष्पाञ्जलिं समर्प्य चतुर्वारं चतुर्वारं होमं `ओं स्वाहा' इति स्वाहान्तैर्मन्त्रैर्विष्णुगायत्र्या पूर्णाहुतिं दत्वा ततः स्विष्टकृद्धोमं समाप्याऽग्निं नत्वाऽभ्यर्च्य होमं समापयेदिति ॥ छ ॥

एतावत्क्रियाकरणाशक्तौ पुरुषसूक्तविधानेन वा होमः कार्य इति शैवतन्त्रे-

`होमस्थानं प्रयायाच्च आसने तूपविश्य च ।
कुण्डेऽग्निकार्यं प्रवरं स्थण्डिले मध्यमं स्मृतम् ॥

आलयस्येशदिग्भागे होमस्थानमिति स्मृतम् ।
पूर्वस्यामग्निकोणे वा नान्यासु च कदाचन ॥

पुरतोऽग्निं प्रतिष्ठाप्य अग्नावावाहयेत्ततः ।
सहस्त्रशीर्षमन्त्रेण देवबिम्वस्थितं तथा ॥

तस्मिन्नावाहयेदग्नौ दीपिते ज्वलिते स्वयम् ।
तुषाकेशास्थिविस्पृष्टो न योग्यो हविषोऽनलः ॥

जुहुयात्पुरुषसूक्तेन षोडशाज्यतिलान्नकैः ।
पुरुषसूक्तं जपेदत्र प्रार्थयेच्च मनोरथान् ॥

समाप्य होमं वह्निस्थं बिम्बे संयोज्य मन्त्रतः ।
पुनः षोडशभिर्मन्त्रैर्दद्यात्पुष्पाणि पौरुषैः ॥

भगवन् देवदेवेश सङ्गृहाण नमोऽस्तु ते ।
एतन्मन्त्रं समुच्चार्य देवहस्ते विनिक्षिपेत् ॥

स्थिरार्चने प्रतिष्ठाग्निर्दीप्ताग्निश्वरपूजने।
एवं होमाग्निराख्यातो ज्ञात्वा होमं समाचरेद्ग ॥' इति।

कर्त्रादिवैगुण्येन होमाशक्तौ तूक्तमन्त्राणां होमे उक्तसङ्ख्यापेक्षया चतुर्गुणो जपः कार्य इत्यग्निपुराणे -

`अग्नावावश्यकं होमं कुर्याच्छक्त्यनुसारतः।
होमाशक्तौ तु कुर्वीत जपं तस्य चतुर्गुणम् ॥
केऽप्येवं मन्वतेऽवश्यं नैव होमं समाचरेत्।
पुनश्चरणहोमस्य अशक्तौ स विधिः स्मृत' इति ॥67 ॥

एवं होमानन्तरकृत्यमाह - **विसजयित्वेति ॥**

विसर्जयित्वा नैवेद्यं मूलेन त्रिः समर्च्य च।
धूपदीपौ पुनर्दत्वा पुनर्मूलेन पूर्ववत् ॥ 68 ॥

नैवेद्यं विसजयित्वा बहिर्निष्कास्य **मूलेन** मन्त्रेण **त्रिः** वारत्रयं **समर्च्य** तुलस्यादिद्रव्यैः सम्पूज्येत्यर्थः। प्रथममेकवारं दत्तत्वात् पुनर्धूपदीपौ दत्वेत्युक्तम्। ॥ **पूर्ववदिति** ॥ मूलमन्त्रेण तुलसीपुष्पादिभिर्भगवदर्चनं त्रिवारं कार्यमित्यर्थः। अत्र मूलेनेति सर्ववैष्णवमन्त्राणां सूक्तानां चोपलक्षणम्।

`सर्वैश्च वैष्णवैर्मन्त्रैः कुर्यात्पुष्पाञ्जलिं ततः।
सूक्तैश्च विष्णुदैवत्यैर्नामभिः शार्ङ्गिणस्तथा' इति हारीतवचनात्।

अर्चनोत्तरभाविकार्यमाह - **अर्चयित्वेति ॥**

अर्चयित्वा हरिम् ध्यात्वा जपेदष्टोत्तरं शतम्।
पुनर्ध्यायेद्धरिम् सर्वदेवदेवेश्वरं प्रभुम् ॥ 69 ॥

न्यासाङ्गं पुनर्ध्यानं कृत्वा स्वबिम्बं हरिम् हृद्यावाहयेदित्याह - **पुनर्ध्यायेदिति ॥** सर्वदेवोत्तमं प्रभुं हरिम् हृदि आवाहयेदिति शेषः । यथोक्तं पुरुषविधाने -

`न्यासं विधाय देवेशमुद्वास्य हृदि विन्यसेत्' इति । अशक्तानामनुकल्पस्तूक्त-पुराणे[1] -

`यदि विस्तरतः पूजा कर्तुं नैव हि शक्यते ।
तदा सङ्क्षेपतो वापि विष्णोः पूजनमाचरेत् ॥

सङ्क्षेपतोऽपि पूजायां यद्यशक्तो भवेत्तदा ।
जलं दलं तुलस्या वाऽवश्यं विष्णौ समर्पयेत् ।
पश्येद्वान्यकृतां पूजां सोऽपि स्यात्कृतपूजनः' इति ॥ 69 ॥

1.23 जपध्यानहोमादीनां फलनिरूपणम्

ननु जपेदित्यादिना जपादेः अनुष्ठेयत्वमभिहितम् । तदयुक्तम् । निष्फलत्वा-दित्यत आह - **जपेति ।**

जपध्यानहुतार्चादीनेवं यः कुरुते सदा ।
धर्मार्थकाममोक्षाणां भाजनं स्यात्स एव हि ॥ 70 ॥

अत्र ध्यानशब्देन जपाङ्गध्यानं होमाङ्गध्यानमर्चनाङ्गध्यानं च ग्राह्यम् । **हुतं** हो-मोऽनुयाग इति यावत् । **एवम्** ऋष्यादिज्ञानपूर्वकम् । **सदेति** नित्यत्वं सूचयति । मोक्षाणामित्युपलक्षणम् । प्रत्यवायतन्निमित्तदुःखाद्यनिष्टनिवृत्तेश्चेत्यपि ग्राह्यम् । **भाजनं** पात्रमाश्रय इत्यर्थः । स्यादेवेति सम्बन्धः ।

[1] पद्मपुराणे इति वि.पाठे । छलारीये तु एकश्लोकाधिक्येन कौर्मे इत्युक्तम् । अशक्तश्चेत् सङ्क्षेप-तोऽपीयं पूजा कार्येत्यादित्यपुराणे इति ज.पाठे ।

इदमुक्तं भवति - इष्टावाप्तिरनिष्टनिवृत्तिश्च खलु पुरुषार्थः । जपादिकं तावन्मोक्षसाधनमिति `जप्येनैव तु संसिद्ध्येद्' (स.स्मृ.) इत्यादिवाक्यसिद्धम् । यदकरणे प्रत्यवायो ब्राह्मण्यं निमित्तमुपादाय विहितं तन्नित्यम् । यथा सन्ध्यावन्दनादि । तादृशं च जपादिकम् ।

`मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ।
नित्यनैमित्तिके कुर्यात्प्रत्यवायजिघांसया' इत्यादिवाक्याद् (श्लोकवार्तिकम्)

अनिष्टनिवर्तकं च। तथा हि। दुःखात्मको हि संसारः । स चाधर्मनिमित्त एव। नित्याकरणे ह्यधर्मप्रचयेन दुःखतत्साधनावाप्तिर्भवतीति तत्करणमनिष्टनिवर्तकमिति ॥70॥

1.24 विष्णुसर्वोत्तमत्वज्ञानस्यावश्यकता

जपादाववश्यानुष्ठेयाङ्गद्वयकथनपूर्वकमुक्तधर्मादिरूपफलस्यातिसौलभ्यमाह - **सर्वोत्तममिति ॥**

सर्वोत्तमं हरिम् ज्ञात्वा य एवं भक्तिपूर्वकम् ।
जपध्यानादिभिर्नित्यं पूजयेन्नास्य दुर्लभम् ॥ 71 ॥

दुर्निषेधे । तथा च `द्वौ नञौ प्रकृतमर्थं सातिशयं गमयत' इति न्यायात्[1] उक्तं धर्मादिकमिति सुलभमेवेत्यर्थः सिध्यति। तत्र सर्वोत्तमत्वज्ञानरूपांशस्यात्यावश्यकत्वं सूचयितुं तदभावेऽनिष्टमाह - **सर्वेति ॥** अविज्ञाय जपाद्यनुष्ठातुरनुष्ठितं जपादिकं व्यर्थं भवतीति शेषः । उपलक्षणमेतत् । भक्तिमकृत्वा जपाद्यनुष्ठातुरनुष्ठितं जपादिकं व्यर्थमेव। `अभक्तोदाहृतं नैव फलदातृ भविष्यति' इत्यादेरिति भक्तेरप्यावश्यकत्वं द्रष्टव्यम् ॥71॥

---

1 अयं न्यायः कर्मनिर्णये उक्तः ।

एवमङ्गद्वयाभावे फलाभावरूपमनिष्टमभिधाय विपरीतानुष्ठाने महानर्थमाह - भक्तिमिति ॥

भक्तिं कृत्वाऽन्यदेवेषु ब्रह्मरुद्रादिकेष्वपि ।
सर्वोत्कर्षमविज्ञय विष्णोर्याति तमो ध्रुवम् ॥ 72 ॥
न यज्ञा न च तीर्थानि नोपवासव्रतानि च ।
दैवतानि च सर्वाणि त्रातुं तं शक्नुयुः क्वचित् ॥ 73 ॥

रुद्रादिसर्वोत्कृष्टत्वेन प्रमितेष्वपि ब्रह्मादिषु **भक्तिं** सर्वोत्कर्षज्ञानपूर्वकस्नेहं कृत्वा तमो याति । अज्ञानमात्रस्य तमःसाधनत्वायोगादेवं योजितम् । एतेन

`मोक्षो ज्ञानं च क्रमशो मुक्तिगो भोग एव च ।
उत्तरेषां प्रसादेन नीचानां नान्यथा भवेत्' इत्यादौ (म.भा.ता.नि.1-79)

ब्रह्माद्यनुग्रहस्य मोक्षहेतुत्वाभिधानात् तदनुग्रहार्थं तेषूत्कृष्टभक्तिरावश्यकीत्यपि प्रत्युक्तम् । अङ्गीक्रियत एव ब्रह्माद्यनुग्रहो मोक्षहेतुः । किन्तु भगवत्प्रसादसाधनतयैव । न तु परोक्तस्तदुत्कर्षः स्वतन्त्रः साधनभूत इति । प्रायश्चित्तेन तमोरूपानर्थनिवारणं भविष्यतीत्यत आह - **न यज्ञा इति** ॥ **तीर्थानि** तीर्थस्थानानि, **दैवतानि** पूजितानीति शेषः । **सर्वाणि** च मिलितान्यपि । किमु प्रत्येकम् । **त्रातुं** तमःप्राप्तेः । **क्वचित्** कदाचिदपि न शक्नुयुरित्यर्थः ।

`ध्यानं च गुरुशुश्रूषा नित्यनैमित्तिकाः क्रियाः ।
तीर्थदानजपाद्याश्च स्वाध्यायो हरिकीर्तनम् ॥
द्वादश्यादिव्रतं चैव तुलस्याद्यैरथार्चनम् ।

सर्वं भक्त्यर्थमुद्दिष्टं सर्वं व्यर्थं तया विना' इति[1] बृहद्भाष्योदाहृतपद्मवचनात् ॥72,73 ॥

सिद्धान्तज्ञानपूर्वकमेव जपादि सफलमित्यभिप्रेत्य सत्सिद्धान्तं निरूपयति - **हरिरि-त्यादिना** सार्धश्लोकेन ॥

हरिर्हि सर्वदेवानां परमः पूर्णशक्तिमान् ।

स्वतन्त्रोऽन्ये तद्वशा हि सर्वेऽतः स जगद्गुरुः ॥ 74 ॥

ब्रह्मादयश्च तद्भक्त्या भागिनो भोगमोक्षयोः ।

द्विविधो हि सत्सिद्धान्तः परापरभेदात् । तत्र परो द्विविधः वाचनिक आनुषङ्गिकश्चेति। साक्षाद्ब्रह्मस्वरूपावधारणपरेषु जन्मादिसूत्रेषूक्तो वाचनिकः। प्राधान्येनोक्त इति यावत् । प्रधानप्रमेयोपयोगितयाऽभिहितो ह्यानुषङ्गिकः तदुपपादक इति यावत् । तत्र **`पूर्णशक्तिमान्' `अन्ये तद्वशगाः' `जगद्गुरुः'** इत्येतैर्वाचनिकं परं सत्सिद्धान्तमाह। शक्तिरिति गुणसामान्योपलक्षणम् । पूर्णगुण इत्यर्थः। अन्ये तद्वशा इत्येतन्न यथास्थितं गृहीतुं शक्यं परसत्सिद्धान्तत्वाभावात् । भगवन्निष्ठस्वातन्त्र्यपरतया व्याख्याने `स्वतन्त्र' इत्यनेन पौनरुक्त्यं स्यात् । अतः अन्ये तद्वशा इत्यनेन सकलजगज्जन्मादिकारणत्वमुच्यते। तत्र `अन्य' इति सामान्योक्त्या सकलेत्यस्य `वशा' इति तदधीनसत्ताकत्वोक्त्या जन्मादिकारणत्वस्य लाभ इति ज्ञेयम् । जगतः **गुरुः** उत्तम इति यावत् । **स्वतन्त्रः** सर्वतः पर इति। आनुषङ्गिकपरसिद्धान्तमाह - स्वाधीनसत्तादिमान् **स्वतन्त्रः**। सर्वतः प्रकृतिजीवजडेभ्यः **परमः** अत्यन्तभिन्नः। अस्वातन्त्र्येऽभिन्नत्वे च पूर्णगुणत्वाद्ययोगात् तत्सिध्यर्थमङ्गीकार्यत्वात्स्वातन्त्र्यभेदयोरानुषङ्गिकत्वम् । अपरसिद्धान्त[2]माह - **ब्रह्मादय इति** ॥ **तस्य** **हरेर्भक्त्या**

---

[1] बृ.भा. अ1-अव्याकृतब्राह्मणम्

[2] अपरसत्सिद्धान्तमिति प्रा.पाठे।

भोगाः समस्ताः मोक्षश्च तयोर्भागिनः सन्तीति शेषः। **क्रमेणेति** च मुक्तौ संसारे च तारतम्यक्रमेणेत्यर्थः[1]। भगवदितरब्रह्मादिनिष्ठधर्मरूपत्वादयमपरः सत्सिद्धान्त इति ज्ञेयम्[2]॥74.॥

अध्यायार्थमुपसंहरति - **तस्मादिति॥**

तस्माज्ज्ञेयश्च पूज्यश्च वन्द्यो ध्येयः सदा हरिः ॥ 75 ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमत्तन्त्रसारसङ्ग्रहे प्रथमोऽध्यायः॥ 1॥

---

1 `क्रमेणेति' इति प्रतीकं धृत्वा व्याख्यातम् । परन्तु मूले कस्मिन्नपि पाठे तत्पदं न दृश्यते। अत्र सार्धश्लोके केवलं `सर्वेऽतः' इति भागः न व्याख्यातः। तेन `स्वतन्त्रोऽन्ये तद्वशा हि क्रमेण स जगद्गुरुः' इति पाठः सम्भाव्यते।

2 परापरसिद्धान्तभेदः 3-3-1-1 अनुव्ख्यानसुधाग्रन्थयोः व्यक्तः। तत्र एतत्सम्वन्ध्यनुव्याख्यानमत्र प्रदर्शितम् -

"अशेषगुणपूर्णत्वं सर्वदोषसमुज्झितिः।
विष्णोरन्यच्च तत्तन्त्रमिति सम्यग् विनिर्णयः ॥ 78 ॥
स्वतन्त्रत्वं सदा तस्य तस्य भेदश्च सर्वतः।
अदोषत्वस्य सिद्ध्यर्थं यदभेदे तदन्वयः ॥ 79 ॥
तत्तन्त्रत्वं च मुक्तानामपि तद्गुणपूर्तये।
मुक्तानामपि भेदश्च नहि भिन्नमभिन्नताम् ।
गच्छद्दृष्टं क्वचित् तस्याप्यभावोऽनुभवोपगः ॥ 80 ॥
पूर्वाभेदे दोषवत्त्वमीशस्येत्यतिभिन्नता।
नारायणेन मुक्तानामपि सम्यगिति स्थितिः ॥ 81 ॥
भेदाभेदेऽप्यभेदेन दोषाणामपि सम्भवः।
निर्दोषत्वं रमायाश्च तदनन्तरता तथा ॥ 82 ॥
ब्रह्मा सरस्वती वीन्द्रशेषरुद्राश्च तत्स्त्रियः।
शक्रकामौ तदन्ये च क्रमान्मुक्तावपीति च ॥ 83 ॥
सत्सिद्धान्त इति ज्ञेयो निर्णीतो हरिणा स्वयम् ।" इति।

तस्माद् धर्मादेः फलस्य सत्वात् । हरिर्ज्ञेयः सर्वोत्तमत्वादिना प्रणवादिमन्त्रैः । पूज्यः अष्टाक्षरेण चक्राब्जादौ ध्येयः उद्यद्भास्वदित्याद्युक्तप्रकारेण । तस्मात्सदा वन्द्य इत्यर्थः ॥75 ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य
श्रीमत्तन्त्रसारसङ्ग्रहस्य टीकायां
श्रीमद्यदुपत्याचार्यपूज्यपादाराधकश्रीनिवासाचार्यपूज्यपादानां शिष्येण
वेङ्कटपतिना कृतायां गुर्वर्थदीधितौ प्रथमोऽध्यायः समाप्तः ॥ ॥

श्रीकृष्णार्पणमस्तु ॥

2

तन्त्रसारसङ्ग्रहे द्वितीयोऽध्यायः

श्रीगुरुभ्यो नमः ओम् ।

प्रणम्य श्रीनिवासार्यगुरूणां चरणौ शुभौ ।
करिष्यामि यथाबोधं द्वितीयाध्यायपञ्चिकाम् ॥

पूर्वाध्यायोक्तप्रणवादीनां वक्ष्यमाणवराहादीनां च जपापेक्षया पूर्वोत्तरकालमवश्यमनुष्ठेयं मातृकान्यासं तत्रैवापेक्षितप्राणायामं कलशे आवाह्यरूपविशेषान् दीक्षालक्षण-होमकुण्डलक्षाणादिकं च निरूपयत्यस्मिन्नध्याये ।

2.1 मातृकान्यासविधिः

तत्रादौ मातृकान्यासमाह - यस्येति ॥

यस्य कस्यापि मन्त्रस्य न्यासः पञ्चाशदक्षरैः ।
वीर्यदः केऽभितो वक्त्रमक्षिकर्णेषु नासयोः ॥ 1 ॥
गण्डयोरोष्ठयोर्दन्तपङ्क्त्योर्मूर्धनि वाचि च ।

दोःपत्सन्धिषु साग्रेषु पार्श्वयोः पृष्ठगुह्ययोः ॥ 2 ॥
तुन्दे च हृदि धातूनां सप्तके प्राणजीवयोः ।

यस्य कस्यापि सर्वस्यापि **मन्त्रस्य** मन्त्रजपस्यादौ अन्ते च **पञ्चाशदक्षरैः** `अं अजाय नमः' इत्यादिपञ्चाशदक्षरप्रयुक्तैर्मन्त्रैः **न्यासः** कार्य इत्यर्थः । कुत इत्यत आह - **वीर्यद इति ॥** यतोऽत इति शेषः । मन्त्रे वीर्यमतिशयफलाधायकत्वं द्रष्टव्यम् । न्यासस्थानान्याह - **क इत्यादिना ॥ के** परितः ललाटे ललाटोपरितनभागे । **अभितो वक्त्रं** वक्त्रमभितः मुखं परितः अक्षिणी कर्णौ च तेषु । **मूर्ध्नि** शिखापुरोभागे । अतः क इत्यनेन न पौनरुक्त्यम् । **साग्रेषु दोःपत्सन्धिषु** दोःसन्धिषु पत्सन्धिषु चेत्यर्थः । **पार्श्वयोः** कट्योः । **पृष्ठगुह्ययोः** पृष्ठे गुह्ये च । **तुन्दे** नाभेरधः । **धातूनां सप्तके** त्वक्चर्ममांसरुधिरमेदोमज्जास्थीति सप्तधातुषु । **प्राणजीवयोः** प्राणापानादिवृत्तिपञ्चके । यद्वा, प्राणो नामाहङ्कारकार्यविषेषः । स एव श्वासोच्छ्वासजनकः । अत एव तत्वविवेकटीकायां `प्राणोऽहङ्कारकार्यविशेषः' इति । सुधायां च `शारीरो वायुः' इत्युक्तम् । वाराहे च `नासाद्वारा बहिर्याति प्राणोऽहङ्कारनामवान्' इति ॥ 1,2. ॥

ननूक्तैकपञ्चाशत्स्थानेषु पञ्चाशन्मन्त्राणां न्यासः कथमित्यत उक्तं - **सक्षकारानिति ॥**

सक्षकारान्न्यसेद्वर्णान् नृसिंहः क्षस्य देवता ॥ 3 ॥
जपे न्यासे च विहितः क्षोऽक्षराणां सदाऽन्ततः ।

तद्देवतामाह - **नृसिंह इति ॥** क्षकारस्य कदा न्यास इत्यत आह - **जप इति ॥** जपे न्यासे[1] चेति सदाऽक्षराणाम् **अन्ततः** अन्ते क्षकारस्य प्रयोगो विहित

---

[1] कलशार्चनादौ च इति प्रा.ज.पाठौ ।

इत्यर्थः ॥ 3 ॥

2.2 प्राणायामः

`प्राणायामत्रयं कृत्वा मातृकान्यासमाचरेत्' इत्युक्तत्वेन प्राणायामपूर्वकत्वान्मातृकान्यासस्य तत्पूर्वभाविनं प्राणायाममाह - **प्राणायाम इति ॥**

प्राणायामो रेचयित्वा पूरयित्वा च कुम्भके ॥ 4 ॥

तारैस्त्रिर्द्वादशावृत्तैर्द्व्येकद्वादशकेन वा ।
तत्तन्मन्त्रेण वा कार्यो गायत्र्या दशतारकैः ॥ 5 ॥

रेचनं दक्षिणनासारन्ध्रेण श्वासस्याधोविसर्जनम् । वामघ्राणरन्ध्रेण देह वायोरूर्ध्वनयनं **पूरणम् ।** `रेचयित्वा दक्षिणतः पूरयित्वा च वामतः' इति वक्ष्यमाणत्वात् (तं.सा.4-145)। **कुम्भकम्** उभयश्वासनिरोधः। **रेचयित्वा पूरयित्वा कुम्भके** प्रथमार्थे सप्तमी, कुम्भकः श्वासनिरोधः प्राणायाम इति । यद्वा कुम्भके सति प्राणायामः सम्पन्न इति शेषः । न तु रेचनाद्यतिरिक्तः प्राणायामः ।

`रेचकः पूरकश्चैव कुम्भकश्च त्रिधा स्मृतः । प्राणायामः' इति वक्ष्यमाणत्वात् । (तं.सा.4-134) प्राणनिरोधसमये मन्त्रजपश्च कर्तव्य इति शेषः । कोऽयं मन्त्रः ? कतिवारमित्यपेक्षायामाह - **तारेति ॥ त्रिभिः द्वादशभिः** षट्त्रिंशत्सङ्ख्याकैः **तारैः** प्रणवैः । पक्षान्तरमाह - **द्व्येकेति ॥ द्विर्द्वादशकेन** चतुर्विंशता एकद्वादशकेन वेत्यर्थः । अशक्तिप्रवचनव्यासङ्गाद्यपेक्षयेदं पक्षद्वयं ज्ञेयम् । जपः कार्य इति सम्बन्धः । पक्षान्तरमाह - **तत्तदिति ॥** अनेन सर्वमन्त्रजपेष्वपि तारेणैव प्राणायामस्तारजपाधिकारिभिः संन्यासिभिः कार्य इति पूर्वोक्तमिति सूचयति । तान् प्रत्येव तत्तदिति विकल्पः । इतरेषां तु तारजपाधिकाराभावात् तत्तन्मन्त्रेणैवेति नियमो ज्ञेयः । नन्वेवं

सति संन्यासिनां गायत्रीजपाङ्गप्राणायामस्तारेण वा गायत्र्या वा ? इतरेषां तु चतुर्विंशत्यक्षरगायत्र्यैवेति प्राप्तमत आह - **गायत्र्या दशतारकैरिति ॥ तारकैः** प्रणवैः । ॐ भूरित्यारभ्य सुवरोमित्यन्तैर्दशतारकैर्युक्तगायत्र्येत्यर्थः । गायत्र्याः इति च पदं षष्ठ्यन्तं ज्ञेयम् । प्राणायामः कार्य इति सम्बन्धः । यथोक्तं -

`प्रणवेन च संयुक्तां व्याहृतीभिश्च संयुताम् ।
प्राणायामः स विज्ञेयो गायत्रीं यज्जपेत्त्रिशः' इति ।

प्राणायामेऽङ्गुलिप्रकारस्तु -

`पञ्चाङ्गुलीभिर्नासाग्रे पीडनं प्रणवाभिधा ।
मुद्रेयं सर्वपापघ्नी वानप्रस्थगृहस्थयोः ॥

कनिष्ठानामिकाङ्गुष्ठैर्नासाग्रे यत्प्रपीडनम् ।
ॐकारमुद्रिका प्रोक्ता यतेश्च ब्रह्मचारिणः' इति वचनादवगन्तव्यः ।

अत एव

`कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम् ।
प्राणायामः स विज्ञेयो तर्जनीमध्यमे विना' इति

वचनं संन्यासिब्रह्मचारिणां परं ज्ञेयम् ॥4,5 ॥

2.3 शौचम्

शुद्धस्य प्राणायामेऽधिकारात् प्राणायामपूर्वभाविनीं शुद्धिमाह - **आदाविति ॥**

**आदावेव जपे कुर्याच्छोषणं दहनं प्लुतिम् ।
वाय्वग्निवारुणैर्बीजैर्ध्यात्वा तन्मण्डले हरिम् ॥ 6 ॥**

आदौ प्राणायामात् **वाय्वादिबीजैः** यं रं वम् इत्येवंरूपैः[1] क्रमेण पापपुरुषशोषणदहनशरीरप्लुतीः कुर्यादित्यर्थः। आदावेवेत्येवकारेणेदं शोषणादिकं पूर्वाङ्गमेव नोत्तराङ्गमिति सूचयति।

अयं भावः। करन्यासगुरुनमस्कारपूर्वकं वाय्वग्निवरुणै[2]र्बीजैर्नाभिहृच्छिरस्सु षट्कोणत्रिकोणवर्तुलमण्डलेषु हरिम् ध्यायन् पापपुरुषशोषणादिकं कृत्वा तत्वन्यासमातृकान्यासौ कृत्वा प्रणवादिजपमारभेदिति[3] ॥ 6 ॥

2.4 कलशे आवाह्यरूपविशेषाः

दीक्षां विना मन्त्रजपेऽधिकाराभावात् दीक्षां सूचयितुं तदुपयुक्तं कलशार्चनं वक्तुं कलशे आवाह्यरूपविशेषानाह - **एकेति** ॥

एकपञ्चाशद्वर्णानां चतुर्विंशतिमूर्तयः।
आत्माद्या वासुदेवाद्या विश्वाद्या मत्स्यकच्छपौ ॥ 7 ॥
कोलो नृसिंहः सवटुर्जामदग्न्यरघूद्वहौ।
वासिष्ठयादवौ कृष्णावात्रेयो बुद्धकल्किनौ ॥ 8 ॥
शिंशुमारश्चेति शतं कलाः कलशनामकाः[4]।
एताभिः सहितां मूलमूर्तिं कुम्भोदके सुधीः ॥ 9 ॥
यथोक्तविधिनाऽभ्यर्च्य प्रतिमां शिष्यमेव वा।

1 `ॐ इत्येवंरूपैः' इति ज.पाठः। `ॐ यं ॐ रं ॐ वं' इति विवक्षा स्यात्।
2 वारुणैरिति ज.पाठः।
3 आरभेतेति भाव्यमिति भाति, रभधातोरात्मनेपदित्वात्।
4 `कलशदेवता' इति गु.दी.सू.पाठान्तरम्।

स्नापयेत् .... ॥

एकाधिकपञ्चाशद्वर्णानामकारादिक्षकारान्तानामभिधेया इति शेषः । **मूर्तयः** अजाद्याः । **चतुर्विंशन्मूर्तयः** केशवाद्याः **आत्माद्याः** अत्मान्तरात्मपरमात्मज्ञानात्मानश्चत्वारः । **वासुदेवाद्याः** वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाद्याश्चत्वारः । **विश्वाद्याः** विश्वतैजसप्राज्ञतुर्याः । **कोलो** वराहः । **वटुः** वामनस्तेन सहितो नृसिंहः । **वासिष्ठो** व्यासः । **आत्रेयो** दत्तः । इति शतं मम **कलाः** स्वरूपांशाः । `कल =ज्ञान'[1] इति धातोः ज्ञानसुखरूपत्वात् कलशदेवतात्वाच्च कलशनामका इत्यर्थः । कलशेति नामकथनेन यत्र यत्र कलशपूजोच्यते तत्र सर्वत्र एतेषां पूजेति सूचयति। कलशदेवतेत्यपि **क्वचित्पाठः** [2]। **मूलमूर्तिं** नारायणम् । कुम्भोदक इत्यनेन उदक एवैतेषामावाहनं न तु `कलशस्य मुखे विष्णुः कण्ठे रुद्र' इत्यादाविव बहिरिति सूचयति। **॥पूर्वोक्तविधिनेति॥** `अष्टाक्षरेण सम्पूज्य' इत्यादिना (तं.सा.1-50) तथा `अर्घ्यं पाद्यमाचमनीयकम्' इत्यादिना (तं.सा.1-59) `लक्ष्मीधरे यजेद्' इत्यादिना (तं.सा.1-61) `धूपदीपौ ततो दत्वा नैवेद्यं मूलमन्त्रत' (तं.सा.1-66) इत्यादिना चोक्तप्रकारेण **अभ्यर्च्य** प्रपूज्य **प्रतिमाम्** उत्सवादौ **शिष्यं** दीक्षायां **स्नापयेद्** अभिषिञ्चयेदित्यर्थः । तृतीये वक्ष्यमाणप्रकारेण गुरुभिः कलशान् प्रतिष्ठाप्य शुद्धोदकेन पूरयित्वा तुलसीं निक्षिप्य पूर्वोक्तप्रकारेण कलशे पीठपूजां कृत्वा शतमूर्तिभिः सहितायाः मूलमूर्तेरावाहनं कृत्वा धूपादिपूजां विधाय तैः कलशैः शिष्याभिषेचनं कार्यमिति भावः ॥7-9. ॥

1 पाणिनीयधातुपाठे ज्ञानार्थकः कलधातुः न पठ्यते। भ्वाद्यन्तर्गतः कल शब्दसङ्ख्यानयोरिति [धा.पा.497] दृश्यते । कल क्षेपे [धा.पा.1606], कल गतौ सङ्ख्याने च [धा.पा.1866] इति चुरादौ द्वौ पठ्येते । तत्राद्यस्तृतीयो वाऽस्मिन्नर्थे विवक्षित इति वक्तव्यम् । गत्यर्थानां ज्ञानार्थत्वात् । अथवा, गीताभाष्ये 11-33तमे श्लोके एवं वर्तते - `कल बन्धने, कल च्छेदने, कल ज्ञाने, कल कामधेनुः इति पठन्ति' - इति। तदनुसारेणात्रैवमुक्तम् ।

2 `कलशदेवताः' इति बहुवचनान्ततया भाव्यमिति भाति।

अर्चास्नापनात्पूर्वं कृत्यमाह - **पूर्वमिति ॥**

.... पूर्वमर्चायां जपोऽनूनः सहस्रतः ॥ 10 ॥

मूलमन्त्रस्य चाङ्गानां न्यासः स्नानादनन्तरम् ।
प्रतिमायां सन्निधिकृच्छिष्ये माहात्म्यकृद्भवेत् ॥ 11 ॥

स्नापनादिति शेषः । अर्चायामित्युक्त्या न तु शिष्य इति ज्ञायते । सहस्रतोऽनूनः मूलमन्त्रस्य जपः कार्य इति शेषः । स्नानादनन्तरम् **अङ्गानां च** कृद्धोल्कादीनाम् । चशब्दात् तद्वर्णानां च न्यासः कार्य इत्यर्थः । ननु

`आवाह्यार्चादिषु स्थाप्य न्यस्ताङ्गं मां प्रपूजयेत् ।
पाद्योपस्पर्शनार्घ्यादीनुपचारान् प्रकल्पयेद्' (भा.11-23-24)

इत्यादिनाऽभिषेकात्पूर्वं न्यासकथनात् तद्विरोध इति चेत्सत्यम् । एकादशस्कन्धोक्तस्तु मातृकातत्वन्यासः । स च स्नापनात्पूर्वमेव भवति । अत्रोक्तस्तु स्नानोत्तरभावी मूलमन्त्रतदङ्गादिन्यास इत्यविरोधः । स्नानफलमाह - **प्रतिमायामिति ॥ सन्निधिः** सन्निधानम् । **माहात्म्यं** वर्चोविशेषः ॥.10,11 ॥

कलशशब्दिताजाद्यर्चनफलमाह - **कलश इति ॥**

कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं भगम् ।
योग्यतां पापहानिं च पुण्यवृद्धिं च साधयेत् ॥ 12 ॥

उक्तविधिना अर्चित इति शेषः । **प्रज्ञां** बुद्धिम् । **मेधां** धारणाशक्तिम् । **श्रियं** शरीरकान्तिम् । **भगम्** ऐश्वर्यादिषट्कम् । **योग्यतां** योग्यताव्यक्तिम् । कलशलक्षणं तूक्तमन्यत्र -

`सौवर्णं कलशं रम्यं रौप्यं ताम्रमथापि वा।
निर्दोषं मृण्मयं वापि चन्दनेन विलेपितम् ॥
षडङ्गुलोन्नताः कार्या' इति ॥ 12 ॥

2.5 होमविधिः

एवं दीक्षाङ्गभूतमभिषेकमुक्त्वा शान्तिकं काम्यमकाम्यं च होममाह - **उपसर्गेष्वित्यादिना सार्धश्लोकद्वयेन ॥**

उपसर्गेषु जातेषु दैवभूतात्महेतुषु ।
आयुषे वाथ शान्त्यै वा श्रिये वा पुण्यवृद्धये ॥ 13 ॥
योग्यतायै मन्त्रसिद्ध्यै विष्णोः प्रीत्यर्थमेव वा ।
जुहुयात्सहस्रमयुतं लक्षं कोटिमथापि वा ॥ 14 ॥
पूर्ववत्संस्कृते वह्नौ ध्यात्वा देवं जनार्दनम् ।

दैवहेतुषु उल्कापाताद्यनावृष्ट्यादिष्वाधिदैविकेषु। **भूतहेतुषु** भूकम्पनादिभौतिकेषु। **आत्महेतुषु** वामचक्षुःस्फुरणादिष्वाध्यात्मिकेषु। **उपसर्गेषु** दुःखहेतुषु उपद्रवेषु जातेषु सत्सु तत्परिहारायेति शेषः। **पूर्ववद्** अनुयागस्थलवत् षोडशकर्मभिः पीठपूजादिना च संस्कृते वह्नौ देवं ध्यात्वा सहस्रमयुतं लक्षं कोटिं वा जुहुयादित्यन्वयः। निमित्ताल्पेऽल्पो होमः। तदाधिक्ये सोऽप्यधिक इति निमित्ताल्पत्वबहुत्वापेक्षया व्यवस्थितविकल्पो वाशब्दः। **आयुषे** आयुर्वृध्यै। **शान्त्यै** दुःस्वप्नग्रहवक्रतादिप्रयुक्तपीडानिवृत्त्यै। मन्त्रसिद्ध्यै जुहुयादिति काम्यो होमः। विष्णोः प्रीत्यर्थमेव वेत्यकाम्यो होम इति ज्ञेयम् ॥13,14. ॥

2.6 होमकुण्डपरिमाणम्

कुण्डलक्षणपुरस्सरं वह्निस्थापनमाह - कृत्वेत्यादिना ॥

कृत्वा त्रिमेखलं कुण्डं चतुर्विंशाङ्गुलोच्छ्रितम् ॥ 15 ॥

तावत्खातं चतुष्कोणमुच्छ्रितं द्वादशैव वा[1] ।

द्व्यङ्गुलं त्र्यङ्गुलं वाऽपि चतुरङ्गुलमेव वा ॥ 16 ॥

विस्तारो मेखलानां स्यादन्त्या वा चतुरङ्गुला ।

चतुर्विंशाङ्गुलं वा तद्विस्तारो द्वादशैव वा ॥ 17 ॥

अत्र `कुण्डं कृत्वे'त्यस्य `वह्निं निक्षिपे'दित्यग्रिमेण (तं.सा.2-19) निक्षिपेदित्यनेनान्वयः । एवं ध्यात्वेत्यस्यापि । तत्रादौ कुण्डलक्षणमाह - त्रिमेखलमिति ॥ तिस्रो मेखलाः सोपानायिताः वेदिका यस्य तत् । वेदिकात्रयसंयुक्तमित्यर्थः । त्रिमेखलमिति ब्राह्मणाभिप्रायम् । क्षत्रियादीनामन्यथोक्तेर्ग्रन्थान्तरे ।

`त्रिमेखलं द्विजकुण्डं क्षत्रियस्य द्विमेखलम् ।

मेखलैकं तु वैश्यस्य' इति ।

यद्वा त्रिमेखलमिति मध्यमः कल्पः । उपलक्षणमेतत् । एकद्विपञ्चमेखला अपि ज्ञेयाः । यथाह लक्षसङ्ग्रहे -

`मुख्यास्तु पञ्च ताः प्रोक्ताः मध्यमास्तिस्र एव तु ।

द्वे स्यातामधमे पक्षे एका स्यात् त्वधमाधमा' इति ।

---

[1] द्वादशेन वा इति गु.दी.सू.पाठान्तरम् ।

7A

मेखलायाः परिमाणमाह - **चतुर्विंशेति ॥** क्रियाविशेषणमेतत् । **चतुर्विंशाङ्गुलोच्छ्रितं** भूमेरूर्ध्वं चतुर्विंशत्यङ्गुलैरुच्छ्रितम् । प्रत्येकमष्टाङ्गुलोच्छ्रितत्वं ज्ञेयम् । खातोपरिस्थितवेदिकापरिमाणमुक्त्वा तत्परिमाणमाह - **तावदिति ॥ तावत्खातं** भूमेरधस्ताच्चतुर्विंशत्यङ्गुलं खातम् । `यावत्कुण्डस्य विस्तारः खननं तावदीरितम्' इति वचनात् । **चतुष्कोणं** चतुरस्रम् । मेखलोच्छ्रितसमः खात इति समेखलाखातपक्ष उक्तः । इदानीं मेखलोच्छ्रयसमो न भवति खात इत्यपरमेखलाखातपक्षमभिप्रेत्याह - **उच्छ्रितमिति ॥** उच्छ्रितमेव द्वादश । खातं तु चतुर्विंशाङ्गुलमिति योज्यम् । **द्वादशेन वेति क्वचित्पाठः । द्वादशेन** अङ्गुलीनां द्वादशकेनोच्छ्रितं वेत्यर्थः । एवं मेखलोच्छ्रयं निरूप्य इदानीं मेखलाविस्तारमाह - **अङ्गुलमिति ॥** तिसृणां मेखलानामेव विस्तारः त्र्यङ्गुलं वा चतुरङ्गुलं वा स्यादिति व्यवस्थितविकल्पः । **वा** अथवा **अन्त्या** कण्ठसंलग्ना मेखला नियतं चतुरङ्गुला अनयोरनियम इत्याशयः । अन्त्यमेखलायाश्चतुरङ्गुलत्वमुक्तमेवोच्यत इति पुनरुक्तिर्दोष इति चेन्न । `सिद्धे सत्यारम्भो नियमार्थ' इति न्यायेन चतुरङ्गुलतानियमार्था पुनरुक्तिरित्यदोषः । **तद्विस्तारः** कुण्डविस्तार एव चतुर्विंशाङ्गुलं वा द्वादश वेत्यर्थः ॥.15-17 ॥

कुण्डान्तर्घृताद्याहुतिप्रक्षेपार्थं कुण्डान्त्यमेखलोर्ध्वं विनता सती या स्थाप्यते सा योनिरुच्यते यज्ञकाण्डे । तल्लक्षणमाह - **अश्वत्थेति ॥**

> अश्वत्थपत्राकृतिः स्यान्मूलतो द्वादशाङ्गुला ।
> योनिः खाते च विनता प्रविष्टा द्व्यङ्गुलं तथा ॥ 18 ॥

अत्रैवेत्यनुवर्तते । अश्वत्थपत्राकृतिरेव योनिस्स्यादित्यनेन `अश्वत्थपत्रवद्योनिर्गजोष्ट्रप्रतिमाथवा' इत्यत्र द्वितीयपादोक्तं पराचष्टे । तद्दैर्घ्यमाह - **स्यादिति ॥** मूलमारभ्य द्वादशाङ्गुलदैर्घ्योपेता । यद्वा **मूलतः** मूले द्वादशाङ्गुला । उत्तरोत्तरमीषन्न्यूना चेत्यपि ग्राह्यम् । योनिः सा विनता सती खाते द्व्यङ्गुलं प्रविष्टा । अत्र द्वादशाङ्गुलेत्यस्य

सामान्यवचनत्वादुच्चत्वे आयतत्वे च द्वादशङ्गुलेत्यर्थो ज्ञेयः । यथोक्तं पञ्चरात्रे -

`अर्धाङ्गुलोच्छ्रितां योनिं विदध्यात्तावदायताम्' इति ।

कुण्डस्य न्यूनाधिक्यकरणे दोष उक्तः ॥

`मानहीने महाव्याधिरधिके शत्रुवर्धनम् ।

योनिहीने त्वपस्मारं वाक्कुण्ठः कण्ठवर्जिते ॥

श्रृङ्गाररहितं यच्च यजमानविनाशकृत्' इति ॥ 18 ॥

अथ कुण्डे अग्निस्थापनविधिमाह - **तदात्मनीति ॥**

तदात्मनि हरिम् ध्यात्वा कुण्डे देवीं श्रियं तथा ।

विष्णुवीर्यात्मकं वह्निं निक्षिपेत् प्रणवेन ह ॥ 19 ॥

कुर्यात् क्रियाः षोडश च व्याहृतीभिः पृथक्पृथक् ।

वह्नेः .... ॥

तस्य हरेः **आत्मनि** प्रतिमास्थानीये **कुण्डे** कुण्डमध्ये । तादृग्लक्षणोपेतस्वरूपे कुण्ड इति वा । देवीं श्रियं च ऋतुस्नातां तेन रममाणां ध्यात्वा वह्निं विष्णुवीर्यात्मकं ध्यात्वा प्रणवेन वह्निं कुण्डे निक्षिपेत् । हरिरेव वीर्याधायक इत्यनुसन्धाय विष्णुवीर्याभिमानिदेवाभिमन्यमानं वह्निं निक्षिपेदिति भावः । यद्वा तदा **आत्मनि** स्वात्मनि हरिम् ध्यात्वा कुण्डे श्रियं ध्यात्वेत्यर्थः । इदानीमग्नेः षोडशसंस्कारानाह - **कुर्यादिति ॥ क्रियाः** गर्भाधानादिषोडशसंस्कारान् **॥पृथक् पृथगिति ॥** अग्नेराराधानसिध्यर्थम् अमुकसंस्कारार्थं व्याहृतिहोमं करिष्य इति सङ्कल्प्य भूः स्वाहेत्यादिव्याहृतिभिश्चतस्र आहुतीर्हुत्वा पर्युक्ष्य पुनः सङ्कल्पादीति पृथक् पृथगित्यर्थः ।

इदमुक्तं विष्णुतीर्थीये -

'उपलिप्य शुचौ देशे कुण्डे वा स्थण्डिलेऽपि वा ।
संस्कृत्य विधिवद्भूमौ समादध्याद्धुताशनम् ॥

पत्राण्यासाद्य सम्प्रोक्ष्य संस्कृत्याज्यं यथोक्तवत् ।
गर्भाधानादिसंस्कारानग्नेः कुर्यात्पृथक् पृथक् ॥

मूलेन पुष्पमाराध्य संस्मरेत् तत्र देवताः ।
वासुदेवादिकास्ताभ्यः स्रुवेण जुहुयाद्धुतम् ॥

गर्भाधानं पुंसवनं सीमन्तं जातकर्म च ।
नामान्नप्राशने चौलं मौञ्जी व्रतचतुष्टयम् ।
गोदानाख्यं स्नातकं च विवाहः पैतृमेधिकम्' इति ॥ 19. ॥

[1] प्राजापत्यसौम्याग्नेयवैश्वदेवरूपं व्रतचतुष्टयं द्रष्टव्यम् । प्रकृते बहिर्निष्क्रमणेन वैष्णवबलिना वा सह षोडशक्रियाः, अग्नेरुत्तरक्रियाभावादिति द्रष्टव्यम् ।

---

1 विष्णुतीर्थीये अनुयागविधौ अत्रोक्तौ द्वौ श्लोकौ पठ्येते। मूलेनेति श्लोकः तत्र नोपलभ्यते। तस्य मूलं न लब्धम् । षोडशसंस्कारबोधकः सार्धश्लोकः तत्र किञ्चिद्व्यत्यासेन पठ्यते । पूर्वषोडशसंस्कारेष्वनन्तर्गतः मरणानन्तरमाचर्यमाणः पैतृमेधिकसंस्कारः मातृकासु सार्धश्लोकस्यान्ते पठितः इत्येतदतीवाश्चर्यकरम् । सन्दर्भस्पष्टतायै विष्णुतीर्थीयस्थः अनुयागविधिभागः अत्र प्रदर्श्यते -

'अनुयागविधिः-
समर्प्योक्तप्रकारेण तथाग्नौ जुहुयात्सुधीः ।
सङ्क्षेपात् तद्विधिं वक्ष्ये वायव्ये वाग्निकोणके ॥ 3 - 110 ॥

उपलिप्य शुचौ देशे कुण्डे वा स्थण्डिलेऽपि वा ।
संस्कृत्य विधिवद्भूमौ समादध्याद्धुताशनम् ॥ 3 - 111 ॥

त्रीणि काष्ठान्युपादाय निदध्याद्द्रव्यदेवताः ।
स्मरन् परिसमूह्याथ परिस्तीर्य ततो क्षिपेत् ॥ 3 - 112 ॥

2.7 होमद्रव्याणि

अथ प्रधानहोममाह - तद्वेति ॥

... तद्वहरेः प्रीतिं कुर्वन् द्रव्यैर्यजेत् ततः ॥20॥

आज्येन वा पायसेन समिद्भिः क्षीरिणामथ।

तिलैर्वा तण्डुलैर्वाऽपि मधुरैस्त्रिभिरेव वा ॥21॥

ब्रह्मपत्रसमिद्भिर्वा समिद्भिर्वाऽमृतोद्भवैः।

अमृताः समिधो ज्ञेयाः सर्वत्र चतुरङ्गुलाः ॥22॥

पात्राण्यासाद्य सम्प्रोक्ष्य संस्कृत्याज्यं यथोक्तवत् ।

गर्भाधानादिसंस्कारान् कुर्यादग्नेः पृथक्पृथक् ॥ 3 - 113 ॥

व्याहृतीभिर्यथाज्येन कुर्यात्पूर्णाहुतीः सुधीः ।

गर्भाधानं सवः पुंसः सीमन्तो वैष्णवो बलिः ॥ 3 - 114 ॥

जातकं नाम निष्कामोऽन्नाशनं चौलकर्म च ।

उपनीतिर्महानाम्नी महाव्रतमतः परम् ॥ 3 - 115 ॥

उपनिषदश्च गोदानं समावर्त्यमतः परम् ।

विवाहश्चैवमित्येताः कुर्यात्तु षोडश क्रियाः ॥ 3 - 116 ॥

पूजयित्वा हरिम् वह्नाविध्माघाराज्यभागकान् ।

चतुश्चतुः पीठदेवमानं सपरिवारकम् ॥ 3 - 117 ॥

हुत्वा प्रधानहवनं चतुर्लोकाग्निना कृतम् ।

पूर्णाहुतिः प्रतिहुतं वषट्कारावसानया ॥ 118 ॥

जुहुयाद्विष्णुगायत्र्या समिधादिचतुर्ष्वपि ।

ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् ॥ 3 - 119 ॥ '।

ततोऽग्नौ हरिसम्पूजनोत्तरं गर्भाधानाद्युत्तरं च तद्वद्धरेः प्रीतिं कुर्वन् वक्ष्यमाणद्रव्यैः हरिम् यजेदित्यर्थः। होमद्रव्याण्याह - **आज्येन वेति॥ आज्येन** गोघृतेन। **पायसेन वा** गोक्षीरसिद्धेन। **क्षीरिणाम्** अश्वत्थवटौदुम्बरादीनां समिद्भिः। **त्रिभिर्मधुरैः** आज्यमधुक्षीरैः। `आज्यं क्षीरं मधु तथा मधुरत्रयमुच्यते' इति कात्यायनवचनादिति। मधुशर्करागुडैस्त्रिमधुरैरिति गुरुमतम्[1]। **ब्रह्मवृक्षसमिद्भिः** पालाशसमिद्भिः अश्वत्थसमिद्भिर्वा। क्षीरवृक्षत्वेऽप्यस्य प्राधान्यात् पृथग्ग्रहणम्। **अमृतोद्भवैः** अमृतवल्लीसंज्ञैर्वा यजेत्। विशेष्यलिङ्गत्वाभावश्छान्दसः। अन्यसमित्सु स्मृत्युक्तस्य प्रादेशपरिमाणस्य सम्मतत्वादमृतासु समित्सु परिमाणविशेषमाह - **अमृता इति॥ सर्वत्र** सर्वहोमेषु चतुरङ्गुलाश्चतुरङ्गुलपरिमाणा इत्यर्थः॥20-22॥

प्रसङ्गाद्दीक्षायां होमं होम्यं चाह - **एवमिति॥**

एवमेव च दीक्षायामाज्येनैवाहुतिक्रिया।
पूजा च कार्या विधिवत् पूर्वं सर्वहुतेष्वपि॥ 23॥

क्रिया कार्येति शेषः। आज्येनैव नत्वन्यत्रोक्तचर्वादिनेत्यर्थः॥

इदानीं सर्वहोमेषु समाप्तेषु कर्तव्यमाह - **पूजेति॥ सर्वहुतेषु** सर्वहोमेषु समाप्तेष्विति शेषः। अपिः पश्चादितिपदार्थे। `अपिः पदार्थसम्भावने'ति (पा.सू.1-4-96) स्मरणात्। मधुनोऽपि स्यादिति यथा। पश्चाच्च[2]। पूर्वमिति लुप्तोपमा। पूर्वमिव धूपदीपादिपूजा कार्येत्यर्थः॥23॥

इदानीं यज्ञे दक्षिणासङ्ख्यामाह - **गुरव इति॥**

1 उत्तरत्र तृतीयाध्याये 18तमश्लोके `अयं गुरूपदिष्टोऽर्थः' इति व्याख्याकृता उक्तत्वात् स्वगुरूणां श्रीश्रीनिवासतीर्थादीनामित्यर्थः इति भाति।

2 अपिशब्दविवरणं यदत्तं तल्लब्धार्थकथनमिदमिति भाति।

गुरवे दक्षिणां दद्याल्लक्षेलक्षे शतं सुधीः ।
आत्मनैव कृते होमे शक्तितो गुरुदक्षिणाम् ॥ 24 ॥

॥इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमत्तन्त्रसारसङ्ग्रहे
द्वितीयोऽध्यायः॥

सुधीः शोभनबुद्धिः यजमानः **गुरवे** आचार्याय लक्षेलक्षे प्रतिलक्षं होमे कृते सतीति शेषः । **शतं** गाः धनादिकं वा दद्यादिति सम्बन्धः । इदं च स्वाशक्त्या ऋत्विगादिकृते होमे । यजमानकर्तृके होमे तु विशेषं वक्ति - **आत्मनैवेति॥** न तु परेणेत्यर्थः । **शक्तितः** ल्यब्लोपनिमित्तेयं पञ्चमी । शक्तिमनतिक्रम्य गुरुदक्षिणां दद्यादित्यनेन न शतमिति नियम इति सूचयति ॥24 ॥

॥इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमत्तन्त्रसारस्य
टीकायां श्रीमद्यदुपत्याचार्यपूज्यपादाराधारकश्रीनिवासाचार्यपूज्यपादानां
शिष्येण वेङ्कटपतिना विरचितायां गुर्वर्थदीधितौ द्वितीयोऽध्यायः॥
अस्मद्गुर्वन्तर्गतश्रीमध्वेशार्पणमस्तु॥

3

तन्त्रसारसङ्ग्रहे तृतीयोऽध्यायः

श्रीगुरुभ्यो नमः । हरिः ॐ ।

सुरैः सम्पद्भिरर्च्याय मानुषैरुदविप्लुषा ।
वेदव्यासाय देवाय नमस्कुर्मोऽनिशं वयम् ॥ 1 ॥

प्रणम्य श्रीनिवासार्यगुरूणां पादपङ्कजे ।
तन्त्रसारतृतीयाध्यायार्थं वक्ष्यामि लेशतः ॥ 2 ॥[1]

3.1 प्रतिमाद्रव्यम्

पूजायाः सुप्रतिष्ठितप्रतिमासापेक्षत्वादग्रे मूर्तिप्रतिष्ठाप्रकारं निरूपयितुमादौ तावद्देवालयगतप्रतिमालक्षणमाह - **प्रतिष्ठामिति ॥**

प्रतिष्ठां कारयन् विष्णोः कुर्यात् सुप्रतिमां बुधः ।
लोहैर्वा शिलया दार्वा मृदा वाऽपि यथाक्रमम् ॥ 1 ॥

---

1 आतृतीयाध्यायाद्यन्तं ज.पाठः नोपलब्धः ।

विष्णोः प्रतिष्ठां कारयन् आचार्यादिभिरिति शेषः। **बुधः** वक्ष्यमाणलक्षणज्ञानी। निपुणो वा। **सुप्रतिमां** शोभनप्रतिमां कुर्यात् । स्वयमेव। यद्वा कुर्यादित्यन्तर्णीतणिच् । कारयेदित्यर्थः। **लोहैः** सुवर्णरजतताम्रैः।
`सुवर्णं रजतं ताम्रं त्रिविधं लोहमिष्यत' इति वचनाद्विष्णुतीर्थीये। **दार्वा** चन्दनकाष्ठादिना। **मृदा** गङ्गादीनाम् । शोभनमृत्तिकया वा। अपिपदात्पित्तलादिना। **यथाक्रमं** शास्त्रोक्तक्रममनतिक्रम्य कुर्यात् ॥1॥।

3.2 प्रतिमालक्षणम्

प्रतिमायाः शोभनत्वं कथमित्यतः एवमित्याह - **षडित्यादिना॥**

षण्णवत्यङ्गुलां योग आसीनामथवा स्थिताम् ।
शयानां वा मुमुक्षूणां व्याचक्षाणां निजां स्थितिम् ॥ 2 ॥

यद्वा यथाक्रममित्युक्तम् । कोऽसावित्यतस्तं निरूपयति - **षडित्यादिना॥** षण्णवत्यङ्गुलोच्छ्रिताम् । **योगे** योगासने **आसीनाम्** उपविष्टां व्यासादिरूपाम् । अथवा **स्थितां** रामादिप्रतिमाम् । **शयानाम्** अनन्तशयनरङ्गनाथादिप्रतिमाम् । **निजां स्थितिं** स्वस्वरूपं माहात्म्यं वा। मुमुक्षूणामिति कर्मणि षष्ठी। मुमुक्षून् प्रति व्याचक्षाणाम् । अथवा तादर्थ्ये षष्ठी। मुमुक्षूणामर्थे व्याचक्षाणां हयास्यादिकाम् । अत्र शयानामिति संन्यासिविषयम् ।

`शयानां नार्चयेद्देही न च मृद्दारुजां तथा' इति

पञ्चरात्रे गृहस्थस्य शयानमूर्तेः प्रतिषेधात् ॥2॥

3.3 षण्णवत्यङ्गुलानामवयवशो विभागः

षण्णवत्यङ्गुलामिति समग्रप्रतिमायाः षण्णवत्यङ्गुलपरिमितत्वमुक्तम् । एकैकस्मिन्नवयवे कियदङ्गुलपरिमितत्वमित्यपेक्षायां तामेव षण्णवतिमवयवशो विभज्याऽह

- मुखादूर्ध्वमित्यादिना ॥

मुखादूर्ध्वं व्यङ्गुलोच्चां नवाङ्गुललसन्मुखाम् ।
सुवृत्तत्र्यङ्गुलग्रीवामा स्तनाच्च षडङ्गुलाम् ॥ 3 ॥
पञ्चादशाङ्गुलां नाभेरा सार्धदशकाङ्गुलाम् ।
वृषणादा मूलतश्च सार्धव्यङ्गुलमायताम् ॥ 4 ॥
तावदा गुदतो दीर्घां चैत्यादाऽष्टादशाङ्गुलाम् ।
तथा व्यङ्गुलचैत्यां च द्वाविंशज्जङ्घया युताम् ॥ 5 ॥

ललाटोपरिस्थकेशपर्यन्तं मुखम् । तदुपरि व्यङ्गुलोच्चशीर्षवतीम् । `ललाटाद्योमसज्ज्ञं स्याद्व्यङ्गुलद्वयमेव हि' इति याज्ञवल्क्यवचनात् । अत्र सर्वत्र ह्रस्वमध्योच्चभेदभिन्नतत्तत्प्रतिमाङ्गुलमेव ग्राह्यम् । `ह्रस्वमध्योच्चभेदेन तत्तन्मानं समस्तश' इति वक्ष्यमाणत्वात् (तं.सा.3-53)। लसच्च तत् मुखं च लसन्मुखम् । नवाङ्गुलपरिमितं तत् यस्याः सा तामिति विग्रहः । तदुक्तं बृहद्भाष्ये पञ्चमेऽध्याये[1] -

`नवाङ्गुलमुखो यस्तु गले च चतुरङ्गुलः ।
चतुर्विंशाङ्गुलतनुस्तद्वाक्यं देवपूजितम्' इति ।[2]

ननु मुखस्य नवाङ्गुलत्वे `दशतालो दशमुखो ललाटत्रिंशकस्तथा' इति (बृ.भा.3अध्याये शाकल्यब्राह्मणे) बृहद्भाष्ये दशमुख इत्युक्तेर्विरोधः[3] । अत्र षण्णवत्यङ्गुलामिति ष-

---

1 बृहदारण्यके वक्ष्यमाणवचनं प्रचलितपाठेषु तृतीयाध्याये उपलभ्यते । बृहदारण्यके द्विविधाध्यायविभागस्य दृष्टत्वादुभयमपि युज्यते ।

2 बृ.भा. 3अध्याये शाकल्यब्राह्मणे ।

3 इत ऊर्ध्वं टीकाकृद्भिः तत्र तत्र बृहदारण्यकभाष्यस्यायं भागः पौनःपुन्येन उल्लिखित इति हेतोः स भाष्यभागः अत्र सम्पूर्णतया उल्लिख्यते -

णणवत्यङ्गुलत्वस्योक्तत्वात् । तत्र दशमुखत्वोक्त्या नवाङ्गुलत्वस्यैव लाभादिति चेन्न। `नासाया उच्चत्वेनैव मापने' (तं.सा.3-25) इति वक्ष्यमाणत्वेन मुखस्य सार्धनवाङ्गुलत्वेनाविरोधात् । एवमपि तत्र पञ्चनवत्यङ्गुलत्वमेव लब्धमिति चेन्न। तत्राप्येकाङ्गुलस्य ग्राह्यत्वात् । अनुक्तिः स्वल्पत्वादिति सम्प्रदायविदः। सुवृत्ता त्र्यङ्गुलपरिमिता ग्रीवा यस्याः सा तथा ताम् । न चात्र `गले च चतुरङ्गुलम्' इति (बृ.भा.3अध्याये शाक-

---

`प्रश्नो वादे च जल्पादौ कर्तव्यः प्रतिवादिना।
तदुक्तिमात्रे प्रामाण्यं यदि नास्याऽगमान्तरम् ॥

अपेक्षितं यदा शङ्का दर्शयनीयस्तदाऽऽगमः।
निःशङ्कत्वेन यो वक्ता प्रश्नानामुत्तरं सदा॥

आनुकूल्येनाऽगमानां नाशङ्क्यं तद्वचः क्वचित् ।
दशताळो दशमुखो ललाटत्रिंशकस्तथा॥

सार्धोन्नतश्चैव पुनः पर्यग् दशशिरास्तथा।
पञ्चोराः सप्तपादो यो नाऽशङ्क्यं तद्वचः क्वचित् ॥
नवाङ्गुलमुखो यस्तु गले च चतुरङ्गुलः।
चतुर्विंशाङ्गुलतनुस्तद्वाक्यं देवपूजितम् ॥

प्राधान्याल्लक्षणोपेतो दुर्लक्षणयुतोऽपि सन् ।
तस्यापि वाक्यं मानं स्यात् किमु सर्वयुतस्य तु ॥

प्रायो देवाश्च ऋषयो न सर्वशुभलक्षणाः।
ऋते विष्णुं सुरश्रेष्ठं ब्रह्माणं वाऽप्यनन्तरम् ॥

यस्मान्न विदुषां वाक्यमाशङ्क्यं केनचित् क्वचित् ।
तस्माद् वेदेषु सर्वेषु कथाः प्रश्नोत्तरात्मिकाः॥

न प्रमाणान्तरं तत्र पृच्छन्ति घटनां विना।
एतस्मादाश्वलाद्याश्च पप्रच्छुर्नैव कुत्रचित् ।
आगमं याज्ञवल्क्योक्तेरन्यं तन्मैथिलोऽपि वा॥ इति ब्रह्मतर्के।' - इति।

ल्यब्राह्मणे) बृहद्भाष्यविरोधः, तत्र गलस्य चतुरङ्गुलपरिमितत्वोक्तेरिति । तस्य कण्ठाधःकूपमादाय जिह्वामूलपर्यन्तं परिमाणकथनपरत्वात् । `कण्ठकूपात्तु जिह्वायाः मूलं स्याच्चतुरङ्गुलम्' इति विष्णुतीर्थीयवचनात् । अस्य त्र्यङ्गुलत्वस्य कण्ठकूपं विहाय मध्यभागपरिमाणमपेक्ष्य प्रवृत्तेरिति । आस्तनात् स्तनपर्यन्तम् । आङ् मर्यादायाम् । एवमुत्तरत्रापि । स्तनशब्दस्य विभक्तिपरिणामेन द्वितीयायान्ततया आङश्चानुवृत्तिः । स्तनमारभ्य **नाभेरा** नाभिपर्यन्तं पञ्चदशाङ्गुलामित्यर्थः । पञ्चेत्यत्र दीर्घश्छान्दसः । **॥ सार्धेति ॥** नाभिपदमाङ् च पूर्ववदनुवर्तते । वृषणात् आ इति विभागः । नाभिमारभ्य वृषणपर्यन्तं **सार्धदशकाङ्गुलाम्** अर्धाधिकदशाङ्गुलामित्यर्थः । वृषणपरिमाणं तूत्तरत्र वक्ष्यति (तं.सा.3-12) । **मूलतः** मूलप्रदेशे सार्धद्व्यङ्गुलम् **आयतां** विस्तृतामित्यर्थः । यद्वा आ ऋद्धद्व्यङ्गुलसहितामायतां[1] विस्तृतामित्यर्थः । ततश्च द्व्यङ्गुलायतत्वमेव न तु सार्धद्व्यङ्गुलत्वमिति भाव इति **केचित्** । वृषणमारभ्य गुदपर्यन्तं तावद्दीर्घां सार्धद्व्यङ्गुलदीर्घामित्यर्थः । **॥ चैत्यादा ॥ चैत्यं** जानु । गुदमारभ्य जानुपर्यन्तमष्टादशाङ्गुलाम् । **॥ द्व्यङ्गुलेति ॥** तावद्दैर्घ्योपेतजानुप्रदेशयुतामित्यर्थः । द्वाविंशत्यङ्गुलोच्चजङ्घया युताम् ॥3-5 ॥

3.4 आगुल्फपादपरिमाणम्

पादपृष्ठभागस्योपरितनग्रन्थिर्गुल्फशब्देनोच्यते । गुल्फादधस्तात्पादपर्यन्तं परिमाणं वक्ति - **आरभ्येति ॥**

आरभ्य गुल्फमद्धैव[2] सहार्धचतुरङ्गुलाम् । षडङ्गुलोच्चप्रपदां
सार्धत्र्यङ्गुलमेव च ।
प्रपदोच्चयुतामन्ते द्व्यङ्गुलप्रपदोच्छ्रयाम् ॥ 6 ॥

---

1 `-सहितमायताम्' इति भाव्यम्, मूले `सार्धद्व्यङ्गुलमिति ह्रस्वदर्शनात् ।

2 छलारीये `गुल्फमध्यं च' इति पाठस्तथैव व्याख्यानम् ।

गुल्फमारभ्य अधरमिति शेषः। सहार्धचतुरङ्गुलामेवेत्यन्वयः। अद्धेति `पादान्मानं तु गुल्फस्य सार्धाङ्गुलचतुष्टयम्' इति प्रमाणप्रसिद्धिमाह। इदानीं गुल्फमारभ्य पादाग्रपर्यन्तं प्रपदः, तस्यादिमध्यान्तेति विविक्षाभेदेन परिमितिमाह - **षडङ्गुलेति॥** आदाविति ग्राह्यम्। षडङ्गुलोच्चप्रपदादिभागामित्यर्थः **॥ सार्धेति॥** मध्य इति ग्राह्यम्। सार्धत्र्यङ्गुलमेवोच्चप्रपदयुतामिति बुध्या विवेकेन सम्बन्धः। सार्धत्र्यङ्गुलोच्चप्रपदमध्यामित्यर्थः। **अन्ते** प्रपदाग्रे। द्व्यङ्गुलप्रपदोच्छ्रयां द्व्यङ्गुलोच्चप्रपदाग्रयुतामिति यावत्। ननु `मुखादूर्ध्वं द्व्यङ्गुलोच्चाम्' (तं.सा.3-3) इत्युक्तशीर्षपरिमाणमारभ्य `आरभ्य गुल्फमद्धैव सहार्धचतुरङ्गुलाम्' (तं.सा.3-6) इत्यन्तेनोक्तपादपर्यन्तं परिमाणे गण्यमाने सप्तनवत्यङ्गुलानि भवन्ति। षण्णवत्यङ्गुलामिति प्राचीनं वचनं (तं.सा.3-2) कथमिति चेन्न। अस्त्यत्र गुरुपादोक्तः सम्प्रदायविशेषः।[1] ॥6॥

पादस्थाङ्गुष्ठादिपञ्चाङ्गुलीनां दैर्घ्यपरिमाणमाह - **त्र्यङ्गुलद्व्यङ्गुलामित्यादिना॥**

त्र्यङ्गुलद्व्यङ्गुलामर्धहीनमध्याङ्गुलामपि।

---

1 इतः अग्रे एकः प्रघट्टकः मूलमातृकायां लिखित्वा मृष्टः। तथापि अन्यमातृकासु दृश्यमानत्वात् अत्र प्रदर्श्यते - `तथा हि। मूलतश्च सार्धद्व्यङ्गुलमायतामिति वृषणमूलपरिमाणकथनं तावदागुदतो दीर्घामिति दैर्घ्यकथनं प्रासङ्गिकम्। ततोऽत्रोक्तपञ्चाङ्गुलमपि त्यक्त्वा वृषणं चतुरङ्गुलमिति वक्ष्यमाणवृषणदैर्घ्यपरिमाणेन चतुरङ्गुलेन सह षण्णवत्यङ्गुलत्वं सेत्स्यति। व्यवधानेनाभिधानं तु अतिरहस्यत्वात्। इत्यवगन्तव्यमिति॥ छ॥ अन्ये तु तावदागुदतो दीर्घामिति वृषणमूलाधोभागमारभ्य गुदपर्यन्तं सार्धद्व्यङ्गुलपरिमाणमुक्तम्। तत्र सार्धैकाङ्गुलमेव गणनीयम्। वृषणमूलाधोभागापेक्षया तिर्यगेकाङ्गुलव्यवधानेनाधोभागे गुदस्य विद्यमानत्वात्। ततस्तत्रैकाङ्गुलपरित्यागे षण्णवत्यङ्गुलत्वं सम्भवतीति समाधानं वर्णयन्ति। अथवा सार्धद्व्यङ्गुलमायताम् इत्युक्तसार्धद्व्यङ्गुलायतत्वग्रहणेन ग्रीवाचतुरङ्गुलसाहित्येन गणने अर्धन्यूनषण्णवतिर्जायते। तत्रार्धस्याल्पत्वादविवक्षेति **केचित्।** वस्तुतस्तु फालादुपरिविद्यमानद्व्यङ्गुलग्रहणेन षण्णवत्यङ्गुलत्वमिति भाति॥ छ॥' - इति।

त्रिपादाङ्गुलहीनान्यां ततस्तादृशतत्पराम् ॥ 7 ॥

त्र्यङ्गुलं त्र्यङ्गुलपरिमितं **द्व्यङ्गुलम्** अङ्गुलिद्वयम् अङ्गुष्ठं तदनन्तरं चेति यस्याः सा तथोक्ता। अयं भावः। अङ्गुष्ठस्य त्र्यङ्गुलं दैर्घ्यम् । तदनन्तरस्य च त्र्यङ्गुलदैर्घ्यमिति। अर्धहीनं त्र्यङ्गुलम् । सार्धद्वयाङ्गुलं तत्परिमितं मध्याङ्गुलं यस्यास्ताम् । त्रयः **पादाः** भागाः[1] यस्य तादृशाङ्गुलेन हीनं यत्त्र्यङ्गुलं सपादाङ्गुलिद्वयमिति यावत् । तत्परिमितम् **अन्यत्** अनामिकाख्यं चतुर्थमङ्गुलं यस्यास्ताम् । **ततः** अनामिकातः। **तादृशं** तुरीयाङ्गुलिसदृशं **तत्परं** तस्मात्तुरीयत्परं कनिष्ठानामकं पञ्चममङ्गुलं यस्याः सा तादृशतत्परा। पञ्चमस्य तुरीयाङ्गुलसादृश्यं तादृशपदोक्तम् । यथा तुरीयस्य स्वाव्यवहितपूर्वापेक्षया पादोनत्वमेवं तुरीयाख्याव्यवहितपूर्वाक्षया पादोनत्वेन ज्ञेयम् । तथा च अङ्गुलद्वयपरिमितदीर्घमित्यर्थः। **ततः** अनन्तरं **तादृशं** सपादद्व्ययाङ्गुलपरिमाणं **तत्परं** पञ्चमं यस्याः सा तामिति **केचित्** ॥7 ॥

3.5 नखपरिमाणम्

इदानीं तन्नखपरिमाणमाह - **पादेति** ॥

पादोनोच्चाङ्गुष्ठनखां तदर्धतदनन्तराम् ।
क्रमशः पादहीनान्यां रक्तपादनखां शुभाम् ॥ 8 ॥

पादोनोच्चाङ्गुष्ठनखाम्। **पादेन** चतुर्थभागेन न्यूनैकाङ्गुलिपरिमाणेनोन्नतः अङ्गुष्ठस्य नखो यस्यास्ताम् । **तदर्धेन** सार्धपादेनोच्चः। **तदनन्तरः** द्वितीयाङ्गुलनखो यस्यास्ताम् । सार्धैकपादतदनन्तराङ्गुलि[2]नखामिति यावत् । ॥ क्रमश

1 अंशा इति वि.पाठे।
2 अङ्गुष्ठनखामिति वि.पाठे।

इति ॥ क्रमेण पादेन हीनाः अन्ये मध्यमानामिकाकनिष्ठिकाङ्गुलित्रयनखाः यस्याः सा ताम् । द्वितीयाङ्गुलिनखपरिमाणापेक्षया पादोनपरिमाणत्वं तृतीयनखस्य। तत्परिमाणापेक्षया पादोनपरिमाणोपेतत्वं तुरीयनखस्य। तत्परिमाणापेक्षायाऽन्तिम-नखस्य पादोनपरिमणोपेतत्वमित्यर्थः।

अयं भावः - अङ्गुष्ठनखस्य त्रिपादोच्चत्वम् । तदनन्तराङ्गुलिनखस्य सार्धैकपादोच्चत्वम् । सार्धैकपादाङ्गुलपरिमाणे चतुर्धा विभक्ते तत्रैकांशोनपरिमाणत्वं तृतीय-नखस्य। तृतीयनखपरिमाणे चतुर्धा विभक्ते तत्रैकांशोनपरिमाणत्वं तुरीयनखस्य। तत्परिमाणे चतुर्धा विभक्ते तत्रैकांशोनत्वं कनिष्ठिकानखस्येति। **रक्ताः** शोणाः पादाः नखाश्च यस्यास्ताम् । पादग्रहणेनेदमङ्गुलिपरिमाणं पादाङ्गुलिपादनखानामेवेति सूचयति। **शुभां** पुष्टावयवत्वादिना मनोरमाम् । षडङ्गुलोच्चप्रपदाम्[1] ॥8 ॥

3.6 प्रपदतिर्यग्विस्तारः

पूर्वं प्रपदौन्नत्यस्य षडङ्गुलत्वमुक्त्वेदानीं प्रपदतिर्यग्विस्तारस्य षडङ्गुलपरिमित-त्वमाह - **विस्तार इति** ॥

विस्तारः प्रपदस्यापि षडङ्गुल उदाहृतः।
अङ्गुष्ठपरिणाहस्तु चतुरङ्गुल ईरितः।
त्र्यङ्गुलस्तु तदन्यस्या[2] व्रीह्यर्धोनाः क्रमात् पराः ॥ 9 ॥

प्रपदस्य पादाग्रस्य विस्तारोऽपीत्यन्वयः। तेन प्रागुक्तोच्चत्वसमुच्चयः। इदानीं पादाङ्गुलिपरिणाहमाह ॥ **अङ्गुष्ठेति** ॥ **परिणाहो** नाम परितः परिमाणस्थौल्यमिति यावत् ॥ **चतुरङ्गुल इति** ॥ चतुरङ्गुलमितसूत्रवेष्टनयोग्य इति भावः।

---

1 यद्यपीदमनन्वितमिति भाति, तथापि अग्रिमापिपदेनेदं लभ्यते इति भाति।

2 `त्र्यङ्गुलस्तु तदन्यः स्यात्' इति `त्र्यङ्गुलस्तु तदन्यस्य' इति च टीकाकृदुल्लिखिते पाठान्तरे।

तदन्यस्याः द्वितीयाङ्गुलेः त्र्यङ्गुलस्तु परिणाह इति बुध्या विविक्तस्यानुवृत्तिः । `त्र्यङ्गुलस्तु तदन्यस्ये'त्यपरः पाठः । तत्र **तदन्यस्य** द्वितीयाङ्गुलस्येत्यर्थः । क्वचित् `तदन्यः स्यात्' इति पाठः ॥ **व्रीहीति** ॥ **पराः** उभाभ्यामन्याः तिस्रः अङ्गुल्यः क्रमाद् **व्रीह्यर्धोनाः** व्रीह्यर्धोनस्वस्वपूर्वपरिमाणोपेतपरिणाहा इत्यर्थः । अयं भावः । तृतीयाङ्गुलस्य व्रीह्यर्धोनाङ्गुलित्रयपरिणाहत्वम् । तुरीयस्य तृतीयपरिणाहापेक्षया व्रीह्यर्धोनपरिणाहत्वम् । अन्तिमस्य तुरीयपरिणाहापेक्षया व्रीह्यर्धोनपरिणाहत्वमिति । तथा च अर्धव्रीहिन्यूनत्र्यङ्गुलपरिणाहा तृतीया । चतुर्थी व्रीह्यूनत्र्यङ्गुलपरिणाहा । पञ्चमी सार्धव्रीह्यूनत्र्यङ्गुलपरिणाहेत्युक्तं भवति ॥9 ॥

3.7 जङ्घादिपरिमाणम्

जङ्घायाः आदिमध्यान्तभागपरिणाहमाह - **दशेति** ॥

दशाङ्गुलं जङ्घमूलं तन्मध्यं त्र्यङ्गुलाधिकम्[1] ।
सप्तादशाङ्गुलं तूर्ध्वं जानुरष्टादशाङ्गुलः ॥ 10 ॥

ऊर्वन्तोऽपि तथा ज्ञेयो मध्यं द्विर्द्वादशाङ्गुलम् ।
चतुरङ्गुलाधिकं मूलं गुह्यं सार्धचतुष्टयम् ॥ 11 ॥

सार्धत्रयं परीणाहाद्वृषणं चतुरङ्गुलम् ।
सप्ताङ्गुलं परीणाहाद् वृत्तं प्रोक्तं समस्तशः ॥ 12 ॥

अष्टत्रिंशाङ्गुलं कट्याः परिणाह उदाहृतः ।

---

1 टीकाकृता अत्र पाठान्तरद्वयमुल्लिखितम् । तच्च द्वयं क्रमात् `- मध्यं तत्त्र्यङ्गुलाधिकम्' इति `- मध्यतस्त्र्यङ्गुलाधिकम्' इति च ।

सुवृत्तत्वं तथा श्रोण्योः पीनत्वं च समस्तशः[1] ॥ 13 ॥

दशाङ्गुलपरिणाहवत् । जङ्घमूलमिति ह्रस्वः `ङ्यापोः सञ्ज्ञाछन्दसोर्बहुलम्' इति (पा.सू.6-3-63) वचनात् छान्दसः । **तन्मध्यम्** तस्याः मध्यं जङ्घामध्यं **त्र्यङ्गुलाधिकं** त्रयोऽङ्गुलाः अधिकाः येषां दशानां तत्परिमितः परिणाहो यस्य तत् । `तत्त्र्यङ्गुलाधिकम्' इति पाठे तेभ्यो दशभ्यः त्र्यङ्गुलैरधिकः परिणाहो यस्य तत् । मध्यत इति पाठे मध्यमित्येवार्थः । **ऊर्ध्वं** जङ्घोर्ध्वभागः जङ्घावसानभाग इति यावत् । सप्तदशाङ्गुलपरिणाहम् । सप्तादशेति दीर्घश्छान्दसः । **जानुः** जानुप्रदेशः । जानुशब्दः पुंनपुंसकलिङ्ग इति ज्ञेयम् । **ऊर्वन्तो** जानूपरिभागोऽपि **तथा** अष्टादशाङ्गुलपरिणाहत्वेन ज्ञेयः । **मध्यम्** ऊरुमध्यम् । **द्विर्द्वादशाङ्गुलं** चतुर्विंशत्यङ्गुलपरिणाहम् । **मूलम्** ऊरुमूलं **चतुरङ्गुलाधिकं द्विर्द्वादशाङ्गुलम्** अष्टाविंशत्यङ्गुलपरिणाहम् । गुह्येन्द्रियस्य दैर्घ्यपरिमाणं पूर्वमनुक्तत्वात् प्रसङ्गादाह - **गुह्यमिति ॥** शिश्नापरपर्यायं लिङ्गं सार्धचतुष्टयदीर्घम् । तस्य परिणाहमाह - **सार्धेति ॥** परिणाहात् सार्धत्रयं गुह्यमिति सम्बन्धः । सार्धत्र्यङ्गुलस्थूलमिति यावत् । वृषणं चतुरङ्गुलं दैर्घ्ये । परिणाहात् सप्ताङ्गुलम् । **समस्तशः** समस्तं गुह्यं वृषणं च **समस्तशः** सर्वत्र **वृत्तं** पीनमित्यर्थः । **समस्तशः** जङ्घादिकं सर्वमित्यप्याहुः । **समस्तशः श्रोण्योः** समग्रश्रोण्योः पीनत्वं सुवृत्तत्वं च **तथा** अष्टत्रिंशाङ्गुलम् । समत्वत इति **क्वचित्पाठः** । समत्वेनेत्यर्थः ॥10-13 ॥

3.8 कटिविस्तृतिः नाभिपरिमाणम्

कट्याः परिणाहं पूर्वमुक्त्वा विस्तृतिमाह - **विस्तार इति ॥**

विस्तारश्च तथा कट्याः सुप्रतिष्ठितता पदोः ।

1 अत्र टीकाकृदुल्लिखितं पाठान्तरम् `- पीनत्वं च समत्वतः' इति ।

कट्याश्चैवाङ्गुलाधिक्यं नाभेरध उदाहृतम् ॥ 14 ॥

नाभिः सार्धाङ्गुलश्चैव गम्भीरोऽर्धाङ्गुलोऽन्ततः ।
वृत्तः प्रदक्षिणश्चैव द्विचत्वारिंशदङ्गुलम् ।
मध्यं स्तने परीणाहः षडङ्गुलमतोऽधिकः ॥ 15 ॥

विततत्वम्[1]। पदोः सुप्रतिष्ठितता च पीठे निश्छिद्रतयोपवेशनं च विधेये इति शेषः । अयं भावः - पादयोः पीठस्योपरि प्रक्षेपे पादपीठयोर्मध्ये यथा छिद्रं न भवेत् तथा कारयेत् । छिद्रे सति सर्वदाऽपवित्रपल्यादिसूक्ष्मजन्त्वाश्रयणसम्भवेन तथा तन्मूत्रादिदूषणसम्भवेन च तस्य परिहार्यत्वादिति । **नाभेरधः** अधःप्रदेशस्य **कट्याः** सकाशादष्टत्रिंशाख्यकटिपरिणाहादिति यावत् **अङ्गुलाधिक्यम्** अङ्गुलाधिकपरिणाहोपेतत्वमित्यर्थः । एकोनचत्वारिंशदङ्गुलपरिणाह इत्युक्तं भवति । नाभिः सार्धाङ्गुलगम्भीर एव । अन्ततो बहिरर्धाङ्गुलोन्नतः[2]। **वृत्तो** वर्तुलः **प्रदक्षिणः** दक्षिणावर्तश्च । मध्यमिति मध्यशब्देन नाभेरुपरितनः प्रदेशो विवक्षितः । तथा च **मध्यम्** उदरं **द्विचत्वारिंशदङ्गुलं** तावत्परिणाहम् । **स्तने** स्तनभागे **अतः** मध्यात् षडङ्गुलमधिकः परिणाहः । स्तनभागोऽष्टचत्वारिंशदङ्गुलपरिणाह इत्याशयः ॥ 14,15 ॥

3.9 उरःपरिमाणम्

उरसो विस्तृतिमाह - **एकेति** ॥

एकोनविंशाङ्गुलं तदुरोविस्तारलक्षणम् ।

पादोनमङ्गुलं चैव भुजाभ्यां सह सार्धकम् ॥ 16 ॥

---

1 विस्तार इति पूर्वं प्रतीकतया धृतस्यायमर्थः ।

2 'गम्भीरोऽर्धाङ्गुलोन्नतः' इत्यपि मूलपाठः । टीकायां तु '- अर्धाङ्गुलोन्नतः' इति पाठः स्वीकृतः । उन्नतशब्दरहितपाठेऽपि उन्नतशब्दसाहित्येन व्याख्यानं करणीयं भवति इत्यनेन ज्ञायते ।

अंसयोर्विस्तृतिश्चैव पृथगष्टाङ्गुला मता ।
सप्ताङ्गुलोच्छ्रयः कक्षादुपरि स्कन्धयोर्मतः ॥ 17 ॥

अष्टत्रिंशाङ्गुलं चैव हस्तयोर्मानमुच्यते ।
अष्टादशाङ्गुलो बाह्वोः परिणाह उदाहृतः ।
क्रमादूनं तदन्ते तु सार्धाष्टाङ्गुलमीरितम् ॥ 18 ॥

साङ्गुलस्तु तलः सार्धनवाङ्गुल उदाहृतः ।

तत् तस्याः प्रतिमायाः उरोविस्तारलक्षणमेकोनविंशाङ्गुलं पादोनमङ्गुलं चेति योजना। उरः पादोनविंशाङ्गुलविस्तारमिति भाव इति बहवः। गुरवस्तु पादस्याप्यूनमङ्गुलम्। अङ्गुलस्य पञ्चधा विभागं कृत्वा पादस्याप्यूनमङ्गुलं चेत्यर्थः। अङ्गुलस्य पञ्चमोंऽशश्चेति भाव इति।[1] ननूरसः पादोनविंशाङ्गुलत्वे `पञ्चोराः सप्तपादो यो नाशक्यं तद्वचः क्वचित्' इति बृहद्भाष्ये[2] पञ्चोरा इति समग्रकायस्य पञ्चोरःपरिमितदैर्घ्योक्त्या पादोननवनवत्यङ्गुलत्वं स्यात्। षण्णवत्यङ्गुलत्वं कथमिति चेन्न। उरसो भागविशेषस्य तावद्विस्तारस्य भावेन तद्विवक्षया पञ्चोरा इति वाक्यप्रवृत्तेः। अत्र पुनर्भागान्तरविवक्षया पादोनविंशाङ्गुलत्वोक्तेरिति **केचित्**। पादस्याऽप्यूनमिति योजनान्तरेण षण्णवतेरेव लाभादिति गुरूपदिष्टोऽर्थः। भुजद्वयविशिष्टोरसो विस्तारमाह - **भुजाभ्यामिति** ॥ भुजाभ्यां सहोरसो माने कृते सति तत्सहितमुरः **सार्धकं पूर्वोक्तमानं**[3] अर्धसहितपूर्वोक्तमानं ज्ञेयमित्यर्थः। भुजद्वयविशिष्टमुरः पादपादार्धोनत्रिंशाङ्गुल-

---

1 एतद्वाक्यस्थाने वि.पाठे `अङ्गुलपञ्चमो भाग इति यावत्। पादोनाङ्गुलिविस्तारमिति भावः' इति किञ्चिदधिकव्यत्यासो दृश्यते।

2 बृ.भा. 3अध्याये शाकल्यब्राह्मणे

3 इदं पदमध्याहृतम्।

विस्तारमिति[1] भावः । अंसयोः स्कन्धयोः विस्तृतिः पृथक् पृथक् अष्टाङ्गुलपरिमिता । स्कंन्धयोर्हस्तयोर्बाह्वोरित्यत्र सर्वत्रैकैकस्य एकैका सङ्ख्या न तु द्वयोर्मिलित्वेति ज्ञातव्यम् । कक्षादुपरि स्कन्धयोः पृथक् **सप्ताङ्गुलोच्छ्रयः** सप्ताङ्गुलोन्नतत्वम् । हस्तयोः **मानम्** औन्नत्यमष्टत्रिंशाङ्गुलम् । बाह्वोः परिणाहोऽष्टादशाङ्गुल उदाहृतः । क्रमादधोध ऊनं तद्बाहुद्वयम् । **अन्ते** बाह्वन्ते **सार्धाष्टाङ्गुलमीरितं** द्वादशाङ्गुलमित्यर्थः । अर्धाधिकाष्टाङ्गुलमिति वार्थः । **साङ्गुलः** अङ्गुलैः सहितः **तलः** पाणितलः **सार्धनवाङ्गुलः** अर्धाधिकनवाङ्गुलदीर्घः उदाहृत इत्यर्थः ।

ननु तलस्य सार्धनवाङ्गुलत्वे `दशताल' (बृ.भा. 3अध्याये शाकल्यब्राह्मणे) इति बृहद्भाष्ये `दशतालौ सप्तपादौ विन्यात्तौ च सुरोत्तमा'विति (गी.ता.13-27) त्रयोदशाध्यायगीतातात्पर्ये च समग्रकायस्य दशतालपरिमितत्वोक्तेः समग्रदेहस्य पञ्चनवत्यङ्गुलत्वमेव स्यात् । न तु षण्णवत्यङ्गुलत्वमिति चेत् न। एकाङ्गुलपरिमाणस्याप्यस्याविवक्षया दशताल इति ग्रन्थप्रवृत्तेस्तत्रापि तत्परिमाणस्य ग्राह्यत्वादिति **बहवः ।** तालशब्दस्य तलापेक्षयाऽर्थान्तरत्वेन विरोधप्रसक्तिरेव नास्तीति प्रतिभाति । तथा चोक्तं गीतातात्पर्यन्यायदीपिकायाम् - `मध्यमाङ्गुल्यग्रमारभ्य मणिबन्धपर्यन्तं करस्ताल'[2] इति । `प्रादेशतालगोकर्णास्तर्जन्यादियुते तते' इत्यमरकोशः ॥16-18.॥

3.10 तलपरिमाणमङ्गुलपरिमाणं च

ननु साङ्गुलस्तल इत्युक्तम् । तत्र तलपरिमाणमङ्गुलपरिमाणं च कियदित्यत आह - **सममिति ॥**

समं तदुभयं ज्ञेयं तथैव तलविस्तृतिः ॥ 19 ॥

---

1 वि.पाठे पादशब्दस्यावृत्तिर्नास्ति ।

2 न्या.दी. 13-27 । न्यायदीपिकापाठः इत्थं वर्तते - `अत्र तालो नाम मध्यमाङ्गुल्यग्रात् मणिवन्धपर्यन्तः कर उच्यते' इति । तस्य अर्थानुवादोऽयम् ।

तदुभयं तलमङ्गुलश्चेत्युभयं समं ज्ञेयम् । अङ्गुलोच्छ्रयः पादोनपञ्चाङ्गुलः तलोच्छ्रयोऽपि पादोनपञ्चाङ्गुल इति समं ज्ञेयमित्यर्थः । **तलविस्तृतिस्तथैव** तलदैर्घ्यवदेव पादोनपञ्चाङ्गुलेति भावः ॥19॥

3.11 पञ्चाङ्गुलीनां दैर्घ्यस्थौल्यपरिमाणम्

पञ्चाङ्गुलीनां दैर्घ्ये परस्परं तारतम्यमाह - **अर्धेत्यादिना ॥**

अर्धाङ्गुलोन्नता मध्या द्वयोः सार्धाङ्गुलोन्नता ।
कनिष्ठिकायास्तस्यास्तु व्रीहिमानाधिकः परः ॥ 20 ॥

मध्या मध्याङ्गुलिः **द्वयोः** तर्जन्यनामिकयोः सकाशाद् **अर्धाङ्गुलोन्नता** तर्जन्यनामिकाभ्यामर्धाङ्गुलोन्नता। तर्जन्यनामिकाभ्यामर्धाङ्गुलोन्नतत्वेऽपि मध्यायाः कनिष्ठिकातः कियदाधिक्यमित्यत आह - **सार्धेति ॥** मध्येत्यनुवर्तते। तथा च मध्या कनिष्ठिकायाः सकाशात् सार्धाङ्गुलोन्नता। कनिष्ठिकापेक्षयाऽङ्गुष्ठस्याधिक्यमाह - **तस्या इति ॥ तस्याः** कनिष्ठिकायाः सकाशाद्व्रीहिपरिमाणेनाधिकः **परः** अङ्गुष्ठः ॥20॥

एवमौन्नत्यमुक्त्वा स्थौल्यमाह - **सार्धत्रयेति ॥**

सार्धत्रयपरीणाहौ मध्यज्येष्ठावुदाहृतौ ।
अन्यौ व्रीहितदर्धोनावन्या सार्धद्वयाङ्गुला ।

मध्या च ज्येष्ठश्चेति द्वौ सार्धत्रयाङ्गुलपरिणाहावुदाहृतौ। **अन्यौ** मध्यमायाः पूर्वापरपार्श्ववर्तिनौ अनामिकातर्जन्याख्यावयवौ व्रीहितदर्धेन सार्धत्रयपरिणाहौ। अत्रायं विवेकः। अनामिका व्रीह्यूनसार्धत्रयाङ्गुलपरिणाहा। तर्जनी व्रीह्यर्धोनसार्धत्रयाङ्गुलपरिणाहेति **केचित्।** वस्तुतस्तु पूर्वापरावुभावपि सार्धव्रीहिन्यूनपरिणाहाविति

ज्ञेयम् । `अर्धाङ्गुलोन्नता मध्या द्वयोः' इति पूर्ववाक्यात् । **अन्या** कनिष्ठिका सार्धद्वयाङ्गुलपरिणाहा।

ज्येष्ठामङ्गुलिं विनेतराङ्गुलीनामन्त्यभागपरिमाणमाह - **पादोनेति ॥**

पादोनान्तपरीणाहाः सर्वा[1] ज्येष्ठां विना स्मृताः ॥ 21 ॥

स्वस्वमूलपरिणाहस्येति शेषः। **सर्वाः** अङ्गुलयः स्वस्वमूलपरिणाहस्य **पादेन ऊनान्तपरिणाहाः** अन्त्यभागे स्वस्वमूलापेक्षया पादोनाङ्गुलपरिणाहा इत्यर्थः। अयं भावः। मध्यमाङ्गुलादिभागे सार्धत्रयाङ्गुलपरिणाहत्वम् । अन्त्यभागे पादोनसार्धत्रयाङ्गुलत्वम् । सपादाङ्गुलत्रयत्वमिति यावत् । अनामिकायास्त्वादिभागे सार्धव्रीह्यूनसार्धत्रयाङ्गुलपरिणाहत्वम् । अन्त्यभागे सार्धव्रीह्यूनसपादाङ्गुलित्रयपरिणाहत्वम् । तर्जन्या अप्यादिभागे सार्धव्रीह्यूनसार्धत्रयाङ्गुलपरिणाहत्वम् । अन्त्यभागे सार्धव्रीह्यूनसपादाङ्गुलत्रयपरिणाहत्वम् । कनिष्ठिकायाः आदिभागे सार्धद्वयाङ्गुलपरिणाहत्वम् । अन्त्यभागे सपादाङ्गुलिद्वयपरिणाहत्वमिति। ज्येष्ठां विनेत्यनेन ज्येष्ठायाः अन्त्यभागे आदिभागपरिणाहसमपरिणाहत्वं भाति। यथोक्तं विष्णुतीर्थीये - `मूलेऽन्त्येऽपि समोऽङ्गुष्ठः शेषाङ्गुल्यस्तथा न हि' इति ॥ 21 ॥

3.12 गलपरिमाणम्

गलपरिणाहमाह - **वक्ष इति ॥**

वक्षोविस्तारसदृशः परिणाहो गलस्य च ।
ललाटकुक्षिकण्ठास्तु दीर्घरेखात्रयान्विताः ॥ 22 ॥

---

[1] सर्वे इति पुल्लिङ्गपाठोऽप्यस्ति। `अङ्गुलिशब्दः पुल्लिङ्गेऽप्यस्ति। अतः सर्वे इति' इति तत्वकणिकायाम् ।

वृत्तो गलो बाहवश्च स्तनावङ्गुलयस्तथा ।
रक्तास्तलनखाश्चैव नेत्रान्तोऽधर एव च ॥ 23 ॥
.... उत्तरोष्ठश्च जिह्वा च ।

गलस्य कण्ठस्य परिणाहः वक्षोविस्तारेण **सदृशः** तुल्यः पादोनविंशत्यङ्गुलपरिणाह इत्यर्थः । **दीर्घरेखात्रयान्विताः** दीर्घेण रेखात्रयेण युक्ताः ललाटादित्रयः । गलो बाहवश्च स्तनौ अङ्गुलयश्च वृत्तः वृत्ताः वृत्तावित्यादि योज्यम् । **तलः** पाणितलः **नखाः** हस्तनखाश्च, पादनखानां रक्तत्वस्य रक्तपादनखांशुभामित्यत्रोक्तत्वात्, नेत्रान्तश्च अधर इत्यत्र बुध्या विवेकेनोष्ठपदस्याऽकर्षः,[1] उत्तरोष्ठश्च जिह्वा चेत्येते रक्ताः ॥22,23 ॥

3.13 हस्तनखपरिमाणम्

नखदैर्घ्यपरिमाणमाह - **नखाविति** ॥

.... नखौ पादोनकाङ्गुलौ ।
अर्धाङ्गुलौ तथा मध्यावन्येऽष्टांशक्रमोनकाः ॥ 24 ॥

ज्येष्ठाङ्गुलनखावित्यर्थः । द्विवचनं तु हस्तद्वयस्याङ्गुलापेक्षया । अन्यथा अन्य इति बहुवचनानुपपत्तिरिति ज्ञेयम् । अङ्गुष्ठनखौ पादोनैकाङ्गुलिदीर्घौ । मध्याविति द्विवचनं पूर्ववदेव । **मध्यौ** मध्यमाङ्गुलीनखौ अर्धाङ्गुलिदीर्घौ । **अन्ये** तर्जन्यनामिकाकनिष्ठिकानखाः **अष्टांशक्रमोनकाः** क्रमेण मध्याद्यपेक्षयाऽष्टांशोनाः । अयं भावः ।

---

[1] अत्र `विवेकेन ओष्ठपदस्य' इति पदच्छेदः `ओत्वोष्ठयोः समासे वा' इति वार्तिकात् पररूपम् । अग्रिमवाक्ये उत्तरोष्ठः इत्यत्राप्ययमेव परिहारः ।

तर्जनीनखस्य मध्यनखपरिमाणापेक्षयाऽष्टांशोनमध्यनखपरिमितदैर्घ्यम् । अनामिकानखस्यापि तर्जनीनखवत् मध्यनखापेक्षयाऽष्टांशोनतत्परिमितदैर्घ्यम् । कनिष्ठिकानखस्य तदुभयापेक्षयाऽष्टांशोनतत्परिमितदैर्घ्यमिति । तथा चोक्तं विष्णुतीर्थीये -

`पादोनमङ्गुलं कार्यमङ्गुष्ठस्य नखं तथा ।
अर्धाङ्गुलं तथा कार्यं मध्यमाया नखं तथा ।
अष्टमांशाष्टमांशोनाः शेषाङ्गुल्यः क्रमेण तु' इति ॥24॥

3.14 मुखस्यावयवशो विभागस्तत्परिमाणं च

नवाङ्गुललसन्मुखामित्युक्तम् । नवाङ्गुलत्वं नासाधोभागस्त्र्यङ्गुलः नासा त्र्यङ्गुली ललाटं च त्र्यङ्गुलमित्यवयवशो विभज्य दर्शयति - **नासिकाया इति** ॥

**नासिकाया अधस्ताच्च नासिका च ललाटिका[1] ।
समा मानेन नासाया उच्चत्वेनैव मापने ।
अर्धाङ्गुलाधिकं सर्वं मुखस्य[2] तु भविष्यति ॥ 25 ॥**

नासिकायाः **अधस्ताद्** अधःप्रदेशः नासिका च **ललाटिका** ललाटमित्येते मानेन समाः । एतत्त्रितयं मानेन समं त्र्यङ्गुलमित्यर्थः । तथा च नवाङ्गुललसन्मुखामिति (तं.सा.3-3) प्रागुक्तमुपपन्नं भवति । चुबुकाग्रमारभ्य नासिकापर्यन्तं त्र्यङ्गुलम् । भ्रूपर्यन्तं नासिका च तावती । तदुपरि रराटिका च त्र्यङ्गुलेति नवाङ्गुलत्वं सम्पन्नं भवति । ननु सार्धनवाङ्गुलपरिमितो हि हस्तः । तेन समपरिमाणत्वमन्यत्रोक्तम् । अत्र तु नवाङ्गुलपरिमितत्वमेव मुखस्योच्यतेऽतो विरोध इत्यत आह

1 रराटिका इति गु.दी.सू.पाठान्तरम् ।
2 सर्वमुखस्येति गु.दी.सू.पाठान्तरम् ।

- **नासाया इति॥** नासिकायाः उच्चत्वेन निमित्तेन चुबुकादिमारभ्य केशपर्यन्तं मापने कृते सति **मुखस्य** नवाङ्गुलात्मकस्य मुखस्य, **सर्वं** परिमाणं पूर्वोक्तनवाङ्गुलापेक्षयाऽर्धाङ्गुलमधिकं यस्य तत् तादृशं भवतीत्यर्थः। **सर्वमुखस्येति** पाठे चुबुकादिमारभ्य नासाग्रेण ललाटान्तपर्यन्तं मापने क्रियमाणे नासाया उच्चतया सर्वमुखस्यार्धाङ्गुलाधिकम् । भावप्रधानो निर्देशः। अधिकत्वं भविष्यतीत्यर्थः। पूर्वोक्तं नवाङ्गुलत्वं तूच्चत्वेन मापनं विनेति ज्ञेयम् । तथा च मुखस्य सार्धनवाङ्गुलत्वं लब्धमिति हस्तसमानत्वं वर्तत एवेति भावः ॥25 ॥

आस्यतिर्यक्परिमाणमाह - **चतुरङ्गुलमिति॥**

चतुरङ्गुलं तथैवास्यं सार्धव्रीह्यधरं स्मृतम् ।
उत्तरं व्रीहिमात्रं तु तदूर्ध्वं चाधरोपमम् ।
सार्धाङ्गुलमधः प्रोक्तमधरादध एव च ॥ 26 ॥

आस्यम् आस्यदैर्घ्यं चतुरङ्गुलम् । नासाधोऽङ्गुलित्रयपरिमाणमुक्तम् । तत्रापि कस्मिन् भागे कियत्परिमाणमित्यपेक्षायामाह - **सार्धव्रीहीति॥** [1] **अधरं सार्धव्रीहि** [2] अधरोष्ठः सार्धव्रीहिपरिमाणः। **उत्तरं व्रीहिमात्रम्** उत्तरोष्ठो व्रीहिपरिमितः। **तदूर्ध्वम्** उत्तरोष्ठापेक्षयोर्ध्वं नासिकान्तपर्यन्तम् **अधरोपमं** सार्धव्रीहिमितम् । नासापेक्षयाऽधोभागेऽधरोष्ठोपम इत्यर्थः। अधरादधः सार्धाङ्गुलं प्रोक्तमिति योजना। अधरोष्ठादधोभागः सार्धैकाङ्गुल इत्यर्थः। एवं हि त्रयस्यैकाङ्गुलत्वमिति परिभाषयाऽर्धव्रीहिन्यूनत्र्यङ्गुलत्वं सिद्धम् [3]। उपलक्षणमेतत् । ओष्ठयोर्मध्ये

1 इत आरभ्य प्रतिमार्थमिति 39तश्लोकव्याख्यापर्यन्तं `..इति ॥' इत्येवंरूपं प्रतीकधारणं न कृतम् ।

2 बहुव्रीहिरयम् ।

3 `एवं हि त्रयस्यगुलम्' इति वि.पाठेन `एवं व्रीहित्रयस्यैकाङ्गुलत्वम्' इति प्रा.पाठेन च सिद्धः शुद्धपाठोऽयम् ।

मन्दस्मितमर्धव्रीहिपरिमितं ग्राह्यम् । तथा च नासाधोभागस्य त्र्यङ्गुलत्वसिद्धिरिति द्रष्टव्यम् ॥26॥

आस्यपार्श्वद्वयं प्रोक्तमा कर्णात्तु षडङ्गुलम् ।
सप्ताङ्गुलं नासिकायाः पार्श्वमा कर्णतः स्मृतम् ॥ 27 ॥
सपादाङ्गुलमुच्चा च नासिका परिकीर्तिता ।
अर्धाङ्गुले पुटे तस्या मध्यं च समुदाहृतम् ॥ 28 ॥
नासिका व्रीहिविस्तारा चक्षुषी अङ्गुलत्रये ।
अङ्गुलं चैव विस्तीर्णे फुल्लेऽर्धं च तदन्यथा ॥ 29 ॥
चतुरङ्गुलौ भ्रुवौ चैव तथाऽर्धाङ्गुलिविस्तृतौ ।
असंहतौ च निबिडौ तथा पक्ष्म सुनीलकम् ॥ 30 ॥

आस्यमारभ्य **आ कर्णात्** कर्णद्वयपरिमितम् । आस्यपार्श्वद्वयमिति यावत् । प्रत्येकं षडङ्गुलं प्रोक्तम् । नासिकायाः पार्श्वं पर्श्वद्वयम् । **आकर्णतः** कर्णद्वयमारभ्य सप्ताङ्गुलं स्मृतम् । **नासिका** नासिकास्तम्भः । **तस्याः** नासिकायाः **पुटे** अर्धाङ्गुलोच्चे । **मध्यं** पुटमध्यं च अर्धाङ्गुलमिति वचनव्यत्ययेन सम्बध्यते । **चक्षुषी अङ्गुलित्रये** तत्परिमितदैर्घ्ये । यदा **फुल्ले** विकसिते तदाऽङ्गुलविस्तृते । **तदन्यथा** फुल्लत्वाभावे । **अर्धम्** अर्धाङ्गुलं विस्तीर्णे । भ्रुवौ च **चतुरङ्गुलौ** चतुरङ्गुलदीर्घौ । भ्रूश्ब्दः पुल्लिङ्गे च वर्तते । **असंहतौ** मध्ये विच्छिन्नौ **निबिडौ** घनौ । **पक्ष्म सुनीलकं** सुतरां नीलमित्यर्थः । पक्ष्म सुनीलकं ज्ञेयमिति **अन्ये** ॥27-30॥

कर्णौ च त्र्यङ्गुलौ सार्धद्वयविस्तारसंयुतौ ।

सकुण्डलं तावदेव विवरं सम्प्रकीर्तितम् ।
तथा द्व्यङ्गुलविस्तारं लताभ्यां सह कथ्यते ॥ 31 ॥
नीलालकसहस्रेण युक्तं तन्मुखपङ्कजम् ॥ 32 ॥
ललाटं सुविशालं च तथा सार्धनवाङ्गुलः[1]।
विस्तारो मूर्ध्नि वृत्तं च शिरश्छत्राकृति स्मृतम् ॥ 33 ॥

कर्णौ **त्र्यङ्गुलौ** त्र्यङ्गुलदीर्घौ। **सकुण्डलं** कुण्डलसहितं **विवरं** कुण्डलप्रक्षेपाधिकरणं कर्णच्छिद्रमिति यावत् । **तावदेव** सार्धद्व्यङ्गुलपरिणाहमेव। अत्र कुण्डलशब्देन कुण्डलाकारकर्णशष्कुल्यधःप्रदेश एव विवक्षितः । तस्य सार्धद्व्यङ्गुलत्वमुपपन्नम् । तथा कर्णविवर **लताभ्यां** कर्णरन्ध्रपार्श्वद्वयस्थत्वविशेषाभ्यां सह द्व्यङ्गुलविस्तारम् । **कर्णपूरं** कर्णालङ्कारविशेषः। **सुविशालं** शोभनं विशालं च। **मूर्ध्नि विस्तारः सार्धनवाङ्गुलः** ब्रह्मरन्ध्रमारभ्य चतुर्दिक्षु सार्धनवाङ्गुल इत्यर्थः। शिर आरभ्य तन्मध्यपर्यन्तं[2] गणने एकत्र सार्धनवाङ्गुलम् । एवं पर्यक्भागचतुष्टयेऽपीति भावः। सार्धनवाङ्गुलमिति पाठे मूर्ध्नि सार्धनवाङ्गुलं यथा भवति तथा विस्तारः स्यादित्यर्थः। ननु `सार्धोन्नतश्चैव पुनः पर्यग्दशशिरास्तथा' इति बृहद्भाष्ये[3]। `दशशिरा' (बृ.भा. 3अध्याये शाकल्यब्राह्मणे) इति समग्रकायस्य दशशिरस्त्वोक्त्या पञ्चनवत्यङ्गुलत्वप्राप्त्या षण्णवत्यङ्गुलत्वव्याघात इति चेन्न, एकाङ्गुलपरिमाणस्याल्पस्याविवक्षया तद्ग्रन्थस्य प्रवृत्तेरिति सम्प्रदायात् । नवाङ्गुलं[4] ललाटमिति वा सम्बन्धः।

---

1 सार्धनवाङ्गुलम् इति गु.दी.सू.पाठान्तरम् ।

2 प्रा.पाठे पार्श्वे `=ब्रह्मरन्ध्रपर्यन्तम्=' इति एतच्छब्दार्थः लिखितः।

3 बृ.भा. 3अध्याये शाकल्यब्राह्मणे ।

4 इतः वाक्यद्वयं प्रा.पाठे नास्ति। मूले सार्धनवाङ्गुलमिति विद्यते । तत्र नवाङ्गुलमिति बुद्ध्या विवेकेनान्वयः अत्र प्रदर्श्यते इति भाति।

`नवाङ्गुलं ललाटं तु विस्तारेण प्रकीर्तितम्' इति

विष्णुतीर्थीयवचनात् । शिरश्छत्राकृति वृत्तं च । मध्यभागे उच्चमिति केचित् ॥31-33 ॥

3.15 केशविचारः आभरणविचारश्च

दीर्घाश्च कुञ्चिताग्राश्च नीलाः केशा हरेर्मताः ।
मुखमानेन चैवोर्ध्वं किरीटं केशवस्य हि ॥ 34 ॥

कुण्डले मकराकारे वक्षश्चैव सकौस्तुभम् ।
सश्रीवत्सं दक्षिणतः पीनं तुङ्गमुदाहृतम् ।
हारग्रैवेयसहितमुपवीतयुतं तथा ॥ 35 ॥
बाहवश्च सकेयूरकङ्कणाङ्गदमुद्रिकाः ।
समध्यबन्धं मध्यं च नितम्बे पीतमम्बरम् ।
काञ्चीगुणश्च पदयोर्नूपुरे चातिसुस्वरे ॥ 36 ॥
अङ्गुलीयानि च पदोः कृतिभिः साधु कारयेत् ।
सोत्तरीयं च चक्राद्यैरायुधैश्च समन्वितम् ॥ 37 ॥

अनुन्नतैरविरलैर्दन्तैर्युक्तं च सुस्मितम् ।
समदृष्टियुतं कार्यं श्लक्ष्णं[1] चैव मनोहरम् ॥ 38 ॥

---
1 हृद्यमिति गु.दी.सू.पाठान्तरम् ।

हरेः केशा इति सम्बन्धः। केशवस्य किरीटं मुखमानेनोन्नतं कार्यम्। मुखमानं च नासाया उच्चत्वेन मापने सार्धनवाङ्गुलम्। अन्यथा नवाङ्गुलमिति प्रागुक्तमनुसन्धेयम्। वक्षः **दक्षिणतः** दक्षिणभागे श्रीवत्ससहितम्। **पीनं पुष्टं तुङ्गम्** उन्नतं चोदाहृतम्। **हारैः** मुक्ताहारैः **ग्रैवेयैः** ग्रीवाभरणैश्च सहितम्। बाहवः केयूरादिसहिताः। केयूराङ्गदयोरवान्तरभेदो मानान्तरादवगन्तव्यः। भुजकीर्तिस्तु केयूरमङ्गदो बाहुभूषणमिति[1] द्राविडाः। **मध्यबन्धेन** कटिबन्धेन सहितं मध्यं कटिप्रदेशः। काञ्चीगुणश्च नितम्बे। नूपुरे **कृतिभिः** कुशलैः शिल्पिभिः कारयेदिति सम्बन्धः। **अविरलैः** परस्परसन्दष्टैः। **समदृष्टियुतं** समानलोचनाभ्यां युक्तम्। अन्यथा दोषः कथितः पञ्चरात्रे -

`ऊर्ध्वदृष्टिमधोदृष्टिं तिर्यग्दृष्टिं विवर्जयेत्।
ऊर्ध्वदृष्ट्या वित्तनाशो ह्यधोदृष्ट्या कुलक्षयः।
तिर्यग्दृष्ट्या वयोनाशः तस्माद्ग्राह्या समेक्षणा' इति।

श्लक्ष्णं हृद्यम्। हृद्यमित्येव **क्वचित्पाठः। मनोहरं** दर्शनमात्रादेव मानसहारि। एतादृशं प्रतिमाशरीरं कारयेदित्यन्वयः। इदं भगवत्पादोक्तं प्रतिमापरिमाणं देवालयगतप्रतिमाया एव। गेहे त्वन्यदेवेति द्रष्टव्यम्। यथोक्तं मात्स्ये -

`अङ्गुष्ठपर्वमारभ्य वितस्तिर्यावदेव तु।
गेहेषु प्रतिमा कार्या नाधिका तत्र शस्यते' इति।

नचात्र गेहीयमूर्तेर्लक्षणानुक्तेर्न्यूनता स्यादिति वाच्यम्। स्वस्वाभिमतमूर्तिं प्रकल्प्य षण्णवतिधा विभज्याङ्गुलिं प्रकल्प्य तेन मुखादिकं कल्पयेत् इत्याशयादित्यादि द्रष्टव्यम्। **इति प्रतिमालक्षणप्रकरणम्** ॥34-37॥

1 प्रा.पाठे बाहुभूषणशब्दार्थः पार्श्वे `तोलबन्दी' इति लिखितः।

3.16 शिलापरीक्षापूर्वकं शिलानयनप्रकारः

एवं प्रतिमालक्षणमुक्त्वेदानीं प्रतिमार्थं शिलापरीक्षापूर्वकं शिलानयनप्रकारमाह - **प्रतिमार्थमिति ॥**

> **प्रतिमार्थं व्रजन् पञ्चध्वनिभिर्मङ्गलैर्युतः ।**
> **गत्वा शुचि स्थलं तत्र शिलां चैव परीक्षयेत् ॥ 39 ॥**

प्रतिमानिर्माणार्थं व्रजन् शिलानयनायेति शेषः । **पञ्चध्वनिभिः** मुखाहत-कराहत-नखाहत-दण्डाहत-परस्पराहतेति पञ्चवाद्यानि[1] तेषां ध्वनिभिः **मङ्गलैः** दूर्वाङ्कुरादिभिर्युतः गच्छेदिति शेषः । गमनानन्तरभाविकार्यमाह - **गत्वेति ॥ शुचि** पवित्रं **स्थलं** पर्वतादिकं गत्वा **तत्र** स्थले शिलां परीक्षयेत् । शिल्पिभिरिति शेषः । वर्णभेदेन शिलाभेदः पाद्मसंहितायाम् -

> `शिला चतुर्विधा ब्रह्मन् ! वर्णभेदैर्द्विजादिभिः ।
> शुभा शिला ब्राह्मणस्य क्षत्रियस्य तु पाटला[2]।
> वैश्यस्य पीता शूद्रस्य कृष्णा मुख्या यथोदिता' इति ॥39 ॥

परीक्षानन्तरं कार्यमाह - **ध्वनीति ॥**

> **ध्वनिभेदेन विज्ञाय शिलां गर्भवतीं त्यजेत् ।**

ध्वनिभेदेन शिथिलशब्देन गर्भवतीं शिलां विज्ञाय तां गर्भवतीं शिलां त्यजेत् । गर्भावतीं शिलां विज्ञाय गर्भं त्यजेदिति वार्थः ।

---

1 मुखाहतेत्यादि पञ्चशब्दानां वाच्यवाद्यानि प्रा.पाठे `चागसर-मृदङ्ग-वीणादि-भेरी-ताल' इति लिखितानि । लिपिकृट्टिप्पणिरिति भाति ।

2 प्रा.पाठे पार्श्वे `रक्ता' इति पाटलशब्दार्थः लिखितः ।

`ध्वनिश्च शिथिलो यासु स्पर्शो उष्णमथापि वा ।
तासु गर्भाः स्फुटं सन्ति यत्नेनोत्पाटयेच्च तान्' इति पाद्मसंहितावचनात् ।

ध्वनिभेदेनेत्युपलक्षणम् । अन्यान्यपि गर्भपरीक्षाज्ञापकानि द्रष्टव्यानि। तथा हि विष्णुतीर्थीये पञ्चरात्रागमे -

`वृक्षगर्भं शिलागर्भं मण्डलेन परीक्षयेत् ।
माञ्जिष्टवर्णके वृक्षे मण्डले च शिलोत्तमे ॥
मण्डूकं तत्र गर्भस्थं जानीयाच्च गुरूत्तमः ।
मण्डले मधुवर्णे च खद्योतं तत्र निर्दिशेत् ॥
पीते गोधां सिते सर्पं कुलीरं हरितालके ।
गुडवर्णे तु पाषाणं मण्डले सति निर्दिशेत् ॥
स्फटिकाभेऽनलं विद्यात् कपिले तत्र मूषकम् ।
भस्माभे सिकतां विद्याच्चित्रवर्णे तु वृश्चिकम् ॥
एवं गर्भाः समुद्दिष्टा मण्डलैरश्मवृक्षयोः ।
शिलायामथ वृक्षे वा मण्डलानि तु सन्ति चेत् ॥
तत्र गर्भपरीक्षार्थं गुरुर्लेपं प्रकल्पयेत् ।
ब्रह्माणिं वज्रपाणिं च शूलपाणिं च वैष्णवम् ॥
अजाक्षीरेण संयोज्य लेपयेदुपलं गुरुः ।
एकरात्र्युषितं कुर्यात् पाषाणं तद्विलेपितम् ।
क्लिन्नत्वं यदि तत्र स्यात् सगर्भं तं विदुर्बुधा' इत्यादि ।

शिलापरीक्षानन्तरं कर्तव्यमाह - **मूलेति॥**

मूलमन्त्रं जपन् विष्णुं ध्यायंस्तिष्ठेदुपोषितः ।
वार्क्षी चेद् यज्ञवृक्षस्य सारेणैव तु कारयेत् ॥ 40 ॥

शुभसूचनाद्यर्थमुपोषितः । विष्णुं ध्यायन् **मूलमन्त्रम्** अष्टाक्षरं जपन् तिष्ठेद् वसेत् । रात्र्यामिति शेषः । वार्क्ष्यां मूर्तौ विशेषमाह - **वार्क्षी चेदिति ॥** वृक्षमयी चेत्प्रतिमा प्रतिष्ठाप्या तदा तु फलविशेषकामनायां, यज्ञवृक्षस्येति निर्धारणे षष्ठी एकवचनं समुदायापेक्षं, यज्ञसाधनस्य चन्दनागरुब्रह्मवृक्षशम्युदम्बराश्वत्थादेर्वृक्षस्य मध्ये सारेणैव कारयेत् । शिल्पिभिरिति शेषः । तथा हि वृक्षभेदेन फलभेदः पाद्मसंहितायाम् ।

`द्रुमजातिप्रतिकृतिः सा पूज्या कामिनां भवेत् ।
प्रतिमा चन्दनमयी पूजिता श्रियमावहेत् ॥

प्रतिमा चागरुमयी भुक्तिमुक्तिफलप्रदा ।
ब्रह्मवर्चसकामेन ब्रह्मवृक्षसमुद्भवा ॥

शमीप्रतिकृतिः स्वर्गं नयेत् सत्पुरुषं यथा ।
अन्नाद्यकामैः प्रतिमा पूज्योदम्बरदारुजा ॥

अश्वत्थनिर्मिता पूज्या राज्यकामेन धामनि ।
न्यग्रोधनिर्मितं बिम्बं वंशविच्छेदकारणम्' इति ॥40 ॥

शिलाद्युद्धारात्पूर्वं बलिदानं कार्यमिति भावेनाह - **बलिदानं चेति ॥**

बलिदानं च सङ्क्षेपविधानेनैव कथ्यते ।

अस्य सङ्क्षेपशास्त्रत्वान्न विस्तरविरोधिता ॥ 41 ॥

दत्वोपहारं हरये तद्भूतेभ्यो बलिं हरेत् ।

प्राच्येभ्यो विष्णुभूतेभ्य इत्याद्यखिलदिक्षु च ॥ 42 ॥

आदाय विष्णुभूतेभ्यो लोकपेभ्यस्तथा हरेः ।
अनुज्ञामुद्धरेद्वृक्षं शिलां वा प्रतिमाकृते ॥ 43 ॥

नन्वेवं ग्रन्थान्तरविरोधः स्यात् । तत्र विधानान्तरस्य प्रतिपादितत्वादित्यत **आह - अस्येति ॥** सङ्क्षेपेण बलिदानेऽयं प्रकारो विस्तरेण बलिदाने प्रकारान्तरमिति भावः । **॥ दत्वेति ॥** पुरतो मूलमन्त्रेण चेति शेषः । उपहारं हरये दत्वा **तद्भूतेभ्यो विष्णु-**पार्षदेभ्यः कुमुदकुमुदाक्षादिभ्यः **हरेत्** दद्यात् । भूतबलिदाने मन्त्रमाह - **प्राच्येभ्य इति ॥** प्राच्येभ्यो विष्णुभूतेभ्योऽयं बलिर्नमः । आदिशब्देन आग्नेयेभ्यो विष्णुभूते-भ्योऽयं बलिर्नम इत्यादिमन्त्रेण **अखिलदिक्षु** अष्टदिक्षु । यथोक्तं विष्णुतीर्थीये -

`कुमुदं कुमुदाक्षं च पुण्डरीकं च वामनम् ।
शङ्कुकर्णं स्वर्णनेत्रं सुमुखं सुप्रतिष्ठितम् ।
पूजयेन्नृत्यगीताद्यैर्बलिदानेन वै बुध' इत्यादि ।

लोकपेभ्यो हरेश्चानुज्ञामादायेति सम्बन्धः । स्वप्नादावनुज्ञां प्राप्य वृक्षं शिलां वा **प्रतिमाकृते** प्रतिमार्थमुद्धरेत् । **केचित्** - इन्द्रादिभ्यो बलिदानं विधत्ते - **प्राच्येभ्य इति ॥** विष्णुभूतेभ्यः प्राच्यादिदिक्पेभ्य इन्द्रादिभ्यो बलिं हरेत् । दिक्पाश्चोक्ताः षड्प्र-श्नोपनिषद्भाष्ये -

`प्राच्याः प्राणास्तथेन्द्राद्याः दक्षिणाश्च यमादयः ।
प्रतीच्या वरुणाद्यास्तु सोमाद्याश्चोत्तराः स्मृताः ॥
शेषमित्राववाचीनौ वीन्द्रकामावुदक्तनौ ।
सभार्याः कोणपैः सार्धं चत्वारो दिशि दिश्यपि' (ष.प्र.भा.1-5) इत्याहुः ॥41-43 ॥

3.17 शिलाभेदस्तदुपयोगेन प्रतिमादिनिर्माणम्

शिलाविशेषेण कृत्यमाह - **प्रतिमामिति ॥**

प्रतिमां पिण्डिकां पीठं शिलाभिस्तु त्रिजातिभिः ।
स्वरस्थूलत्वभेदेन पुंस्त्र्याद्या जातितः शिलाः ॥ 44 ॥
पुंशिला प्रतिमार्थं तु स्त्रीशिला पीठक्लृप्तये ।

त्रिजातिभिः पुंनपुंसकस्त्रीत्वजातियुक्ताभिः क्रमात्प्रतिमादिकं कुर्यादिति शेषः । पीठाधःस्थितशिला पिण्डिकेत्युच्यते । प्रतिमायाः आधारभूतः उलूखलाकारशिला-विशेषः पिण्डकेत्यप्याहुः । पुंस्त्वादिजातिः केनोपायेन ज्ञेयेत्यत आह - **वरेति ॥** पुंस्त्र्याद्या ज्ञेया इति शेषः । घण्टानिनादवत्स्थूलस्वरा पुंशिला । भिन्नकांस्यध्वनिव-त्सूक्ष्मस्वरा स्त्रीशिला । नादद्वयभिन्नसमस्वरा नपुंसकेति स्वरभेदेन पुंस्त्र्याद्या शिला ज्ञेया इत्यर्थः । तथा चोक्तं विष्णुतीर्थीये -

`पुल्लिङ्गा ब्रुवते नादं कांस्यघण्टानिनादवत् ।
मूले मध्ये तथाग्रे च ज्ञेया सा पुंशिला बुधैः ॥

तदेतल्लक्षणं यत्र मन्दं मन्दं प्रदृश्यते ।
स्त्रीलिङ्गेति स्मृता सा च भिन्नकांस्यध्वनिस्तु या ।
नपुंसकेति साख्याता न यत्रैतद्द्वयं भवेत्' इति ।

स्वराभावे नपुंसकलिङ्गेत्यप्याहुः । कया शिलया किं कार्यमित्यत आह - **पुंशिलेति ॥** स्वीकर्येति शेषः । एवमुत्तरत्रापि । नपुंसकशिला पिण्डिकाक्लृप्तय इत्यर्थात्सिद्धम् ॥44. ॥

3.18 प्रतिमानयनप्रकारः

एवं शिलां परीक्ष्यारण्ये सुस्थले वा कारितायाः प्रतिमायाः गृहानयनप्रकारमाह - वेदेति ॥

वेदमङ्गलघोषेण वाद्यैस्तत्प्रतिमां हरेत् ॥ 45 ॥

हरेत् नयेत् । गृहमिति शेषः ॥45 ॥

3.19 देवालयस्थलतन्निर्माणविचारः

अथ प्रतिमास्थापनाय देवालयः कुत्र कार्य इत्यतः स्थलनियममाह - **प्रागुदक्प्रवण इति** ॥

प्रागुदक्प्रवणे देशे कुर्याद्देवालयं सुधीः ।
समावृतं[1] दक्षिणतः पश्चाद् गिर्यग्र एव वा ॥ 46 ॥

मध्ये वा ग्रामपुरयोर्विशाले सुशुचौ तथा ।
ऐशानीं दिशमेकां तु विनोदकविवर्जिते ॥ 47 ॥

जलाशयस्य मध्ये वा शिलावृक्षवि[क्षादि]वर्जिते ।
स्मशानादिकदेशानां विदूरे सुमनोहरे ॥ 48 ॥

प्राक् उदक्केति द्वन्द्वः । **प्रवणो** निम्नः । प्राक्प्रवणदेशे उदक्प्रवणे वा देशे इति केचित् । **प्रागुदक्प्रवणे** पूर्वभागे ईषदुत्तरदिगभिमुखे, ईशान्याभिमुख इति यावत्,

---

1 `समावृते' इति `रामावृते' इति च टीकाकृत्सूचिते पाठान्तरे ।

देशे स्थले देवालयं कुर्यात् । देवालयं विशिनष्टि - **समावृतमिति ॥** दक्षिणतः पश्चाच्च **समावृतं** कुड्याद्यावरणयुक्तम् । पूर्वद्वारमुत्तरद्वारं वा कुर्यादिति यावत् । समावृत इति सप्तम्यन्तपाठे आरामादिनेति शेषः । `आरामः स्यादुपवनम्' इत्यमरः । **दक्षिणतः** दक्षिणदिग्भागे **पश्चात्** पश्चाद्भागे च आरामादिना समावृतेत्यर्थः । **रामावृत** इति औत्तरीयकोशेषु पाठः । तत्र रमन्ते जना येष्विति रामाः क्रीडास्थानानि । तैरावृत इत्यर्थः । **॥ ग्रामेति ॥** ग्राममध्ये पुरमध्ये वेत्यर्थः । एकामैशानीं दिशं विनाऽन्यासु सप्तसु कुर्यादिति भावः । **केचित्तु** प्रागुदकप्रवण इत्यस्य देवालयं प्राक् पूर्वभागे चेत् कुर्यात् तर्हि उदक्प्रवणे देशे कुर्यादिति योजना । पश्चाच्चेत् दक्षिणतः समोन्नते कुर्यादिति योजनेत्याहुः । तत्र `समोन्नते दक्षिणत' इति पाठो बहुकोशेष्वदर्शनात् कल्पित इति प्रतिभाति । **उदकविवर्जिते** वृष्टिसमये यत्रोदकं न तिष्ठति तत्रेत्यर्थः । शिलावृक्षादिवर्जिते जलाशयस्य मध्ये वा `सर्वतस्तु जले श्रेष्ठ'मिति वचनात् । स्मशानादिदेशानां सकाशाद् **विदूरे** बहुदूरे ॥46-48 ॥

अथ देवालयस्थलपरिमाणमाह - **किष्किति ॥**

किष्कुद्वादशतोऽनूनं कुर्याद् देवालयस्थलम् ।
द्विगुणं चतुर्गुणं वाऽपि शतकिष्कुप्रमाणकम् ॥ 49 ॥

हस्तमात्रं किष्कुः । `किष्कुर्हस्ते वितस्तौ च'[1] `नल्वः किष्कुचतुःशतम्' इति कोशात्[2]। तथा च द्वादशहस्तादन्यूनं द्वादशकरं, **द्विगुणं** चतुर्विंशतिहस्तपरिमाणं, **चतुर्गुणम्** अष्टचत्वारिंशत्करं वा शतहस्तप्रमाणं वा देवालयस्थानं कुर्यादित्यर्थः ॥49 ॥

देवालयार्थं भूशोधनप्रकारमाह - **कृत्वेति ॥**

---

1 अ.को. 3-नानार्थवर्गः-श्लो.162

2 अ.को. 1-भूवर्गः-19

कृत्वा भूशोधनं सम्यक् सार्धपुम्मानतस्त्वधः ।
केशाङ्गारास्थिवल्मीकलोष्टाश्मादिविवर्जिते ॥ 50 ॥

हरिम् तत्रापि सम्पूज्य बलिं दत्वा च पूर्ववत् ।
मृद्दारुशैलैर्लोहैर्वा कुर्याद्देवालयं दृढम् ॥ 51 ॥

सार्धपुरुषप्रमाणतः अधस्तात् सम्यक् भूशोधनं कृत्वा केशादिवर्जितं कुर्यात् । आदिपदेन तुषादि । एवं संशोधितभूम्यां देवालयकरणेऽङ्गभूतपूजामाह - **हरिमिति** ॥ **तत्रापि** देवालयनिर्माणे अल्पेऽपि हरिम् सम्पूज्य बलिदानेनेति शेषः । **पूर्ववत्** पूर्वमन्त्रेण भूतबलिं दत्वा मृदा दारुभिः **शैलैः** शिलाभिः **लोहैः** सुवर्णरजतताम्रैर्वा **दृढम्** अभेद्यं देवालयं कुर्यादित्यर्थः । इदमेव भूशोधनं समन्त्रकमुक्तं पञ्चरात्रे ।

`पूर्वोक्तां भूमिमासाद्य प्रविश्य बलिपूर्वकम् ।
भूमिं प्रदक्षिणां कृत्वा मन्त्रमेनमुदीरयेत् ॥

यक्षा पिशाचा नागाश्च येऽत्र तिष्ठन्ति सर्वदा ।
सर्वे प्रयान्तु तेऽन्यत्र विष्णोः स्थानं करोम्यहम् ॥

ततोऽस्त्रमन्त्रसंसिद्धान् सिद्धार्थान्[1] मन्त्रतः क्षिपेत् ।
ततो भागवताचार्यो हलेन विलिखेद्ध्रुवम् ।
ब्राह्मणो यजमानश्च अनड्वान्[2] गौरवर्णक' इत्यादि ॥ 50,51 ॥

3.20 सिंहावलोकनन्यायेन अङ्गुलिपरिमाणम्

पूर्वं (तं.सा. 3-1) प्रतिमालक्षणकथनावसरे षण्णवत्यङ्गुलामित्याद्युक्तम् । तत्राङ्गुलिपरिमाणानाम् अनुक्तत्वादङ्गुलिपरिमाणमाह - **दीर्घस्थेति** ॥

---

1 अस्यार्थः मूलमातृकायाम् `सर्षपान्' इति लिखितो दृश्यते ।

2 सन्ध्यभावः आर्षत्वेनोपपादनीय इति भाति ।

दीर्घस्थकलमास्तिस्रस्तिर्यगष्टयवोदराः ।
अङ्गुल्या मध्यरेखायाः समा लक्षणतः स्मृताः ॥ 52 ॥

तिस्रः **दीर्घस्थकलमाः** दीर्घाकारेण स्थिताः **कलमाः** व्रीहयः । **तिर्यगष्टयवोदराः ।** वाशब्दोऽध्याहार्यः । तिर्यक्स्थिता अष्टयवानामुदरा वा । **अङ्गुल्या** ज्येष्ठाङ्गुल्याः अङ्गुष्ठस्येति यावत् । मध्यरेखायाः **लक्षणतः** मानतः समाः स्मृता इत्यर्थः । तिर्यक् विहिता अष्टयवोदराः तिस्रो दीर्घस्थकलमाः दीर्घाकारेण स्थिताः धातुविशेषा इति **अन्ये ।** तथा चाङ्गुलिमध्यरेखामादाय षण्णवत्यङ्गुलतादि द्रष्टव्यमिति भावः ॥52 ॥

कस्याङ्गुलिमानेन षण्णवत्यङ्गुलत्वादीनीति जिज्ञासायामाह - **स्वाङ्गुल्या इति ॥**

स्वाङ्गुल्या मध्यरेखा तु प्रतिमादिषु लक्षणम् ।
ह्रस्वमध्योच्चभेदेन तत्तन्मानं समस्तशः ।
प्रादेशहस्तपुरुषमानं सामान्यलक्षणम् ॥ 53 ॥

स्वशब्दः प्रतिमादिपरः । **स्वाङ्गुल्याः** प्रतिमाज्येष्ठाङ्गुल्याः **मध्यरेखा** मध्यरेखाप्रमाणं प्रतिमादिषु । आदिपदात् पीठपिण्डिकादेर्ग्रहणम् । तेषु **लक्षणं** ज्ञापकम् । ननु प्रतिमाङ्गुलिमानं चेत् ग्राह्यं तर्हि द्वादशाङ्गुलापरपर्यायप्रादेशमात्रप्रतिमा ह्रस्वा, चतुर्विंशत्यङ्गुलाख्यारत्यपरपर्यायहस्तपरिमिता मध्यमा, पञ्चहस्तापरपर्यायपुरुषपरिमिता उच्चेति ह्रस्वादिभेदेन प्रतिमायाः अनेकविधत्वात् कुत्र किं मानं ग्राह्यमित्यत आह - **ह्रस्वेति ॥** ह्रस्वमध्योच्चभेदेन स्थितासु **सर्वशः** सर्वप्रतिमासु **तत्तन्मानं** तत्तत्परिमाणलब्धमङ्गुलमानं ग्राह्यमिति शेषः । अयं भावः । ह्रस्वप्रतिमा चेत् तदङ्गुलमानेनैव षण्णवत्यङ्गुलत्वादीत्यादीति । एतेन यजमानाङ्गुल्या मध्यरेखा प्रतिमादिषु

लक्षणमिति **केषाञ्चित्** प्रलापोऽपास्तः। उक्तं चान्यत्र -

`गृहीतप्रतिमायां तु तत्तदङ्गुलिसङ्ख्यया।
विभज्य तेषु भागैकं तदाहुर्लब्धमङ्गुलम् ।
लब्धाङ्गुलेन कुर्वीत प्रतिमावयवं बुध' इति।

ह्रस्वमध्योच्चभेदेनेत्युक्तम् । पुरुषादिमानस्यापि तालादिमानापेक्षया ह्रस्वमानत्वाद्ध्रस्वादि दुर्ज्ञेयमित्यत आह - **प्रादेशेति ॥** प्रादेशमानं ह्रस्वम् । हस्तमानं मध्यम् । पुरुषमानमुच्चमिति मानत्रयं **सामान्यलक्षणं** साधारणलक्षणम् । विशेषलक्षणं तु षण्णवत्यङ्गुलाम् (तं.सा.3-2) इत्यादिनोक्तमिति भावः ॥53 ॥

पूर्वं किष्कुद्वादशेति स्थानपरिमाणस्योक्तत्वादिदानीं देवालयविमानद्वारस्योर्ध्वपरिमाणमाह - **प्रतिमेति ॥**

प्रतिमाध्यर्धकं द्वारमूर्ध्वमर्धं च विस्तृतिः[1]।

द्वारं विमानद्वारम् । ऊर्ध्वं प्रतिमाध्यर्धकम् । सपीठायाः प्रतिमायाः सकाशादर्धाधिकं सार्धप्रतिमामानोच्चमित्यर्थः। विस्तृतिश्च द्वारस्येति शेषः। **अर्धम्** ऊर्ध्वमाने अर्धम् । पादन्यूनप्रतिमामानम् । मध्यं च विस्तृतिरिति पाठे देवालयमण्टपमध्यप्रदेशो **मध्यम्।** **विस्तृतिः** भित्तिविस्तारश्च प्रतिमाध्यर्धकमित्यर्थः।

पीठस्योन्नतिमाह - **प्रतिमार्धेति ॥**

प्रतिमार्धप्रमाणेन पीठस्योच्चत्वमिष्यते ॥ 54 ॥

पीठस्य आसनस्योच्चत्वं प्रतिमार्धप्रमाणेन। पिण्डिकाया ऊर्ध्वपरिमाणमाह - **उन्नतिरित्यादिना द्व्यङ्गुलं वापीत्यन्तेन** ॥54 ॥

---
[1] मध्यं च विस्तृतिरिति गु.दी.सू.पाठान्तरम् ।

उन्नतिः पिण्डिकायास्तु चतुरङ्गुलमानतः ।
त्र्यङ्गुलं द्व्यङ्गुलं वापि .... ।

पिण्डिकायाः पीठाधःशिलायाः उन्नतिः **चतुरङ्गुलमानतः** चतुरङ्गुलमानात् द्व्यङ्गुलं त्र्यङ्गुलं वोन्नतिरित्यर्थः ।

देवालयान्तःस्थगर्भगृहस्य प्रतिमापेक्षयोपर्युन्नतिमाह - **गृहान्तरिति ॥**

.... गृहान्तः प्रतिमासमम् ।
उच्चं पर्यक्क क्रमश उच्चत्वं मध्यतः स्मृतम् ॥ 55 ॥

गर्भगृहान्तः तत्रापि **मध्यतो** मध्यभागे प्रतिमापेक्षयोपरीति शेषः । **प्रतिमासममुच्चं** प्रतिमाप्रमाणेनोच्चमित्यर्थः । **मध्यतः** मध्यप्रदेशापेक्षया **पर्यक्** परितः उच्चत्वं क्रमात् स्मृतमित्यर्थः ॥55 ॥

इदानीं प्रतिमोर्ध्वभागे गृहाद्बहिरुन्नतिपरिमाणमाह - **तावदिति ॥**

तावदुच्चं बहिश्चैव यद्येकशिखरं भवेत् ।
अर्धोच्चमथवाऽपि स्यादधस्तात् प्रतिमोन्नतम् ।
ततो द्विगुणमानं वा सार्धप्रतिममेव वा ॥ 56 ॥

बहिः गर्भगृहादुपरि यदि **एकशिखरम्** अङ्गुलिव्यवधानेन विना शिखरं साक्षाद्विमानसम्बद्धं भवेत्, तर्हि शिखराधारभूतं **तावदुच्चं** प्रतिमासमोच्चमथवा प्रतिमार्धोच्चं स्यादित्यर्थः । ननु यथा बहिर्विकल्पः तथा गृहान्तः प्रतिमोपरि प्रतिमामानं वैकल्पिकं किं नेत्याह - **अधस्तादिति ॥** शिखरादधस्तात् गृहान्तः प्रतिमोपरीति

यावत् । प्रतिमासदृशोन्नतमेवेति योज्यम् । तेन `गृहान्तः प्रतिमासमम्' (तं.सा. 3-55) इत्यनेनेदं पुनरुक्तमिति चोद्यं निरस्तम् । शिखराधारपरिमाणे पक्षद्वयमुक्तम् । पुनरपि पक्षद्वयमाह - **तत इति ॥** प्रतिमात इत्यर्थः ॥56 ॥

एवं शिखरतदाधारयोर्मध्ये गलो व्यवधायको नेति पक्षे शिखराधारपरिमाणमुक्तम् । तयोर्मध्ये गलस्य व्यवधायकत्वेऽपि तस्य तदेव परिमाणमङ्गीकृत्य व्यवधायकगलपरिमाणमाह - **शिखरान्तर इति ॥**

शिखरान्तरे तु प्रतिमामानं तद्गल उच्यते ।
तत्त्रिपादं तदर्धं वा तदध्यर्धमथापि वा ॥ 57 ॥

शिखरस्यान्तरे व्यवधाने सति शिखराधारत्वेन पूर्वोक्ताद्वस्तुनः शिखरस्य गलेन व्यवधाने सतीति यावत् । **तस्य** शिखरस्य **गलः** गलति सङ्कोचयति प्रासादावयवानिति कण्ठसदेशः प्रदेशः प्रतिमापरिमित उच्यते । अस्मिन् पक्षे गलस्यैव साक्षात्शिखराधारत्वम् । पूर्वं साक्षात्शिखराधारत्वेन उक्तस्य तु गलाधारत्वमिति द्रष्टव्यम् । पक्षान्तराण्याह - **तदिति ॥ तत्त्रिपादं** तस्याः प्रतिमायाः त्रिपादपरिमाणं पादोनप्रतिमामानमित्यर्थः । **तदर्धं** प्रतिमार्धम् । **तदध्यर्धं** तस्याः अध्यर्धं सार्धप्रतिमामानमित्यर्थः । अर्धेनाधिकमर्धम् **अध्यर्धम् । तस्य** प्रतिमार्धस्याध्यर्धं सार्धपादमिति वा[1] ॥57 ॥

गलोपरिभागे पूर्वादिदिक्षु निर्मातव्यवस्तुद्वयमाह - **वर्तुलमिति ॥**

वर्तुलं पद्मसदृशं हस्तिपृष्ठसमं तथा ।
चतुरस्रं चाष्टकोणं विमानं परिकीर्तितम् ॥ 58 ॥

---
1 सार्धपादशब्दार्थः `अर्धाधिकैकपादे'ति मूलमातृकायां प्रा.पाठे च पार्श्वे लिखितः ।

प्रतिमाया दशगुणं विंशद्गुणमथापि वा।
वर्तुलं शिखरं त्वेकं किरीटाकृतिमद्भवेत् ॥ 59 ॥

वर्तुलाकारं पत्रसदृशं वस्तु निर्मातव्यम् । तथा **हस्तिपृष्ठसमं** गजपृष्ठाकारं वस्तु निर्मातव्यमित्यर्थः। विमानस्य वर्तुलत्वभ्रान्तिं परिहरन् विस्तृतिमात्रमाह - **चतुरस्रमिति ॥ चतुरस्रं** चतुष्कोणमष्टकोणं वा विमानं, गर्भगृहं प्रतिमायाः दशगुणमानमथवा विंशद्गुणमानं प्रकीर्तितम् । अत्र **केचित् ।** वर्तुलाकारं पद्मसदृशं हस्तिपृष्ठसदृशं विमानमिति विमानविशेषणान्येव ।

`गवाक्षजालसंयुक्तो विमानश्च प्रकीर्तितः ।
वर्तुलः पद्मकश्चैव विंशद्धस्त उदाहृतः ।
इभराण्मृगराजाख्यौ हस्तद्वादशकौ स्मृतौ' इति हयशीर्षवचनात् इत्याहुः ।

प्रासादादिगतानेकशिखरेषु प्रधानशिखरपरिमाणमाह - **वर्तुलमिति ॥** एकं प्रधानं शिखरं किरीटाकृतिमत् वर्तुलं च भवेत् । शिखरे विशेषस्तु शेखरे -

`शिखरं कारयेद्धीमान् घण्टाकारसमाकृतिम् ।
शिखरस्याग्रभागे तु सिंहं तत्र च कारयेत् ॥
महावाराहमैन्द्र्यां तु नारसिंहं तु दक्षिणे ।
प्रतीच्यां श्रीधरं चैवमुदीच्यां हयशीर्षकम् ॥
आग्नेय्यां जामदग्न्यं च नैरृते राममेव च ।
वायवीये योगनिद्रामीशे योगासनं भवेत्' इति ॥58,59 ॥

विमानस्य पुरतः सभा कार्या । सा चैका वा द्विसङ्ख्याका वा त्रिसङ्ख्याका वा । तत्राद्या सभा विमानसम्बद्धा वा कार्येत्याह - **सभयेति ॥**

सभयाऽपि समेतं वा पृथक्सभमथाऽपि वा ।
द्विसभं त्रिसभं वाऽपि सगोपुरमथाऽपि वा ॥ 60 ॥

विमानमित्यनुवर्तते । यत्रावस्थिताः सन्तो लोकाः प्रतिमामवलोकयन्ते सा सभा अत्रोच्यते । तया **समेतं** संयुक्तम् । **पृथक्** असम्बद्धा सभा यस्य तत्पृथक्सभम् । मन्दिरासम्बद्धसभोपेतमित्यर्थः । त्रिसभमित्येतत् एकस्याः अग्रे अन्या तदग्रतोऽपरेति ज्ञेयम् । गोपुरेण सहितं **सगोपुरम्** । अथाऽपि वेति निपातसमुदायोऽनुक्तपक्षान्तरार्थः । गोपुररहितं वेति । **केचित्** सभयाऽभिसमेतं[1] नैवेद्यमण्टपयुतम् । **पृथक्सभं** नैवेद्यसभातिरिक्तसभा पुरुषसूक्तमण्टपस्तद्युक्तम् । तत्पुरतो द्विसभं गरुडमण्टपः । त्रिसभं वाहनमण्टपः । तत्पुरतः प्राकारयुक्तं सप्तप्राकारयुक्तं वेत्यर्थ इति व्याचक्षते ॥60 ॥

प्राकारमाह - **प्राकारेति** ॥

प्राकारवृत्तयुक्तं वा सप्तप्राकरमेव वा ।
समवृत्तं[2] किष्कुमात्रं बहिर्वा चतुरस्रकम् ॥ 61 ॥

वृत्तेति पूर्वं योज्यम् । परनिपातश्छान्दसः । कडारादिगणस्थत्वाद्वा[3]। **वृत्तो** वर्तुलो यः प्राकारस्तेन युक्तम् । वाशब्दाच्चतुरस्रप्राकारम् । सप्तप्राकारमेव वा । उत्तमे सप्तप्राकारयुक्तमेव । वाशब्देन प्राकारत्रयपक्षादेः सङ्ग्रहः । ॥ **समेति** ॥ **बहिः** विमानात् परितः **किष्कुमात्रं** हस्तमात्रं द्विचत्वारिंशदङ्गुलपरिमितं वा समवृत्तं वा ।

1 मूले सभयाऽपि इति अपिशब्दः दृश्यते । अत्र तु अभिशब्दः । मूलमातृकायामपि अभिशब्द एव दृश्यते । उल्लिख्यमानपक्षे तथा पाठः स्यात् ।

2 सद्म वृत्तमिति गु.दी.सू.पाठान्तरम् ।

3 `कडाराः कर्मधारये' इति 2-2-38तमे पाणिनिसूत्रे कडारादिगणे पठितानां शब्दानां विशेषणवाचकत्वेऽपि परनिपातः विहितः । अन्यथा `विशेषणं विशेष्येण बहुलम्' इति 2-1-57तमेन सूत्रेण पूर्वनिपातः स्यादिति भावः ।

चतुरस्रकं वा कार्यमित्यर्थः । `किष्कुः स्मृतो द्विरत्निस्तु द्विचत्वारिंशदङ्गुल' इत्यादित्यपुराणात् । सद्मवृत्तमिति पाठे सद्मभिर्युक्तं वृत्तं चेत्यर्थः[1] ॥61 ॥

देवमन्दिरस्य सभायाश्च व्यवधानाभावपक्षे किष्कुमात्रमित्युक्तम् । पृथक्सभमित्युक्तव्यवधानपक्षे त्वाह - ततः परमिति ॥

ततः परं किष्कुमात्रं सभाया अन्तरं यदि ।
ततस्तावत् तृतीयायाः सार्धमेव ह्युदाहृतम् ॥ 62 ॥

सभायाः विमानस्यान्तरं यदि तर्हि ततः किष्कुमात्रप्रदेशात् परं परतः किष्कुमात्रं कार्यम् । व्यवधानपक्षे किष्कुद्वयं कार्यमित्यर्थः । आद्यसभायाः विमानाद्व्यवधानपक्षे द्वितीयतृतीययोः स्वस्वपूर्वापेक्षया व्यवधानं कार्यम् । तत्र द्वितीयायाः प्रथमापेक्षया तृतीयायाः द्वितीयापेक्षया कियद्व्यवधानमित्यपेक्षायामाह - ततस्तावदिति ॥ ततः तदनन्तरसभायाः द्वितीयाया इति यावत् । तावत् किष्कुद्वयव्यवधानं कार्यमित्यर्थः । तृतीयायाः सभायाः स्वपूर्वापेक्षया सार्धं तावदेव किष्कुद्वयमेव व्यवधानमुदाहृतम् । किष्कुत्रयव्यवधानं कार्यमिति भावः । अन्ये तु - ततः देवमन्दिरात् परं प्रथमसभायाः किष्कुमात्रमन्तरं भवति । ततः प्रथमतः द्वितीयायाः तावत् किष्कुमात्रम् । तृतीयायाः सार्धमेव किष्कुप्रमाणमन्तरमुदाहृतमित्यर्थः - इत्याहुः ॥62 ॥

विमानापेक्षया पूर्वादिदिक्षु शक्राद्यालयः कार्यः । तत्परिमाणमाह - किष्कुत्रयमिति ॥

किष्कुत्रयं च शक्रादेः स्थानं तद्वृत्ततः स्मृतम् ।
ततस्तु मण्डपं कुर्यात् प्रतिष्ठायाः सुलक्षणम् ॥ 63 ॥

---

[1] तथा च मध्यमपदलोपी कर्मधारयसमासः, शाकपार्थिवादिगणस्य आकृतिगणत्वादिति भावः ।

शक्रादेस्तत्स्थानं **वृत्ततो** वृत्तं किष्कुत्रयं च स्मृतमित्यर्थः। एवं देवालयनिर्माणप्रकारं समभिधाय प्रतिष्ठाप्रकारमभिधातुं प्रतिष्ठामण्टपनिर्माणमाह - **तत इति** ॥63 ॥

3.21 वास्तुपुरुषोपरि देवतापूजा

प्रतिष्ठाया अर्थे प्रतिष्ठामण्टपान्तर्वास्तुपुरुषोपरि देवतापूजामाह - **पूजयेदिति ॥**

पूजयेद्वास्तुपुरुषस्योपरिस्थांस्तु सर्वदा।
देवान् ब्रह्मादिकान् ....।

मण्टपाधः वास्तुपुरुषः। तस्योपरिस्थान् **ब्रह्मादिकान् देवान्** ब्रह्माणमारभ्य बुधान्तान् वक्ष्यमाणान् एकोनपञ्चाशद्देवान् वक्ष्यमाणचतुष्षष्टिस्थानेषु पूजयेत्। तुशब्दाद्वास्तुपुरुषमपि। सर्वदेत्युक्त्या न प्रतिष्ठाकाल एव, अपि तु भूपरिग्रहवास्तुकरणगृहप्रवेशमण्टपकूपतटाकग्रामप्रतिष्ठादावपि पूजयेदिति सूचयति। तदुक्तं मात्स्ये -

`प्रासादभवनोद्यानप्रारम्भे गेहवेशने।
द्वाराभिवर्तने तद्वत् प्रासादपरिवर्तने॥
पुरवेश्मप्रवेशे च सर्वदोषोपशान्तये।
वास्तूपशमनं कृत्वा ततः सूत्रेण वेष्टयेत्' इति।

तस्य स्वरूपमाह - **वास्तुरिति ॥**

.... वास्तुर्वराहस्य हरेः सुतः।
पातितो दैवतैर्भूमौ चतुरस्राकृतिः स्थितः॥ 64 ॥

वास्तुः वास्तुनामको देवो हरेः वराहस्य सुतो दैवतैः पातितो भूमौ चतुरस्राकृतिः स्थितः। वराहस्य सुत इत्यनेन -

`कश्यपस्य गृहिणी नु सिंहिका राहुवास्तुतनयावजीजनत्।
पूर्वजो हरिनिकृन्तकन्धरो, दैवतैरवरजो निपातितः'

इति पदार्थादर्शादिग्रन्थान्तरोक्ता, [1] `शक्रक्रोधात् समुत्पन्नो वास्तुर्यज्ञापहारक' इति शैवागमे चोक्तोत्पत्तिर्नेति सूचयति।

अस्य विस्तृतिवर्णादयः पञ्चरात्रे -

`पूर्वमासीन्महानुग्रः सर्वभूतभयङ्करः।
स देवैर्निहितो भूमौ स वास्तुपुरुषः स्मृतः॥
यावद्भूमिः स्थिरा लोके तावद्वास्त्वसुरः स्मृतः।
संहारे तु लयं याति देवैः सर्वग्रहादिभिः॥
विस्तारोऽस्य समन्ताच्च शतकोटिसुयोजनः।
संस्थितोऽसौ धरां व्याप्य प्रोन्नतः कृष्णवर्णक' इति ॥64॥

वास्तुपुरुषस्योपरि ब्रह्मादिकान् पूजयेदित्युक्तम्। तत्प्रकारं विवरितुं चतुष्षष्टिस्थानयुक्तं वास्तुमण्डलस्थलमाह[2] ॥ कृत्वेति ॥

कृत्वाऽष्टकाष्टकोष्ठानि मध्ये ब्रह्मा चतुष्टये।
पूज्यो द्वयेद्वये शक्रो यमो वरुण एव च।

---

1 उत्पत्तिर्नेत्यग्रिमेणान्वयः।

2 मण्डलपदमङ्कयित्वा मूलमातृकायां शरीरेति पार्श्वे लिखितम्।

सोमश्च पूज्याः कोणेषु वह्न्याद्याः कोणदेवताः ॥ 65 ॥

पुनस्त्रयेत्रये कामं धातारं सविधातृकम् ।
स्कन्दं च पूजयेत् कोणे सूर्यं चैव विनायकम् ।
कालं कुबेरं च बहिः प्रत्येकं दिक्षु पूजयेत् ॥ 66 ॥

[1] अष्टानां समूहः **अष्टकम् ।** अष्टकेन युक्तानि अष्टकोष्ठानि चतुष्षष्टिमन्दिराणीति यावत् । तत्र मध्ये प्रथमावरणे कोष्ठचतुष्टयम् । द्वितीयावरणे पूर्वादिदिक्षु द्वे द्वे कोणेष्वेकमेकमिति कोष्ठद्वादशकम् । तृतीयावरणे चतुर्दिक्षु त्रीणि त्रीणि कोष्ठानि कोणेष्वेकैकमिति षोडश कोष्ठानि। चतुर्थावरणे एकैकस्यां दिशि कोणस्थेन सहाष्टसङ्ख्याकानि कोष्ठानि वर्तन्ते[2] एवं चतुर्दिक्षु मिलित्वा द्वात्रिंशत्कोष्ठानीति चतुष्षष्टिकोष्ठान्यभिप्रेत्य तेषु देवता आह - **मध्य इति ॥** मध्ये कोष्ठचतुष्टये ब्रह्मा पूज्यः । बहिर्दिक्ष्विति वक्ष्यमाणपदद्वयमत्र सर्वत्राऽकृष्यते । तथा चेयं योजना - तद्बहिः पूर्वादिदिक्षु द्वयेद्वये शक्राद्याः चत्वारः पूज्याः । शक्रो द्वये यमो द्वये वरुणो द्वये सोमश्च द्वय इति । **वह्न्याद्याः** वह्निनिरृतिवाय्वीशानाः कोणदेवताः कोणेषु पूज्याः । पुनर्वह्निस्तृतीयावरणे पूर्वादिदिक्षु त्रये त्रये कोष्ठे कामादीन् पूजयेत् । कोणचतुष्टये सूर्यादिचतुरः पूजयेत् । **बहिः** तृतीयावरणाद्बहिः चतुर्थावरणे **दिक्षु** पूर्वादिदिक्षु वक्ष्यमाणान् प्रत्येकं पूजयेत् ॥65,66 ॥

एकैकस्यां दिशि सप्तकोणेष्वेकैकमित्यष्टकोष्ठान्यभिप्रेत्याष्ट देवता आह - **हरिमिति ॥**

---

1 एतत्प्रघट्टकादौ - नवसङ्ख्याकाः दीर्घरेखाः कृत्वा तत्रैव पुनर्नवसङ्ख्याकाः अर्वाचीनाः रेखाः क्रियन्ते चेत् चतुष्षष्टिकोष्ठानि भवन्तीति **केचित् ।** वस्तुतस्तु - इति मूलमातृकायामदृष्टो भागः अन्यत्र दृश्यते ।

2 मूलमातृकायामधः - कोष्ठशब्देन रेखान्तर्गृहा उच्यन्ते । गोपीचन्दनादिना ..... - इति अग्रे पठितुमशक्यं किञ्चिद्दृश्यते ।

हारिम् हरिम् गभीरं च गाहनं गहनं शुभम् ।[1]
त्रातमङ्गारकं चैव पूर्वस्यां दिशि पूजयेत् ॥ 67 ॥[2]

दारणं विदरिम् दूतं प्रद्योतं द्योतनं दरिम् ।[3]
मृत्युं शनैश्चरं चैव दक्षिणस्यां प्रपूजयेत् ॥ 68 ॥

पुष्करं क्षरणं क्षारिम् विक्षरं क्षोभणं क्षरम् ।[4]
चार्वङ्गं भार्गवं चैव पश्चिमस्यां प्रपूजयेत् ॥ 69 ॥

चारं विचारं प्रचरं सञ्चरं चारणं चरम् ।[5]
बृहस्पतिं बुधं चैवाप्युत्तरस्यां प्रपूजयेत् ॥ 70 ॥

हर्यादीन्सप्त दिक्स्थेषु सप्तकोणेषु अष्टमानङ्गारादीन् कोणगताष्टमकोणेषु पूजयेदिति विवेकः । वास्तुदेहस्थितानां देवानां ध्यानं तन्त्रे -

`सर्वे चतुर्भुजा देवा वास्तुदेहे व्यवस्थिताः ।
कृताञ्जलिपुटाः सर्वे खड्गखेटकपाणयः ।
ब्रह्माणं संनिरीक्षन्ते तद्वक्राभिमुखाश्च ते' इति ॥67-70 ॥

इदानीं मण्टपादावुक्तं वास्तुपूजनमन्यत्राप्यतिदिशति - **एवमिति ॥**

---

1 इतः चतुर्षु श्लोकेषु टीकाकृत्सम्मतपाठस्य निर्धारणं कर्तुं न शक्यते । अतः स्थलचतुष्टये प्रचलितपाठद्वयमपि दत्तम् । प्रकृते पाठान्तरम् - `हरिम् [हारं] हरं गभीरं च गाहनं गेहनं शुभम्' ।

2 पाठान्तरम् - `भानु[भात]मङ्गारकं चैव पूर्वस्यां दिशि पूजयेत् ।' ।

3 पाठान्तरम् - `दारुणं विदरिम् द्योतं प्रद्योतं द्योतनं हरिम् ।

4 पाठान्तरम् - `पुष्करं क्षरणं क्षारं विक्षरं क्षोभणं क्षरम् ।'

5 पाठान्तरम् - `चारं विचारं प्रचरं सञ्चारं चारणं चरम् ।'

एवमेव विमानस्य कृतेः प्रागपि पूजयेत् ।

विमानं देवमन्दिरं रथो वा तत्करणात् **प्रागपि** पूर्वं पश्चाच्च **एवमेव** शोधितभूप्रदेशे चतुःषष्टिमन्दिराणि कृत्वा ब्रह्मादीन् पूजयेन्न त्वन्यागमोक्तप्रकारेणेत्यर्थः ।

मण्टपकरणप्रकारमाह - **सप्तपर्णमयमिति ॥**

सप्तपर्णमयं साधु कारयेन्मण्डपं ततः ॥ 71 ॥

ततः वास्तुपूजानन्तरं 'सप्तपर्णो विशालत्वक्क्षारदो विषमच्छद' इत्यभिधानात् कदलीवृक्षस्तम्भप्रचुरम् । भूर्जावृक्षमयं वा। **ततः** वास्तूपरि। **सप्तपर्णमयं** यष्टिकसप्तकमयं[1] मण्टपमिति **केचित्** । सप्तपर्णो वृक्षविशेषः । तत्काष्ठप्रचुरमिति **अन्ये** ॥71 ॥

तत्परिमाणमाह - **सप्तहस्तमिति ॥**

सप्तहस्तं द्विषड्ढस्तमथवा द्विगुणं ततः ।
चतुर्गुणं वा सम्यक् तु चतुरस्रं सहाजिरम् ॥ 72 ॥

द्विगुणं चतुर्विंशतिहस्तम् । **चतुर्गुणम्** अष्टचत्वारिंशद्धस्तम् **अजिरेण**[2] बहिर्भूम्या सहितं सहाजिरम् ॥72 ॥

अथ अङ्कुरार्पणं विवक्षुः आदौ तदुपयुक्तं मण्टपान्तरमाह - **अन्यच्चेति ॥**

अन्यच्च मण्टपं दीर्घं पञ्चहस्तं च करयेत् ।

त्रिचतुष्कोष्ठकं तत्र मध्ये प्रागायतं शुभम् ॥ 73 ॥

---

1 प्रा.पाठे तु सप्तपर्णमयम् इष्टकासप्तकमयम् इति दृश्यते ।

2 अजिरशब्दार्थः अङ्गणेति प्रा.पाठे पार्श्वे लिखितः ।

कारयेन्मण्डलं साधु हस्तमात्रं सुविस्तृतम् ।
तत्र द्वादशपात्राणि स्थापयेत्[1] पालिकादिकम् ॥ 74 ॥

दीर्घं पञ्चहस्तं च पञ्चहस्तदीर्घहस्तं चेत्यर्थः। **तत्र मध्ये** तन्मध्ये **प्रागायतं** पूर्वपश्चिमविस्तीर्णम् । **त्रिचतुष्कोष्ठकं** त्रिषु स्थानेषु चतुष्कोष्ठकानि यस्मिन् । एवं द्वादशकोष्ठम् । मध्ये वीथ्या च युतम् । **शुभं** रङ्गैः पूरितम् । **साधु** वक्रत्वादिदोषशून्यं मण्डलं कारयेत् । तत्र कोष्ठानां परिमाणमाह - **हस्तेति ॥ हस्तमात्रं** हस्तप्रमाणम् । **सुविस्तृतं** चतुरस्रत्वेन विस्तृतम् । **तत्र** द्वादशकोष्ठेषु मण्टपे वा **पालिकादिकं** पालिकादिकानि द्वादश पात्राणि स्थापयेत् । आदिपदेन पञ्चमुखनामकं[2] शरावपात्रग्रहणम् । यद्वा हस्तमात्रमित्यादि मण्डलस्यैव विशेषणम् । **तत्र** मन्डले। कारयेत्पालिकादिकमिति पाठे त्वयमर्थः - द्वादशपात्राणि स्थापनीयानीति शेषः। तानि पात्राणि प्रागेव कारयेदिति। तेषां नामकथनपूर्वकमाह - **कारयेदिति ॥** पालिकैवादिः[3] पञ्चमुखादेर्यस्य स पालिकादिस्तं प्रागेव कारयेदित्यर्थः। यद्वा कारयेदित्यतः पूर्वं स्थापितानीति शेषः। ऋत्विग्भिः स्थापयेदिति यावत् । स्वार्थिको वा णिच् ॥73,74 ॥

द्वादशपात्रपरिमाणमाह - **पालिका इति ॥**

पालिकास्तु चतुर्विंशत्यङ्गुलोच्छ्रयसंयुताः ।
अष्टादशाङ्गुलाश्चैव तथा पञ्चमुखा अपि ।

---

1 कारयेदिति गु.दी.सू.पाठान्तरम् ।

2 प्रा.पाठे पञ्चमुखशब्दस्य `मुचणिकि' इति कन्नडभाषाशब्दः पार्श्वे लिखितः। अयं च शब्दः अद्यापि कर्णाटकानामुत्तरभागे `धारवाडकन्नडे'ति प्रथितायां भाषायां समुपयुज्यते ।

3 प्रा.पाठे आदिशब्दं चिह्नयित्वा पार्श्वे `आद्या' इति लिखितम् । वि.पाठेऽदर्शनात् लिपिकृता स्वयं लिखितं तत् ।

द्वादशाङ्गुलकाश्चैव शरावाः पश्चिमानुगाः ॥ 75 ॥

तत्र विष्णुं चतुर्मूर्तिं पूजयेद्भक्तितस्त्रिशः ।
सप्तधान्यानि तेष्वेव पूरयेदङ्कुरार्थतः ॥ 76 ॥

विस्तृतमुखाः सप्तधान्याङ्कुरार्थं पात्रविशेषाः **पालिकाः** । [1] ताश्चतस्र इति द्रष्टव्यम् । चतुर्विंशत्यङ्गुलोच्छ्रिताः पञ्चमुखाः कुम्भाः । अष्टादशाङ्गुलोच्छ्रयाः तेऽपि चत्वारः । शरावाश्चत्वारो द्वादशाङ्गुलोच्छ्रया इत्यर्थः । पश्चिमानुगा इति पश्चिमपार्श्वस्थपृष्ठभागा इत्यर्थः । पृष्ठभागे किञ्चित्त्रिकोणोपेता इति **केचित्** । अयं भावः । पालिकाचतुष्टयं पञ्चमुखचतुष्टयं शरावचतुष्टयं चेति द्वादशपात्राणि द्वादशकोष्ठेषु निक्षिपेदिति ॥

तत्र तेषु पात्रेषु द्वादशकोष्ठे मण्डले च चतुर्मूर्तिमनिरुद्धप्रद्युम्नसङ्कर्षणवासुदेवरूपिणं विष्णुं **त्रिशो** वारत्रयं पूजयेत् । तेन द्वादशमूर्तयो भवन्ति। **तेष्वेव** विष्णुपूजार्थं कृतेष्वेव पात्रेषु सप्तधान्यानि मुद्गाढकयवनिष्पावाः सर्षपमाषप्रियङ्गुका इति सप्तधान्यानि।

`यवाश्च व्रीहयश्चैव निष्पावाश्च प्रियङ्गवः ।
तिलाश्च माषाश्च तथा नीवारा शालयस्तथा'

इति पाद्मसंहितोक्तानि सप्तधान्यानि वा।

अङ्कुरार्पणस्य कालविशेषमाह पराशरः -

`उत्तरायणकाले तु शुक्लपक्षे विधीयते ।
स्थापनं देवदेवस्य स्वगृहालययोरपि ॥

राष्ट्रिय संस्कृत संस्थान ग्रन्थालय 23655 जयपुर

---

1 पालिकाशब्दार्थः प्रा.पाठे पार्श्वे `यशमञ्चकीत्यपभ्रष्टभाषा' इति ।

प्रतिष्ठादिवसात्पूर्वं पञ्चमे सप्तमेऽपि वा ।
स्वसूत्रोक्तविधानेन कारयेदङ्कुरार्पणम् ।
पूर्वमेव प्रतिष्ठायां सायाह्ने नियतः शुचिः' इति ॥75 ॥

3.22 प्रतिष्ठाङ्गबलिः

इदानीं बलिमाह - **तत्रेति** ॥

तत्र नित्यं बलिं दद्यात् विष्णवे दशरात्रकम् ।
ब्रह्मशङ्करगीर्वाणपितृगन्धर्वयक्षकैः ।
भूतैश्च पायसेनैव तदा पद्माक्षतेन च ॥ 77 ॥

अन्नापूपेन पुष्पान्नैरन्नलाजाक्षतैरपि ।
सक्तुभिश्च क्रमेणैव देवान्तं पायसेन वा ॥ 78 ॥

पालिकादिपात्राणां समीपे । ब्रह्मशङ्करगीर्वाणपितृगन्धर्वयक्षकैः भूतैश्चेति तृतीया चतुर्थ्यर्था । तेभ्यश्च दशरात्रकं नित्यं बलि दद्यात् । गीर्वाणशब्देन देवसमुदायो गृह्यते । तत्र द्रव्यमाह - **पायसेनेति** ॥ पायसेनैव विष्णवे । ब्रह्मशङ्करगीर्वाणेभ्यः **पद्माक्षतेन** पद्मसहितेनाक्षतेन। **अन्नापूपेन** अन्नसहितेनापूपेन पितृभ्यः। **पुष्पान्नैः** पुष्पसहितान्नैः गन्धर्वेभ्यः। **अन्नलाजाक्षतैः** अन्नैर्लाजैरक्षतैश्च यक्षेभ्यः। सक्तुभिः भूतेभ्य इति क्रमेण विष्ण्वादीनां बलिं दद्यादित्यर्थः। पक्षान्तरमाह - **देवान्तमिति** ॥ विष्णुब्रह्मरुद्रदेवेभ्यः पायसेन, पित्रादिभ्यः द्रव्यैरिति ॥76-78 ॥

3.23 प्रतिमाधिवासः

अथ प्रतिमाधिवासमाह - **तत्रैवेति** ॥

तत्रैव प्रतिमायाश्च कारयेदधिवासनम् ।
पञ्चगव्ये सप्तरात्रं क्षिप्त्वा पुरुषसूक्ततः ॥ 79 ॥

यदा पालिकादिस्थापनमङ्कुरार्पणं च तस्मिन् समय एव बलिदानानन्तरमेव वा पञ्चगव्ये प्रतिमां पुरुषसूक्ततः क्षिप्त्वा प्रतिमायाः सप्तरात्रं पञ्चगव्येऽधिवासनं कारयेदित्यर्थः । अत्र मृज्जलधान्याधिवासनं च ग्राह्यम् । तथा हि पञ्चरात्रे -

'अर्चां संस्थाप्य मृद्धान्यसलिलेष्वधिवासयेत्' इति ॥ 79 ॥

3.24 वेदादिपारायणम्

तेषु सप्तदिनेषु ऋगादिवेदजापकानाह - **वेदेति** ॥

वेदांश्च चतुरः सम्यक् पारयेयुर्द्विजोत्तमाः ।
प्राच्यादिद्वारगौ द्वौद्वावेकैकं तु दशावराः ।
यथालब्धं यथावित्तमथवा विष्णुतत्पराः ॥ 80 ॥

द्विजोत्तमाश्चतुरो वेदान् सम्यक् **पारयेयुः** पारायणं कुर्युः । पारायणकर्तारः कति? कुत्र च परायणं कार्यमित्यपेक्षायामाह - **प्राच्यादीति ॥** प्राच्यादिद्वारगौ द्वौ द्वौ जापकौ एकैकं पारयेयुरित्यर्थः । एवमष्टौ जापकाः षोडश ऋत्विजः आचार्यश्चेति पञ्चविंशतिद्विजोत्तमाः मुख्यकल्पे भवेयुरिति द्रष्टव्यम् । **॥दशेति ॥** अवरपक्षे दशकात् न्यूनत्वं न सम्पाद्यमिति भावः । विष्णुपरा इति वक्ष्यमाणमत्राकृष्यते । विष्णुपरा दशावरा द्विजोत्तमा इत्यर्थः । दशकपक्षे चत्वारो वेदपाठकाः चत्वारो होत्रादयः ऋत्विजः ऐशान्यां मण्टपमध्ये पुरुषसूक्तजापी एकः, आग्नेय्यां मन्त्रजापी चैकः इति दश भवेयुरिति द्रष्टव्यम् । तदुक्तं पञ्चरात्रे -

`आचार्यः स्थापयेद्विद्वान् मन्त्रज्ञांस्तत्र मण्टपे ।
चतुरो ब्राह्मणान् होतॄन् ऋत्विजो जापकांस्तथा ।
रक्षकांश्च चतुर्द्वारि आग्नेय्यां[1] मन्त्रजापिनम् ।
ऐशान्यां पुरुषसूक्तस्य जापकं मण्टपान्तरे' इति ।

ननु ब्राह्मणदशकस्याप्यलाभे कथमित्यत आह - **यथालब्धमिति ॥** अथवा यथालब्धमिति सम्बन्धः । ननु बहूनां लाभे दक्षिणावकाशे कथमित्यत आह - **यथावित्तमिति ॥** विष्णुपरा इति द्विजोत्तमा भवेयुरित्यनुवर्तते । बहव इति शेषः । अयं भावः । दशकपक्षे एकैकस्मिन् द्वारि एकैक इति नियमः । बहुब्राह्मणलाभे वित्ते च सति एकैकद्वारि बहवो द्विजोत्तमा कार्या भवेयुरिति ।

`कृत्वा वेदिं च तन्मध्ये नवहस्तप्रमाणतः ।
अष्टहस्तेन वा कुर्यात् सप्तहस्तेन वा पुनः ।
द्विहस्ताध्यर्धहस्ता वा वेदिका ह्यतिशोभना' इति ॥ 80 ॥

प्रमाणान्तरे वेदिकायास्तत्प्रमाणस्य च सिद्धत्वादथ मण्टपे कुण्डनिवेशमाह - **त्रयोदशेति ॥**

त्रयोदशात्र कुण्डानि परितः कारयेद्बुधः ।
उक्तलक्षणयुक्तानि प्रधानं त्वग्निकोणके ।
साक्षात्तु कोणकाद्धस्तमात्रमन्तरतः सुधीः ॥ 81 ॥

अत्र मण्टपे परित इति दिक्षु द्वेद्वे विदिक्षु चैकैकं प्रधानं चेति त्रयोदश कुण्डानि कारयेत् । **उक्तलक्षणयुक्तानि** द्वितीयेऽध्याये उक्तमेखलाकण्ठनाभ्यादियुक्तानि ।

1 पाठद्वयेऽपि आग्नेयामित्यस्ति । तच्चिन्त्यम् ।

`अष्टस्वाशासु कुण्डानि चतुरस्राणि कारयेत् ।
हस्तमात्राणि सर्वाणि दीक्षासु स्थापनादिषु' इति

प्रमाणान्तरोक्तचतुरस्रत्वहस्तपरिमितत्वादिलक्षणयुक्तानि वा। प्रधानकुण्डस्य ग्रन्थान्तरेऽन्यथोक्तत्वात् प्रधानं कुत्र कार्यमित्यत आह - **प्रधानमिति ॥ अग्निकोणके** पूर्वदक्षिणयोरन्तराले प्रधानकुण्डं भवति। प्राधान्यं तु बहुहोमाधिकरणत्वेनेति ज्ञातव्यम् । ननु कोणके एकं कुण्डमस्ति। इदं प्रधानं च। तत्र कथं कार्यमित्यत आह - **साक्षादिति ॥ साक्षाद्** अग्निकोणगात्कुण्डाद्धस्तमात्रव्यवधानतोऽग्निकोण एव प्रधानं कारयेदित्यर्थः। यद्वा प्रधानकुण्डादितरकुण्डानामन्तरमाह - **साक्षादिति ॥** `साक्षात्प्रत्यक्षमुख्ययोः' इत्यभिधानात् साक्षात् प्रधानकुण्डात्प्राच्यादिकुण्डानां हस्तमात्रमन्तरं यथा भवति तथा कारयेदिति ॥81 ॥

कुण्डकथनप्रसङ्गाद्धोममाह - **आज्याहुतिमिति ॥**

आज्याहुतिं तेषु कुर्यात् प्रत्येकं लक्षसङ्ख्यकम् ।
प्रत्येकमयुतं वाऽपि प्रधाने लक्षसङ्ख्यकम् ।
अर्धं तदर्धमथवा मूलमन्त्रेण मन्त्रवित् ॥ 82 ॥
पञ्चविंशतितत्वार्थे प्रधाने जुहुयात् पुरः[1]।

तेषु त्रयोदशकुण्डेषु मूलमन्त्रेणेति वक्ष्यमाणम् (तं.सा.3-82) अत्र सम्बध्यते। आज्याहुतिं प्रत्येकं लक्षसङ्ख्यकम् अयुतं वा कुर्यादिति वदता `परमान्नतिलव्रीहिसमिद्भिस्तु यथाक्रमम्' इति स्मृत्यन्तरोक्तं समिधन्नादिकं नेत्युक्तं भवति। यदाऽन्यकुण्डेऽयुतहोमकरणं तदा लक्षमेव प्रधानकुण्डे जुहुयादित्याह - **प्रधाने इति ॥**

1 पुनरिति गु.दी.सू.पाठान्तरम् ।

लक्षसङ्ख्यकमिति क्रियाविशेषणम् । प्रधानकुण्डे होमे पक्षान्तरमाह - **अर्धमिति ॥** **अर्धं** लक्षार्धं पञ्चाशत्सहस्राणि । **तदर्धं** पञ्चविंशत्सहस्राणि । मूलमन्त्रेणाज्याहुतिं कुर्यात् । मन्त्रविदित्यधिकारिविशेषणेन ऋष्यादिज्ञानपूर्वकं होमः कार्य इति सूचयति । `यो ह वा' इत्यारभ्य `तस्मादेतानि मन्त्रे विन्द्यात्' इति श्रुतेः[1]। **प्रधाने** मुख्यकुण्डे **पञ्चविंशतितत्वार्थे,**

`पुरुषोऽव्यक्तं च महानहङ्कारो मनस्तथा ।

दशेन्द्रियाणि शब्दाद्या भूतेताः पञ्चविंशतिः' इति

वक्ष्यमाण (तं.सा.3-128) पञ्चविंशतितत्वदेवताप्रीत्यर्थं जुहुयात् । **पुरः** पुरतः इतरकुण्डेषु तत्वमन्त्रहोमात् पुरत इति भावः । पुनरिति पाठे प्रधानहोमापेक्षया पुनरिति ॥82. ॥

एकैकत्र होमसङ्ख्यामाह - **प्रत्येकमिति ॥**

प्रत्येकं तु सहस्रं वा प्रत्येकं शतमेव वा ।

शतं पुरुषसूक्तेन गायत्र्या च सहस्रकम् ॥ 83 ॥

कृत्वा जलाधिवासं च पूर्वं वा पञ्चगव्यतः ।

प्रत्येकम् एकैकमन्त्रेण सहस्रं वा शतं वा एवकारेण शतादूनपक्षं निषेधति । शतमित्यत्र गायत्र्या चेत्यत्र प्रत्येकमित्यनुवर्तते । तथा च पुरुषसूक्तेन प्रत्येकं शतं गायत्र्या च प्रत्येकं सहस्रकं जुहुयात् । होमसमये निष्कास्याः प्रोक्ताः हयशीर्षे -

`पाषण्डान् नास्तिकान् सर्वान् देवब्राह्मणदूषकान् ।

---

1 छान्दोग्यब्राह्मणवचनम् । पूर्णपाठः तं.सा.1-17श्लोकटीकायां द्रष्टव्यः ।

दीक्षाबहिष्कृतान् सर्वान् हेतुवादरतांस्तथा ।
निष्कास्य प्रारभेत् कर्म वैष्णवैर्दीक्षितैः सह' इति ।

॥ **कृत्वेति** ॥ होमानन्तरं पञ्चगव्ये स्थितप्रतिमामादाय तस्याः जले अधिवासं कृत्वा चक्राब्जादिकं लिखेदिति पूर्वशेषेण योजना । ॥ **पूर्वं वेति** ॥ पञ्चगव्यतो पञ्चगव्याधिवासनात् पूर्वं जलाधिवासं कृत्वा अनन्तरं पञ्चगव्याधिवासं च कृत्वा चक्राब्जादिकं लिखेदिति भावः ॥83. ॥

3.25 मण्डलविचारः

अभिषेकार्थं कलशस्थापनं वक्तुं मण्डलमाह - **चक्राब्जमिति** ॥

चक्राब्जं भद्रकं वाऽपि मण्टपे मण्डलं शुभम् ॥ 84 ॥

मण्टपे प्रतिष्ठामण्टपे तत्रस्थवेद्यामिति द्रष्टव्यम् । चक्राब्जं **भद्रकं** सर्वतोभद्रनामकं वा **शुभं** दृष्टिप्रियं मण्डलं लिखेदिति शेषः ॥.84 ॥

चक्राब्जमण्डललक्षणमाह - **पद्ममिति** ॥

पद्मं वृत्तत्रयं चक्रं राशयो वीथिका तथा ।
शोभोपशोभिकाश्चैव चक्राब्जस्य तु लक्षणम् ।
चतुरस्रं विना चक्रं विशेषो भद्रके स्मृतः ॥ 85 ॥

मध्ये पद्मम् । तद्बहिर्वृत्तत्रयम् । तद्बहिश्चक्रम् । तद्बही राशयस्तद्बहिर्वीथिका । तद्बहिः शोभोपशोभिका इति चक्राब्जस्य लक्षणम् । चक्राब्जे लेख्याः प्रतिमास्त्वन्यत्रोक्ताः । मात्स्ये -

`घटी[1] नृमिथुनं सगदं च वीणाचापी नरोऽश्वजघनो मकरो मृगास्यः ।

तौली[2] ससस्यदहनः प्लवगा च कन्या शेषाः स्वनामसदृशाः खचराश्च सर्वे' इति[3]।

सर्वतोभद्रं लक्षयति - **चतुरस्रमिति** ॥ चक्रं विना चतुरस्रत्वं भद्रके विशेष इत्यर्थः । पद्मं लिखित्वा तत्परितः वृत्तत्रयस्थाने चतुरस्ररेखात्रयं लिखित्वा चक्रं परित्यज्य राश्यादिकं लिखेदिति भावः ॥85 ॥

3.26 कलशसङ्ख्यादिविचारः

कलशसङ्ख्यामाह - **सहस्रमिति** ॥

सहस्रमर्धं पादं वा कलशांस्तत्र पूजयेत् ।
शतं तदर्धं पादं वा वित्ताभावे निगद्यते ॥ 86 ॥

तत्र चक्राब्जादिमण्डले सहस्रं कलशम् । **अर्धं** पञ्चशतं **पादं** सार्धशतद्वयं पूजयेत् । सहस्रमिति मुख्यम् । वित्ताभावेऽन्तिमपक्षद्वयं ज्ञेयम् । तावतोऽपि वित्तस्याभावे कथमित्यत आह - **शतमिति** ॥ **वित्ताभावे** पञ्चाशदधिकशतद्वयकलशोपयुक्तवित्ताभावे । **शतं तदर्धं** पञ्चाशत् । **पादं** पञ्चविंशतिं वा पूजयेत् ॥86 ॥

इदानीं पञ्चविंशतिकलशपक्षे कलशेषु प्रक्षेप्यद्रव्याण्याह - **क्वाथेनेति** ॥

क्वाथेन क्षीरवृक्षाणां तथा पञ्चामृतैरपि ।
पञ्चगव्येन शुद्धेन जलेन च पृथक् पृथक् ।
पूरयेत्कलशान् मध्यं शुद्धोदेनैव पूरयेत् ॥ 87 ॥

1 अस्यार्थः प्रा.पाठे `शिरसि घटधारी' ।

2 अस्यार्थः प्रा.पाठे `तुलाधारी' ।

3 बृहज्जातके प्रथमाध्याये ।

ब्राह्मस्यैव चतुर्दिक्षु गन्धोदानां चतुष्टयम् ।
चतुर्दलश्वेतपद्मचतुष्के मण्डलस्थिते ।
पूर्वादिक्रमयोगेन रसक्वाथशुभोदकान् ॥ 88 ॥
गन्धांश्च स्थापयेत् ।

क्षीरवृक्षाणाम् अश्वत्थोदुम्बरप्लक्षादीनां क्वाथेन कषायरसेन पञ्चामृतेन पञ्चगव्येन गोमूत्रादिना शुद्धजलेन च पृथक् पृथक् पञ्चकलशान् पूरयेत् । मध्यं मध्यस्थकलशेष्वपि मध्यं कलशं शुद्धोदेनैव पूरयेदित्यर्थः । अन्ये तु क्षीरवृक्षाणां क्वाथेन त्वचा । अयं भावः । त्वचं पिष्टां कृत्वा जले प्रक्षिप्य तज्जलं कलशेषु प्रक्षिपेदित्याहुः । मध्यकलशस्य परितःस्थितकलशेषु प्रक्षेप्यद्रव्यमाह - ब्राह्मस्येति ॥ मध्यकलशस्यैव ब्रह्मदेवताकत्वात्ब्राह्मत्वमिति ज्ञेयम् । गन्धोदानां तद्युक्तकलशानाम् । पञ्चविंशतिकलशपक्षे कलशस्थापनप्रकारमाह - चतुर्दल इत्यादिना ॥ चत्वारि दलानि यस्य तच्चतुर्दलम् । चक्राब्जादिमण्डलस्थिते चतुर्दले श्वेतपद्मचतुष्टये पूर्वदक्षिणपश्चिमोत्तरक्रमयोगेन क्वाथादिपूर्णकलशान् स्थापयेत् । चतुर्दिक्ष्वाश्रित इति क्वचित्पाठः [1] ॥87,88 ॥

पूर्वोक्तपञ्चकलशस्य स्थानं वदन् पञ्चगव्यकलशाधः पद्मान्तरमाह - पञ्चगव्यमिति ॥

पञ्चगव्यं शुद्धान्तरे न्यसेत् ।
पृथक् चतुर्दलं पद्मं रक्तं कृत्वाऽल्पकं सुधीः ॥ 89 ॥

रक्तवर्णमल्पं पद्मं कृत्वा । शुद्धान्तरे शुद्धोदपूर्णकलशचतुष्टयानामन्तरे मध्ये पञ्चगव्यपूर्णं कलशं स्थापयेत् न्यसेदित्यर्थः । अयं भावः । पञ्चविंशतिकलशपक्षे

---
1 कस्य भागस्येदं पाठान्तरमिति न ज्ञायते ।

चक्राब्जं भद्रकं वा लिखित्वा एकैकस्मिन् पद्मदले एकैकं पद्ममध्ये त्वेकमिति क्रमेण पञ्चकं पञ्चकं न्यसेत् । मण्डलमध्ये च पञ्चकं न्यसेत् । एवं पञ्चविंशतिकलशान् प्रस्थाप्य पूर्वदिगवस्थितेषु कलशेषु पञ्चसु पञ्चामृतानि क्षीरादीनि एकैकत्रैकैकमिति क्रमेण प्रक्षिपेत् । दक्षिणदिगवस्थितेषु पञ्चसु कलशेषु क्वाथजलानि प्रक्षिपेत् । पश्चिमदिगवस्थितानां पञ्चकलशानां मध्ये मध्यस्थकलशं विहाय परितः स्थितेषु चतुर्षु शुद्धोदकं प्रक्षिपेत् । मध्यकलशे पञ्चगव्यं प्रक्षिपेत् । पश्चिमदिगवस्थितपद्ममध्ये रक्तद्वयेणाल्पं चतुर्दलं पद्मं कृत्वा, तदुपरि पञ्चगव्यकलशं निक्षिपेत् । उत्तरदिगवस्थितेषु गन्धोदकं स्थापयेत् । मध्यस्थितपञ्चानां मध्ये मध्यं विहाय चतुर्षु गन्धोदकमेव प्रक्षिपेत् । मध्ये तु शुद्धोदकमेव प्रक्षिपेदिति ॥89 ॥

पञ्चाशत्कलशपक्षे कलशस्थापनप्रकारमाह - **पञ्चाशत्त्व इति ॥**

पञ्चाशत्वे तु गन्धोदं सर्वं मध्ये[1] निधापयेत् ।
ब्राह्मस्य पुरतस्त्वेकं शार्वं संस्थापयेद् बृहत् ।
अष्टदिक्ष्वष्टपद्मेषु पञ्चकम्पञ्चकं न्यसेत् ॥ 90 ॥

कलशानामिति शेषः । **गन्धोदं** गन्धोदपूर्णम् । **सर्वं** कलशनवकम् । **मध्ये** मण्डलमध्ये **निधापयेत्** स्थापयेत् । **॥ ब्राह्मस्येति ॥ ब्राह्मस्य** मध्यकलशस्य पुरोभागे **शार्वं** शर्वदेवताकं बृहत्कलशं संस्थापयेदित्यर्थः । पञ्चाशत्कलशपक्षे गन्धोदयुक्ताः दश कलशाः मध्ये स्थाप्या इति भावः । अवशिष्टचत्वारिशत्कलशस्थापनप्रकारमाह - **अष्टदिक्ष्विति ॥** मण्डलादिन्द्राग्न्याद्यष्टदिक्षु लिखितेषु चतुर्दलाष्टपद्मेषु कलशानां पञ्चकंपञ्चकं **न्यसेत्** स्थापयेदित्यर्थः । अष्टपद्मानां चतुश्चतुर्दलानि मध्यं चेति स्थानपञ्चके पञ्चपञ्च कलशान् स्थापयेदिति भावः ॥90 ॥

शतकलशादिस्थापनायामुक्तप्रकारमतिदिशति - **अनेनेति ॥**

[1] केवलमत्रैवैवं पाठः । अन्यत्र सर्वमध्ये इति पाठः ।

अनेन क्रमयोगेन कलशा अखिला अपि ।
तत्तद्द्रव्यमयास्तत्रतत्र स्थाप्यास्तु बाह्यतः ।
तदैवाङ्कुरपात्राणि परितस्तत्र विन्यसेत् ॥ 91 ॥

शतकलशपक्षेऽपि **अनेन क्रमयोगेन** पुनरपि दशकलशाः गन्धोदयुक्ता एव मध्ये स्थाप्या इत्यनेन क्रमोपायेन **अखिलाः** अवशिष्टचत्वारिंशत्कलशाः क्वाथादि-तत्तद्द्रव्यप्रचुराः **बाह्यतः** पूर्वपद्मेभ्यो बहिः पूर्वाद्यष्टदिक्षु चतुर्दलपद्माष्टकं लिखित्वा तत्र स्थाप्या इत्यर्थः । इतोऽधिककलशपक्षेऽप्येवमिति द्रष्टव्यम् । **॥ तदैवेति ॥** **तत्र** मण्डले **परितः** मण्डलं परितः दिक्षु द्वेद्वे विदिक्षु चैकैकमिति द्वादशाङ्कुरपा-त्राणि विन्यसेदित्यर्थः ॥91 ॥

3.27 कलशद्रव्यविचारः

मण्डलादन्यत्र स्थाप्यकलशान् द्रव्यविशिष्टत्वेनाह - **कुशोदकमित्यादिना ॥**

कुशोदकं च कार्पूरं कौङ्कुमं चान्दनं तथा ।
तुहिनोदं हीरबेर[1]मौशीरं[2] कोष्ठसार्षपम् ॥ 92 ॥

नदीसङ्गमजं चैव ताटाकं कौप्यमेव च ।
निर्झरोदमिति प्रोक्ता विशेषकलशा इमे ।

---

1 हैरबेरमिति गु.दी.सू.पाठान्तरम् ॥

2 उशीराख्यगन्धमिश्रमुदकमित्यर्थः । तथा हि योगदीपिका [पटलम् 1-25]- उशीरं कुङ्कुमं मांसी कुष्ठं मलयजोगरुः । हीरबेरं मुरं चेति गन्धाष्टकमुदीरितम् ॥ - इति ।

कुशोदकपूर्णम् ।[1] **तुहिनोदकं** शीतलजलपूर्णम् । **हीरबेरं** हीवेरम् । हीवेरस्य मुडिवालेत्यपभ्रष्टभाषा ।[2] हैरबेरमिति **क्वचित्पाठः। कोष्ठसार्षपं** को-ष्ठौषधजलपूर्णं सर्षपोदकभृतं च। **ताटाकं** तटाकोदकपूर्णम् । **निर्झरोदं** निर्झर-जलपूर्णम् । इतीत्यनन्तरं द्रव्याश्रया इति शेषः । **इति** द्रव्याश्रयास्त्रयोदश **कलशाः** विशेषकलशाः प्रोक्ता इति सम्बन्धः । अयं भावः । पञ्चविंशत्यादिसर्वपक्षेष्वपि एते उ-क्तद्रव्यपूर्णाः अन्यत्र स्थाप्या इति ।

पश्चिमदिगवस्थितानां मध्ये परितः स्थितेषु चतुर्षु ब्राह्मकलशे च शुद्धोदं स्था-प्यमित्युक्तम् । एतच्छुदोदद्वयं किंरूपमित्यपेक्षायामाह - **शुद्धोदेति॥**

शुद्धोदद्वयमप्येतन्महातीर्थसमुद्भवम् ॥ 93 ॥

कुशोदकपूर्णम् ।[3] **तुहिनोदकं** शीतलजलपूर्णम् । **हीरबेरं** हीवेरम् । हीवेरस्य मुडिवालेत्यपभ्रष्टभाषा ।[4] हैरबेरमिति **क्वचित्पाठः। कोष्ठसार्षपं** को-ष्ठौषधजलपूर्णं सर्षपोदकभृतं च। **ताटाकं** तटाकोदकपूर्णम् । **निर्झरोदं** निर्झर-जलपूर्णम् । इतीत्यनन्तरं द्रव्याश्रया इति शेषः । **इति** द्रव्याश्रयास्त्रयोदश **कलशाः** विशेषकलशाः प्रोक्ता इति सम्बन्धः । अयं भावः । पञ्चविंशत्यादिसर्वपक्षेष्वपि एते उ-क्तद्रव्यपूर्णाः अन्यत्र स्थाप्या इति । पश्चिमदिगवस्थितानां मध्ये परितः स्थितेषु चतुषु ब्राह्मकलशे च शुद्धोदं स्थाप्यमित्युक्तम् । एतच्छुदोदद्वयं किंरूपमित्यपेक्षायामाह - **शुद्धोदेति॥ एतत्** पूर्वोक्तं शुद्धोदद्वयम् । अपिपदेन ब्राह्मे मृत्तिकां च क्षिपेदिति अनुजानाति। यथोक्तं पञ्चसंस्कारसङ्ग्रहे रङ्गपतितीर्थैः -

`क्षेत्रतीर्थोदकं शैलतुलसीगजमृत्तिकाः ।

---

1 कुशोदकशब्दस्य कुशोदकपूर्णबोधकत्वप्रकारः अग्रिम`इति'शब्दव्याख्यानावसरे स्फुटीभविष्यति।

2 ह्रीबेरम् । मुडिवालेत्यपभ्रष्टभाषा इति वि.पाठः ।

3 कुशोदकशब्दस्य कुशोदकपूर्णबोधकत्वप्रकारः अग्रिम`इति'शब्दव्याख्यानावसरे स्फुटीभविष्यति।

4 ह्रीबेरम् । मुडिवालेत्यपभ्रष्टभाषा इति वि.पाठः ।

चतुष्पथा च वल्मीका न्यसेत् ता मध्यमे घटे'[1] इति ॥92,93॥

पञ्चविंशत्यादिकलशपक्षेषु आवाह्यमूर्तिविशेषानाह - **चतुर्विंशतीत्यादिना॥**

चतुर्विंशतिमूर्तीनां वर्णमूर्तीस्तथाऽपराः ।
आवाहयेच्छतत्वे तु क्रमव्युत्क्रमतस्तु ताः ॥ 94 ॥

वर्णमूर्तीः पुनश्चैव द्विचतुर्वारमेव च ।
सहस्रकलशादित्वे जपेन्मन्त्रांश्च श[भ]क्तितः ॥ 95 ॥

तत्रादौ पञ्चविंशतिकलशपक्षे आवाह्यरूपविशेषानाह - **चतुर्विंशतिमूर्तीनामिति॥** आवाहनं कार्यमिति शेषः। अयं भावः। पञ्चगव्यकलशं विहायेतरेषु ब्राह्मकलशे केशवं तत्पूर्वकलशे नारायणमित्यादिक्रमेण चतुर्विंशतिमूर्तीरावाहयेत् । पञ्चगव्यकलशे केशवमेवावाहयेत् । `आवाहनं च स्नपनं पञ्चगव्येन मध्यवत्' इति (तं.सा.3-105) वक्ष्यमाणत्वात् । पञ्चगव्यकलशे अन्ते आवाहनं कार्यमिति। पञ्चाशत्कलशपक्षे रूपविशेषानाह - **वर्णमूर्तीरिति॥** **पञ्चाशद्वर्णमूर्तीः** अजाद्याः आवाहयेदित्यनुकृष्यते। शतकलशपक्षे रूपविशेषानाह - **तथाऽपराः आवाहयेच्छतत्वे त्विति॥** कलशानामिति शेषः। **अपराः** आत्माद्याः वासुदेवाद्या विश्वाद्या मत्स्याद्याश्च तथाशब्देन चतुर्विंशतिमूर्तीनां वर्णमूर्तीनां च परामर्शः। अयं भावः। शतकलशपक्षे केशवादिचतुर्विंशतिमूर्तीः पञ्चगव्ये पुनः केशवमिति पञ्चविंशतिमूर्तीः अजादिपञ्चाशद्वर्णमूर्तीरात्माद्याश्चतस्रो वासुदेवाद्याश्चतस्रो विश्वाद्याश्चतस्रो मत्स्याद्यास्त्रयोदशेति पञ्चविंशतिमूर्तीश्चावाहयेदिति। पञ्चाशदधिकशतद्वयपक्षे आवाहनप्रकारमाह - **क्रमव्युत्क्रमतस्तथा वर्णमूर्तीः पुनश्चैवेति॥** अयमर्थः। केशवादिशिंशुमा-

---

1 श्रीरङ्गपतितीर्थाः धर्मशास्त्रनिवन्धकाराः। तैर्विरचितो ग्रन्थः पञ्चसंस्कारसङ्ग्रहः। अयं ग्रन्थः मैसूरुनगरस्थप्राच्यविद्यासंशोधनालये उपलभ्यते - इति श्रीमन्तः प्रभञ्जनाचार्याः।

रान्तं शतकं केशवादिक्रमेणैव ब्राह्मकलशादिक्रमेणावाहयेत् । अनन्तरभाविपञ्चाशत्कलशेषु पुनश्च वर्णमूर्तीरजादिक्रमेणावाहयेदिति । पञ्चाशत्कलशपक्षे सहस्रकलशपक्षेऽपि आवाहनप्रकारमाह - **द्विचतुर्वारमेव च सहस्रकलशादित्व इति ॥** आदिशब्देन पञ्चशतकलशपक्षो ग्राह्यः । तत्र पञ्चशतकलशपक्षे द्विवारमावाहनं कार्यम् । सहस्रकलशपक्षे चतुर्वारमिति ग्राह्यम् । अयं भावः । पञ्चशतकलशपक्षे पञ्चाशदधिकशतद्वयपक्षोक्तरीत्या एकवारमावहनं कार्यम्, पुनरप्येकवारमिति द्विवारमावाहनम् । सहस्रकलशपक्षे पञ्चाशदधिकशतद्वयपक्षोक्तरीत्या चतुर्वारमावाहनं कार्यमिति । ॥ **जपेदिति ॥** कलशान् स्पृष्ट्वेति शेषः । **मन्त्रान्** प्रणवादीन् ॥94,95 ॥

3.28 कलशाभिषेकः

इदानीं कलशाभिषेकमाह - **तत इत्यादिना ॥**

ततस्तु पञ्चघोषैश्च वेदघोषैस्तथाऽऽदरात् ।
आनीय प्रतिमां स्नानं कारयेत् प्रणवेन तु ॥ 96 ॥

मन्त्रैः पुरुषसूक्तान्तैर्विश्वतश्चक्षुषा तथा ।
पुनश्चाष्टाक्षरेणैव प्रणवेन च भक्तितः ॥ 97 ॥

स्नापयित्वा गन्धजलैर्गन्धपुष्पादिभिः पुनः ।
अलङ्कृत्य स्थापयेत्तु प्रतिमां प्रणवेन तु ॥ 98 ॥

जपेदष्टाक्षरं मन्त्रं तत्तन्मूर्तिमनुं तथा ।
अष्टोत्तरशतं मन्त्री .... ।

पञ्चवाद्यादिघोषैः प्रतिमामानीय प्रतिष्ठामण्टपमिति शेषः । **प्रणवेन** मन्त्रेण । **पुरुषसूक्तान्तैस्तु** `तत्राऽत्वाहार्षसूक्तं च घर्मसूक्तं च वैष्णवम्' इति (तं.सा. 3-102) पुरुषसूक्तान्तैः सूक्तैश्च स्नानं कारयेत् । `कुशोदकं च कार्पूरमित्याद्युक्त (तं.सा.3-92) त्रयोदशकलशानां जलैरिति शेषः । **विश्वतश्चक्षुषा तथा** `विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्' इति (ऋ.सं.10-81-3) सूक्तेन च । **पुनश्च** गन्धजलैः स्नापयित्वेति सम्बन्धः । गन्धपुष्पतुलसीभिरलङ्कृत्य पुनः **प्रणवेन** तदुच्चारणपूर्वकं स्थापयेत् । **प्रतिमां** गर्भगृहस्थपीठ इति शेषः । इदं देवालयविषयमिति द्रष्टव्यम् । **तत्तन्मूर्तिमनुं** प्रतिष्ठाप्यवराहादिमूर्तिमन्त्रम् । **मन्त्री** मन्त्रसिद्धिमान् ॥96-98. ॥

3.29 प्रतिमायामनुसन्धानम्

प्रतिमायां विष्णुमूर्तिध्याने अवश्यमनुसन्धेयमीषद्रहस्यमाह - **ध्यायेत्तेजोमयीमिति ॥**

.... ध्यायेत्तेजोमयीं पुनः ॥ 99 ॥

प्रतिमां प्रतिमान्तस्स्थां तन्मध्ये परमं वपुः ।
चिदानन्दरसं सर्वगुणसम्पूर्णमुत्तमम् ॥ 100 ॥

पुनः मन्त्रजपानन्तरं प्रतिमान्तस्स्थां **तेजोमयीं प्रतिमां** प्रतिमागततेजोभागरूपां वायोः प्रतिमां ध्यायेदित्यर्थः । **तन्मध्ये** तेजोमयप्रतिमामध्ये । चिदानन्दादिपूर्णं परमं वपुर्विष्णोरिति शेषः । तदुक्तं

`प्रतिमां प्रतिमान्तस्स्थां वायोस्तेजोमयीं सुधीः ।
विष्णोर्वपुश्च तन्मध्ये ध्यायेदानन्दचिद्घनम् ॥

विना प्रतीकं प्राणस्य स्वयं निरयभाग्भवेत् ।

वायुं विना न गृह्णामि यत्किञ्चिद्वस्तु मे प्रियम् ॥

तस्माद्वायुमुखैर्देवैः वायुहस्तेन दापयेत्' इति ।

`तस्मादादित्यसंस्थे वा शरीरस्थेऽपि वाऽनिले ।

बलज्ञानात्मके दिव्याकृतिमत्युज्वलात्मनि ।

सर्वदेवोत्तमं विष्णुमुपासीत ततोऽधिकम्' इति (छा.भा.1-2-7)

छान्दोग्यभाष्ये च। अत्रादित्यशरीरपदाभ्यां प्रतिमासामान्योपलक्षणम् । तेजोमयी प्रतिमा लक्ष्मीः प्रतिमेति केचित् सम्प्रदायविदः ॥.99,100॥

प्रतिमायां तत्वदेवताध्यानमाह - पञ्चविंशतीति ॥

पञ्चविंशतितत्वानां देवतास्तदनन्तरम् ।

स्थापयेत् प्रतिमामध्ये परितः केशवस्य तु ॥ 101 ॥

तत्राऽत्वाहार्षसूक्तं च घर्मसूक्तं च वैष्णवम् ।

सूक्तं च विश्वकर्मीयं पौरुषं सूक्तमेव च ॥ 102 ॥

जप्त्वा चैव निजं मन्त्रं पुनरष्टाक्षरं सुधीः ।

प्रणवं च जपेद्विष्णुं ध्यायन्नुत्तमरूपिणम् ॥ 103 ॥

ततस्तु कलशैर्बाह्यक्रमेणैव जनार्दनम् ।

स्नापयेदुक्तमन्त्रैस्तु मध्यमं प्रणवेन तु ॥ 104 ॥

अष्टार्णेन निजेनापि तथा पुरुषसूक्ततः ।

तदनन्तरं विष्णुध्यानानन्तरम् । **तत्र** तस्मिन् समये । **आत्वाहार्षसूक्तं** `आ त्वा हारिषमन्तरे अधि ध्रुवस्तिष्ठा विचाचलिः' इत्यादि (ऋ.सं.10-173-1) । **घर्मसूक्तं** `घर्मा समन्ता' इत्यादि (ऋ.सं.10-114-1) । **वैष्णवं** `अतो देवा इत्यादि' (ऋ.सं.1-22-16) । **विश्वकर्मीयं** `विश्वकर्मा विमना' इत्यादि (ऋ.सं.10-82-2) । `य इमा विश्वा भुवनानि' इत्यादि वा (ऋ.सं.10-81-1) । **पौरुषं सूक्तं** `सहस्रशीर्षा' इत्यादि (ऋ.सं.10-90-1) । **निजं मन्त्रं** तत्तन्मूर्तिमन्त्रं जप्त्वा । **कलशैः** सहस्रकलशैः । **॥ बाह्यक्रमेणेति ॥** आदौ बाह्यपङ्क्तिस्थकलशपञ्चकैस्ततस्तदन्तःस्थकलशैस्ततस्तदन्तःस्थैरिति क्रमेणेत्यर्थः । **उक्तमन्त्रैः** आत्वाहार्षादिमन्त्रैः । मध्यमे विशेषमाह - **मध्यमं प्रणवेन तु अष्टार्णेन निजेनापि तथा पुरुषसूक्तत इति** ॥101-104. ॥

ननु पञ्चविंशतिकलशपक्षे चतुर्विंशतिमूर्तीरावाहयेदित्युक्तम् । एतदस्तु । एकः शिष्टो वर्तते । स कः ? तत्र किं रूपमावाहयेदित्यपेक्षायामाह - **आवाहनं चेति ॥**

आवाहनं च स्नपनं पञ्चगव्यस्य[व्येन] मध्यवत् ॥ 105 ॥

पूर्वाद्युत्तरपर्यन्तः कलशक्रम उच्यते ।
जप्त्वा पुनश्च तन्मन्त्रान् पूजयेच्च विधानतः ॥ 106 ॥

द्वारलोकपतिभ्यश्च बलिं दत्वा यथाक्रमम् ।
वस्त्ररत्नहिरण्याद्यैरलङ्कृत्य विभूषितः[1] ।
गुरवे दक्षिणां दद्यात् कोटिं लक्षं सहस्रकम् ॥ 107 ॥

[1] विभूतितः इति गु.दी.सू.पाठान्तरम् ।

शतमर्धं तदर्धं वा निस्स्वो भक्त्या क्षमापयेत् [1]।
तदर्धमृत्विजां चैव तदर्धं पारणाकृताम् ॥ 108 ॥
आ श्वभ्य आ श्वपाकेभ्यो दद्यादन्नं समस्तशः ।

मध्यवत् मध्यकलशवत् । ब्राह्मकलशे यथा केशवस्यावाहनं तथा पञ्चगव्यकलशेऽपि तत्रोक्तः प्रणवादिरेवात्रापि स्नापने मन्त्र इति भावः । ॥ **पूर्वादीति** ॥ उक्तकलशानां प्रथमग्रहणे पूर्वादिः क्रमसमाप्तौ उत्तरान्तः क्रम उच्यत इत्यर्थः । कलशग्रहणे पूर्वस्मिन् आरम्भः उत्तरे कलशे समाप्तिरिति भावः । **तन्मन्त्रान्** उक्तमन्त्रान् । **विधानतः** प्रथमाध्यायोक्तविधानेन पूजयेत् । **द्वारपतिभ्यो** जयादिभ्यः **लोकपतिभ्य** इन्द्रादिभ्यश्च । **यथाक्रमं** बलिदानोक्तक्रमेण । **अलङ्कृत्य** प्रतिमामिति शेषः । पूजयेदित्यन्वयः । **विभूषितः** स्वयमिति शेषः । विभूतित इति **क्वचित्पाठः** । **निःस्वो** दरिद्रः भक्त्या क्षमापयेत् । गुरुमिति शेषः । समापयेदिति **क्वचित्पाठः** । ऋत्विगादेर्दक्षिणामाह - **तदर्धमिति** ॥ आचार्यार्धमित्यर्थः । **पारणाकृतां** वेदसूक्तमन्त्रपाठकानामिति यावत् । **तदर्धम्** ऋत्विगर्धम् । आश्वभ्य इति ब्राह्मणभोजनानन्तरं बहिरुच्छिष्टप्रक्षेपे तद्भोजनेन यथा श्वचण्डालाद्यास्तृप्येरन् तथा ब्राह्मणेभ्यः परिवेषयेदिति भावः । दक्षिणाविशेषस्तद्राहित्ये प्रत्यवायश्च हयशीर्षे-

`आचार्यदक्षिणां दद्यात् नगरं ग्राममेव वा ।
मन्त्रहीनो गुरुं हन्याद्राष्ट्रं मन्त्रेण वर्जितः ।
धर्मं च यजमानं च हन्याद्दक्षिणया विना' इति ॥.105-108 ॥

3.30 उत्सवकालावधिः

उत्सवकालावधिमाह - **पुरस्तादिति** ॥

---
1 समापयेत् इति गु.दी.सू.पाठान्तरम् ।

पुरस्तात् परतश्चैव सप्तरात्रं निरन्तरम् ॥ 109 ॥

सुवर्णवस्त्ररत्नाद्यैरागताभ्यागतानपि ।

पूजयेच्छक्तितो भक्त्या प्रीयतां भगवानिति ॥ 110 ॥

गीतनृत्यैश्च वाद्यैश्च पुराणैरितिहासकैः ।

स्तोत्रैर्मङ्गलघोषैश्च वैदिकैर्दिनसप्तकम् ॥ 111 ॥

नयेत् .... ।

प्रतिष्ठातः पुरस्तात् परतश्चेति निरन्तरं सप्तरात्रमित्यर्थः । पुरतः सप्तरात्रं **परतः** प्रतिष्ठानन्तरं सप्तरात्रमिति वा । **आगतानभ्यागतानपि** यदृच्छयाऽऽगताः आगताः उत्सवमुद्दिश्यागताः अभ्यागताः तानपि ॥ **दिनसप्तकमिति** ॥ पूर्वतो दिनसप्तकं परतश्च दिनसप्तकम् । गीताद्यैर्नयेत् । मिलित्वा दिनसप्तकमिति वा ॥.109-111 ॥

3.31 अवभृथस्नानम्

अवभृथस्नानमाह - **तत इत्यादिना** ॥

.... ततो महाराजविभूत्याऽवभृथं सुधीः ।

कारयेद् देवदेवस्य स्वाध्यायैर्गीतनर्तनैः ।112 ॥

महानदीसङ्गमेषु तीर्थे चाऽतिप्रशस्तके[1]।

स्नापयेत् पूर्ववन्मन्त्रैः पुंसूक्तान्तैः स्मरन् हरिम् ॥ 113 ॥

---

[1] अत्रोल्लिखितः पाठः टीकाकृता पाठान्तरत्वेनोल्लिखितः। टीकाकृतः मूलपाठः व्याख्याने न स्फुटः। `महानदैः सङ्गमेषु तीर्थैश्चाऽतिप्रशस्तकैः' इति स्यात् ।

ततः पूर्ववदागत्य प्रवेश्य पुरुषोत्तमम् ।
पूजयित्वा विधानेन दत्वा दानानि शक्तितः ।
गुरुं च भक्त्या सम्पूज्य स्वीकुर्यादाशिषस्ततः ॥ 114 ॥

शतप्रस्थादनूनं तु नैवेद्यं पायसोत्तरम् ।
दिनेष्वेतेषु दातव्यं सघृतं ससितादिकम् ।[1]
पश्चादपि यथाशक्ति पूजा कार्या हरेः सदा ॥ 115 ॥

ततः सप्तदिनानन्तरम् । **स्वाध्यायैः** वेदैः । **नदाः** शोणाभद्रादयः । **तीर्थैः** जलैः । `महानदीसङ्गमेषु तीर्थे चातिप्रशस्तके' इत्यपि कोशेषु पाठः । **पूर्ववत्** नृत्तगीतादिकैः । पूर्ववद्विधानेनेति सम्बन्धः । **पुरुषोत्तमं** तदधिष्ठितप्रतिमाम् । **प्रवेश्य** देवालयमिति शेषः । ततः गुरोः । **शतप्रस्थादनूनं** प्रसृतित्रितयम् । `मानं प्रस्थचतुष्टयमि'त्यभिधानोक्तप्रस्थशतपरिमितम् । पायसमेवोत्तरमुत्कृष्टं यस्मिन् तत् **पायसोत्तरम्**। **ससितादिकं** सशर्करादिकम् । आदिपदेन मधु । ससितोदकमिति क्वचित्पाठः। **पश्चादपि सदा** यावज्जीवम् । अत्र प्रतिमायाः पीठे स्थिरीकरणम् । स्थिरीकृतायाश्चलने शान्तिश्च मात्स्ये -

`स्थितं न चालयेद्देवमन्यथा पापभाग्भवेत् ।
पूरयेत्सितकाभिश्च सुदृढं सर्वतो यथा ॥

लोकपालस्यादिभागे यस्य सञ्चलते विभुः ।
तस्य लोकपतेः शान्त्यै देयाश्चेमास्तु दक्षिणाः ॥

इन्द्राय वारणं दद्यात् काञ्चनं वाऽल्पवित्तवान् ।

---

1 ससितोदकमिति गु.दी.सू.पाठान्तरम् ।

अग्नेः सुवर्णं मेषं तु यमस्य महिषं तथा ॥

अजां सकाञ्चनीं दद्यात् निरृतिं राक्षसं प्रति ।

वरुणं प्रति मुक्तानि शुक्तिकानि प्रदापयेत् ॥

रीतिकां वायवे दद्यात् वस्त्रयुग्मेन संयुताम् ।

सोमाय धेनुर्दातव्या राजतस्तु वृषः शिवे ॥

चलने तु भवेद्धोरं भयं कुलविनाशनम् ।

यस्यां यस्यां तु चलनं शान्तिः स्यात् तत्रतत्र तु' इति ॥ 112-115 ॥

3.32 जीर्णदेवालयोद्धारप्रकारः

जीर्णदेवालयोद्धारप्रकारमाह - जीर्णेत्यादिना ॥

जीर्णालयोद्धृतौ चैव तत्वमन्त्रान् स्वकं तथा ।
प्रातिलोम्येन जप्त्वैव मूर्तौ सङ्कोचयेद्धरिम् ॥ 116 ॥

उक्तेनैव विधानेन कृत्वा देवालयं पुनः ।
स्नापयेत् पुण्डरीकाक्षं द्विगुणेन प्रवाहणात् ।
विभवेनानुलोमेन जपेन्मन्त्रान् पुनस्तथा ॥ 117 ॥

उक्तेनैव विधानेन तदर्धैर्विभवैः[1] सुधीः ।
पादमात्रैरपि हरिम् स्नापयित्वा यथोदितम् ॥ 118 ॥

एतेनैव विधानेन कृत्वा देवालयं पुनः ॥

---

1 `तथैव विभवैः' इति गु.दी.सू.पाठान्तरम् ।

आराधयेज्जगन्नाथं ध्यायन् भक्त्या यथोदितम् ।
यात्राऽपि पूर्ववत् तत्राप्युत्सवेषु च सर्वशः ॥ 119 ॥

जीर्णालयोद्धृतौ कर्तव्यायामिति शेषः । **स्वकं** तत्तन्मूर्तिमनुम् । **प्रातिलोम्येन** व्युत्क्रमेण । मूर्तौ सङ्कोचयेदिति । अयं भावः । प्रतिमास्थो भगवान् गर्भगेहे विशेषाकारेण व्याप्तो वर्तते । अतस्तत्र शूद्रसञ्चारो न सम्भवति । तदर्थं व्याप्तं भगवन्तं मन्त्रजपेन मूर्तिनिष्ठमेव कुर्यादिति ॥ **उक्तेनेति** ॥ चक्राब्जं भद्रकं वापीत्यादिनोक्तेनेत्यर्थः (तं.सा. 3-84) । **विधानेन** कलशस्थापनादिविधानेन । **तदर्धैः** पूर्वं स्थापनाकाले कृतापेक्षायाऽर्धैर्विभवैः । तथैव विभवैरिति **क्वचित्पाठः** । **पादमात्रैः** उक्तचतुर्थभागैर्वा । **यथोदितं** `स्नानं कारयेत्प्रणवेन तु' इत्याद्युक्तम् (तं.सा.3-96) अनतिक्रम्य । **एतेनैव विधानेन** `किष्कुद्वादशतोऽन्यूनम्' इत्याद्युक्त (तं.सा.3-49) विधानेन **प्रवाहणात्** सङ्कोचनार्थं स्नापनात् । **द्विगुणेन** विभवेन । **मन्त्रान्** तत्वमन्त्रादीन् । **अनुलोमेन** क्रमेण । **यथोदितं** `मम स्वामी हरिर्नित्यम्' (अनु.व्या.4-1-4) इत्याद्यन्यत्रोक्तप्रकारमनतिक्रम्य जगन्नाथं ध्यायन् । **तत्रापि** जीर्णदेवालयोद्धृतावपि । **पूर्ववत्** `स्वाध्यायैः गीतनर्तनैः' इति (तं.सा.3-112) पूर्वोक्तप्रकारेणावभृथस्नानार्थं यात्रापि कर्तव्येति शेषः । **सर्वशः** सर्वेषु उत्सवेषु । रथोत्सवादिषु च यात्रा कर्तव्येति सम्बन्धः ॥116-119 ॥

एतदेव विवृणोति - **कलशेत्यादिना विधानत इत्यन्तेन ॥**

कलशोक्तविधानेन पूजा बलिहृतिस्तथा ।

उत्सवेषु सदा कार्या कलशश्चोत्सवादनु ।
यात्रास्थानं[1] च कर्तव्यं सम्यगुक्तविधानतः ॥ 120 ॥

---

1 यात्रास्नानमिति गु.दी.सू.पाठान्तरम् ।

कलशेषूक्तं यद्विधानं मण्डलकरणादि विधानं तेनेत्यर्थः। **तथा बलिहृतिः** बलिदानं च। **॥ कलशश्चोत्सवादन्विति ॥** अयं भावः। प्रतिष्ठादिस्थले पूर्वं कलशार्चनादि उत्सवे त्वनन्तरमिति। **यात्रास्थानं** देवयात्रार्थं स्थानमुपवनादि। आगमोक्तविधानतः सम्यक्कर्तव्यमित्यर्थः। यात्रास्नानमिति पाठे द्वन्द्वैकवद्भावः। **यात्रा** वनयात्राऽवभृथस्नानं चेत्यर्थः। जीर्णोद्धारादिफलं मोक्षधर्मे -

`जीर्णस्फुटितसन्धानं यः करोति हरेर्गृहे।
आरामावसथाद्येषु लभ्यते मौक्तिकं फलम् ॥

प्रत्यब्दं यः प्रकुर्वीत विष्णोरायतनं नवम्।
यावद्वर्षसहस्राणि सवितुर्लोकमेष्यति' इति ॥120॥

3.33 सम्प्रोक्षणविधानम्

इदानीं निमित्तपुरस्कारेण सम्प्रोक्षणविधानमाह - **चोरेति ॥**

चोरचण्डालपतितश्वोदक्यादिप्रवेशने।
शवाद्युपहतौ चैव पूजाविच्छेदने तथा।
स्नापनोक्तेन मार्गेण प्रायश्चित्तविधिः स्मृतः ॥ 121 ॥
सर्वत्र विष्णुगायत्र्या होमः स्यादयुतावरः[1]।

पतितः ब्राह्मणादिरेव महापातकेनापगतजातिः। वर्णबाह्य इति **अन्ये।** **उदकी रजस्वला। उदक्या** रजस्वलेति **अन्ये।** आदिपदेन म्लेञ्छगर्दभादीनां ग्रहणम्। चोरादीनां देवमन्दिरान्तःप्रवेशे शवादीनामत्यशुचीनाम् **उपहतौ**

[1] अयुतोत्तर इति गु.दी.सू.पाठान्तरम्।

स्पर्शे सति । शवादीत्यादिपदेन प्रसवादिग्रहणम् । पूजायाः मध्ये उच्छेदे जाते । तदुक्तं हारीतस्मृतौ -

`प्रसवे मरणेऽपि वा ।
रजस्वलाप्रवेशे च सेके वर्षजलैरपि ।
पूजायाश्चैव विच्छेदे गर्दभादिप्रवेशने ॥

यवनादेस्तथोच्छिष्टस्पर्शनेऽप्यङ्गदाहने ।
पुनः सम्प्रोक्षयेद्बिम्बं न प्रतिष्ठां समाचरेत्' इति ।

स्नापनोक्तेन मार्गेण प्रतिष्ठादिकाले क्रियमाणं **स्नापनम्** अभिषेकस्तदुक्तेन मार्गेण । समन्त्रं होममाह - **सर्वत्रेति ॥** प्रतिष्ठाजीर्णालयोद्धारोत्सवसम्प्रोक्षणेष्वित्यर्थः । **अयुतावरः** अवरपक्षे दशसहस्रसङ्ख्याको होमः । स्यात्कार्य इति शेषः । अयुतोत्तर इति **क्वचित्पाठः ।** सम्प्रोक्षणे जलाधिवासादिकं नेति द्रष्टव्यम् ।

`पूर्वस्थापितबिम्बस्य न पुनः स्थापनं स्मृतम् ।
स्थाप्यते चेन्महादोषस्तस्य सम्प्रोक्षणं स्मृतम् ॥

जलाधिवासरहितं नेत्रोन्मीलनवर्जितम् ।
विण्मूत्रश्लेष्मसम्पर्के सम्प्रोक्ष्यैव समर्चयेत् ॥

सम्प्रोक्षणविधानस्य न कालनियमः स्मृतः ।
निमित्ते समनुप्राप्ते सद्यः कृत्वा समर्चयेत्' इति पञ्चरात्रवचनात् ॥121 ॥

3.34 प्रसङ्गात् विष्णुगायत्रीमन्त्रोद्धारः

विष्णुगायत्र्या होम इति प्रसक्तत्वात् विष्णुगायत्रीमुद्धरति - **नावाव्याद्याभिधानेति ॥**

नावाव्याद्यभिधानानि विद्महे धीमहे तथा ।
प्रचोदयात् तृतीयाधस्तन्नो गायत्रिनामिका ॥ 122 ॥

ना च वा च वि च एते आद्या येषामभिधानानां तदनुक्रमेण विद्महे इति योज्यम् । **तृतीयाधः** तृतीयस्य विष्णुरित्यस्याधः **पश्चात्** पृष्ठभागे पूर्वमिति यावत् । तन्न इति पदं योज्यम् । तथा हि ना इति गृहीतनारायणायेति चतुर्थ्यन्तपदादधः विद्महे इति योज्यम् । वासुदेवायेत्यभिधानानन्तरं धीमहीति, ततस्तन्नो विष्णुः प्रचोदयादिति । तथा च `नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात्' इति मन्त्राकारः । **गायत्रिनामिका** विष्णुगायत्रिनामिका ॥ 122 ॥

3.35 अन्यदेवताप्रतिमाप्रतिष्ठापनविधिः

अथान्यदेवताप्रतिमाप्रतिष्ठापनविधिमाह - **दुर्गेति** ॥

दुर्गाशिवस्कन्दसूर्यविनायकमुखानपि ।
स्थापयेदुक्तमार्गेण तत्तन्मन्त्रैः स्मरन् हरिम् ॥ 123 ॥

विनायकमुखान् [1] गरुडशेषरुद्रादीन् । **उक्तमार्गेण** कलशस्थापनाद्युक्तविधिना । तत्र विशेषमाह - **तत्तदिति** ॥ तेषांतेषां मन्त्रैस्तेषु हरिम् संस्मरन् स्थापयेदिति सम्बन्धः ॥ 123 ॥

प्रतिष्ठाप्यविष्णुप्रतिमायामन्यदेवताप्रतिमायां च विशेषमाह - **गोलकेति** ॥

गोलकद्वितयं विष्णोस्त्रितयं वा प्रकीर्तितम् ।
अन्यदेवप्रतिष्ठासु तदन्तश्चिन्तयेद्धरिम् ॥ 124 ॥

[1] वीनां नायक इति व्युत्पत्तिस्मारकः `पक्षिनायक' इति शब्दः प्रा.पुस्तके पार्श्वे लिखितः ।

विष्णुस्मृतिविहीना तु पूजा स्यादासुरी स्मृता ।
गृह्णन्ति देवता नैतां ततः स्याद् देशविप्लवः ।
व्याधिचोरादिभिस्तस्मादन्तर्ध्येयो हरिः सदा ॥ 125 ॥

विष्णुप्रतिमायां प्रतिष्ठाप्यदृश्यप्रतिमा, तदन्तस्तेजोमयीति गोलकद्वितयम् । अस्मिन् पक्षे अन्तस्स्थवायुप्रतिमायाः लक्ष्मीस्वरूपप्रतिमायाश्चैकत्वविवक्षा द्रष्टव्या । शिवाद्यन्यदेवताप्रतिमासु दृश्यप्रतिमा तदन्तश्शिवादिदेवताशरीरं, तदन्तः उक्तैकत्वविवक्षया तेजोमयशरीरं चेति गोलकत्रितयं कीर्तितम् । तदन्तः तेजोमयशरीरान्तः । अन्यथा दोषमाह - विष्ण्विति ॥ न केवलमासुरी स्यात् एतां देवताः न गृह्णन्ति । ततः विष्णुस्मृतिहीनपूजातः भगन्धरादिव्याधिचोरानावृष्ट्यादिभिर्देशविप्लवः स्यादित्यर्थः । अन्तः अन्यदेवतान्तः ॥124,125 ॥

3.36 भगवद्भक्तेरावश्यकता

अन्यदेवताभक्तिमतोऽपि भगवद्भक्तिरहितस्य शुभा गतिर्न स्यादित्याह - विष्णुभक्तीति ॥

विष्णुभक्तिविहीनस्य गतिः स्यान्न शुभा क्वचित् ।
भक्तस्याप्यन्यदेवेषु तस्माद्ध्येयो हरिः सदा ॥ 126 ॥

संस्मृतो भगवान् विष्णुः सर्वमङ्गलमङ्गलः ।
समस्ताभीष्टदायी स्यात्तेन ध्येयोऽखिलैर्जनैः ॥ 127 ॥

3.37 पञ्चविंशतेः विवक्षान्तरेण षड्विंशतः तत्वानां निरूपणम्

`पञ्चविंशतितत्वार्थे' इत्युक्तम् (तं.सा.3-83) । `पञ्चविंशतितत्वानां देवता' इति च (तं.सा.3-101) । `तत्वमन्त्रान्' इति च (तं.सा.3-116) । तत्र कानि पञ्चविंश-

तितत्वानि देवताश्च काः ? किं च पञ्चविंशतीत्युक्त्या तत्वेषु विवक्षान्तरेण सङ्ख्यान्तरं नास्तीति प्रमीयते । अत आह - **पुरुष इत्यादिना ॥**

पुरुषोऽव्यक्तं च महानहङ्कारो मनस्तथा ।
दशेन्द्रियाणि शब्दाद्या भूतेता[1] पञ्चविंशतिः ॥ 128 ॥

तत्वाख्याः कालमाये च नियतिर्मतिरेव च ।
विद्या कला प्रवृत्तिश्च द्वात्रिंशत्तत्वसङ्ग्रहः ॥ 129 ॥

स्फूर्तिः संवित्प्रतिष्ठा च शक्तिरित्यपराणि च ।
महालक्ष्मीस्वरूपाणि ह्येकादश विदो विदुः ।
विष्णोरपि हि रूपाणि तन्नाम्नैकादशैव तु ॥ 130 ॥

पुरुषो जीवतत्वम् । पुरुषादिमनोऽन्तानि पञ्च तत्वानि । **दशेन्द्रियाणि** ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्चेति दशेन्द्रियाणि । **शब्दाद्याः** आद्यशब्देन स्पर्शगन्धरसरूपाणि गृह्यन्ते । **भूतेता** पृथिव्यादिपञ्चभूतयुक्ता इति पञ्चविंशतिस्तत्वाख्या । तत्वाख्याः इति बहुवचनान्तपाठे प्रवृत्तिश्चेत्येते तत्वाख्या इति सम्बन्धः । कालादिसप्तसाहित्येन द्वात्रिंशत्तत्वसङ्ग्रहः । स्फूर्त्यादिचत्वारि अपराणि तत्वानि सन्ति । एवं सम्भूय षट्त्रिंशत्तत्वानि । तत्र कालादिशक्त्यन्तानि एकादश तत्वानि विष्णोः महालक्ष्म्याश्च रूपाणीत्याह - **महालक्ष्मीत्यादिना ॥** **तन्नाम्नैव** कालादिनाम्नैव । **एकादश** स्वरूपाणि ॥ 128-130 ॥

तत्वानां स्थितिप्रकारं ध्यानार्थमाह - **प्रधानेति ॥**

---

[1] तत्वाख्याः इति गु.दी.सू.पाठान्तरम् ।

प्रधानोपमवर्णानि द्विभुजान्यप्यशेषतः ।
कृताञ्जलिपुटान्येव प्रधानस्थं[1] हरिम् प्रति ।
सर्वाण्येतानि तत्वानि .... ॥ 131 ॥

प्रधानः सर्वोत्तमो नारायणः । **तदुपमवर्णानि** उद्यदादित्यवर्णानीत्यर्थः । यद्वा **प्रधानम्** अव्यक्तं तस्य गुणत्रयात्मकत्वेन शुक्लकृष्णरक्तवर्णवत्वात्, **तदुपमवर्णानि** एतानि सर्वाणि तत्वानीति । प्रधानस्थं हरिम् प्रति कृताञ्जलिपुटानि । प्रधानं तं हरिम् प्रति इत्यपि क्वचित् पाठः ।

इदानीं पुरुषादितत्वाभिमानिन आह - **ब्रह्मेत्यादिना** ॥

.... ब्रह्मा तु पुरुषः स्मृतः ॥ 131 ॥

महांश्चाव्यक्तनाम्नी तु ब्रह्माणी सम्प्रकीर्तिता ।
एवं वायुरपि ज्ञेयो भारती चापि तत्त्रयम् ॥ 132 ॥
रुद्रोऽहङ्कार उद्दिष्टः स्कन्देन्द्रौ मन उच्यते ।
अहङ्कारः शेषवीन्द्रावपि विद्वद्भिरीरितौ ॥ 133 ॥
दिग्वायुसूनुसूर्यांश्च वरुणश्चाश्विनावपि ।
वह्निदक्षाविन्द्रसूनुर्मित्रश्चैव मनुस्तथा ॥ 134 ॥
इन्द्रियाख्याः शब्दनामा बृहस्पतिरुदाहृतः ।
अन्ये तु सूनवो वायो रुद्रस्यापि प्रकीर्तिताः ॥ 135 ॥

---
1 प्रधानं तमिति गु.दी.सू.पाठान्तरम् ।

एतेषु भगवान् विष्णुः प्रधानतनुरेव तु ।
ध्येयः .... ।

ब्रह्मा विरिञ्चः **पुरुषो महांश्च** जीवाभिमानी महत्तत्वाभिमानी च **स्मृतः** `जीवमान्युत्तमो ब्रह्मा ।' `सर्वजीवाभिमानी स परः पुरुष उच्यते' (भा.ता.11-24-19) इत्येकादशतात्पर्ये उदाहृतप्रमाणेषु प्रसिद्धः । **ब्रह्माणी सरस्वती अव्यक्त-नाम्नी** स्थूलाव्यक्तनाम्नी । मूलसूक्ष्माव्यक्तस्य लक्ष्म्याऽभिमन्यमानत्वात् । `प्रकृति-र्नाम तत्पत्नी प्रकृतेरभिमानिनी' इति एकादशतात्पर्योदाहृतप्रमाणात्(भा.ता.11-24-19) । **वायुः एवं** पुरुषः महांश्च । **भारती चैवम्** अव्यक्तनाम्नी । तत्रायं पुरुषो महानव्यक्तमिति त्रयं तत्वेन ज्ञेयम् । **रुद्रोऽहङ्कारः** स्थूलाहङ्कारः । **स्कन्देन्द्रौ** षण्मुखसुरेन्द्रौ मनः **उच्यते** उच्येते । शेषवीन्द्रावपि सूक्ष्माहङ्काराभिमानिनौ । दि-गादयो मन्वन्ता दश **इन्द्रियाख्याः** इन्द्रियेति नामवन्तः । तदभिमानिनश्च । दि-क्शब्देन दिग्देवता उच्यन्ते । ताश्च

`मित्रो यमश्च वरुणः कुबेरश्च दिगीश्वराः ।
श्रोत्राभिमानिनः सर्वे' (ऐ.भा.प्रघट्टक1-खण्ड5)

इत्यैतरेयभाष्योक्ताः श्रोत्राभिमानिन्यः । वायुसूनुः प्राणनामा त्वगभिमानी । सूर्यश्चक्षु-रभिमानी । वरुणो जिह्वाभिमानी । अश्विनौ घ्राणस्य । वह्निर्वागिन्द्रियस्य । दक्षः पा-ण्योः । इन्द्रसूनुर्जयन्तः पादयोः । मित्रः पायोः । मनुः स्वायुम्भुवः उपस्थायाः । **बृ-हस्पतिः** शब्दनामा तदभिमानी चोदाहृतः । एवं शब्दस्य बृहस्पतिमुक्त्वा पुनः श-ब्दस्य तदतिरिक्तानां स्पर्शादीनां चतुर्णां चाभिमानिन आह - **अन्ये त्विति ॥** शब्दा-दीनां पञ्चतन्मात्राणामभिमानिनः **अन्ये तु** प्राणापानव्यानोदानसमानाः पञ्च वायोः रुद्रस्यापि सूनवः प्रकीर्तिताः । यथोक्तं गीतातात्पर्ये -

`शब्दाद्याः पञ्च शिवजाः शब्दनात् स्पर्शनादपि ।

रूपणात् रसनाच्चैव गन्धनाच्च तथाभिधाः' (गी.ता.उदाहृतम् 13-27) इति।

केचित्तु - बृहस्पतेः शब्दाभिमानित्वेनोक्तत्वात् **अन्ये तु** स्पर्शाद्यभिमानिनस्तु अपानव्यानोदानसमानाश्चत्वार इत्यर्थः। आकाशादिपञ्चमहाभूतदेवानां गणपत्यादीनां

`विनायकस्तथाऽऽकाशो निरावृत्त्या प्रकाशनात्।

प्रधानवायुजो भूतवायुर्नाम्ना मरीचकः॥

अग्निश्च पृथिवी चैव प्रसिद्धौ वरुणो जलम्।

अदनात् प्रथनाज्जन्मलयहेतोस्तथाभिधाः' (गी.ता.उदाहृतम् 13-27)

इति प्रमाणप्रसिद्धत्वादनुक्तिरिति वर्णयन्ति।

वस्तुतस्तु, **अन्ये च**[1] मात्राभिमानिनः भूताभिमानिनश्च वायोः सूनवो रुद्रस्य सूनवोऽपीति योजना। तत्र वायोः सूनवः शब्दादिमात्राभिमानिनः। रुद्रस्य सूनवो विनायकाद्याश्चाकाशादिभूताभिमानिन इति बोद्धव्यम्। **एतेषु** पुरुषादितत्वेषु प्रधानतनुरेव विष्णुर्ध्येयः इति सम्बन्धः। अत्र सर्वत्र तत्तन्नियामकत्वेन तत्तच्छब्दवाच्यत्वं द्रष्टव्यम्॥131-135॥

तत्वमन्त्राण्युद्धरति - **परात्मनोरिति**॥

.... परात्मनोर्मध्ये तत्वनाम तदर्थयोः।
जपे न्यासे नमोन्तस्तु स्वाहान्तो होमकर्मणि॥ 136॥

तदर्थयोः परमात्मनोरिति सम्बन्धः। स प्रधानतनुर्विष्णुरर्थौ ययोस्तादृशयोः परात्मशब्दयोर्मध्ये तत्वनाम उच्चार्यमिति शेषः। **तदर्थयोः** तत्वनामार्थयोरिति वा।

---

1 पूर्वम् अन्ये तु इति प्रतीकं धृत्वा व्याख्यातम्। अत्र चशब्दः उपात्तः। तुशब्दार्थस्फोरणायैवं कृतमिति भाति।

अयं मनुर्नमोन्त इति द्रष्टव्यम् । अनेन मूलेन सम्प्रदायेन च `पराय पुरुषात्मने ब्रह्म-वायुभ्यां नमः' इत्यादिमन्त्रस्वरूपं लब्धमिति ज्ञेयम् । तथा चोक्तं हयशीर्षे -

`नमः परायेति पूर्वमात्मने नम इत्यनु ।
नामजीवादितत्वानां न्यसेत्तत्तत्पदे क्रमात्' इति ।

न चैतेषु मन्त्रेष्वनन्वयः, पुरुषात्मने पराय नमः, ब्रह्मवायुभ्यां च नम इति चशब्दा-ध्याहारः कार्य इति तात्विकानां सम्प्रदायात् । मन्त्रस्य नमोन्तत्वे विशेषमाह -

`जपे न्यासे नमोन्तस्तु स्वाहान्तो होमकर्मणि' इति[1]। अत्र **केचन सम्प्रदायविदः** तत्वमन्त्रस्यैव होमे नमःशब्दस्थाने स्वाहाशब्दो द्रष्टव्यो न तु मन्त्रान्तर-स्येति वदन्ति। **अन्ये तु** होमसमये सर्वमन्त्राणामपि नमश्शब्दस्थाने स्वाहाशब्दं वदन्ति ॥ 136 ॥

जपादिकं कियद्वारमित्यत आह - **त्रीति** ॥

त्रिचतुःषड्दशावृत्तिरेतेषां तु हुतादिके ।
न्यासोऽङ्गुलीषूरुबाहुमध्येषु व्युत्क्रमात् स्मृतः[2]।
क्रमे विपर्ययेणात्र शक्त्यादित्वं प्रकीर्तितम् ॥ 137 ॥

एतेषां तत्वमन्त्राणां **हुतादिके** होमजपन्यासेषु त्रिचतुःषड्दशान्यतमाऽऽवृत्तिः स्वीकार्येति शेषः । `यस्य कस्यापि मन्त्रस्य न्यासः पञ्चाशदक्षरैः' (तं.सा.2-1) रित्युक्तमुपलक्षणम् । तत्वमन्त्रैर्न्यासोऽपि `वीर्यद' इति (तं.सा.2-1) द्रष्टव्यमित्यभि-प्रेत्य तत्वमन्त्रोद्धारप्रसङ्गात् तन्न्यासस्थानान्याह - **न्यास इति** ॥ **अङ्गुलीषु** पदोर्हस्तयोश्चाङ्गुलीषु । ऊरू च बाहू च मध्यं च तेष्वित्यर्थः । **न्यासो व्युत्क्रमात्स्मृतः**

[1] प्रकृततन्त्रसार3-136तमश्लोकस्योत्तरार्धमेव अत्र पूर्णतयोदाहृतम् ।

[2] व्युत्क्रमे स्मृत इति गु.दी.सू.पाठान्तरम् ।

संहारन्यास इत्यर्थः। व्युत्क्रमे स्मृत इति **क्वचित्पाठः।** अयं भावः। वामपादकनिष्ठिकामारभ्य तदङ्गुष्ठपर्यन्तं पृथिव्यादिपञ्चकं न्यसेत् । अनन्तरं दक्षपादकनिष्ठिकामारभ्य तदङ्गुष्ठपर्यन्तं गन्धादिपञ्चकं न्यसेत् । अनन्तरं वामहस्तकनिष्ठिकामारभ्य तदङ्गुष्ठपर्यन्तं प्राणादिपञ्चकं न्यसेत् । अनन्तरं वामोरौ मनः न्यसेत् । अथ दक्षोरावहङ्कारम् । अथ वामबाहौ महान्तं दक्षबाहौ अव्यक्तं न्यसेत् । अनन्तरं हृदय एव पुरुषादिद्वादश विन्यसेदिति। सृष्टिन्यासे मध्यादित्वमित्याह - **क्रम इति॥ क्रमे** सृष्टिक्रमे विवक्षिते विपर्ययेण न्यासः स्मृतः। अयं भावः। क्रमे विवक्षिते। मध्यबाहूरुषु अङ्गुलीषु चेति **विपययेण च** `अङ्गुलीष्वि' (तं.सा.3-137) त्युक्तक्रमापेक्षया विपरीतक्रमेण न्यासः स्मृत इति। ननु क्रमे विवक्षिते स्थानेषु एवं क्रमो भवेत् । मन्त्रेषु क्रमो वाऽन्यो[1] वेत्यपेक्षायामाह - **अत्रेति॥** अत्र सृष्टिक्रमे शक्त्यादित्वं प्रकीर्तितम् । अयं भावः। शक्त्यादिद्वादश हृदयमध्ये विन्यसेत् । अव्यक्तमहती दक्षवामहस्तयोः। अहङ्कारमनसी दक्षवामोर्वोः। श्रोत्रादिपञ्चकं दक्षिणहस्ताङ्गुष्ठमारभ्य तत्कनिष्ठिकापर्यन्तं विन्यसेत् । वागादिपञ्चकं वामहस्ताङ्गुलीषूक्तक्रमेण विन्यसेत् । शब्दादिपञ्चकं दक्षिणपादाङ्गुष्ठादिषु विन्यसेत् । आकाशादिपञ्चकं वामपादाङ्गुष्ठादिषु न्यसेदिति। उपलक्षणमेतत् । स्थितिन्यासोऽपि द्रष्टव्यः। तत्क्रमः संहृतिन्यासेऽधिकारिविशेषश्चतुर्थाध्याये (तं.सा.4-119,120) वक्ष्यते ॥ 137 ॥

तत्वमन्त्राणामृष्यादिकमाह - **ऋषीति॥**

ऋषिच्छन्दोदेवताङ्गध्यानानुक्तौ प्रधानवत् ।
ज्ञेया मन्त्राः समस्तास्ते पृथङ् मोक्षादिदायकाः ॥ 138 ॥

ध्यानानुक्तौ ध्यानश्लोकानुक्तौ **प्रधानवत्** प्रणवमन्त्रवत् मूलमन्त्रवद्वा ज्ञेयाः। ऋष्यादय इति शेषः। तत्वमन्त्राणां मालामन्त्रत्वभ्रममपनयन् फलमप्याह -

[1] `मन्त्रेषु अयं क्रमो वाऽन्यो वा' इति अयंशब्दो भवेचेत् स्फुटप्रतिभासः स्यात् ।

मन्त्रा इति ॥ पृथक् मन्त्रा ज्ञेया इति सम्बन्धः । **मोक्षादिदायकाः** मोक्षादिचतुष्टयप्रदाः । अत्र तत्तदङ्गुष्ठे तत्वदेवतामन्त्रेण न्यासे पूततत्तदङ्गो भवतीत्युक्तं हयशीर्षे ।

'तत्वन्यासोऽयमचिरात्कृष्णसान्निध्यकारकः ।
यः कुर्यात् तत्वविन्यासं स पूताङ्गो भवेद्ध्रुवम्' इति ॥ 138 ॥

3.38 एतद्ग्रन्थमहत्त्ववर्णम्

नन्वध्यायत्रयं निष्प्रयोजनत्वान्नादरणीयम् । न च तन्त्रमार्गज्ञानार्थम् । तस्य मूलतन्त्रसारेणैवोपपत्तेरित्यतस्तस्य दुर्गमत्वेन ज्ञातुमशक्यत्वात् सुगमोऽध्यायत्रयात्मकस्तन्त्रसारसङ्ग्रहोऽयं कृत इत्याह - **तन्त्रमार्गा इति ॥**

तन्त्रमार्गास्तु हरिणा ह्यसङ्ख्याः कीर्तिता अपि ।
तेष्वयं सुगमो मार्गः सुफलश्चानुतिष्ठताम् ।139 ॥

अयम् अध्यायत्रयात्मकस्तन्त्रसारसङ्ग्रहाख्यो मार्गः सुगमः सुफलश्चेत्यर्थः ॥ 139 ।

नन्वस्य सङ्क्षेपशास्त्रत्वेन अन्यतन्त्रापेक्षायां तेनैवालम् । किमनेनेत्यत आह - **यावत इति ॥**

यावतो ह्यननुष्ठाने कर्मपूर्तिर्न विद्यते ।
तावत् समस्तं कथितमस्मिंस्तन्त्रे यथाविधि ॥ 140 ॥

प्रीयतेऽनेन मार्गेण पूजितो मुक्तिदो भवेत् ।
कामदश्च स्वभक्तानां भगवान् पुरुषोत्तमः ॥ 141 ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमत्तन्त्रसारसङ्ग्रहे तृतीयोऽध्यायः ॥

महामन्त्रजपपूजाहोमादेर्यावतः । **तावत्समस्तम्** अष्टमहामन्त्रादिकम् **अस्मिन् तन्त्रे** शास्त्रे **कथितम्** अभिहितमित्यर्थः । क्षिप्रप्रवृत्तये फलमाह - **प्रीयत इति ॥** भगवान् पुरुषोत्तमः **अनेन मार्गेण** अध्यायत्रयोक्तेन मार्गेण पूजितः प्रीयते । प्रीतश्च मुक्तिदो भवेदिति ज्ञातव्यम् ।॥ 140,141 ॥

आलोच्य पूर्वटीकाश्च स्वगुरूक्तार्थसञ्चयः ।
निरूपितस्तृतीयेऽस्मिन् वेङ्कटेशाख्यसूरिणा ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य
श्रीमत्तन्त्रसारसङ्ग्रहस्य टीकायां
श्रीमद्यदुपत्याचार्यपूज्यपादाराधारकश्रीमच्छ्रीनिवासाचार्यपूज्यपादानां
शिष्येण वेङ्कटपतिना विरचितायां गुर्वर्थदीधितौ तृतीयोऽध्यायः समाप्तः ॥

छ ॥

4

तन्त्रसारसङ्ग्रहे चतुर्थोऽध्यायः

श्रीगुरुभ्यो नमः हरिः ॐ ॥[1]

गुरूपदिष्टाः सञ्चिन्त्य क्रोडाद्या मन्त्रदेवताः ।

अर्थं वक्ष्ये यथाबोधं मन्त्राध्यायस्य लेशतः ॥

4.1 अध्यायार्थकथनम्

पूर्वाध्याये प्रतिष्ठायां `तत्तन्मन्त्रैः स्मरन्हरिम्' इति (तं.सा.3-123) मन्त्रा उक्ताः । अवश्यं जप्यानां तेषामुद्धारमतिगोप्यत्वात् सङ्केतेन करोत्यस्मिन्नध्याये । तत्रादौ निर्मलत्वेनाप्रामाण्यशङ्कावारणाय मूलं वदन्नत्र चिकीर्षितं प्रतिजानन् प्रेक्षावत्प्रवृत्तये फलं च वक्ति - **अथेति ॥**

अथ विष्णूदिते तन्त्रसारे मन्त्रगणो हि यः ।

उदितः सङ्ग्रहेणासावुच्यतेऽखिलसाधकः ॥ 1 ॥

---

1 श्रीवेदव्यासाय नमः इति ज.पाठः ।

अथ प्रतिष्ठादिप्रकारकथनानन्तरम् । **विष्णूदिते** विष्णुना कथिते तन्त्रसारे यो **मन्त्रगणः** मन्त्रसमूहः कथितोऽस्ति **असौ** मन्त्रगण **उच्यते** । तर्हि मूलतन्त्रसारेणैवालं किमनेनेत्यत उक्तं **सङ्ग्रहेणेति** । विक्षिप्योक्तानां मन्त्राणामेकीकृत्य निरूपणाख्यः सङ्ग्रह एवास्य ग्रन्थस्य प्रयोजनमित्याशयः । सङ्ग्रहेणोच्यते तर्हि सङ्कुचितत्वेन समग्रफलको न स्यादित्यत आह - **अखिलसाधक इति** ॥ अखिलपुरुषार्थसाधक इत्यर्थः ॥1 ॥

4.2 भूवराहमन्त्रः - 1

अस्मिन्कल्पे वराहावतारस्य प्राथमिकत्वेन प्रथमतस्त्रयस्त्रिंशदक्षरं भूवराहमन्त्रमाह - **याष्टम इति** ॥

याष्टमस्तूयुतोऽन्तेन समेतश्चैव भूभृतः ।
बीजं नमश्च भगवानुद्देश्यो रूपसंयुतः ॥ 2 ॥
स एव तादृशो लोकत्रयपालो भुवःपतेः ।
भावं मे देहि दान्ते तु दापयस्वाहया युतः ॥ 3 ॥
मनुः ।

याष्टमो यकारादष्टमो हकारः । तु ऊयुत इति पदच्छेदः । **ऊयुतः** ऊकारेण युतः **अन्तेन** बिन्दुना समेतः **भूभृतो** वराहस्य बीजं भवति । अत्र बीजस्य बिन्दुसमेतत्वकथनेन वक्ष्यमाणसर्वबीजानामपि बिन्दुसमेतत्वं द्रष्टव्यम् । बीजानन्तरं नमःशब्दस्तदनन्तरम् **उद्देश्यः** चतुर्थ्यन्तो **भगवान्** भगवच्छब्दः । एवमुत्तरत्राप्युद्देशशब्दश्चतुर्थीविभक्तिवाचक इति द्रष्टव्यम् । **स एव** वराहो रूपशब्देन युतः **तादृशः** चतुर्थ्यन्तः । **लोकत्रयपालः** लोकत्रयस्य पालक इत्यर्थको `भू-

भुर्वःस्वःपतिः' इति शब्दः। **तादृशः** चतुर्थ्यन्त इत्यनुवर्तते। भुवः पतेर्भावमित्यर्थकं भूपतित्वमिति पदम्। तदनन्तरं मे देहीति पदम्। **दान्ते** दकारस्यान्ते **दापयस्वाहया** दापयश्च स्वाहा चेति द्वन्द्वैकवद्भावः। नपुंसकत्वं तु नाश्रितम्। `दापय'`स्वाहा'शब्दाभ्यां युत इत्यर्थः। दापयसहिता स्वाहेति वा। दापयशब्देन स्वाहाशब्देन च युतस्त्रयस्त्रिंशदक्षरो **मनुः** वराहमन्त्रः। **केचित्तु** मे देहीत्यनन्तरं दाकार इति ग्राह्यं दान्त इति वक्ष्यमाणत्वात्। **दान्ते** दाकारस्यान्ते **दापयस्वाहया** दापयस्वाहापदेन युतो वाराहो मनुरित्यर्थ इत्याहुः। तथा चैवं मन्त्रनिष्पत्तिः - हूं नमो भगवते वराहरूपाय भूर्भुवःस्वःपतये भूपतित्वं मे देहि ददापय स्वाहा - इति।

मन्त्रार्थस्तु - वरानुत्तमानानन्दादिगुणान् कदापि न त्यजतीति वा, वरान् वरणीयान् प्रार्थ्यान् स्वरूपानन्दाविर्भावादीनाहरति ददातीति वा वराहनामकं रूपमवतारो यस्येति वा, वराहवद्रूपं शरीरं यस्येति वा वराहरूपस्तस्मै त्रिलोकपतये नमः। त्वं मे भूपतित्वं देहि। तत्वाभिमानिदेवैः ददापय तान् दातुं प्रेरय। स्वाहा `स्वीयं स्वीकुरुते यस्मात्स्वाहेत्युक्तो जनार्दन' (अनु.व्या.1-4-1) इति ॥2,3॥

4.3 वराहाष्टाक्षरः-वराहचतुर्दशाक्षरश्च 2-3

अष्टाक्षरं द्वितीयं वराहमन्त्रमाह - **तस्येति**॥

तस्यापरस्तारबीजोद्देशनमोयुतः[1]।

नमः सोद्देशभगवान् महाशब्दयुतश्च सः।
तादृशः स्वाहया युक्तो वराहस्यापरो मनुः ॥ 4 ॥

---

[1] नामबीजोद्देश- इति गु.दी.सू.पाठान्तरम्।

तस्य वराहस्य अपरो द्वितीयो मन्त्रः । **तारः** ॐकारः । **बीजं** ह्रूमिति । **उद्देशः** चतुर्थी । **नमः** नमःशब्दः । **तैर्युक्तः** । तथा चोक्तं पञ्चरात्रे -

`अष्टाक्षरे तथा मन्त्रे वेदादिः प्रथमाक्षरे ।
द्वितीयं बीजकं तस्माद्वराहाय हृदन्तक' इति[1] ।

तथा च `ओं ह्रूं वराहाय नमः' इति अष्टाक्षरवराहमन्त्रप्रयोगः । नामबीजोद्देश इति बहुकोशेषु पाठः । तत्र **नामबीजं** ह्रूमित्यर्थो ज्ञेयः । ॐकारं विहाय सप्ताक्षरो वाराहमन्त्रः पूर्वोक्त एव । अपरे तु - नामभूतवराहशब्देन बीजेन उद्देशेन नमःशब्देन च युक्तः तस्यापरो मन्त्रो वर्तत इत्यर्थ इत्याहुः[2] ।

तस्य चतुर्दशाक्षरं तृतीयं मनुमाह - **नम इति** ॥ प्रथमं नमःशब्दस्ततश्चतुर्थ्यन्तो भगवच्छब्दः **स वराहः** वराहशब्दसहित इति यावत् । **महा**शब्द**युतः तादृशः सोद्देशः स्वाहया युतः** स्वाहाशब्देन संयुतः वराहस्य **अपरः** तृतीयो **मनुः** । एवं च `नमो भगवते महावराहाय स्वाहा' इति मन्त्रनिष्पत्तिः ॥ 4 ॥

`ध्यानहीने तु निष्फलम्' इत्युक्तत्वेन मन्त्रत्रयध्येयस्य वराहस्य ध्यानमाह - **श्याम इति** ॥

श्यामः सुदर्शनदराभयसद्वरेतो
भूम्या युतोऽखिलनिजोक्तपरिग्रहैश्च ।
ध्येयो निजैश्च तनुभिः सकलैरुपेतः
कोलो हरिः सकलवाञ्छितसिद्धयेऽजः ॥ 5 ॥

---

1 हृदन्तकेति इति वि.पाठः ।

2 `ह्रूं वराहाय नमः' इत्यस्मिन् पक्षे मन्त्रनिष्पत्तिः ।

नीलवर्णः **सुदर्शनदराभयसद्वरेतः** चक्रशङ्खाभयवरमुद्रायुतबाहुचतुष्टयः **भूम्या** रमावतारया स्वपत्न्या युतः। **अखिलनिजोक्तपरिग्रहैः** स्वशिष्यत्वेन परिग्रहरूपैर्ब्रह्मादिभिः जनैर्युक्तः। यद्वा **अखिलाः** निजाः स्वीयाः प्रागुक्ताः ये **परिग्रहा** लक्ष्मीधरानन्तब्रह्मवाय्वादयस्तैरित्यर्थः[1]। **निजैः** सकलैः **तनुभिः** आवरणभूतैर्देवैरुपेतः। `पूर्णं सदाऽवरणशोभिसदैकदंष्ट्रमाद्यं वराहमनिशं प्रभजस्व चित्त' इति वैहायसपञ्चरात्रोक्तेः। अत्र तनुशब्दस्य स्त्रीलिङ्गत्वेऽपि निजैः सकलैरिति लिङ्गव्यत्ययः पुरुषाकारमूर्तिसूचकः। यद्वा **निजैः** अखिलैरावरणरूपैः **तनुभिः** स्वस्वरूपभूतेच्छादिशक्तिभिश्चोपेतः। `इच्छाद्या मोचिकाद्याश्च अणिमाद्याश्च शक्तयः' इति भागवततन्त्रोक्ताः[2] शक्तयो ज्ञेयाः। अथवा **निजैस्तनुभिः** क्रुद्धोल्कादिभिः विश्वरूपान्तैः शक्तिभिश्चोपेतः। एतेन सकलावरणदेवतासमेतत्वमुक्तं भवति। **अजो** जनिरहितः **कोलो** वराहरूपो हरिः **सकलवाञ्छितसिद्धये** सकलाभीष्टप्राप्त्यै **ध्येयः** चिन्त्य इत्यर्थः ॥5॥

ऋष्यादिज्ञानस्यात्यावश्यकत्वादृष्यादिकं लाघवेन वक्ष्यमाणसर्ववैष्णवमन्त्राणामप्याह - **वैष्णवानामिति** ॥

> वैष्णवानां मुनिर्ब्रह्मा मन्त्राणां वर्णभेदतः।
> ज्ञेयं छन्दो दैवतैकस्तत्तद्रूपो हरिः परः ॥ 6 ॥

वैष्णवानां मन्त्राणामिति सम्बन्धः। विष्णुदेवताकानां सर्वमन्त्राणां ब्रह्मा ऋषिः। यत्र विशिष्य ऋषिः नोच्यते तत्र ब्रह्मा ऋषिरिति वक्तव्यम्। तस्य सर्वमन्त्रद्रष्टृत्वादिति भावः। **॥वर्णभेदत इति॥** वर्णसङ्ख्यातः छन्दो ज्ञेयमित्यर्थः[3]। **तत्तद्रूपः** त-

---

1 अत्र `इत्यप्याहुः' इति ज.पाठे अधिकम्।

2 एकादशभागवततात्पर्योक्ताः।

3 प्रा. पाठे `वृत्तरत्नाकरे' इति उपरि लिखितमस्ति।

तन्मन्त्रप्रतिपाद्यरूपः **परः** उत्तमो हरिरेका एव **देवता** प्रतिपाद्यदेवता। तथा हि छन्दांसि कथितानि ग्रन्थान्तरे -

`उक्ताऽत्युक्ता तथा मध्या प्रतिष्ठान्यासु पूर्विका।
गायत्र्युष्णिगनुष्टुप्च बृहती पङ्क्तिरेव च॥
त्रिष्टुप्च जगती चैव तथाऽतिजगती मता।
शक्वरी साऽतिपूर्वा स्यादष्ट्यत्यष्टी ततः स्मृते॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः।
विकृतिः सङ्कृतिश्चापि प्रोक्ताऽतिकृतिरुत्कृतिः॥
इत्युक्ता छन्दसां सञ्ज्ञा' इत्याद्युक्त्वा
`आरभ्यैकाक्षरात् पादादेकैकाक्षरवर्धितैः।
पृथक् छन्दो भवेत्पादैः यावत् षड्विंशतिं गतम्' इति॥6॥

`न्यासहीने हरेदायुः' इत्युक्तत्वेन[1] वराहमन्त्रत्रयस्य षडङ्गन्यासमन्त्रानाह - **प्रणवेनेति॥**

**प्रणवेन स्वनाम्ना च भूधरेण परात्मना।
सर्वज्ञसर्वशक्तिभ्यां षडङ्गानि विदो विदुः॥7॥**

**ज्ञानैश्वर्यप्रभानन्दतेजःशक्तिभिरेव वा।
पूर्णात्ममध्यगैः सर्ववैष्णवाङ्गान्यथो विदुः॥8॥**

ॐकारेण स्वनाम्ना वराहनाम्ना भूधरपदेन परात्मपदेन सर्वज्ञसर्वशक्तिपदाभ्यां षडङ्गानि ज्ञानिनो विदुः। सर्ववैष्णवमन्त्रसाधारणाङ्गन्यासमन्त्रानाह - **ज्ञानेति॥**

---

1 पूर्वं प्रथमाध्यायस्याष्टादशश्लोकावतरणिकायामयं श्लोकः पूर्णतयोल्लिखितः।

अत्र वेति प्रसिद्ध्यर्थः । `स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तम्' इति (ष.प्र.5-1) षट्प्रश्नोपनिषत्प्रयोगात् । पूर्णात्मशब्दयोर्मध्यं गच्छन्तीति पूर्णात्ममध्यगाः । तैर्ज्ञानादिशब्दैः सर्ववैष्णवमन्त्राणां षडङ्गानि न्यसनीयानीति विदुर्ज्ञानिन इत्यर्थः ।[1] स्फुटमुक्ताङ्गकेषु नृसिंहमन्त्रादिषु एतेषामयोगादनुक्ताङ्गेष्वेव एतान्यङ्गानीति ध्येयम् ॥7,8 ॥

4.4 श्रीकरमन्त्रः-4

अष्टाक्षरं श्रीकरमन्त्रमाह - तिष्ठेति ॥

तिष्ठोदादिः स्वजायायाः कारणं स्वाहया युतः ।
श्रीकरोऽष्टार्णको मन्त्रो गरुडारूढसंस्मृतिः ॥ 9 ॥

द्विर्भीषय त्रासय च प्रमर्दय तथैव च ।
प्रध्वंसयाथो रक्षेति पञ्चाङ्गश्चेदुदाहृतः ॥ 10 ॥

आदित्यचन्द्रावपि चक्रशङ्खौ
शङ्खप्रसूनाख्यनिधी दधानः ।
चिन्त्यः कराभ्यां वसु तर्पयन्नः
स्वाङ्कस्थलक्ष्मीर्गरुडांससंस्थः ॥[2]

---

1 मूलमातृकायामदृष्टं वाक्यमन्यत्र पठ्यते । तदिदम् `तथा च `पूर्णज्ञानात्मन' इत्यादिप्रकारेण मन्त्रसिद्धिर्ज्ञातव्या ।' इति ।

2 अयं ध्यानश्लोकः ग्रन्थकृता व्याख्यातः । सः प्रसिद्धप्रचलितपाठेषु नोपलभ्यते । छलारीये `श्रीकरमन्त्रस्य ध्यानविशेष उक्तस्तन्त्रे' इत्यवतार्य अयं श्लोकः उदाहृतः । अत्र तु व्याख्यानात् ग्रन्थकृल्लब्धपाठे ध्यानश्लोकोऽस्तीति सम्भाव्यते । बेङ्गळूरुनगरस्थशम्याप्रासग्रन्थालये हस्तलिखितपुस्तकद्वयेऽप्ययं श्लोकः मूलान्तर्गततया लिखितः । अयमप्यंशः अस्य व्याख्यानस्य वैशिष्ट्यमिति वक्तुं शक्यम् ।

उदिति शब्द एवादौ यस्य स उदादिः **तिष्ठ** तिष्ठशब्दः । **स्वजायायाः कारणं** स्वयं हरिस्तस्य जाया श्रीस्तस्याः कारणं श्रीकारणमित्यर्थकश्रीकर इति शब्द इति यावत् । **स्वाहया** स्वाहाशब्देन युतः श्रीकरो मन्त्र इत्यर्थः । तथा च `उत्तिष्ठ श्रीकर स्वाहा' इति मन्त्रनिष्पत्तिः । एतन्मन्त्रजपेन किं फलं भवतीत्यत आह - **श्रीकर इति ॥** सोऽयं मन्त्रः सम्पत्कर इत्यर्थः । ध्यानमाह - **गरुडेति ॥** गरुडारूढस्य हरेः संस्मृतिः कर्तव्येति शेषः ।न्यासमन्त्रमाह - **द्विरिति ॥** द्विः द्विवारमुच्चरितः भीषयेति शब्द इत्यर्थः । त्रासयेत्यादावपि द्विरिति सम्बध्यते । इति पञ्चाङ्गः । **चेत्** षडङ्गश्चेत् । ज्ञानैश्वर्येत्यादिना प्रागेवोदाहृत इत्यर्थः ।[1] अत्र षडङ्गानुष्ठानं पञ्चाङ्गानुष्ठानं वा कार्यमिति भावः । उक्तमेव ध्यानं पुनरधिकविधानायाह - **आदित्येति ॥**

कराभ्यां हस्ताभ्यामादित्यचन्द्रौ सूर्यसोमौ दधानः अपराभ्यां कराभ्यां चक्रशङ्खावायुधविशेषौ । पुनः कराभ्यां **शङ्खप्रसूननिधी** शङ्खनिधिं प्रसूननिधिं च दधानः ।

`महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव' इति

कोशोक्तनिधिष्वेवान्यतरस्य प्रसूनेति नामान्तरं ग्रन्थान्तरप्रसिद्धम् । निध्यन्तरं वेत्यदोषः । पुनरन्याभ्यां कराभ्यां वसु धनं तर्पयन् प्रीणयन् । `तृप प्रीणन' इति धातुः (धा.पा.1196) । ददान इति यावत् । `वसुतर्पयन्नित्येकं पदम् । कराभ्यां वसुना प्रीणयन्नित्यर्थ' इति **अपरे ।** ततश्चाष्टबाहुर्ध्येय इत्यर्थः । **श्रियो** लक्ष्म्याः सृष्ट्याद्युन्मुखत्वकरणात् श्रीकरः । ज्ञानमोक्षादिसम्पत्करत्वाद्वा श्रीकरः । **उत्तिष्ठ** अस्मभ्यं फलं दातुं शयनादासनाच्चोत्थानं कुरु इति मन्त्रार्थः ॥9,10 ॥

---

[1] मूलमातृकायामदृष्टं वाक्यमन्यत्र पठ्यते । तदिदम् - `पञ्चाङ्गश्चेत् इति पाठे चेत् यदि पञ्चाङ्गः अभिमतः तर्हि इति पञ्चाङ्गानीति शेषः ।' - इति ।

4.5 आनुष्टुभनृसिंहमन्त्रः-5

अथ नृसिंहमन्त्रमाह - **क्रूरमिति ॥**

क्रूरं वीरं बृहद्विष्णुं दीप्यन्तं विश्वतोमुखम् ।
पुंमृगेन्द्रं भयकरं शुभं मृत्योश्च मारकम् ।
नमामि स्वयमित्येष द्वात्रिंशार्णो मनुर्हरेः ॥ 11 ॥

क्रूरमित्यर्थकमुग्रमिति पदम् । **वीरं** वीरमिति पदम् । **बृहद्विष्णुं** बृहदित्यर्थकपदोपेतं विष्णुमिति पदम् । महाविष्णुमिति पदमिति यावत् । **दीप्यन्तं** तदर्थकं ज्वलन्तमिति पदम् । **विश्वतोमुखं** सर्वतोमुखमिति पदम् । **पुंमृगेन्द्रं** पुरुषवाचकपदोपेतं मृगेन्द्रवाचकपदं नृसिंहपदमिति यावत् । **भयकरं** भीषणमिति पदम् । **शुभं** तत्पर्यायं भद्रमिति पदम् । **मृत्योश्च मारकं** मृत्युमृत्युमिति पदम् । नमामीति पदम् । स्वयमित्यर्थकोऽहमिति शब्दः । **एष** उक्तपदजातयुक्तो **हरेर्नृसिंहस्य** मनुरित्यर्थः । तथा च

`उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्'

इति द्वात्रिंशदक्षरमन्त्रनिष्पत्तिः । वृत्तोत्फुल्लविशालाक्षत्व-विपक्षक्षयदीक्षितत्व-निनादस्फुटितब्रह्माण्डत्वादिना दैत्यानां क्रूरत्वेनोग्रः । नखाग्रशकलीकृतसर्वावध्यातिबलदितिनन्दनत्वेन वीरः । पदा विष्टब्धपातालत्व-मूर्धाविष्टत्रिविष्टपत्व-भुजप्रविष्टदिक्त्वैर्महाविष्णुः । सूर्यादीनां जगत्प्रकाशकत्वसामर्थ्यप्रदप्रकाशवत्त्वेन ज्वलन् । सर्वतोव्याप्तवदनत्वेन सर्वतोमुखः । नरवत्सिंहवद्विग्रहवत्त्वेन सर्वचेतनोत्तमत्वेन वा नरसिंहः ।

रोगभूतवेतालराक्षसादिविनाशकविभीषकनामवत्वेन भीषणः । स्वाश्रयेण सर्वस्यापि भद्रकरत्वेन भद्रः । स्वभक्तानां सम्प्राप्तमृत्युशत्रुगणविनाशकत्वेन मृत्युमृत्युः । तं प्रति तनुमनादीनामर्पणाख्यनमस्कारं करोमीति द्वात्रिंशदक्षनृसिंहमन्त्रार्थः ॥ 11 ॥

4.6 नृसिंहचतुर्विंशत्यक्षरः-6

नृसिंहस्य द्वितीयमन्त्रमाह - **द्विरिति** ॥

द्विर्जयस्योपरि निजं सोद्देशं सर्ववित्तथा ।
महातेजोबलं वीर्यं तादृशं स्वाहया युतम् ।
चतुर्विंशाक्षरो मन्त्रो निखिलेष्टप्रदायकः ॥ 12 ॥

द्विवारमुच्चरितस्य जयेति पदस्योपरि **निजं** नरसिंहेति पदं **सोद्देशं** चतुर्थ्यन्तम् । **सर्ववित्** एतदर्थप्रतिपादकं सर्वज्ञपदं च **तथा** चतुर्थ्यन्तम् । महातेजोबलपदं वीर्यपदं च **तादृशं** सोद्देशमन्ते स्वाहापदेन युतम् । तथा च 'जय जय नरसिंहाय सर्वज्ञाय महातेजोबलवीर्याय स्वाहा' इति चतुर्विंशत्यक्षरो मन्त्रः । तदर्थस्तु - भक्तानां बाह्यान्तरशत्रुविजयकारणत्वेन **जय** उत्कृष्टो वर्तस्व । हे स्वाहेति[1] ॥ 12 ॥

4.7 नृसिंहगायत्री-7

तृतीयं नरसिंहगायत्रीमन्त्रमाह - **विद्महे इति** ॥

विद्महेधीमहेपूर्वं स्वयं चैव महाबलः ।
प्रेरयेत्तन्न इत्येतन्मध्येऽनन्तः प्रकीर्तितः ॥ 13 ॥

---

1 'स्वीयं स्वीकुरुते यस्मात् स्वाहेत्युक्तो जनार्दनः' इत्यनुव्याख्यानवचनाद् [अनु.व्या.1-4-1] अस्यार्थो ज्ञेयः । मूलमातृकायामदृष्टानीमानि वाक्यान्यन्यत्र पठ्यन्ते - सर्वज्ञाय स्वपरगताखिलविशेषविषयकपूर्णज्ञानाय । महाबलतेजोबलवीर्याय निरवधिककान्तिशक्तिपराक्रमवते । नरसिंहाय नरमृगरूपविशिष्टाय तुभ्यं नमोऽस्त्विति शेष इति । - इति ।

विद्महे इत्यतः पूर्वं **स्वयं** स्वनामभूतो नरसिंहशब्दः । चशब्दाच्चतुर्थ्यन्त इति ग्राह्यम् । धीमहीत्यतः पूर्वं महाबलपदं चतुर्थ्यन्तम् । तन्नःप्रचोदयादिति पदयोर्मध्ये अनन्तशब्दः प्रकीर्तित इत्यर्थः । तथा च `नरसिंहाय विद्महे महाबलाय धीमहि । तन्नोऽनन्तः प्रचोदयात्' इति चतुर्विंशत्यक्षरनृसिंहगायत्रीनिष्पत्तिः । तदर्थस्तु - **नरसिंहाय** नरसिंहप्रीत्यर्थं **विद्महे** ज्ञानं सम्पादयामः । **महाबलाय** शत्रुविभीषकसामर्थ्योपेतनृसिंहप्रीत्यर्थं **धीमहि** ध्यानं सम्पादयामः । **तत्तु** ज्ञानं ध्यानं च **अनन्तः** देशकालगुणतः परिच्छेदशून्यो नृहरिः **नः** अस्मान् **प्रचोदयात्** प्रेरयेत् । `लिङर्थे लेट्' इति (पा.सू.3-4-7) सूत्राल्लेटो लिङश्चैकार्थत्वात् ॥13॥

मन्त्रत्रयस्यापि क्रमेणाङ्गन्यासमन्त्रानाह - **पादैरिति** ॥

पादैर्व्यस्तैः समस्तैश्च पदैश्चाङ्गं प्रकीर्तितम् ।
पूर्वयोस्तत्र पूर्वं तु सर्वज्ञेन षडङ्गकम् ।
तृतीयं तु द्विरावृत्तैः पादैरङ्गसमन्वितम् ॥ 14 ॥

पूर्वयोः प्रथमद्वितीययोर्मध्ये आद्ये द्वात्रिंशदक्षरे मन्त्रे व्यस्तैः समस्तैश्च पादैः पञ्चाङ्गं, द्वितीये चतुर्विंशत्यक्षरमन्त्रे **पदैः** षड्भिर्जयेत्यादिपदैः **अङ्गं** षडङ्गं प्रकीर्तितम् । तयोर्मध्ये पूर्वमन्त्रं **सर्वज्ञेन** सर्वज्ञपदेन षडङ्गं जानीयात् । **तृतीयं** गायत्रीमन्त्रं द्विरावृत्तैः `नरसिंहाय विद्महे' इत्यादित्रिभिः पादैरेव षडङ्गसमन्वितं जानीयादिति शेषः ॥14॥ ध्यानमाह - **ध्ययेदिति** ॥

ध्यायेन्नृसिंहमुरुवृत्तरवित्रिनेत्रं
जानुप्रसक्तकरयुग्ममथापराभ्याम् ।
चक्रं दरं च दधतं प्रियया समेतं

तिग्मांशुकोट्यधिकतेजसमग्र्यशक्तिम् ॥ 15 ॥

उरूणि विशालानि वृत्तानि रविवद्दीप्तानि त्रीणि नेत्राणि यस्य तम् । रविमण्डलवद्वृत्तत्रिनेत्रमिति परनिपातो वा[1]। जान्वोः **प्रसक्तं** संसक्तं **करयुग्मं** करद्वयं यस्य स तथा तम् । **अपराभ्यां** कराभ्यां चक्रं शङ्खं च **दधतं** दधानम् । **प्रियया** रमया **समेतं** सहितम् । **तिग्मांशुकोट्यधिकतेजसं** सूर्यकोटिभिरपि अधिकतेजोरूपम् । **अग्र्यशक्तिं** सर्वोत्कृष्टसामर्थ्यं नृसिंहं **ध्यायेत्** चिन्तयेदित्यर्थः ॥ 15 ॥

अत्रोक्तवक्ष्यमाणमन्त्रेषूक्तमेव ध्यानमिति न मन्तव्यं, किन्त्वधिकमप्यस्तीत्याशयेन द्विचतुर्बाहुत्वादिकमुपलक्षणमित्याह - **सर्वेष्वित्यादिना** ॥

सर्वेष्वपि हि मन्त्रेषु द्व्याद्यनन्तानन्तबाहुकः ।
चेतनान्तस्स्थमारभ्य सर्वगान्तस्वरूपवान् ॥ 16 ॥

अनन्तरूपो ध्येयोऽत्र स्वगुरूक्तानुसारतः ।
यथायोग्यं यथाशक्ति तत्तदायुधभूषणः ॥ 17 ॥

द्वौ आदी अनन्ता अन्ते येषां ते तथा तादृशा बाहवो यस्य स तथा। **चेतनान्तःस्थं** जीवान्तर्गतमारभ्य **सर्वगान्तस्वरूपवान् सर्वेषु** अव्याकृताकाशादिषु **गं** गतं व्याप्तं रूपमेव **अन्तं** चरमं यस्य स्वरूपस्य तदस्यास्तीति सर्वगान्तस्वरूपवान् । तथा च जीवान्तर्गतमिति सूक्ष्मं स्वरूपमारभ्य ततोऽपि ईषदधिकततोऽपीषदधिकततोऽपीषदधिकेत्यादिक्रमेण यावद्देशव्याप्तरूपपर्यन्तं विद्यमानानेकपरिमाणवत्त्वेन भगवान् ध्येय इति भावः । एतदपि उपलक्षणत्वेनोक्तं बोद्धव्यम् । एवमनन्तरूप इत्यत्राप्येकं रूपमारभ्यानन्तरूप इति द्रष्टव्यम् । नन्वेतत्सर्वमपि स-

---

1 निपात्यते विधिं विना कथ्यते इति निपात इति निपातशब्दार्थः ।

र्वाधिकारिकं किम् ? नेत्याह - **यथायोग्यमिति ॥** योग्यतायाः अधिकविषयत्वेऽपि तत्कालेऽभिव्यक्त्यभावे कथमित्यत आह - **यथाशक्तीति ॥** ननु योग्यतातिक्रमेण ध्यानप्रवृत्तेरेवाभावादिदं न वक्तव्यमिति चेत् । न । प्रयत्नसम्भवेन तन्निषेधार्थत्वात् । यद्वा यथायोग्यं स्वगुरूक्तानुसारत इति सम्बन्धः । स्वस्यैतावद्योग्यता वर्तत इति ज्ञानं च कथं भवतीत्यत आह - **स्वगुरूक्तानुसारत इति ॥** स्वगुरूक्तप्रकारेणेत्यर्थः । योग्यगुरुसम्पत्त्यभावे तु कथमित्यत आह - **यथाशक्तीति ॥** योग्यगुरुसम्पत्त्यभावे यावदायुधादियुतमूर्तिध्यानं[1] स्वप्रयत्नेन सुशकं तावदायुधादिविशिष्टो ध्येयः । तानि तानि तासां तासां मूर्तीनां यान्यागमेषूक्तानि आयुधानि भूषणानि च यस्य स तत्तदायुधभूषणः[2] ॥ 16,17 ॥

अथ चतुर्विंशतिबाहुयुक्तनरसिंहस्यायुधान्याह - **शङ्खेति ॥** [3]

चक्रशङ्खगदापद्मखड्गखेटाः सशार्ङ्गकाः ।
शरो मुसलवज्रौ च हलः पाशाङ्कुशौ तथा ॥ 18 ॥

शूलं च भिण्डिपालश्च पट्टिशोऽग्निर्वराभये ।
तर्कमुद्राऽक्षमाला च पुस्तकं च विदारणम् ।
इत्यादीन्यखिलान्येव विष्णोश्चिन्त्यानि बाहुषु ॥ 19 ॥

---

1 यावद्बाह्वादियुतेति प्रा.पाठः ज.पाठश्च मूलमातृकायां च । परन्तु अग्रे तावदायुधेति आयुधशब्दात् आयुधसब्दसहितः वि.पाठः आदृतः ।

2 एवं च अयं फलितः विग्रहः - आयुधानि च भूषणानि च = आयुधभूषणानि. तानि तानि आयुधभूषणानि यस्य सः = तत्तदायुधभूषणः - इति ।

3 पाठत्रयेऽपि शङ्खशब्दः प्रतीकत्वेन धृतः । मूलं तु चक्रशब्दादि । पाठभेदः स्याद्वा इति विचारणीयम् ।

खेटः चर्म। **भिण्डिपालो** नामायुधविशेषः[1]। **तर्कमुद्रा** ज्ञानमुद्रा। **विदारणं** परशुः। विदारणं तु हस्तद्वय इति सम्प्रदायविदः। ततो नायुधेषु न्यूनताशङ्कावकाशः। यद्वा आदिपदेन शक्तेः प्रासस्य वा ग्रहणम्। विष्णोर्बाहुषु **अखिलानि** समस्तानि चिन्त्यानि। आयुधानीति शेषः ॥18,19॥

4.8 हंसमन्त्राः 8-12

अथ हंसमन्त्रमाह - **वियदिति** ॥

वियत्स इति युग्मार्णो विपरीतश्च स स्मृतः।

वियत्पदवाच्याकाशबीजत्वात् **वियत्** हकारः बिन्दुयुतः, ततः **सः** सकारः इति **युग्मार्णः** द्व्यक्षरः। ततश्च हंस इत्याकारक एको मन्त्रः। स एव **विपरीतः** प्रतिलोमेनोक्तः सोऽहमित्याकारोऽपि द्व्यक्षरो द्वितीयमन्त्रः स्मृत इत्यर्थः। हंस इत्यक्षरयोः व्युत्क्रमेणोच्चारणे सति `सःहम्' इति भवति।[2]

तृतीयमन्त्रमाह - **सः सर्गहीन इति** ॥ [3]

स सर्गहीनो वेतश्च बिन्दुहीनोत्तरस्तथा ॥ 20 ॥

त्रय एते महामन्त्राः........................।

---

1 प्रा.पाठे आयुधभागं चिह्नयित्वा कवणि इति अधो लिखितम्। प्रायः प्रादेशिकभाषाशब्दः लिपिकृता स्वयं लिखितः स्यात्।

2 मूलमातृकायामदृष्टानीमानि वाक्यान्यन्यत्र पठ्यन्ते - अत्र सकारविसर्गस्य स्थानिवद्भावेन सकारत्वात् तस्य `ससजुषो रुः' इति [पा.सू.8-266] रुत्वे तस्य च `हशि चे' [पा.सू.6-1-114]त्युत्वे गुणे च सोऽहमिति भवतीति भावः ॥ - इति।

3 ससर्गहीन इतीति विसर्गरहितः इति प्रा.पाठः प्रामादिकः। `एतत्तदोः सुलोपोऽनञ्समासे हलि' इति सूत्रं [पा.सू.6-1-132] सर्वनामशब्दविषयम्। प्रकृते स इति सकारोऽभिप्रेत इति विसर्गेण अवश्यं भाव्यम्।

सः सकारः सर्गेण विसर्गेण रहितः ।[1] वेतः वाकारेण युतः । उत्तरः उपरिस्थितो हकारः बिन्दुहीनो दीर्घयुतश्च । तथा च `स्वाहा' इति तृतीयमन्त्रः स्मृत इत्यर्थः ॥20॥

महामन्त्रत्वमेव विशदयति - पुरुषार्थेति ॥

.... पुरुषार्थचतुष्टये ।
कल्पवृक्षाः प्रिया विष्णोर्विशेषाज्ज्ञानदायकाः ।
तैरेव तु द्विरावृत्तैरङ्गमेषां प्रकीर्तितम् ॥ 21 ॥

पुरुषार्थचतुष्टये धर्मादिमोक्षान्तचतुर्विधपुरुषार्थे कल्पवृक्षा इव कल्पवृक्षाः । हंसमन्त्रस्याङ्गन्यासमाह - तैरेवेति ॥ द्विरावृत्तैः तैरेव मन्त्रैः एषां हंसमन्त्राणाम् अङ्गं षडङ्गं प्रकीर्तितम् ।

एतेषु मन्त्रेष्वपूर्वं कञ्चन विशेषमाह - श्वासेति ॥

श्वासरूपो जपो नित्यमुभयोर्विद्वदज्ञयोः ।
एकविंशत्सहस्रात्मा सषङ्खतमहर्निशम् ।

ज्ञान्यज्ञानिनोः उभयोः अपि नित्यं प्रतिदिनं श्वासरूपः एतन्मन्त्रजपो वर्तत इत्यर्थः । प्रतिदिनं क्रियमाणो जपः कियत्सङ्ख्याक इत्यत आह - एकविंशत्सहस्रात्मेति ॥ अहश्च निशा च अहर्निशम् । एकवद्भावो नपुंसकं च । तत् अहर्निशम् । `कालाध्वनोरत्यन्तसंयोग' (पा.सू.2-3-5) इति द्वितीया । गुणक्रियादिभिः

[1] अत्र `उपलक्षणमेतत् । अकाररहितश्चेति द्रष्टव्यम् ।' - इति मूलमातृकायामदृष्टे वाक्ये अन्यत्र पठ्येते ।

कालाध्वनोरत्यन्तसंयोगे द्वितीया स्यादिति तदर्थः । अन्तं विराममतिक्रान्त इति अत्यन्तः । स चासौ संयोगः निरन्तरसन्निकर्षः । स च सामर्थ्यादनयोः [कालाध्वनोः] गुणादिभिरेव[1] । `मासमधीते'[2] इत्यत्रेव भवतीति क्रियया अत्यन्तसंयोगः कालस्यास्तीति द्वितीया । अहनि एकविंशत्सहस्रात्मा निशायां चैकविंशत्सहस्रात्मा जपो भवति इति प्रत्येकं योज्यम् । तेन `मासव्रतं सार्धशतश्वासकालैरकल्पयद्' इत्यादिना (म.ता.नि.22-177) न विरोधः । गणनप्रकारस्तु[3] एकमासस्य सपञ्चाशच्छतसहस्रश्वासत्वे द्वादशमासात्मकसंवत्सरस्य अष्टादशशतसहस्रसङ्ख्याकश्वासा भवन्ति । एकसंवत्सरस्याष्टशतोत्तरसहस्रश्वासत्वे द्वादशसंवत्सरस्य गणने एकविंशत्सहस्रत्वे सति षड्शतसङ्ख्याकश्वासा भवन्ति । `तदहः केशवाज्ञया' इति (म.ता.नि.22-176) एकस्यैवाह्नो द्वादशाब्दत्वोक्त्या अह्न्येव षड्शतोत्तरेकविंशत्सहस्रश्वासा भवन्ति । रात्रावप्येवमेवेति अहोरात्रं मिलित्वा ४३२००[4] द्विशतोत्तरत्रिचत्वारिंशत्सहस्रसङ्ख्याकश्वासा भवन्ति । एतावत्सङ्ख्याकश्वासमन्त्रे एतावत्सङ्ख्याकवायुरूपाणि वर्तन्ते । वायुरूपेषु तावत्सङ्ख्याकहंसनामकभगवद्रूपाणि सन्तीति ज्ञेयम् । अस्मिन् पक्षे महाभारततात्पर्यनिर्णयोक्ताहःशब्दो मुख्यार्थो भवतीति ज्ञेयम् । ॥ छ ॥

अन्ये तु अहर्निशमित्यव्ययम् । प्रतिदिनमित्यर्थः । ननु एकैकस्मिन् दिवसे श्वासरूपहंसमन्त्रजपस्य सषड्शतैकविंशत्सहस्रसङ्ख्याकत्वमुक्तम् । न च तद्युक्तम् । महाभारततात्पर्यनिर्णयविरोधत् । तथा हि

`एकाहेन बृहस्पतिम् ।

स्वाज्ञया चारयामास क्षिप्रं द्वादशराशिषु ॥

---

1 `आदिपदेन क्रिया' इति मूलमातृकायामुपरि विवृतम् ।

2 कालाध्वनोरितिसूत्रस्योदाहरणतया अयं प्रयोगः सिद्धान्तकौमुद्यादिषु प्रदर्शितः ।

3 इत आरभ्य `तात्पर्यनिर्णयोक्ताहःशब्दो मुख्यार्थो भवतीति ज्ञेयं' इत्येतत्पर्यन्तो भागः प्रतिपङ्क्ति आद्यन्तयोः प्रा.पाठे `='चिह्नेन अङ्कितम् । एतावान् भागः ज.पाठे नास्ति ।

4 मूलकृतैवात्र देवनागरीसङ्ख्यासङ्केता उपयुक्ताः ।

द्वादशाब्दमभूत्तेन तदहः केशवाज्ञया' इति (म.भा.ता.नि. 22-176)

एकस्यैवाह्नो द्वादशराशिषु गुरुसञ्चारेण द्वादशाब्दरूपत्वं विधाय `मासव्रतं सार्धशत-श्वासकालैरकल्पयत्' इति। (म.भा.ता.नि. 22-177) सचतुश्चत्वारिंशच्छतसङ्ख्यानां मासानां व्रतसिद्ध्यर्थं सपञ्चाशच्छतश्वासकालस्य मासरूपत्वमुक्तम् । तथा च श्वासगणने क्रियमाणे सति एकस्मिन्नहन्येव सषड्शतैकविंशत्सहस्रसङ्ख्याकश्वासा भवन्ति। एवं चात्र अहर्निशमित्यहोरात्रात्मकदिवसे श्वासरूपजपस्य सषड्शतैकविंशत्सहस्रसङ्ख्याकत्वोक्तौ तद्विरोधः स्यादेवेति चेत् । न। स्यादेतदेवं यदि तात्पर्यनिर्णयोक्ताहःशब्दस्याहर्मात्र-परत्वं स्यान्न चैवम् । किं नामाहोरात्रात्मकदिवसपरत्वमेव। न चाहःशब्दस्य दिवस-परत्वमप्रसिद्धमिति वाच्यम् । `पञ्चदशाहानि मासाः' `दशाहेन तु कर्कन्धुः' इत्यादि-श्रुतिस्मृति (भा.3-32-2) प्रसिद्धत्वादित्याहुः ॥21॥

`विद्वदज्ञयोः' इत्युक्तम् । तर्ह्युभयोरपि जपप्रयुक्तं फलं भवति किमित्यतो ज्ञानि-नामेव तत्फलं भवति नान्येषामित्याशयेन ज्ञानिनां तत्फलप्राप्तावुपायमाह - **अर्पणीय इति॥**

अर्पणीयो हरौ नित्यं प्रातर्योगो महानयम् ॥ 22 ॥

प्रातर्योग इति हंसमन्त्रस्य सञ्ज्ञा। उक्तं च ऋग्भाष्ये `प्रातर्योगेन गम्यते' (ऋ.भा.अ2-सू1-मं1) इति। `प्रातर्योगेन हंसमन्त्रेण' इति (ऋ.भा.टी.अ 2-सू1-मं1) तट्टीकोक्तेः। प्रातरेव युज्यते आरभ्यते इति **प्रातर्योगः** पूर्वदिनकृतं जपं हरौ प्रातः समर्प्य पुनरयं मन्त्रः प्रातरेवारम्भणीय इति। तथा च **महान्** महाफलप्रदो बहुकालीनो वाऽयं **प्रातर्योगः** श्वासरूपहंसमन्त्रजपो **नित्यं** प्रतिदिनं शयनादुत्थितेन परिशुद्धेन पुरुषेण हरावर्पणीय इत्यर्थः। तथा च परमात्मनि समर्पणलक्षणोपाय एव फलप्रापकः। न च सोऽज्ञानिनामस्ति। तथा च ज्ञानिभिरेव तत्फलं प्राप्यते नान्यैरिति भावः। श्वासेत्युप-

लक्षणम् । उच्चारणरूपजपोऽपि ग्राह्यः । अत्रोक्तं हंसरूपं विष्णोरिव वायोरप्यस्तीति ज्ञातव्यम् । यथोक्तं बृहद्भाष्ये -

`तस्माद्विष्णोर्व्रतस्यानु नित्यं प्राणव्रतं चरेत् ।
हंसोपास्तिः श्वासरूपे तयोर्व्रतमुदीरितम् ॥
हंसरूपौ हि तौ देवौ श्वासोच्छ्वासप्रवर्तकौ' इति (बृ.भा. अ1-सप्तान्नब्राह्मणम्) ।
`मेघसंस्थं हंसरूपं तं विष्णुं परमेश्वरम् ॥
विरिञ्चिशिवपूर्वेभ्यो नृसिंहानुष्टभं पराम् ।
उच्चारयन्तमर्थांश्च व्याचक्षाणं समन्ततः ॥
ददृशुर्मुनयो दिव्यमाचार्यं ब्रह्मशर्वयोः ।
एवं वायुं च ददृशुः तत्र हंसस्वरूपिणम् ।
शिवादिभ्यो व्याहरन्तं तामेवानुष्टभं पराम्' इत्यैतरेयभाष्ये
(ऐ.भा.प्रघट्टक2-अध्याय2-खण्ड5) च ॥ 22 ॥

उभयविधजपानुष्ठातुः फलमाह - **अशेषेति** ॥

अशेषदोषदहनस्तत्वज्ञानप्रदायकः ।
अष्टैश्वर्यप्रदश्चैव कृतादौ समुपासताम् ।

अशेषदोषदहनः प्रदायक इति स्वार्थे णिच् । नन्वनेन योगेन भगवन्तमुपासतामणिमाद्यैश्वर्यप्राप्तिः सर्वयुगेष्वपि भवति किमित्यतो नेत्याह - **कृतादाविति** ॥ आदिशब्देन त्रेताद्वापरयोर्ग्रहणम् । कलियुगे मन्त्रवीर्यतिरस्कारस्य वक्ष्यमाणत्वात् (तं.सा.4-41) । तथा च **कृतादौ** कृतत्रेताद्वापरयुगेषु **समुपासतां** मन्त्राभ्यासरूपोपासनां कुर्वतां क्रमादष्टैश्वर्यप्रद इत्यादि ।

हंसमन्त्रान्तरमाह - **तारेति** ॥

तारयोगोऽप्येवमेव ब्रह्मादावेव वर्तते ॥ 23 ॥

तारेण **योगः** सम्बन्धः यस्य मन्त्रत्रयस्य स तारयोगः । स एवमेवोक्ताशेषफलक एव, पृथक् मन्त्र एवेति वा । तेनैते मालामन्त्रा इत्युक्तं भवति । ततश्च `ओं हंसः सोऽहं स्वाहा' इति मन्त्रनिष्पत्तिः । अयं चतुर्थो मन्त्रः सर्वाधिकरिको नेत्याह - **ब्रह्मादाविति** ॥ तेन त एव जपाधिकारिणोऽन्ये सर्वे ज्ञानमात्र इत्युक्तं भवति ॥23 ॥

ध्यानमाह - **ध्यायेदिति** ॥

ध्यायेद्रवीन्दुकरमिन्दुसहस्रलक्ष-

कान्तिं प्रियासहितमास्थितमिन्दुबिम्बे ।

शङ्खारिदोर्द्वयमुदर्कमहेन्दुबिम्बात्

संसिच्यमानममृतेन रमाधिनाथम् ।24 ॥

-- **रवीन्दुकरम्** ऊर्ध्वहस्तद्वये रवीन्दुयुक्तम् । अधिकारियोग्यतापेक्षया सहस्रलक्षेति । **इन्दुबिम्बे** चन्द्रमण्डले **प्रियया** रमया सहितमास्थितम् । प्रियाभिः क्रुद्धोल्कादिमूर्तिभिः सहितं वा । **उदर्कमहेन्दुबिम्बात्** विंशत्सहस्रयोजनविस्तृतत्वेनोदर्कादुत्कृष्टत्वात् उपरिगताद्वा महाचन्द्रमण्डलैकदेशान्निःसृतेन अमृतेन संसिच्यमानम् ॥24 ॥

सप्ताक्षरमन्त्रध्याने विशेषमाह - **अन्त्यस्येति** ॥

अन्त्यस्य रक्तवर्णो वा ध्येयो विष्णुः सनातनः ।

विद्युद्वर्णोऽथ वा ज्ञेयः .... ॥

अन्त्यस्य चतुर्थमन्त्रस्य रक्तवर्णो विद्युद्वर्णो वा विष्णुर्ध्येयः ।

पञ्चमहंसमन्त्रमाह - **शक्त्येति** ॥

.... शक्त्येतः पञ्चमन्त्रयुक् ॥ 25 ॥

अष्टाक्षरो महामन्त्रस्तैरेवाङ्गैः समन्वितः ।
अन्त्यध्यानयुतश्चैव निश्शेषपुरुषार्थदः ॥ 26 ॥

शक्त्या बिन्दुसमेतह्रीङ्कारेण **इतो** युक्तो अयं मन्त्रसमुदायः **पञ्चमन्त्रयुक्** पञ्चमन्त्रत्वेन युगित्यर्थः । तथा च `ओं ह्रीं हंसः सोहं स्वाहे'त्यष्टाक्षरहंसमालामन्त्रनिष्पत्तिः । त्यजति त्याजयति दोषानिति हम् । गुणसारत्वात्सः । हश्चासौ सश्चेति हंसः । परोक्षत्वात्सः । सर्वाहेयत्वादहम् । स्वीयसारविषयस्वीकर्तृत्वात् स्वाहेति मन्त्रार्थः । **तैः** पञ्चमन्त्रैरेवाङ्गैः पञ्चाङ्गैः । **अन्त्यस्य** चतुर्थमन्त्रस्य यद्ध्यानं `रक्तवर्णो वे' (तं.सा.4-25) त्यादिनोक्तं तेन युत इत्यर्थः ॥25,26 ॥

4.9 दधिवामनमन्त्रः-13

अथ दधिवामनमन्त्रापरसञ्ज्ञकं भोज्याधिपतिमन्त्रमाह - **मूलमिति** ॥

मूलं नः प्रतिषेधश्च सोद्देशो भगवानपि ।
विष्णुर्भोज्याधिपः स्वाहायुक्तोऽष्टादशवर्णकः ॥ 27 ॥

अङ्गानि तत्पदैरेव मन्त्रचिन्तामणिः स्वयम् ।
यथेष्टभक्ष्यभोज्यादिदाता मुक्तिप्रदायकः ॥ 28 ॥

मूलं ॐकारः । **नः** नकारः । **प्रतिषेधः** तदर्थको मकारः । **सोद्देशः** चतुर्थ्यन्तो **भगवान्** भगवच्छब्दः । **विष्णुः** विष्णुशब्दः । **भोज्याधिपः** तदर्थको भोज्याधिपतिशब्दः,[1] **अपि**पदात् उभावपि चतुर्थ्यन्तौ । **स्वाहायुक्त**श्च । तथा

1 तदर्थकोऽन्नाधिपशब्दः इति ज.पाठः ।

चैवं निष्पत्तिः - ॐ नमो भगवते विष्णवे भोज्याधिपतये[1] स्वाहेति। गुणपूर्णत्वात् ॐ। `विष्लृ व्याप्ता'विति (धा.पा.1095) धातोर्व्याप्ताय **अन्नस्य** सर्वेन्द्रियोपभोग्यविषयस्य स्वामिने **नमः** स्वाहेति मन्त्रार्थः। **तत्पदैः** मन्त्रपदैः **अङ्गानि** षडङ्गानि। **मन्त्रचिन्तामणिः** मन्त्रश्रेष्ठः। **यथेष्टं** यथाकामम्। **भक्ष्यं** दन्तैः छित्वा छित्वा ग्राह्यमपूपादि। **भोज्यं** जिह्वाव्यापारैकसाध्यमोदनादि। आदिपदेन लेह्यचोष्यपेयादिग्रहणम्। **लेह्यं** मुखलालाजलेन द्रवीभावमापाद्यमानं खण्डशर्करादि। **चोष्यं** रसमात्रं गृहीत्वा त्याज्यमिक्षुकादि। **पेयं** दन्तजिह्वाव्यापारानपेक्षं गुडोदकादि[2]। तेषां दाता। **मुक्तिप्रदायकः**। स्वार्थे णिच्। मुक्तिप्रद इत्यर्थः ॥27,28॥

ध्यानमाह - **ध्यायेदिति**॥

ध्यायेत्सुशुक्लमरविन्ददलायताक्षं
सौवर्णपात्रदधिभोज्यमथामृतं च।
दोर्भ्यां दधानमखिलैश्च सुरैः परीतं
शीतांशुमण्डलगतं रमया समेतम् ॥ 29 ॥

सुशुक्लम् अतिश्वेतम्। अरविन्दस्य **दलम्** अर्धं तदिव आयते अक्षिणी यस्य सः अरविन्ददलायताक्षस्तम्। सौपर्णपात्रे स्थितं दधिमिश्रितं भोज्यमन्नममृतं च **दोर्भ्यां** दक्षिणवामाभ्यां दधानम्। अनेन द्विभुजत्वमुक्तं भवति।

`रुग्मपात्रस्थमन्नं सुललितदधिखण्डं पाणिना दक्षिणेन।
कलशममृतपूर्णं वामहस्ते दधानम्' इति वामनपुराणवाक्यात्[3]। `पयः कीलालममृतम्' इत्यमराद् (अ.को.1-11-155) अमृतं जलमिति **केचित्** ॥29॥

---

1 अन्नाधिपतये इति ज.पाठः।

2 पानकादीति ज.पाठः।

3 वामनपुराणान्तर्गतदधिवामनस्तोत्रम्।

4.10 वामनाष्टाक्षरः-14

इदानीं वामनमन्त्रमाह - **अमृतमिति ॥**

अमृतं स्वयमुद्देशयुक्तः सहृदयो मनुः ।
सतारोऽष्टाक्षरोऽङ्गानि पदैर्व्यस्तैः समस्तकैः ॥ 30 ॥

`वकारोऽमृतबीजं स्यात्' इति वचनेनामृतबीजत्वादमृतं वकारो बिन्द्वन्तः **स्वयं** वामनः **उद्देशयुक्तः** चतुर्थीयुक्तः **सहृदयः** सनमःशब्दः **सतारः** सप्रणवः अष्टाक्षरो मनुः । `ओं वं वामनाय नमः' इति मन्त्रनिष्पत्तिः । **वामत्वेन** मङ्गलत्वेन **स्वयं नयति** प्रवर्तते सौन्दर्यं भक्तानां प्रापयतीति वा वामनस्तस्मै नमोऽस्त्वित्यर्थः । **व्यस्तैः** भिन्नैः पदैः **समस्तैः** मिलितैश्चाङ्गानि पञ्चाङ्गानि ॥30॥

ध्यानमाह - **उद्यदिति ॥**

उद्यद्रविप्रभमरीन्द्रदरौ गदां च
ज्ञानं च बिभ्रतमजं प्रियया समेतम् ।
विश्वावकाशमभितः प्रतिपूरयन्तं
भासा स्वया स्मरत विष्णुमजादिवन्द्यम् ॥ 31 ॥

उद्यदादित्यसमानकान्तिम् । **अरीन्द्रः** चक्रं **दरः** शङ्खः तौ बाहुभ्यां बिभ्रतम् । **ज्ञानं** ज्ञानमुद्राम् । **विश्वावकाशं** समग्रस्थानं **स्वया भासा** शरीरकान्त्या **अभितः** सर्वत्र **प्रतिपूरयन्तं** प्रतिभासयन्तम् । विष्णुं स्मरतेत्यर्थः ॥31॥

4.11 वामन[त्रिविक्रम]गायत्रीमन्त्रः-15

वामनगायत्रीमप्याह - **त्रिविक्रम इति ॥**

त्रिविक्रमश्च सोद्देशो विश्वरूपश्च तत्परः[1]।
धीविदौ च महे विष्णुस्तन्नःप्रेरणमध्यगः ॥ 32 ॥

सोद्देशः चतुर्थीसहितः त्रिविक्रमशब्दः। विश्वरूपशब्दः चशब्दात् **सोद्देशः**। **तत्पुरः** चतुर्थ्यन्तत्रिविक्रमविश्वरूपशब्दयोः पुरः **धीविदौ** धीशब्दविच्छब्दौ। अत्र यथायोगं सम्बन्धो न यथाक्रमम्। तयोरुपरि महे इति शब्दः चशब्दान्महिशब्दश्च। तदुत्तरं तन्नः प्रचोदयादिति **तन्नःप्रेरणयोः** तन्नःप्रेरणशब्दयोर्मध्यगः विष्णुशब्दश्च। तथाच `त्रिविक्रमाय विद्महे विश्वरूपाय धीमहि। तन्नो विष्णुः प्रचोदयात्' इति मन्त्र-निष्पत्तिः। ऋषिदेवताध्यानानि तु पूर्वमन्त्रोक्तान्येव। **त्रिभिः** सत्वादिगुणैः विशेषे-णानन्याधीनः **क्रमः** सृष्ट्यादिक्रमो यस्मात्। त्रयो **विक्रमा** पादविक्षेपा यस्येति वा तस्मै तत्प्रीत्यर्थं विद्महे। **विश्वं** गुणपूर्णं रूपं यस्येति **विश्वं** जगत् **रूपं** प्रतिमा यस्येति वा विश्वरूपः तत्प्रीत्यर्थं ध्यानं सम्पादयाम इति मन्त्रार्थः।[2] ॥32 ॥

4.12 परशुराम-दाशरथिरामषडक्षरः-16

अथ भार्गवदाशरथिनाममन्त्रौ युगपदाह - **स्वयमिति** ॥

स्वयमुद्देशसंयुक्तस्तदाद्यर्णपुरस्सरः।
सनतिः षडक्षरो मन्त्रो वर्णैरङ्गक्रिया मता ॥ 33 ॥

स्वयं रामः **उद्देशसंयुतः** चतुर्थीयुतः। तस्य यः **आद्यर्णः** राकारः स **पुरःसरः** आदौ यस्य सः। स च सबिन्दुः अन्ते **सनतिः** नमःशब्दयुतः

---

[1] प्रचलितसर्वकोशेषु `तत्परः' इत्येवास्ति। व्याख्यानुसारं तु `तत्पुरः' इति पाठः।

[2] `तन्नो विष्णुः प्रचोदयात्' इति भागस्यार्थः न व्याख्यातः। नृसिंहमन्त्रवत् ज्ञेय इत्याशयः स्यात्। तत्र हि `तन्नोऽनन्तः प्रचोदयात्' इत्यस्य `तत्तु ज्ञानं ध्यानं च अनन्तः देशकालगुणतः परिच्छे-दशून्यो नृहरिः नोऽस्मान् प्रचोदयात् प्रेरयेत्। `लिङर्थे लेट्' इति [पा.सू.3-4-7] सूत्राल्लेटो लिङश्चैकार्थत्वात्' इति व्याख्या कृता।

षडक्षरो राममन्त्रः । तथा च `रां रामाय नमः' इति मन्त्रोद्धारः । षड्भिर्वर्णैः अङ्गक्रिया षडङ्गन्यासः ॥33 ॥

परशुरामध्यानं निरूपयति - अङ्गारेति ॥

अङ्गारवर्णमभितोऽण्डबहिःप्रभाभि-
र्व्याप्तं परश्वधधनुर्धरमेकवीरम् ।
ध्यायेदजेशपुरुहूतमुखैः स्तुवद्भि-
रावीतमात्मपदवीं प्रतिपादयन्तम् ॥ 34 ॥

रक्तवर्णम् अभितः अण्डमभितः अण्डान्तरम् अण्डाद्बहिश्च प्रभाभिर्व्याप्तम् । एकवीरं मुख्यवीरम् । आवीतं परिवृतम् । आत्मपदवीं स्वस्वरूपमार्गं प्रतिपादयन्तम् उपदिशन्तं ध्यायेत् चिन्तयेदित्यर्थः ॥34 ॥

दाशरथिध्यानमाह - श्याममिति ॥

श्यामं रवीन्द्वमितदीधितिकान्तियुक्तं
ज्ञानं शरं च दधतं प्रियया समेतम् ।
स्वात्मस्वरूपममितं हनुमन्मुखेषु
सन्दर्शयन्तमजितं स्मरतोरुगीर्भिः ॥ 35 ॥

रवीन्द्वमितदीधितिकान्तियुक्तं रवेर्दीधितेरधिका या दीधितिः, इन्दोः कान्तेरधिका या कान्तिस्ताभ्याम् अमिताभ्याम् अपरिच्छिन्नाभ्यां युक्तम् । ज्ञानं ज्ञानमुद्रां शरं बाणं दधतं, स्वात्मस्वरूपं स्वस्वरूपम् उरुगीर्भिः सन्दर्शयन्तमित्यन्वयः । यद्वा नित्यत्वादिना उत्कृष्टाभिः गीर्भिः वेदवाग्भिः । संस्मरत वेदार्थविचारपूर्वकं तदर्थकगुणवत्त्वेन भगवत्स्मरणं कुरुध्वमिति भावः ॥35 ॥

4.13 भार्गवमन्त्रौ राघवमन्त्रौ च 17-20

इदानीं रामयोरन्यावपि मन्त्रावाह - **निजेति ॥**

निजगोत्रं तु सोद्देशं पूर्वाक्षरपुरस्सरम् ।
नत्यन्तं तारपूर्वं च मनुरष्टाक्षरो मतः ।

निजगोत्रं भार्गवस्य भार्गव इति दाशरथेः राघव इति। पूर्वाक्षरे `भां'`राम्' इत्येते पुरस्सरे आदिनी यस्य तत् । **नत्यन्तं** नमःशब्दान्तं तारपूर्वं चेति यत् स अष्टाक्षरो मनुर्मत इत्यन्वयः । तथा च `ओं भां भार्गवाय नमः' इति परशुरामस्य, `ओं रां राघवाय नमः' इति दाशरथिरामस्य चाष्टाक्षरोऽपरो मन्त्रः । रमणीयत्वाद्रामः । रश्च अमश्चेति वा रामः । `आनन्दरूपो निष्परीमाण' इति श्रुतेः[1]। भारतिज्ञानरूपत्वाद्वरणीयत्वाच्च भार्गवः[2] भृगुकुलाविर्भूतत्वाद्वा, रघुकुलाविर्भूतत्वाद्राघवः तस्मै नम इति मन्त्रत्रयार्थः ।

एकाक्षरं मन्त्रद्वयमाह - **त इति ॥**

ते च[3] बीजे बीजभूते धर्मादीनामशेषतः ॥ 36 ॥

---

1 गी.भा.उदा.10

2 `भारूपत्वात् भा। रतिरूपत्वात् रः। ज्ञानररूपत्वात् गः। तथा च कर्मधारयः।' इति मूलमातृकायामुपरि दृश्यते। `भारूपत्वात् भा' इति वाक्यं चिह्नयित्वा `भा दीप्तौ' इति, `ज्ञानररूपत्वात् गः' इति वाक्यं चिह्नयित्वा `गम्लृ गतौ' इति च लिखितम् । आहत्यायं निर्गलितोऽर्थः - भा दीप्तौ इति धातोः भारूपत्वात् भा। रमु क्रीडायाम् इति धातोः रतिरूपत्वात् रः = र् । गम्लृ गतौ इति धातोः येये गत्यर्थकास्तेते ज्ञानार्थकाः इति न्यायाच्च ज्ञानरूपत्वात् गः। वृञ् वरणे इति धातोः वरणीयत्वात् वः। तथा च, भा चासौ र् चासौ गश्चासौ वश्चासौ भार्गवः - इति।

3 प्रचलितसर्वकोशेषु `ते च' इत्येवास्ति। व्याख्यानुसारं तु `ते तु' इति पाठः।

ते तु बीजे भां रामिति बीजे **अशेषतः** सर्वेषां धर्मादीनां चतुर्णां **बीजभूते** जनके। तथा च `रां' `भाम्' इति मन्त्रद्वयम् । अत्र ऋषिध्यानन्यासादिकं पूर्वमन्त्रोक्तमेव। छन्दस्तु पूर्वमन्त्रयोर्गायत्री अन्तिमयोस्तु एकाक्षरत्वादुक्तनामकं छन्दः। छन्दःशास्त्रेष्वेकाक्षरस्योक्तताप्रसिद्धेरिति ज्ञेयम् । एवं सर्वत्राप्येकाक्षरमन्त्रे द्रष्टव्यम् ॥36॥

उक्तमन्त्राणां फलमाह - **एत इति ॥**

एते विजयदा मन्त्रा ज्ञानमोक्षप्रदायकाः ।
हिरण्यरत्नराज्यादिसमभीष्टसुरद्रुमाः ॥ 37 ॥

एते मन्त्रा इत्यन्वयः। हिरण्याद्येव समभीष्टं, तद्दाने सुरद्रुम इव विद्यमाना इत्यर्थः ॥37॥

4.14 अष्टादशाक्षरः कृष्णमन्त्रः 21

अथ मदनगोपालापरपर्यायगोपालकृष्णमन्त्रमाह - **कृष्ण इति ॥**

कृष्णो गोविच्च कामेतो सोद्देशो वल्लवीजनः ।
प्रियश्च तादृशः स्वाहायुगष्टादशवर्णकः ।
पदैरङ्गानि सम्प्रीतिकाममोक्षप्रदो मनुः ॥ 38 ॥

कामेतः कामः क्लीं तेनेतः कृष्णः, **गोवित्** गोविन्दः सोद्देशः, **वल्लवीजनः** गोपीजनः, प्रियश्च वल्लभश्च समुच्चितम् । एतेन गोपीजनवल्लभपदं लभ्यते। तादृशश्चतुर्थ्यन्तः स्वाहायुक् अष्टादशवर्णको मन्त्रः। तथा च `क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा' इति गोपालकृष्णाष्टादशाक्षरो मन्त्रः। अङ्गान्याह - **पदैरङ्गानीति ॥** पञ्चाङ्गानीत्यर्थः। तत्प्रकारस्तु `क्लीं हृदयाय नमः' इत्यादि-

नाऽवधेयः ।[1] फलमाह - **सम्प्रीतीति ॥ सम्प्रीतिः** सुखं समीचीनप्रसादो वा। काम्यन्त इति **कामाः** विषयाः। **मोक्ष** आत्यन्तिकानिष्टनिवृत्तिसहितेष्टप्राप्तिलक्षणः तेषां प्रदायकः ॥38 ॥

ध्यानं निरूपयति - **ध्यायेदिति ॥**

ध्यायेद्धरिन्मणिनिभं जगदेकवन्द्यं
सौन्दर्यसारमरिशङ्खवराभयानि।
दोर्भिर्दधानमजितं सरसं[2] च भैष्मी-
सत्यासमेतमखिलप्रदमिन्दिरेशम् ॥ 39 ॥

हरिन्मणिनिभम् इन्द्रनीलमणिवर्णम् । **सौन्दर्यसारं** सौन्दर्यवरम् । `रसः सारो वरश्चेति शब्दाः पर्यायवाचका' इत्यभिधानात्[3]। **सरसं** स्नेहसहितं यथा भवति तथा। **भैष्मी** रुग्मिणी। **सत्या** सत्यभामा च ताभ्यां समेतम् । यद्वा **सरसं** रसेन रागेण स्नेहेनेति यावत् । तेन सहितमित्यर्थः । सुरसमितिपाठे सम्यक् सर्वोत्तममित्यर्थः । रसशब्दस्योत्तमार्थकत्वात् । **कस्य** सुखस्य **लः** परिग्रहः अस्यास्तीति क्ली । `बिन्दुर्वाक्याधिकत्वं तु' इति वचनादाधिक्यं बिन्द्वर्थः । सुखरूपत्वाद् ज्ञानरूपत्वात्सर्वचेष्टकत्वाद्बलरूपत्वात्कृष्णः । क् चासौ ऋ चासौ ष् चासौ णश्चेति विग्रहः । नियमनादिना सर्वलोककर्षणाद्वा कृष्णः । `कृष विलेखन' इति धातुः (धा.पा.990) । `यतः कर्षसि देवेश नियम्य सकलं जगत्' इत्यादिस्मृतेः (गी.भा.उदा.5-1) । वेदवेद्यत्वाद्धानाख्यकिरणसम्बन्धाद्वा गोपालनेन तत्सत्ताकर्तृत्वाद्वा गोविन्दः । गोपिकाज-

---

1 तथा चेत्थमङ्गन्यासः - क्लीं हृदयाय नमः । कृष्णाय शिरसे स्वाहा । गोविन्दाय शिखायै वौषट् । गोपीजनवल्लभाय कवचाय हुम् । स्वाहा अस्त्राय फट् - इति ।

2 सुरसमिति गु.दी.सू.पाठान्तरम् ।

3 छा.भा.1-2उदा. सारविवेकवचनम्

नप्रियः तस्मै नम इति मन्त्रार्थः ॥39 ॥

4.15 कृष्णषडक्षरः-एकाक्षरश्च 22-23

मन्त्रान्तरमाह - **सकाम इति ॥**

सकामः स्वयमुद्देशी नत्यन्तोऽयं षडक्षरः ।
तदादिरपि सर्वेष्टचिन्तामणिरुदीरितः ॥ 40 ॥

आदौ क्लीमित्यनेन युतः **स्वयं** कृष्णः **उद्देशी** चतुर्थ्यन्तः **नत्यन्तः** नमोऽन्तः । तथा च `क्लीं कृष्णाय नमः' इति कृष्णषडक्षरमन्त्रः । एकाक्षरकृष्णमन्त्रमाह - **तदिति ॥** क्लीमित्यप्येकाक्षरो मन्त्रः । मन्त्रनामाऽह - **सर्वेष्टेति ॥** अनेन फलमप्यभिहितम् । अत्र ज्ञानैश्वर्येति (तं.सा.4-8) सर्ववैष्णवमन्त्राणां सामान्यत उक्तान्येवाङ्गानि इति ज्ञेयम् ॥40 ॥

वेदपञ्चरात्रोक्तसर्वमन्त्रापेक्षया अत्रोक्ता एव मन्त्रा उत्तमाः । तत्रापि कृष्णादिमन्त्रा उत्तमा इत्याशयेन मन्त्रफलभूतैहिकपुरुषार्थविषये सामान्यन्यायमाह - **दृष्टार्थेति ॥**

दृष्टार्थ एव मन्त्राणां कलौ वीर्यं तिरस्कृतम् ।
तत्राप्युद्दीप्तवीर्या हि मन्त्रा अत्र प्रकीर्तिताः ।
वासिष्ठवृष्णिप्रवरा मन्त्रास्तत्रापि वीर्यदाः ॥ 41 ॥

प्रत्यक्षविषयेऽर्थे वीर्यं तिरस्कृतम् । अपवादमाह - **तत्रापीति ॥** कलियुगेऽपीत्यर्थः । **अत्र** चतुर्थाध्याये । प्रथमाध्यायोक्तमन्त्राणां `एते तु सर्वमन्त्राणां मूलमन्त्रा विशेषत' (तं.सा.1-47) इत्यादिना सर्वतोऽप्यतिशयस्य सिद्धत्वान्न विरोधः । तत्रापि विशेषमाह - **वासिष्ठेति ॥** **तत्रापि** चतुर्थाध्यायोक्तमन्त्रेष्वपि ॥41 ॥

4.16 वेदव्यासाष्टाक्षरः 24

इदानीं श्रीवेदव्यासमन्त्रं[1] निरूपयति - **स्वयमिति ॥**

स्वयं वेदपदारूढः पूर्ववर्णपुरस्सरः ।
नत्यन्तोऽष्टाक्षरो मन्त्रः प्रियो विज्ञानगोपतेः ॥ 42 ॥

वेदपदारूढः वेदपदपुरस्सरः **स्वयं** व्यासः । **पूर्ववर्णपुरस्सरः** व्यासपदे पूर्ववर्णः व्या इति बिन्द्वन्तः, पुरस्सरः आदौ यस्य मन्त्रस्य स तथा । **नत्यन्तो** नमोऽन्तोऽष्टाक्षरो मन्त्रः । **विज्ञानगोपतेः** ज्ञानभास्करस्य । विज्ञानात्मकस्य **गोपतेः** सर्ववेदवाक्याधिनाथस्य वा `स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजल' इति कोशात्, व्यासदेवस्य **प्रिय** इष्ट इत्यर्थः[2]। तथा च `व्यां वेदव्यासाय नमः' इति अष्टाक्षरव्यासमन्त्राकारः ॥ 42 ॥

फलमाह - **व्याख्येति ॥**

व्याख्याश्रीसर्वविज्ञानकवितादिगुणप्रदः ।
वादे विजयदो नित्यं यथा युद्धे नृकेसरी ॥ 43 ॥

व्याख्याश्रीः व्याख्यानविषये शोभा । व्याख्या च श्रीश्चेति वा । **सर्वविज्ञानं** सर्वशास्त्रविषयकं ज्ञानम् । **वादे** विवादे जल्पवितण्डालक्षणे[3]। विशेषतो जयं द-

---

1 श्रीपदं प्रा.पाठे नास्ति ।

2 एवं च, विज्ञाने गोपतिरिव विज्ञानगोपतिः । तस्येति प्रथमार्थे, विज्ञानं चासौ गोपतिश्च विज्ञानगोपतिः । तस्येति द्वितीयार्थे च विग्रहौ । प्रथमे गोशब्दस्य किरणवाचित्वमाश्रित्य गोपतिशब्दस्य भास्करार्थकत्वं, द्वितीये च गोशब्दस्य वाग्वाचित्वमाश्रित्य गोपतिशब्दस्य सर्ववेदवाक्याधिनाथार्थकत्वं स्वीकरणीयमिति भावः ।

3 इदमत्र बोध्यम् । श्रीमदानन्दतीर्थभगवत्पादैः तन्त्रसारसङ्ग्रहकर्तृभिः विरचिते कथालक्षणाख्ये ग्रन्थे वाद-जल्प-वितण्डेति कथात्रैविध्यमुक्तम् । तद्रीत्या तु वादो जल्पवितण्डाभ्यां स्फुटं भि-

दातीति विजयदः । अत्र निदर्शनं - **यथेति** ॥ **नृकेसरी** नृसिंहः । नरसिंहमन्त्र इति **अन्ये** ॥43 ॥

ध्यानमाह - **विज्ञानेति** ॥

विज्ञानरोचिःपरिपूरितान्त-
र्बाह्याण्डकोशं हरितोपलाभम् ।
तर्काभयेतं विधिशर्वपूर्व-
गीर्वाणविज्ञानदमानतोऽस्मि ॥ 44 ॥

विज्ञानमेव **रोचिः** प्रकाशः । `रोचिः शोचिरुभे क्लीबे प्रकाशो द्योत आतप' इत्यमरः (अ.को.1-4-34) । तेन रोचिषा परिपूरिते **अन्तर्बाह्ये** अन्तर्बहिर्भागौ यस्य सः **अण्डकोशो** ब्रह्माण्डलक्षणः स यस्य स तथा तम् । हरितोपलस्याभेव आभा यस्य स तथा तम् । **तर्काभयेतं** तर्कमुद्राभयमुद्राभ्यां युक्तम् । विधिशर्वौ पूर्वौ येषां ते । ते च ते गीर्वाणास्तेषां **विज्ञानदं** योग्यज्ञानप्रदातारम् । `विज्ञानमात्मयोग्यं स्यात्' इत्यादेः (भा.ता.1-8-3) । **आनतः** प्रणतोऽस्मि ॥44 ॥

द्यते । ततश्च वादे इत्यस्य जल्पवितण्डालक्षणे इति व्याख्यानमापाततोऽसङ्गतं भाति । परन्तु तत्रैव कथालक्षणे प्रतिपादितरीत्या त्रिषु अन्त्यौ द्वावेव जयफलकौ, वादस्तु तत्वनिर्णयमात्रफलकः । ततश्च अत्र `वादे विजयदः' इति व्याहतं भवति । अतः, नविलक्षणत्वाधिकरणन्यायसुधोक्तरीत्या । वादशब्दः कथासामान्येऽपि रूढः । तथा हि । नविलक्षणत्वाधिकरणीयानुव्याख्यानस्य `वादेन चोच्चनीचत्वविज्ञानं भवति स्फुटम् । इति वादस्य पूर्वत्वं तत्सिद्धौ व्यर्थताऽन्ययोः ॥' [अनु.व्या. 2-1-2] इति कारिकागतवादशब्दव्याख्यायां सुधायामेवमभिहितम् - `वादो जल्पवितण्डालक्षणो विवादः। अन्यथाऽत्यन्तापकृष्टोऽप्युत्कृष्टतमेन वैयात्यद्घटमानो यदि वा दैवायत्तमभिभावयेत् तदा वृथाख्यातिं लभेत।' इत्यादि। एवं चात्र वादशब्देन त्रिष्वपि प्राप्तेषु `विजयद' इति पदमनुसृत्य व्याख्यात्रा `जल्पवितण्डालक्षणे' इति सुष्ठ्वेव व्याख्यातम् ।

4.17 व्यासगायत्रीमन्त्रः 25

व्यासगायत्रीमाह - **ज्ञानेति ॥**

ज्ञानानन्दपुरःपूर्णौ विद्महे धीमहे तथा ।
तन्नःप्रेरणमध्ये तु व्यासो मन्त्राधिपाधिपः ॥ 45 ॥

ज्ञानानन्दशब्दयोः **पुरः** पूर्वं **पूर्णः** पूर्णशब्दः । **तथा** तदग्रे क्रमात् विद्महे धीमहे । तन्नश्शब्दप्रचोदयादितिशब्दयोर्मध्ये व्यासशब्दः प्रथमान्तः । **मन्त्राधिपाधिपः** मन्त्रश्रेष्ठानामुत्तमः । तथा च 'पूर्णज्ञानाय विद्महे पूर्णानन्दाय धीमहि । तन्नो व्यासः प्रचोदयात्' इति चतुर्विंशत्यक्षरव्यासगायत्रीमन्त्रप्रयोगः ॥45 ॥

4.18 एकाक्षरव्यासबीजमन्त्रः 26

एकाक्षरव्यासमन्त्रमाह - **आदिबीजमिति ॥**

आदिबीजं स्थिराशेषज्ञानबीजं विमुक्तिदम् ।
सर्वपापक्षयकरं सर्वव्याधिविनाशनम् ॥ 46 ॥

ध्यायेच्छशाङ्कशतकोट्यतिसौख्यकान्तिं
संसिच्यमानममृतोरुघटैः सुरेशैः ।
वर्णाभिमानिभिरजेशमुखैः सहैव
पञ्चाशता प्रतिगिरन्तमशेषविद्याः ॥ 47 ॥

व्यासशब्दस्य आद्यावयवरूपो व्याकारस्तद्बीजं सबिन्दुकमित्यर्थः । तथा च 'व्याम्' इत्येकाक्षरो व्यासमन्त्रः । फलं वक्ति - **स्थिरेति ॥** विभ्रमजनकैरनेकदुर्वादिकुशा-

स्त्रैरप्यनुच्छेद्यस्य निर्दोषज्ञानस्य **बीजं** जनकम् । मन्त्रद्वये ध्यानमाह - **ध्यायेदिति॥** **शशाङ्कानां** चन्द्राणां शतकोटिभ्यः अतिशयितं **सौख्यं** सुखम्, स्वार्थे ष्यञ्, यस्याः सकाशात् तादृशी कान्तिर्यस्य तम् । यद्वा सौख्यात्मककान्तिम् । **पञ्चाशता** पञ्चाशद्भिः । **वर्णाभिमानिभिः** वर्णानां रमायाः प्रधानाभिमानित्वादवान्तराभिमानिभिः **अजेशमुखैः** सुरेशैरमृतपूर्णोत्कृष्टघटैः संसिच्यमानमिति सम्बन्धः । अशेषविद्याः **सहैव** युगपदेव **प्रतिगिरन्तम्** उच्चारयन्तम् । यद्वा वर्णाभिमानिभिरजादिरूपैः सह । अजादिवासुदेवरूपाणां वर्णाभिमानित्वं नाम वर्णप्रतिपाद्यत्वं, न तु परदत्तपदाधिष्ठातृत्वं तद्गतानां दुःखानां भोगो वा । वर्णप्रतिपाद्यैरजादिभिः सह विद्यमानैरजेशमुखैरिति । पूर्वमन्त्रे द्विरावृत्तैर्मन्त्रपदैरेव षडङ्गानि । द्वितीये द्विरावृत्तैः पादैरेवाङ्गानि । एकाक्षरमन्त्रे व्यां व्यीं व्यूं व्यैं व्यौं व्यः इति षडङ्गानीति सम्प्रदायविदः । यद्यपि

> `ज्ञानैश्वर्यप्रभानन्दतेजःशक्तिभिरेव वा ।
> पूर्णात्ममध्यगैः ....'

इत्युक्त (तं.सा.4-8) न्यासोऽप्यत्र भविष्यति । तथापि गुरुसम्प्रदायाद्व्यवस्था ।

अयमत्र व्यासमन्त्रार्थः । सर्वस्माद्विशिष्टत्वाद्विः । आ समन्तात् सः `सृ गतौ' (धा.पा.935) `सृ ष्लृ गता'वित्यतो[1] वा डे परे रूपमेतत्, गत इति[2]। विशिष्टः सर्वगश्चेति व्यासः । `स व्यासो वीति तमप् वै विः' (गी.भा.10-37) इति गीताभाष्यदशमाध्यायोदाहृतश्रुतेः[3]। यद्वा `वी गतिप्रजननकान्त्यशनखादनेषु' इति (धा.पा.1048)

---

1 गीताभाष्योदाहृतधातुपाठोऽयम् ।

2 एवं च स इत्यस्य गत इत्यर्थ इति भावः ।

3 गीताभाष्योदाहृतश्रुतेः तट्टीकायाश्च पूर्णपाठः एवं विद्यते । भाष्यम् - `विशिष्टः सर्वस्मात् आ समन्तात्स एवेति व्यासः । तथा चाग्निवेश्यशाखायाम् - "स व्यासो वीति तमप् वै विः सोऽधस्तात् स उत्तरतः पश्चात् स पूर्वस्मात् स दक्षिणतः स उत्तरत इति" इति' - इति । टीका - "मुनीनामप्यहं

धातोरत्र वी गत्यर्थः । तथा च **वीं** स्वपरगताखिलविशेषविषयकं ज्ञानमाप्नोति स-र्वदेति व्याम् । वेदेषु विशेषेण परममुख्यया वृत्त्या प्रतिपाद्यतया आस्ते इति वा, वे-दानां व्यासो विभागो यस्मादिति वा वेदव्यासस्तस्मै नमः। **पूर्णज्ञानाय** स्वपरग-ताखिलविशेषविषयकप्रज्ञाय पूर्णः आनन्दो यस्य तस्मै तत्प्रीत्यर्थं विद्महे धीमहे च। **तत्** तस्मात् **तत्र** ज्ञानादौ **नः** अस्मान् प्रचोदयात्प्रेरयेदिति[1] ॥46,47 ॥

4.19 हयग्रीवमन्त्रः 27

हयग्रीवमन्त्रमाह - **सोद्देश इति** ॥

सोद्देशतु स्वयं दीर्घपूर्वार्णाद्यो नमोयुतः ।
सर्वविद्याप्रदोऽष्टार्णः प्रतिवादिजयप्रदः ।
विमुक्तिसाधनः कीर्तिबुद्धिस्थैर्यप्रदः सदा ॥ 48 ॥

स्वयं हयग्रीवः। **सोद्देशः** चतुर्थ्यन्तः। **दीर्घपूर्वार्णाद्यः** बिन्दुदीर्घा-न्तहकारः आद्यो यस्य स तथा। नमश्शब्दयुतः । एतेन `हां हयग्रीवाय नमः' इति मन्त्रनिष्पत्तिः । `ओ हाक् त्याग' (धा.पा.1090) इति धातोः हकारः पारतन्त्र्यादिनि-खिलदोषराहित्यवाची। यातेर्गत्यर्थत्वात् यो ज्ञानवाची। तथा च निर्दोषज्ञानात्मक-ग्रीवोपलक्षितसर्वावयवोपेतत्वात्, **हयति** गच्छति ब्रह्मादिसर्वग्रीवाद्यवयवेषु तैज-सादिरूपैरिति वा हयग्रीवस्तस्मै नम इत्यर्थः । फलमाह - **सर्वेति** ॥48 ॥

व्यासः" इति व्यासशब्दं व्याचष्टे ॥ विशिष्ट इति ॥ "सर्वस्मात् विशिष्टः" इति विशब्दार्थः । आ इत्यनुवादेन समन्तात् इति व्याख्यानम् । स इत्यस्य स एवेति । "सृ गतौ सृङ्ग गतौ" इत्यतो वा डे रूपमेतत् । न तु तदः । व्यासमित्याद्यनुपपत्तेः । समन्तात् गतः सर्वगतः इत्यर्थः । स व्यासः । कुतः ? वीति हेतोः । कोऽर्थः । तमपो अर्थो हि विशब्दः । उत्तरतः उपरिष्टात् ।' - इति ।

1 अत्र प्रचोदयादित्यस्य नृसिंहगायत्रीव्याख्यानोक्तविवरणमनुसन्धेयम् । तत्र चैवमुक्तम् - `लिङर्थे लेट्' इति [पा. 3-4-7 ।] सूत्राल्लेटो लिङश्चैकार्थत्वात् - इत्यर्थः ।'

ध्यानमाह - वन्द इति ॥

वन्दे तुरङ्गवदनं शशिबिम्बसंस्थं
चन्द्रावदातममृतात्मकरैः[1] समन्तात् ।
अण्डान्तरं बहिरपि प्रतिभासयन्तं
शङ्खाक्षपुस्तकसुबोधयुताब्जबाहुम्[2] ॥ 49 ॥

नस्तो मुखादपि निरन्तरमुद्गिरन्तं
विद्या अशेषत उताब्जभवेशमुख्यैः ।
संसेव्यमानमतिभक्तिभराभिनुन्नैः
लक्ष्म्याऽमृतेन सततं परिषिच्यमानम् ॥ 50 ॥

शशिबिम्बे इन्दुमण्डले। चन्द्रवत् **अवदातं** शुभ्रम् । **अमृतात्मकरैः** नाशरहितैः अमृतस्राविभिर्वा स्वरूपभूतैः किरणैः। **समन्तात्** तस्यैव विवरणम् **अण्डान्तरं बहिरपि प्रतिभासयन्तं** प्रकाशयन्तम् । **अमितात्मकरैरिति** पाठे अपरिमितस्वकिरणैरित्यर्थः। **शङ्खः अक्षम्** अक्षमाला **पुस्तकं सुबोधः** ज्ञानमुद्रा एतैः युक्ताः अब्जानीव वाहवो यस्य तम् । अब्जानि तु सनालपद्मानि तेन बाहूनां नालसाम्यं दैर्घ्ये, हस्तानां च पद्मसाम्यमिति लभ्यते। युतात्मबाहुमिति क्वचित्पाठः । **अतिभक्तिभरेण** अतिशयितभक्त्याऽधिक्येन **अवनम्रैः** विनतैः। तुरङ्गवदनं तुरं गच्छतीति **तुरङ्गा** बडवा। वडवामुखमित्यर्थः। अत्र द्विरावृत्तमन्त्रपदैर्वा ज्ञानैश्वर्यादिभिर्वा षडङ्गन्यास इति यथासम्प्रदायं व्यवस्था। एवमग्रेऽपि ॥49,50 ॥

---

1 अमितात्मकरैरिति गु.दी.सू.पाठान्तरम् ।

2 युतात्मबाहुमिति गु.दी.सू.पाठान्तरम् ।

4.20 कपिलमन्त्रः दत्तात्रेयमन्त्रः 28-29

अथ कपिलदत्तात्रेयमन्त्रावाह - **स्वयमिति ॥**

स्वयमुद्देशवान् पूर्ववर्णपूर्वो नमोयुतः।
सतारोऽष्टाक्षरश्चैव नवार्णश्च मनू स्मृतौ ॥ 51 ॥

स्वयं स्ववाचकः कपिलशब्दो दत्तात्रेयशब्दश्च। **उद्देशवान्** चतुर्थ्यन्तः। **पूर्ववर्णः** बिन्द्वन्तः ककारो दकारश्च ययोः। अन्ते नमश्शब्दोपेतः सतारश्च क्रमादष्टाक्षरो नवाक्षरश्च मनुः। तथा च `ओं कं कपिलाय नमः' `ओं दं दत्तात्रेयाय नमः' इति मन्त्रयोः निष्पत्तिः। कं वायुं पिं पिनाकिनं रुद्रं लाति स्वीयतया आदत्त इति वा, सुखकरत्वात्कः पालकत्वात्पिः सर्वानुग्रहकर्तृत्वाल्ल इति वा कपिलस्तस्मै। ऋषये पुत्रत्वेन स्वयमेव स्वेन दत्तो अत्रिपुत्रत्वेनाविर्भूतत्वादात्रेय इति दत्तात्रेयः। तस्मै नम इति मन्त्रयोरर्थः ॥51 ॥

तयोर्ध्यानं निरूपयति - **प्रोद्यदिति ॥**

प्रोद्यद्दिवाकरसमानतनुं सहस्र-
सूर्योरुदीधितिभिराप्तसमस्तलोकम् ।
ज्ञानाभयाङ्कितकरं कपिलं च दत्तं
ध्यायेदजादिसमितिं प्रतिबोधयन्तम् ॥ 52 ॥
अधृष्यताज्ञानमोक्षप्रदौ भक्तेष्विमौ सदा।

रक्तवर्णमित्यर्थः। **॥सहस्रेति ॥** अत्र सहस्रशब्दोऽमितपरः। तथा च अमितसूर्येभ्यः **उर्वीभिः** उत्कृष्टाभिः दीधितिभिः **आप्तसमस्तलोकं** व्याप्तचतुर्दशभुवनम् । अत्र कपिलध्याने दत्तपदं यौगिकं दत्तात्रेयध्याने कपिलपदं यौगिकमिति न

ध्यानश्लोकेऽसम्भवशङ्केति ज्ञेयम् । यद्वा ध्यानमेव मन्त्राङ्गं न श्लोकमपीति न काचिदनुपपत्तिरिति द्रष्टव्यम् । भक्तेषु योग्येषु । अधृष्यता अपराजितत्वं ज्ञानं शास्त्रजं मोक्षश्च इत्येतान् प्रकर्षेण ददत[1] इति अधृष्यताज्ञानमोक्षप्रदौ ॥ 52 ॥

4.21 वैदिकमन्त्राः 30-33

ननु अजादीन् प्रति वेदविद्योपदेष्टृत्वमयुक्तम् । हिरण्यगर्भादीनामपि वेदप्रतिपाद्यत्वेन स्वसमत्वादित्यतोऽशेषवेदार्थत्वमस्यैवेति वक्तुं तत्रैव प्रसिद्धान् वैदिकान् वैष्णवमन्त्रानाह - **सूक्तमिति** ॥

सूक्तं दीर्घतमोदृष्टं `विष्णोर्नुक'मिति प्रभोः ।
सर्वार्थदं गार्त्समदं `यो जात' इति चापरम् ॥ 53 ॥
वासिष्ठं च `परो मात्रये'ति ज्ञानविमुक्तिदम् ।
भौवनीयं सर्वकाममोक्षदं `य इमे'त्यपि ।

प्रभोर्विष्णोः सूक्तं दीर्घतमोदृष्टं `विष्णोर्नुकं' (ऋ.सं. 1-154-1) षडर्चं प्रोक्तमित्यन्वयः । `विष्णोः षड्वैष्णवं हि' (अनु.क्र.1-151) इत्यनुक्रमणिकोक्तेः । गार्त्समदं गृत्समदृषिकं `यो जात' (ऋ.सं. 2-12-1) इति पञ्चदशर्चं प्रभोरपरं पूर्वोक्तात् । सूक्तं सर्वार्थदमिति योजना । `यो जातः पञ्चो ने'त्यनुक्रमणिकायामुक्तत्वात् (अनु.क्र.2-12) । वासिष्ठं वसिष्ठदृष्टं `परो मात्रया' इति (ऋ.सं. 7-99-1) सप्तर्चं प्रभोरपरं सूक्तम् । भौवनीयं विश्वकर्मदृष्टं `य इमा विश्वा भुवनानि' इति (ऋ.सं.10-81-1) चतुर्दशर्चमपरं प्रभोः सूक्तं सर्वकामादिदमिति सम्बन्धः । अनुक्रमणिकायां `य इमा विश्वकर्मा भौवनो वैश्वकर्माणम्'[2] इत्युक्तत्वात् । सूक्तचतुष्टयजपे ज्ञानादीन्येवाङ्गानि ।

---

1 `दत्तः' इति पदेन भाव्यमिति भाति ।

2 अनु.क्र.10-81 । `तु द्वितीया विराड्रूपा' इति शिष्टो भागः ।

विष्णुषडक्षरवद्विष्णुसूक्ते उद्यद्भास्वदिति स्थाने नीलमेघेतिपदप्रक्षेपेण ध्यानम् । अन्यत्र उद्यद्भास्वदिति यथास्थितमेव ध्यानमिति सम्प्रदायविदः ।

ननु

`ऋचः स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ।
यजूंषि निगदाच्चैव तथा सामानि सामतः'[1]

इति पुराणेष्वपरिच्छिन्नमूलवेदात् ऋङ्निगदसामानीतिसञ्ज्ञाः उपवेदास्ततश्चावान्तर-वेदाश्चतुर्विंशत्यादिशाखाभेदयुक्ताः कृत्रिमाष्टकादिभेदभिन्ना उद्धृता इत्यवगम्यते । तत्र सूक्तसञ्ज्ञा कुत्र किंनिबन्धाना चेति चेत् । इत्थम् । मूलवेदे ऋचां या आनुपूर्वी क्रमः ता ऋचो निरन्तराः कृत्वा यावत्पठितं तावदुपवेदे सूक्तमित्युच्यते । यथोक्तमृग्भाष्ये `सूक्तं त्वनारतं प्रोक्तम्' इति[2]। उपवेदादुद्धृतेषु ऋग्वेदादिष्ववान्तरवेदेषु उपवेदगत-सूक्तान्तर्गतक्रमविशिष्टयत्किञ्चिदृक्प्रबन्धवत् सूक्तम् । यत उपवेदगतक्रमपठितानां कासाञ्चिदृचामुद्वापः स्थानान्तरस्थानां तत्रावापश्चास्ति । तदुक्तम् -

`अन्यथात्वं च तत्र स्यादावापोद्वापतस्त्वृचाम्' इति (ऋ.भा.अ1-सू3-मं12) ॥53. ॥

विष्णुसूक्ताद्यर्थस्तु -[3]

विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥

1 ऋ.भा.अ1-सू3-मं12

2 ऋ.भा.अ1-सू3-मं12

3 ऋग्वेदे बहूनि विष्णुसूक्तानि सन्ति । तत्र दशममण्डलगत 154तमं षण्मन्त्रात्मकं समग्रं सूक्तमत्र व्याख्यातम् । अन्यान्येऽपि केचन भिन्नभिन्नस्थलीयाः मन्त्राः व्याख्याताः । अतः `विष्णुसूक्ता-द्यर्थस्तु' इति पाठः आदृतः ।

यच्छब्द आक्षेपे । पार्थिवानि रजांसि यः कः[1] विममे ? न कोऽपि, आनन्त्यात् । यद्वा विमम इति काक्वा योज्यम् । नुशब्दस्त्वर्थे । पार्थिवपरमाण्वपेक्षया विशेषानन्त्योपेतानि विष्णोर्वीर्याणि **कं कः प्रावोचं** [2] प्रावोचत् एतावन्तीति । यो विष्णुस्त्रेधा विचक्रमाणः त्रिविक्रमरूपेण पादविक्षेपं कुर्वन् स्वरभसा त्रिविष्टपं चलितं निशम्य स्वसदनादुरु कम्पमानं चतुर्मुखं निशम्य[3] तेन **उरुगायः** उरु गीयमानः सन् **सधस्थं**, सहस्य सधेत्यादेशः, ब्रह्मणा सह विद्यमानम् **उत्तरं** सर्वोच्चं ब्रह्मसदनम् **अस्कभायत्** स्तम्भितवान् इति । अथवा नु इत्यस्मिन्नर्थे नुकमिति पदद्वयम् । शाखान्तरे एकपदत्वेन पाठाच्च । यो विष्णुः रजांसि **विममे** विशेषेण निर्ममे । अत्र त्रयो लोका अपि पृथिवीशब्दवाच्याः । तथा च मन्त्रान्तरं - `यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यामवमस्यामुतस्थ' इति । किञ्च यश्च विष्णुः **पार्थिवानि** पृथिवीसम्बन्धीनि रजांसि पृथिव्याः अधः सप्तलोकान् **विममे** निर्मितवान् । **रजःशब्दो** लोकवाची । `लोका रजांस्युच्यन्त' इति यास्कोक्तेः । यश्च **उत्तरम्** उद्गततरमुत्तरभाविनं **सधस्थं** सहस्थानं पुण्यकृतां सहनिवासयोग्यं भूरादिलोकसप्तकम् **अस्कभायत्** स्तम्भितवान् सृष्टवानित्यर्थः । यद्वा उत्तरमुत्तरतरमतिविस्तीर्णं **सधस्थं** सहस्थानं लोकत्रयाश्रयभूतमन्तरिक्षमस्कभायत् लोकानामाधारत्वेन स्तम्भितवान् । अनेन अन्तरिक्षाश्रितलोकत्रयमपि सृष्टवानित्युक्तं भवति । **उत्तरम्** उत्कृष्टतरं सधस्थमुपासकानां सहस्थानं सप्तलोकम् **अस्कभायत्** ध्रुवं स्थापितवान् । किं कुर्वन् **त्रेधा विचक्रमाणः** त्रिप्रकारं स्वसृष्टान् लोकान्विविधं क्रममाणः । विष्णोस्त्रेधा क्रमणं `इदं विष्णुर्विचक्रम' (ऋ.सं.1-22-17) इत्यादिश्रुतिसिद्धम् । अत एव उरुगायः उरुभिर्महात्मभिर्गीयमानः, अति प्रभूतं गीयमानो वा । एतादृशस्य विष्णोर्वीर्याणि नुकमिदानीं प्रावोचम् ।

---

1 यच्छब्दोऽत्र किंशब्दार्थक इति व्याख्याया आशयः । `यः कः' इति पदे ज.पाठे न स्तः ।

2 मूलस्थस्य प्रवोचमिति छान्दसपदस्य लौकिकरूपप्रदर्शनमेतत् ।

3 उभयत्र निशाम्येति भवेदिति भाति ।

`प्र तद् विष्णुः स्तुवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।

यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा' इति द्वितीया ऋक् ।

स महानुभावो विष्णुर्वीर्येण स्वकीयेन वीरकर्मणा पूर्वोक्तरूपेण **स्तुवते** स्तूयते सर्वैः । तृतीयसवने स्तोमातिरेके शस्त्रे वीर्येण स्तूयमानत्वे दृष्टान्तः - **मृगो न** ॥ सिंहादिरिव । स्वविरोधिनो मृगयिता सिंह इव **भीमो** शत्रूणां भीतिजनकः । **कुचरः** कुत्सितहिंसादिकर्ता दुर्गमप्रदेशादिगतो वा । **गिरिष्ठाः** पर्वताद्युन्नतप्रदेशस्थायी । किञ्च **कुचरः** कुषु सर्वासु भूमिषु लोकत्रयेषु सञ्चारी वा । **गिरिष्ठाः** गिरिरिव निश्चलः सन् सर्वलोकेषु तिष्ठतीति । यद्वा, गिरि मन्त्रादिरूपायां वाचि । सर्वदा वर्तमानः । ईदृशोऽयं स्वमहिम्ना स्तूयते । किञ्च, यस्य विष्णोः **उरुषु** विस्तीर्णेषु **त्रिषु** त्रिसङ्ख्याकेषु विक्रमणेषु **विश्वा** विश्वानि **भुवनानि** भूतजातानि आश्रित्य निवसन्ति स विष्णुस्तृतीयसवने स्तूयते ।

प्रविष्णव इति तृतीया ॥

`प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे ।

य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित् पदेभिः' ।

विष्णवे सर्वव्यापकाय । **शूषम्** अस्मद्रक्षाणादिजन्यमहद्बलत्वं **मन्म** मननं स्तोत्रं मननीयं **शूषं** बलवान् विष्णुः **एतु** प्राप्नोतु । कर्मणः सम्प्रदानत्वाच्चतुर्थी । कीदृशाय? **गिरिक्षिते** गिरिवदुन्नतप्रदेशे तिष्ठते **उरु गायाय** बहुभिर्गीयमानाय **वृष्णे** वर्षित्रे कामानाम् । एवं महानुभावं प्रति शूषं मन्म च प्राप्नोतु । कोऽस्य विशेष इति । उच्यते । यो विष्णुः **इदं** प्रसिद्धं दृश्यमानं **दीर्घम्** अतिविस्तृतं **प्रयतं** नियतं **सधस्थं** सहस्थानं लोकत्रयम् **एक इत्** एक एव अद्वितीयः सन् त्रिभिः **पदेभिः** पादैः **विममे** विशेषेण निर्मितवान् ।

चतुर्थऋक् **`यस्य त्री पूर्णा' इति ।**

`यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति ।
य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ॥ 4 ॥

यस्य विष्णोः **मधुना** मधुरेण दिव्येनामृतेन **पूर्णा पूर्णानि** पदानि पादक्षेपणानि **अक्षीयमाणा** अक्षीणानि। **स्वधया** अन्नेन **मदन्ति** मदयन्ति। विबुधाः[1]। **य उ** य एव **पृथिवीं** प्रख्यातां भूमिं **द्यां** द्योतनात्मकमन्तरिक्षं च **विश्वा** सर्वाणि भुवनानि चतुर्दशलोकांश्च। यद्वा पृथिवीशब्देनाधोवर्तीन्यतलादिसप्तभुवनानि उत **द्यां** द्युशब्देन तदवान्तररूपाणि भुवरादिसप्तभुवनानि। एवं चतुर्दशलोकान् **विश्वा** भुवनानि तत्रत्यानि जनजातानि। **त्रिधातु**। त्रयाणां भूतानां समाहारः त्रिधातु । पृथिव्यप्तेजोरूपधातुत्रयविशिष्टं यथा भवति तथा **दाधार** धृतवान् । उत्पादितवानित्यर्थः । तथा च छन्दोगारण्यके `तत्तेजोऽसृजत तदन्नमसृजते' (छा.उ.6-2-3) त्यादिना भूतत्रयसृष्टिमुक्त्वा `हन्तेमास्तिस्रो देवतास्तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इति (छा.उ.6-3-4) त्रिवृत्करणसृष्टिरुपपादिता। यद्वा **त्रिधातु** कालत्रयं गुणत्रयं वा दाधारेत्यन्वयः ।

`तदस्य प्रियमभि पाथ' इति पञ्चमी ऋक् ।

तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥ 5 ॥

अस्य महतो विष्णोः **प्रियं** प्रियभूतं **तत्** सत्यत्वेन प्रसिद्धं **पाथः** अन्तरिक्षनामैतत, अनश्वरं ब्रह्मलोकम् **अश्यां** प्राप्नुयाम् । तदेव विशिष्यते - **यत्रेति** ॥ **यत्र** स्थाने **देवयवः** देवं द्योतनस्वभावं विष्णुमात्मनः इच्छन्तः[2] यज्ञदानादिना प्राप्तुमिच्छन्तः नराः **मदन्ति** तृप्तिमनुभवन्ति। तदश्यामित्यन्वयः। पुनरपि तदेव

---

[1] मदयन्ति इति पूर्वप्रकृतक्रियापेक्षितकर्मवाचकतया `विबुधान्' इति पाठेन भाव्यमिति भाति ।

[2] एवं च देवयवः इत्येतत उकारान्तदेवयुशब्दस्य प्रथमाबहुवचनरूपमिति भावः ।

विशिष्यते - **उरुक्रमस्य** अत्यधिकं सर्वं जगदाक्रममाणस्य **विष्णोः** तत्तदात्मना व्यापकस्य परमेश्वरस्य **परमे** उत्कृष्टे निरतिशये केवलसुखात्मके **पदे** स्थाने **मध्वः** मधुररसस्य **उत्सः** निष्यन्दो वर्तते। तदश्याम्। यत्र क्षुत्तृष्णाजरामरणपुनरावृत्त्यादिभयं नास्ति, सङ्कल्पमात्रेणामृततुल्यभोगाः प्राप्यन्ते तादृशमित्यर्थः। ततोऽधिकं नास्तीत्याह - **इत्था** इत्थमुक्तप्रकारेण स हि **बन्धुः** सर्वेषां सुकृतिनां बन्धुभूतः सन् हितकरो वा। तस्य बन्धुत्वं सर्वश्रुत्यादिप्रसिद्धमिति[1] हिशब्दः। यद्वा तस्य विष्णोः प्रियं पाथः जलं तत्पादतीर्थं शालग्रामतीर्थमिति यावत्। **अभ्यश्याम्** अश्नामि। **देवयवो** नरा **यत्र** यस्मिन् प्राप्ते **मदन्ति** हृष्टा भवन्ति तत्पाथ इत्यन्वयः। मध्वरूपी वायुस्तत्रोत्साहयुक्त इत्याह - परमे **विष्णोः** **पदे** विष्णुपादोदके शालग्रामशिलातीर्थे **मध्वः** आनन्दकरशास्त्रनिर्माता आनन्दतीर्थः **उत्सः** उत्साहयुक्तः। स मध्वः **इत्था** इत्थमुरुक्रमस्य बन्धुरिति हि `देहेऽपि यत्रे'त्युपात्त[2]`कस्मिन् न्वहम्' इत्यादिश्रुतिप्रसिद्धमित्यर्थः॥

`यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत्।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः'॥[3]

---

1 अत्र प्रा.पाठे श्रुत्या इति भागं चिह्नयित्वा पार्श्वे द्वासुपर्णेति इति लिखितम्।

2 म.ता.नि. 5-46. पूर्णश्लोकश्च - देहेऽपि यत्र पवनोऽत्र हरिर्यतोऽसौ तत्रैव वायुरिति वेदवचः प्रसिद्धम्। कस्मिन् न्वहं त्विति तथैव हि सोऽवतारे तस्मात् स मारुतिकृते रविजं ररक्ष॥ - इति।

3 ऋ.सं.1-12-1। मूलमातृकायां प्रा.पाठे र.पाठे च मन्त्रः दृश्यते। अस्य व्याख्यानं न दृश्यते। ज1.पाठे मन्त्रस्तद्व्याख्यानमुभयमपि न दृश्यते। अग्रे `परो मात्रया' इति मन्त्रस्य पूर्वार्धं `य इमा' इति मन्त्रः तद्व्याख्यानं च सर्वपाठेषु दृश्यते। पूर्वं हि मूले एवं प्राप्तम् - `सूक्तं दीर्घतमोदृष्टं विष्णोर्नुकमिति प्रभोः। सर्वार्थदं गार्त्समदं यो जात इति चापरम्॥53॥ वासिष्ठं च परो मात्रयेति ज्ञानविमुक्तिदम्। भौवनीयं सर्वकाममोक्षदं य इमेत्यपि।' इति। तत्र `यो जात' इत्यारभ्यमाणं सूक्तं विष्णुसूक्तत्वेनोल्लिखितम्। अतस्तदादिममन्त्रत्वेन `यो जात' इति मन्त्रः उल्लिखितः। अव्याख्याने च कारणं `शिष्टमन्यत्र ज्ञेयम्' इति अग्रे द्विः वक्ष्यमाणेन ऊह्यम्। अन्यत्र यन्नोक्तं तदेवात्र व्याख्यातमिति एतत्सर्वस्य तात्पर्यम् - इति भाति।

`परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति[1]।'

हे देव विष्णो त्वं **मात्रया** मितेः परः अपरिमितगुण इति यावत् । न केवलं गुणतः किन्तु **तन्वा** शरीरेणैव **वृधान** अभिवृद्धः। ते **महित्वं** महिमानं केऽपि **नान्वश्नुवन्ति** साकल्येन जानन्ति। शिष्टमन्यत्र ज्ञेयम् ।

`य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यषीदत्पिता नः ।

स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ आ विवेश (ऋ.सं.10-81-1) ॥'

यः परमात्मा इमानि **विश्वा** समस्तानि भुवनानि सत्यादिलोकान् ब्रह्मादिभ्यो **जुह्वत्** ददानः। **ऋषिः** सर्वज्ञः। **होता** इन्द्रियेषु विषयहोता। **न्यषीदत्** इन्द्रियेषु विषयेषु च नियामकत्वेन निषसाद। **नः** सर्वेषां **पिता** **स** परमात्मा **आशिषा** भक्तमनोरथानुसारेण **द्रविणं** तदुपलक्षितभक्ताभीष्टं दातुमिच्छमानः **प्रथमच्छत्** प्रथमविभागः प्रथमावतारः पुरुषनामा **अवरान्** स्वापेक्षयाऽतिनीचान् ब्रह्मादीन् **आविवेश** देहनियामकत्वेन प्रविवेशेति। शिष्टमन्यत्र द्रष्टव्यम् ।

ननु विष्णुसूक्तादिचतुष्टयस्य विष्णुपरत्वेऽपि नाशेषवेदार्थत्वं युक्तम् । हिरण्यगर्भादिसूक्तानां हिरण्यगर्भादिपरत्वात् । यद्यपि `नामानि सर्वाणि यमाविशन्ति'[2] `यो देवानां नामधा एक एव' इत्यादिश्रुत्या[3] हिरण्यगर्भादिनाम्नां विष्णौ शक्तिमात्रमवसीयते । तथापि न तात्पर्ये प्रमाणमस्ति। `यत्परः शब्दः स हि शब्दार्थ' इति हि न्यायः। न च शक्तिमात्रेण तात्पर्यं कल्पयितुं युक्तम् । अभ्यवहरणसमये प्रयुक्तस्य सैन्धवमानयेति

---

1 ऋ.सं.7-99-1। `उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से ॥' इति अस्य मन्त्रस्योत्तरार्धम् । आकरयोः पूर्वार्धमेव लिखितं व्याख्यातं च।

2 ब्र.सू.भा.उदा.भाल्लवेयश्रुतिः1-1-1।

3 ऋ.सं. 10-82-3।`यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा।' इति पूर्वार्धम् । `तं सम्प्रश्नं भुवना यन्त्यन्या ' इति शेषः।

वाक्यस्य तुरङ्गादौ तात्पर्यापत्त्याऽतिप्रसङ्गः स्यादित्यतो विष्णुसूक्तादिदृष्टान्तेनाशेषवेदानां भगवत्परत्वमाह - एवमेवेति ॥

एवमेवाखिला वेदा ज्ञातव्या विष्णुतत्पराः ॥ 54 ॥

एवं विष्णुसूक्तादय इव अखिलाः हिरण्यगर्भप्रभृतिसमस्त वेदाः अकर्तृकत्वप्रसिद्धिमद्वाक्यसमूहाः विष्णौ मुख्यतः तात्पर्यवन्त एव ज्ञातव्याः[1]। उपक्रमादिभिरिति शेषः । कथमुपक्रमादितात्पर्यलिङ्गानीति चेत् । इत्थम् । `तत्तु समन्वयात्' इति (ब्र.सू.1-1-4) नयरीत्योपक्रमादिरपि सकलसूक्तानां विष्णावेवेति तत्रैव महातात्पर्यम् । उपपत्तिश्च- तथा हि । सर्वोऽपि वेदस्तावदेकमेव शास्त्रं, भेदे मानाभावात् । शास्त्रैक्यं च विषयप्रयोजनैक्यनिमित्तं निमित्तान्तराभावात् । सर्वोत्तमश्च वेदः प्रसिद्धः `वेदशास्त्रात्परं नास्ति' इत्यादौ[2]। सर्वोत्तमता च सर्वोत्तमप्रयोजनवत्तायामुपपद्यते । सर्वोत्तमं च प्रयोजनं मोक्ष एव ।

`धर्मार्थकामाः सर्वेऽपि न नित्या मोक्ष एव हि ।
नित्यस्तस्मात् तदर्थाय यतेत मतिमान्नर' इत्यादेः[3]।

तथा च सर्वशास्त्राणां मोक्षार्थत्वे स्थिते विषयोऽपि विचार्यते । प्रतिवाक्यमर्थानामनेकत्वेऽपि न तेषां शास्त्रविषयतोपपद्यते । वाक्यभेदप्रसङ्गात् । अतो यत्प्रतिपत्तयेऽवान्तरवाक्यार्थप्रतिपादनं स एक एव महातात्पर्यगोचरो विषयो वाच्यः । यश्च ज्ञातोऽभिमतप्रयोजनहेतुः स एव महातात्पर्यगोचरतामापद्यते । विषयप्रयोजनयोः सम्बन्धाभावे शास्त्रस्यानुपादेयत्वप्रसङ्गात् । अभिमतप्रयोजनस्य च मोक्षस्य सर्वोत्कृष्टतया ज्ञातः प्रसन्नो भगवान् विष्णुरेव हेतुरिति -

1 एवं च एवमेव इत्यत्रत्यः एवकारः `विष्णुतत्पराः एवे'ति भिन्नक्रमतया व्याख्यातः ।

2 म.भा.ता.नि.उदा. नरसिंहपुराणवचनम् 17-32 ।

3 वि.त.वि.उदाहृता भाल्लवेयश्रुतिः ।

`यस्य प्रसादात् परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेण ।

नारायणोऽसौ परमो विचिन्त्यो मुमुक्षुभिः कर्मपाशादमुष्मात्'

इति स्पष्टं श्रूयते (वि.त.विनि.उदा. नारायणश्रुतिः) । तस्मात्स एको विष्णुरेव सकल-वेदमुख्यतात्पर्यगोचरोऽङ्गीकार्य इति ।

`मुख्यं च सर्ववेदानां तात्पर्यं श्रीपतेः परम् ।

उत्कर्षे तु तदन्यत्र तात्पर्यं स्यादवान्तरम्'

इति महावाराहवचनं (वि.त.विनि.उदा.) चात्र मानम् ।

एतेनेदमपि निरस्तम् - वेदानां हिरण्यगर्भादिपरत्वेऽभियुक्तव्याख्यानमेव ज्ञापकमस्तीति । मुख्यतात्पर्यनिराकरणेऽप्यवान्तरतात्पर्याभ्युपगमात् । मुख्यतात्पर्य-प्रवक्तॄणामुक्तवाक्यादिविरोधित्वेनाभियुक्तत्वमेव नास्तीति ।

ननु शक्त्यतिरिक्तं किं तात्पर्यम् ? यदत्र समर्थितम्, तात्पर्यवृत्तेरतिरिक्तायाः अन्यत्र शास्त्रे निराकृतत्वादिति चेत्, सत्यमेवं तथापि तयोरस्ति भेदः । पदस्य सामान्यतः इतरान्विते या वृत्तिः सा शक्तिः । यथोक्तम् -

`शक्तिश्चैवान्विते स्वार्थे शब्दानामनुभूयते' इति । (अनु.व्या.1-1-72)

तस्या एव शक्तेः पदान्तरादिसमभिव्याहारेण विशेषान्वयप्रमाजनकत्वे पर्यवसानम् । तदाहितशक्त्यन्तरं वा तात्पर्यमिति । तथा च तत्प्रमितिजनकत्वमेव तात्पर्यशब्दार्थ इत्यवगन्तव्यम् ॥54 ॥

4.22 वेदोक्तलक्ष्मीमन्त्रः 34

इदानीं लक्ष्मीमन्त्रमाह - स्वदृष्टमिति ॥

स्वदृष्टं सूक्तमखिलकामदं हरितुष्टिदम्[1]। वाचोऽम्भ्रण्याः श्रि-
योऽङ्गानि श्रीलक्ष्मीर्मेन्दिरा रमा ॥ 55 ॥

कौशेयपीतवसनामरविन्दनेत्रां
पद्मद्वयाभयवरोद्यतपद्महस्ताम् ।
उद्यच्छतार्कसदृशीं परमाङ्कसंस्थां
ध्यायेद्विधीशनुतपादयुगां जनित्रीम् ॥ 56 ॥

वाचः वाङ्नियामकत्वेन वागाख्यायाः अं परमात्मानं बिभर्तीत्यम्भ्रणीनामिकायाः श्रियः प्रतिपादकं **स्वदृष्टं** 'अहं रुद्रेभिर्वसुभिश्चरामि' इति (ऋ.सं.10-125-1) सूक्तमखिलकामदं हरितुष्टिदं चेत्यर्थः। अखिलमिति पाठेऽहंरुद्रेभिरित्याद्यष्टर्चं सूक्तमित्यर्थः। श्रीरित्यादीनि पञ्चपदानि सोद्देशानि **अङ्गानि** अङ्गन्यासमन्त्रा इति भावः। ध्यानमाह - **कौशेयेति** ॥ कुशाख्यकीटनिर्मितत्वात् **कौशेयं** वर्णतः पीतं वसनं यस्याः सा तथोक्ता ताम् । पद्मद्वयेनाभयवरमुद्राभ्यां **चोद्यताः** उद्युक्ताः ऊर्ध्वं कृताः पद्मवत्प्रशस्ताः हस्ताः यस्याः सा तथा ताम् । पद्मयोः[2] द्वयं पद्मद्वयम् । पद्मद्वयं च अभयं च वरं च पद्मद्वयाभयवराणि। पद्मद्वयाभयवराणि एषु करेषु सन्तीति पद्मद्वयाभयवराः[3]। पद्मद्वयाभयवरेषु उद्यतौ पद्महस्तौ यस्याः सा तामिति वा। **परमस्य** विष्णोः अङ्के संस्थाम् । **विधीशौ** ब्रह्मरुद्रौ। सर्वमातृत्वाज्जनित्रीम् ॥55,56 ॥

4.23 लज्जाबीजं श्रीबीजम् 35-36

लक्ष्म्याः एकाक्षरमन्त्रावाह - **लज्जेति** ॥

---

1 'अखिलं कामदम्' इति गु.दी.सू.पाठान्तरम् ।

2 इतो वाक्यचतुष्टयं ज.ज1.पाठयोः मूलमातृकायां च नास्ति।

3 तथा च अर्शआद्यजिति मतुबर्थे अजिति भाव इति भाति।

लज्जाबीजं च तद्बीजं तस्या एवाभिधायकं

पाशाङ्कुशौ रक्तवस्त्रं लज्जाबीजे विशिष्यते ।

अमध्ययुग्मस्वरगतेनैवाङ्गमुदाहृतम् ॥ 57 ॥

लज्जाबीजं ह्रीरिति । **तद्बीजं** तस्याः श्रियो बीजं श्रीरिति । ततश्च ह्रीं श्रीमिति मन्त्रद्वयं तस्याः रमाया एवाभिधायकम् । ह्रीमित्येकाक्षरमन्त्रध्याने विशेषमाह - **पाशाङ्कुशाविति ॥** पद्मद्वयस्थले पाशाङ्कुशौ पीतवस्त्रस्थाने रक्तवस्त्रमिति लज्जाबीजे ह्रीमित्येकाक्षरमन्त्रे विशिष्यत इत्यर्थः । मन्त्रद्वयन्यासमाह - **अमध्य इति ॥** अमध्ययुग्मस्वरगेत्यविभक्तिको निर्देशः । अमध्ययुग्मस्वरगेनेति । यद्वा, अमध्ययुग्मस्वरगं च तत् तच्च तद्बीजं चामध्ययुग्मस्वरगतत् । तेनेत्येकं वा पदम् । न विद्येते मध्ययुग्मस्वरौ येषां ते अमध्ययुग्मस्वराः । अमध्ययुग्मस्वरान् गच्छति प्राप्नोतीति अमध्ययुग्मस्वरगं तादृशेन बीजमन्त्रेण अङ्गं षडङ्गमुदाहृतमित्यर्थः । अष्टौ स्वरयुग्मानि अआइत्यारभ्य[1] अंअःइत्यन्तानि । तत्र ऋॠऌॡ इति मध्यस्वरयुग्मे । ते विहाय पूर्वैस्त्रिभिर्दीर्घस्वरैः आइत्यादिभिरुत्तरैस्त्रिभिः ऐइत्यादिदीर्घविसर्गस्वरैश्च सहितेन बीजमन्त्रेण षडङ्गमुदाहृतमित्यन्वयः । तत्प्रकारस्त्वित्थम् - ह्रां हृदयाय नमः । ह्रीं शिरसे स्वाहा । ह्रूं शिखायै वौषट् । ह्रैं कवचाय हुम् । ह्रौं नेत्राभ्यां वौषट् । ह्रः अस्त्राय फडिति ।

एवमन्यत्रैकाक्षरमन्त्रे न्यासो द्रष्टव्यः ॥57 ॥

---

1 इतोऽत्र प्रकरणे वहवः सन्धिरहिता निर्देशा दृश्यन्ते । सन्धिकरणेऽबोधः । सन्ध्यकरणे व्याकरणविरोधः `संहितैकपदे नित्या' इति समासे संहितायाः नित्यत्वात्, संहितायां च संहिताधिकारिकसन्धीनामावश्यकत्वात् । तथापि अनुकरणे सन्धिनियमाभावात्, प्रकृते च `अ आ' इत्यादीनामनुकरणरूपत्वात् सन्ध्यकरणमदोष इति भाति ।

4.24 भूबीजं-दुर्गाबीजम् 37-38

अपरं मन्त्रद्वयमाह - सत्तेति ॥

सत्ताबीजं च दुर्बीजं तद्वदेव प्रकीर्तितम् ।
वर्णः श्यामो विशेषोऽत्र ताम्बूलं नीलमुत्पलम् ।
चक्रशङ्खौ तर्जनं च शूलमित्यपरत्र च ॥ 58 ॥

सत्तार्थकबीजं भूरिति। **दुर्बीजं** दुर्गाबीजं दुरिति। **तद्वदेव** ह्रीं श्रीमिति मन्त्रद्वयमिव लक्ष्मीवाचकं प्रकीर्तितम् । अत्र मन्त्रद्वये श्यामो वर्णो विशेषः[1]। पूर्वमन्त्रद्वये उद्यच्छतार्कसदृशीमित्युक्तम् । पद्मद्वयस्थाने ताम्बूलनीलोत्पले। अपरत्र दुर्गाबीजे शङ्खचक्रे तर्जनं शूलमित्यायुधानि ध्येयानीति शेषः। तथोक्तमन्यत्रापि

`दूर्वोपमां त्रिनेत्रां च शङ्खचक्रसमन्विताम् ।
शूलतर्जनसंयुक्तां ध्यायेद्दुर्गामभीष्टदाम्' इति ॥58 ॥

अम्भ्रणीसूक्तार्थस्तूच्यते - **अहं रुद्रेभिः** इत्याद्या ऋक्। अहमर्थस्य [अहंशब्दार्थस्य] देवदेवीचेतनस्य क्षीरनीरवत्सम्पिण्डत्वेन परममुख्यामुख्यवृत्तिभ्यां द्वयोरपि [देवदेव्योः] वाचकत्वात् श्रीदेवी ऋषिः। स्वस्वान्तर्यामिविवक्षया `अहं चरामि' इत्यादि वक्ति। अहं **रुद्रेभिः** `रैवतोऽजो भवो भीम' इति (भा.6-6-18) प्रमाणोक्तैरेकादशरुद्रैः। `अतो भिस ऐस्' (पा.सू. 7-1-9) `बहुलं छन्दसि' इति[2] भिस ऐस्त्वादेशाभावः। **वसुभिः** अग्निप्रमुखैरष्टवसुभिः। **आदित्यैः** `विवस्वानर्यमा पूषा' इति भागवतोक्त

---

1 मूलमातृकायामधः `दूर्वावत् = पच्चद हसरु' इति लिखितम् । तत्रान्त्ये पदे कार्णाटिकभाषिके।

2 पा.सू. 7-1-10। यद्यपि बहुलं छन्दसीति एकादश सूत्राणि अष्टाध्याय्यां पठ्यन्ते। तथापि अतो भिस ऐस् इत्यस्य सप्तमाध्यायप्रथमपादस्य नवमसूत्रत्वात् दशमसूत्रमत्र स्वीकर्तव्यम् ।

(भा.6-6-38) विष्णुव्यतिरिक्तैकादशादित्यैः। **विश्वेदेवैरुत** पुरूरवाः, आर्द्रवः, धुरिर्विलोचनः, कामः, कायनः, क्रतुः, दक्षः, सत्यो, वसुरित्येवं दशविश्वेदेवैरपि। यद्वा उतशब्दादन्यैर्मरुत्प्रभृतिभिरपि। **चरामि** `चर=गतिभक्षणयोः' (धा.पा.559) सञ्चरामि व्याप्ततया वर्त इत्यर्थः। तन्नियामकतया वर्त इति वा। तैः परिवारभूतैः सह वर्त इति वा। अहं **मित्रावरुणा** मित्रावरुणौ। `सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजाल' (पा.सू.7-1-39) इति द्वितीयाया आकारादेशः। **उभा** उभौ मित्रावरुणौ बिभर्मि। उभावित्यग्रेऽप्यन्वेति। अहम् **उभौ** इन्द्राग्नी बिभर्मि। `ईदूदेद्द्विवचनं प्रगृह्यम्' इति (पा.सू.1-1-11) सन्ध्यभावः। अहम् **अश्विना** उभौ अश्विनौ **बिभर्मि** `भृञ् भरणे' (धा.पा. 898) पुष्णामीत्यर्थः। द्विवचनेनोभयोर्लाभेऽप्युभावित्युक्तिर्मुक्तामुक्तद्वयलाभाय। छान्दोग्ये दहरविद्यायां `उभेऽस्मिन् द्यावा पृथिवी अन्तरेव समाहिते। उभावग्निश्च वायुश्च' इत्यादाविव (छा.8-1-3)। उक्तं हि तत्र भाष्ये - `इत्याद्युभयशब्दो मुक्तामुक्तराश्यपेक्षया' इति (छा.भा.8-1-3)। अहमिति पुनरुक्तिरुपचारनिवृत्त्यर्था। एवमग्रेऽपि।

अहं सोमम् इति द्वितीया। **आहनसम्** अभिषूयमाणं **सोमं** चन्द्रम्। `हन = हिंसागत्योः' इति (धा.पा.1012) धातोः हननमभिषवः। स च सोमलताया एव। लताभिमानित्वाचन्द्रोऽप्याहनसमित्युक्तः। अहं बिभर्मि। **उत** किञ्च त्वष्टारं पूषणं भगमहं बिभर्मि। **हविष्मते** वपापुरोडाशादिहविर्युक्ताय। **सुप्राव्ये**। अवते रक्षणगत्याद्यनेकार्थत्वादिह[1] तृप्त्यर्थादुपसर्गद्वयपूर्वकादवतेः `अवितृसवितृभ्य' इतीकारप्रत्यये[2] चतुर्थ्येकवचने परतो यणादेशे सुप्राव्ये इति रूपत्वात् सुष्ठु प्रकर्षेणावित्रे शोभनहविर्दानेन विष्णुप्रभृतिदेवानां तर्पकायेत्यर्थः। **सुन्वते** सोमाभिषवं कुर्वते सोमयाजिने यजमानाय **द्रविणं** ज्ञानधनरूपदैवमानुषवित्तं **दधामि** `डु धाञ् =

1 अव रक्षण-गति-कान्ति-दीप्ति-तृप्त्यवगम-प्रवेश-श्रवण-स्वाम्यर्थयाचन-क्रियेच्छा-दीप्त्यवाप्त्यालिङ्गन-हिंसा-दान-भाग-वृद्धिषु इति 600तमः धातुः।

2 नेदं पाणिनिसूत्रम्। मूलं न ज्ञातम्।

धारणे' (धा.पा.1092) धृतवत्यस्मि। दातुमिति शेषः। ददामीति वा ॥ छ ॥

अहं राष्ट्री सङ्गमनीति तृतीया ॥

राष्ट्री सर्वस्वामिनी। **वसूनां** दैवमानुषवित्तानां **सङ्गमनी** सङ्गमयित्री। उपासकानां प्रापयित्री। **चिकितुषी**। `कित = निर्माणे'[1] जगन्निर्मात्रीत्यर्थः। कितशब्दो ज्ञानपर्यायः। ज्ञानवती सर्वज्ञेति वा। **यज्ञियानाम्**। यज्ञशब्दाद्घप्रत्ययः। यज्ञार्हाणां यज्ञैराराध्यानाम्। **प्रथमा** मुख्या। यज्ञियानां वसूनां सङ्गमनीति वा सम्बन्धः। **ताम्** एवमुक्तगुणविशिष्टाम्। **भूरिस्थात्रां। भूरि** बहुभावेन बहुरूपतया **स्थात्रीं** तिष्ठन्तीम्। ङीप्व्यत्ययश्छान्दसः। दुर्गेति अम्बिकेति चण्डिकेति नानारूपवत्त्वेन वर्तमानाम्। किं दुर्गाम्बिकादिनामकजीवान्तरैक्येन तथा वर्तते नेत्याह - **भूरि** भूरीणि बहूनि दुर्गाम्बिकाभैरवीकालीत्यादिरूपेण बहुधा विद्यमानभूतजातानि **आवेशयन्तीं**, स्वार्थे णिच्, आविशन्तीमित्यर्थः। तत्तन्नामकजीवानां तत्र तत्र स्थानविशेषेषु **आवेशयन्तीं** सन्निधिं कारयन्तीमिति वा। **प्रथमा चिकितुषी** अनादितः सर्वत्र कृतनिवासा वा। `कित = निवास'[2] इति पठन्ति। तां **मा** मां **पुरुत्रा** `देवपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्' इति[3] सप्तम्यास्त्रादेशः। पुरुषु देशेषु करवीरप्रभृतिषु देवाः **व्यदधुः** लङर्थे लुङ्, विदधति नानाविधजनैः पूज्यतया कुर्वन्तीत्यर्थः। तदुक्तं दशमस्कन्धे -

`देवी माया भगवती। बहुनामनिकेतेषु बहुनामा बभूव ह' इति।[4]

मया सो अन्नमत्तीति चतुर्थी ॥

---

[1] कित निवासे रोगापनये चेति पाणिनीयधातुपाठे 993तमः धातुः।

[2] धा.पा.993 कित निवासे रोगापनये चेति धातुपाठः।

[3] देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलमिति समग्रं सूत्रम् पा.सू.5-4-56। तस्यायमर्थानुवाद इति भाति।

[4] भा. 10-5-13. भागवते अयं श्लोक इत्थं पठ्यते `इति प्रभाष्य तं देवी माया भगवती भुवि। बहुनामनिकेतेषु बहुनामा बभूव ह।' इति। तत्रापेक्षितभागमात्रस्यानुवादोऽत्र कृत इति भाति।

यः अन्नमत्ति स **मया** मत्प्रेरित एवान्नम् **अत्ति** भुङ्क्ते, यः **विपश्यति** विविध-वस्तुजातं पश्यति, यः **प्राणिति**, `अन = चेष्टायां',[1] श्वासोछ्वासादिव्यापारं करोति, यश्च परेणोक्तं शृणोति, `श्रु = श्रवणे', (धा.पा.942) सर्वोऽपि **मया ईं** मयैव दर्शन-श्रवणादिकं करोति। `स उ प्राणस्य प्राणश्चक्षुषश्चक्षुः' इत्यादिना (केन.उ.1-2) हरेरेव मुख्यमिदम्। ईमित्यस्य ईदृशीमिति वाऽर्थः। सर्वप्रेरकतया स्थितां माम् **अमन्तवः** अजानन्तः मदज्ञानिनो ये ते **उपक्षियन्ति** `क्षि = क्षये' (धा.पा.236) क्षीणा भवन्ति, नश्यन्तीत्यर्थः। **श्रुत** विश्रुत प्रख्यातेति साधुवर्गसम्बोधनम्। **श्रद्धिवं** **श्रद्धिः** श्रद्धा,`श्रदन्तरोरुपसर्गवद्वृत्तिरिष्यत'इत्युक्तेः[2]। श्रच्छब्दपूर्वकात् `डु धाञ् = धारणपोषण' (धा.पा.1092) इत्यतः `उपसर्गे घोः किः' इति (पा.3-3-92) किप्रत्यये जाते `आतो लोप'[3] इत्याकारलोपे श्रद्धिरिति सिद्धेः। ततो मत्वर्थे वप्रत्ययः। **श्रद्धावन्तम्।** श्रद्धेत्यङ्गेनाङ्गिनः श्रवणादेरुपलक्षणम्। श्रद्धापूर्वकश्रवणमननध्यानवन्तं विषयतासम्बन्धेन तद्वन्तम्। श्रद्धापूर्वकानुष्ठितश्रवणादिगम्यमिति यावत्। तादृशं परमात्मानं **ते** तुभ्यं **वदामि** वेदाभिमानित्वाद् `विज्ञानमानन्दं ब्रह्म' इत्यादि वेदमुखेन वदामि उपदिशामीत्यर्थः। **श्रुधि** श्रुणु। द्वादशगीताभाष्यटीकायां तु ` **अमन्तवो** निरपराधाः ये ते **उपक्षियन्ति** समीपे वसन्ति[4]। **श्रद्धिवं** श्रद्धेयमित्य'भिहितम् (प्र.दी.12-1)।

अहमेव स्वयमिदं वदामीति पञ्चमी॥

---

1 धा.पा.1070। धातुपाठे `श्वस प्राणने अन च' इत्यस्ति। धातुपाठे एव 1176तमः अन प्राणने इति द्वितीयो धातुरस्ति। प्रथमः अदादिः। द्वितीयो दिवादिः। उभयस्यापि प्राणनमेवार्थः। अन चेष्टायामिति अन्यधातुपाठेषु स्यात्।

2 `आतश्चोपसर्गे' इति पाणिनिसूत्रसम्बन्धिवार्तिकम् 3-3-106।

3 पा.6-4-64। `आतो लोप इटि च' इति समग्रं सूत्रम्।

4 एतद्वाक्यानन्तरम् ` श्रुधि श्रुणु। श्रुतः प्रसिद्धः।' इति वाक्यद्वयं प्रमेयदीपिकायां दृश्यते। प्रकृतानुपयोगात् नोल्लिखितमिति भाति।

देवेभिः ब्रह्मादिभिर्देवैः **मानुषेभिरुत** मनुष्यैरपि ऋषिगन्धर्वादिभिरपीति वा उतशब्दार्थः। **जुष्टं** सेवितम् । **सत्यं** सत्यमित्युपलालितमिति यावत् । **इदं** वक्ष्यमाणमहमेव **स्वयं** साक्षादनुपचारेण वदामि नान्योक्तमनुवदामीत्येवकारार्थः। तत्किमित्यत आह - **यमिति॥** तंतमित्युक्तेर्यमित्यस्यावृत्तिः। यंयं रुद्रं कर्तुं कामये तंतम् **उग्रं रुद्रं कृणोमि** करोमि। यं **ब्रह्माणं** विरिञ्चं कर्तुं कामये तं ब्रह्माणं कृणोमि। यम् **ऋषिं** वसिष्ठादिऋषिं कर्तुं कामये तमृषिं करोमि। यं **सुमेधां** सुमेधसं कर्तुं कामये तं **सुमेधां** सुमेधसं कृणोमि। रुद्रादिसर्वदेवादिपदप्राप्तिरपि तद्योग्यानां मदधीनैवेत्यर्थः। तदुक्तं -

`ब्रह्मेशशक्रविधर्मशशाङ्कपूर्वगीर्वाणसन्ततिरियं यदपाङ्गलेशम् ।
आश्रित्य विश्वविजयं विसृजति' इत्यादि[1]

॥छ॥ अम्भ्रणीसूक्ते आद्यो वर्गः ॥छ॥

द्वितीयवर्गे आद्या ऋक् **अहं रुद्राय धनुरातनोमीति** ॥

अहं **शरवे** `शॄ हिंसायां' (धा.पा.1489) हिंसकाय पञ्चममुखच्छेदाद् **ब्रह्मद्विषे।** ब्रह्मद्विषां दैत्यानां शरव इति वा[2]। **रुद्राय** द्वितीयार्थे चतुर्थी। एवंविधं रुद्रं **हन्तवा उ** हन्तवे **उ** एव। `तुमर्थे सेसेनसेऽसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवेङ्तवेनः' (पा.सू.3-4-9) इति तुमर्थे तवे प्रत्ययः। हन्तुमेव न तु भीषयितुमित्यर्थः। **धनुः** चापम् **आतनोमि** ज्याकर्षणेन विस्तारयामि। ननु उ-शब्दस्य एवेतिव्याख्यानमनुपपन्नं, हननस्याकृतत्वाद्भीषणस्यैव कृतत्वात् । ततश्च हन्तुमेवेति प्रतिज्ञाय हननाकरणे भीषणमात्रकरणे च अम्भ्रण्याः इच्छा मोघा स्यादिति चेत् । उच्यते। `न ब्रूमो वयं हन्तवा इति हननसङ्कल्प इति। येनोक्तदोषः। किं नाम?

---

1 द्वा.स्तो.7-2।

2 एवं च ब्रह्मद्विषे इति जात्येकवचनमिति भावः।

यथा क्रुद्धः पिता पुत्रं म्रियस्वेत्याक्षेपपूर्वकं दुर्गुणपरित्यागाभिप्रायेण वदति तथाऽम्भ्रण्यपि रुद्रस्यातिभीषणतया तद्वधमनभिप्रेत्यैव हन्तुमेवेति वदतीत्यङ्गीकारात्' इत्यभिनवचन्द्रिकायां (अभि.चं.1-1-1) व्यक्तम् । अहं **जनाय** जनस्य समदं संमदमिति यावत्, `आमोदसंमद' इत्यभिधानात्, कृणोमि । अहं द्यावापृथिव्युपलक्षितान् सर्वानूर्ध्वाधरलोकान् धारणाय **आविवेश** । `विश = प्रवेशने' (धा.पा.1425) प्रविष्टवत्यस्मीत्यर्थः ॥

अहं सुव इति द्वितीया ॥

अहम् **अस्य** जगतः **पितर** ब्रह्माणं **मूर्धन्** मूर्ध्नि, `सुपां सुलु'गिति (पा.सू.7-1-39) सप्तम्या लुक्, `न ङिसम्बुध्योः' इति (पा.सू.8-2-8) नलोपाभावः, सर्वोत्कृष्टतयेति यावत्, **सुवे** जनयामि । न केवलं पदे संस्थापयामि जनयामि चेत्यर्थः । एवम्भूताया ममापि **योनिः** कारणभूतः समुद्रे **अप्सु** अपामन्तस्तिष्ठतीति योज्यम् ।

`गुरोर्नाम न गृह्णीयाच्छिष्यो भार्या पतेरपि' इति

स्मरणात्[1] स्त्रीणां पतिनामग्रहणमनुचितमिति शिक्षणाय `आपो नारा' इति[2] स्मृत्युक्तरीत्या नारायणशब्दार्थमेवोवाच । यत एवं सर्वस्वामित्वे सति नारायणैकायत्तता ततो हेतोः **विश्वा भुवना** भुवनानि लोकान् अनुरोमकूपलयोदिनो विष्णोरनन्तरं **वितिष्ठे** व्याप्य तिष्ठामि व्याप्नोमि । तस्य विवरणम् **अमूं द्याम्** उपरितनलोकान् उतशब्दादधस्तनलोकान् **वर्ष्मणा** देहेन **उपस्पृशामि** व्याप्य वर्ते इति ॥

अहमेव वात इवेति तृतीया ॥

---

1 ब्र.सू.भा.टी.उदा.1-1-1

2 आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥ इति हरिवंशस्थः पूर्णः श्लोकः ।

अहमेव **विश्वा** विश्वानि भुवनानि **आरभमाणा** उत्पादयन्ती , न केवलं भुवनानि व्याप्य वर्तमाना आकाशवत् किन्तूत्पादयन्त्यपि। **वात इव** वायुरिव **प्रवामि,** `वा = गतिगन्धनयो'(धा.पा.1050)र्निर्लेपा सती सञ्चरामि। सर्वमुत्पाद्य तत्र स्थिताऽप्यहं तत्तद्दोषलिप्ता नास्मीत्यर्थः। उक्तं स्वमाहात्म्यं भगवदाधिक्योक्तिपूर्वकमुपसंहरति - **परो दिवेत्यादिना॥** तृतीया पञ्चम्यर्थे। योऽयं मम योनिः समुद्रेऽन्तरुक्तः स **दिवा** दिवः **परः** उत्तमः। उपलक्षणमेतत् । `परो दिवेभिरसुरैर्यदस्ति' इति श्रुत्यन्तरोक्तदिशा देवासुरेभ्योऽपि परः। अहं तु **महिना** महिम्ना **एतावती** परिमिता बभूव। लिङुत्तमपुरुषैकवचनम् । परिमितमहिमैवास्मीति ॥ छ ॥

इत्यम्भ्रणीसूक्ते द्वितीयो वर्गः ॥ छ ॥

`अहमष्टौ वागम्भृणी तुष्टावात्मानं द्वितीया जगती' (अनु.क्र.10-125) इत्यनुक्रमणिकोक्त्यनुरोधेनाहमित्यष्टर्चं सूक्तम् । अम्भ्रणस्य महर्षेर्दुहिता वाङ्नाम्नी अस्य सूक्तस्य ऋषिः। द्वितीया ऋग्जगती। शिष्टाः सप्त त्रिष्टुभः। परमात्मा देवतेति केचिदाहुः। तत्राम्भ्रणस्य महर्षेर्दुहिता वाङ्नाम्नी ऋषिरित्ययुक्तम् । `श्रीभूदुर्गाऽम्भ्रणी ह्रीश्च महालक्ष्मीश्च दक्षिणा' इत्यादिना (बृ.भा.अ1-अव्याकृतब्राह्मणम्) प्रथमबृहद्भाष्योक्तपैङ्गिश्रुतौ लक्ष्मीपर्यायत्वेनाम्भ्रणीशब्दस्योक्त्या तद्विरोधात् । किन्तु स्वदृष्टं सूक्तमित्यत्रैवो(तं.सा. 4-55)क्तेश्चाम्भ्रणीसञ्ज्ञा श्रीदेव्येव ऋषिरिति सङ्क्षेपः ॥ छ ॥

॥इति तन्त्रसारटीकायां वेङ्कटपतिकृतायां लक्ष्मीसूक्तार्थः समाप्तः॥

श्रीराघवेन्द्रतीर्थोक्तः श्रीसूक्तार्थो निरूपितः।

तन्त्रसारस्य टीकायां वेङ्कटेशाख्यसूरिणा॥[1]

---

[1] अयं श्लोकः मूलमातृकायामधस्तात् दृश्यते। ग्रन्थकृद्भिः श्रीराघवेन्द्रतीर्थानामुल्लेखः स्वीये सूत्रार्थसङ्ग्रहे `इति राघवेन्द्रतीर्थीये' इति तत्रतत्र कृतः। अतो नेदमाश्चर्यकरम्

4.25 भूपञ्चाक्षरः-दुर्गाषडक्षरः 39-40

श्रीशाय नमः । हरिः ओम् ।[1]दुर्गाषडक्षरमन्त्रं भूपञ्चाक्षरमन्त्रं चैकोक्त्यैवोद्धरति - नमोन्त इति ॥

नमोन्तः स्वेन सहितस्तदेवान्यो मनुः स्मृतः ।

तत् भूरिति बीजं दुरिति बीजं च **स्वेन** स्ववाचकेन भूशब्देन दुर्गाशब्देन चतुर्थ्यन्तेन सहितः **नमोन्तः** नमश्शब्दान्तः **अन्यः** केवलबीजापेक्षया एकाक्षर-मन्त्रापेक्षयेति यावत् । **मनुः** मन्त्रः । विधेयलिङ्गानुसारेण नमोन्त इत्यादौ पुल्लिङ्ग-प्रयोगः । तथा च `भूः भुवे नमः'[2] `दुः दुर्गायै नमः' इति पञ्चाक्षरषडक्षरमन्त्रनिष्पत्तिः ।

4.26 वेदोक्तदुर्गामन्त्रः 41

त्रिष्टुप्छन्दस्कं दुर्गाया मन्त्रान्तरमाह - **दुर्गेति** ॥

दुर्गात्रिष्टुप् कश्यपोक्ता तत्र वर्णोऽग्निवत् स्मृतः ॥ 59 ॥
त्रिनेत्रत्वं च दुर्गायाः प्रायः सर्वत्र कथ्यते ।

त्रिष्टुप्छन्दोबद्धा। **कश्यपोक्ता** कश्यपदृष्टा।

`जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।

स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः' इति (ऋ.सं.1-99-1) दुर्गाम-न्त्रः ।

तदर्थस्तु - जातं वेत्तीति **जातवेदाः** । `पुल्लिङ्गेनोच्यते स्त्री च पुंवच्छक्तिमती यदि' इति वचनात् [3] पुल्लिङ्गोपपत्तिः । तत्प्रीत्यर्थं **सोमं सुनवाम** उत्तराधरोपलाभिः

1 इदं पुनर्व्याख्यानारम्भसूचकं मध्ये मङ्गलं ज.1पाठे एवास्ति ।

2 `भूर्भुवे नमः' इति विसर्गसन्धिसहितः ज1.पाठः । अग्रिमवाक्ये तदभावात् स पाठो नादृतः ।

3 ब्र.सू.भा.उदा.1-4

सोमाभिषवणं कुर्मः। **सः वेदः** सर्वज्ञः **अरातीयतो** दुःखकारित्वेन शत्रुवदाचरतो रागादिदोषान् **निदहाति** नितरां भस्मीकरोति। अग्न्यत्वादग्निर्दुर्गा। **नः** अस्मान्। **अतिदुर्गाणि** अत्यन्तं निर्गन्तुमशक्यानि **विश्वा** विश्वानि दुरितानि सिन्धुं नावेव कर्णधार इव **अर्तिपषत्** उत्तारयामासेति।

एतन्मन्त्रदेवतायां वर्णविशेषमाह - **तत्रेति॥ अग्निवद्वर्णः** शुक्लभास्वररूपो वर्णः रक्तवर्णो वा। दुर्गारूपस्य नेत्रसङ्ख्यां प्रसङ्गादाह - **त्रिनेत्रत्वमिति॥** दुर्गायाः **त्रिनेत्रत्वं** त्रिचक्षुष्मत्त्वं **प्रायः** बाहुल्येन सर्वत्र `दूर्वोपमां त्रिनेत्रां च' इत्याद्युदाहृत[1] पुराणवाक्येषु कथ्यत इत्यर्थः। यद्वा **सर्वत्र** सर्वदुर्गामन्त्रेष्वित्यर्थः। ऐश्वर्याद्यपेक्षया जपादिसमयेऽतिक्रौर्याभिव्यञ्जकत्रिनेत्रत्वध्यानस्याकर्तव्यत्वात् प्राय इत्युक्तम् ॥59.॥

इदानीं वैदिकमन्त्रे षडर्णमन्त्रे चाङ्गन्यासमाह - **पादैरिति॥**

पादैः समस्तेन तथा षडर्णेनाङ्गमुच्यते ॥ 60 ॥

वैदिके मन्त्रे व्यस्तैः पादैः समस्तेन च पादेन पञ्चाङ्गानि। तथा षडर्णे मन्त्रे षडर्णेनाङ्गषट्कमुच्यत इत्यर्थः ॥60॥

ननु लक्ष्मीमन्त्रकथनावसरे दुर्गामन्त्रकथनमयुक्तं, सर्वोत्तमा गौरी कृष्णस्वसा वा दुर्गेति बहूनां प्रवादादित्यत आह - **रमाया इति॥**

रमाया एव रूपाणि त्वेतानि हि विदो विदुः।
मुख्यतो जामदग्न्यस्तु देवताऽस्य मनोः स्मृतः ॥ 61 ॥

एतानि श्रीभूदुर्गानामकानि रमाया एव रूपाणीति -

[1] पूर्वं 4-58तमश्लोकव्याख्याने।

`श्रीभूदुर्गेति याऽभिन्ना प्रकृतिः शक्तिरुच्यते ।

विष्णोः स्वरूपशक्तेः सा शक्यत्वाच्छक्तिरुच्यत ' इति[1]

तन्त्रभागवतादिशास्त्रविदः **विदुः** ज्ञातवन्तः । `श्रीमन्त्रस्य क्षत्रहन्ता रामो देवता' इति ग्रन्थान्तरैकवाक्यतायै आह - **मुख्यत इति ॥ अस्य मनोः** दुर्गामन्त्रस्य **जामदग्न्यः** परशुरामः **मुख्यतो देवता** मुख्यप्रतिपाद्यः । अमुख्या देवता रमेत्याशयः । तथा च दुर्गामन्त्रोक्ता गुणास्तच्छब्दवाच्यभगवति मुख्या निरवधिकाश्च । लक्ष्म्यां भगवदायत्तास्तदपेक्षया न्यूनाश्चेत्युक्तं भवति । एवं ब्रह्मादिमन्त्रेष्वपि द्रष्टव्यम् ॥61 ॥

4.27 वेदोक्तचतुर्मुखमन्त्रः 42

अथ ब्रह्मणश्चतुर्मुखस्य मन्त्रमाह - **हिरण्येति ॥**

हिरण्यगर्भसूक्तं च भृगुदृष्टं प्रकीर्तितम् ।

भृगुदृष्टं

`हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।

स दाधार पृथिवीमुत द्यामुतेमां कस्मै देवाय हविषा विधेम' इति (ऋ.सं. 10-121-1)

वर्गद्वयं पञ्चदशर्चं सूक्तं हिरण्यगर्भस्य मन्त्ररूपमित्यर्थः ॥ छ ॥

संस्मृत्य चरणद्वन्द्वं श्रीनिवासार्यसद्गुरोः ।

हिरण्यगर्भसूक्तार्थः कथ्यते तत्कृपाबलात् ॥ 1 ॥

---

1 भा.ता.उदा.

हिरण्यगर्भ इति दशर्चं सूक्तम् (ऋ.सं.10-121)। भृगुऋषिस्त्रिष्टुप्छन्दः।[1] अत्र हिरण्यगर्भशब्दः कशब्दश्च विरिञ्चतदन्तर्याम्युभयपरः। `अन्तस्तद्धर्मोपदेशात्' इत्यधिकरणे (ब्र.सू. 1-1-20) अधिदेवगताशेषशब्दानां महायोगविद्वद्रूढिभ्यां विष्णुवाचित्वोक्तेः। `ज्योतिश्चरणाभिधानादि'त्यत्रा (ब्र.सू. 1-1-24) शेषसूक्तानामवैष्णवत्वप्रसिद्धेरध्यापकसम्बन्धिन्याः विष्णुनारायणादिप्रसिद्धपदाभावनिमित्ताज्ञानमूलकत्वोक्त्या वैष्णवत्वोक्तेरन्तर्यामितयैव विष्णोः सूक्तप्रतिपाद्यत्वोपगमेन[2]। एवं रूपेण सर्वसूक्तानां वैष्णवत्वेऽपि `इदं हिरण्यगर्भसूक्तं' `इदं वायुसूक्तम्' इत्यादिसूक्तव्यवस्थायाश्च `अभिव्यक्तेरित्याश्मरथ्यः' (ब्र.सू. 1-2-29) `अनुस्मृतेर्बादरिः' (ब्र.सू. 1-2-30) `सम्पत्तेरिति जैमिनि' (ब्र.सू. 1-2-31) रिति त्रिसूत्र्यामुक्तदिशा हिरण्यगर्भादिसूक्तैर्हिरण्यगर्भाद्यधिष्ठानेन स्मरणशब्दोक्तोपासने तत्रैव हरेरपरोक्षत्वप्राप्यत्वयोः सत्वेनानुस्मरणाभिव्यक्तिप्राप्तीनां वाय्वादेरधिष्ठानत्वहेतुनोपचारेणोपपत्तेः। `यो देवानां नामधा एक एव' इति[3] `नामानि सर्वाणि यमाविशन्ति' इत्यादिश्रुतेः[4]। `ब्रह्मणि ब्रह्मरूपोऽसौ' इति स्मृतेश्च[5]। `मन्त्रादिवद्वाऽविरोध' (ब्र.सू. 3-3-58) इत्युपासनापादीयसूत्रेऽधमदेवतापरमन्त्राणां तदुत्तमदेवतापरत्वेन व्याख्यानेऽप्यविरोधस्योक्तत्वाच्चोभयपरत्वेनैव मन्त्राणामर्थो ध्येयः[6]।

तत्राद्या ऋक्।

---

1 अत्र - `हिरण्यगर्भो दश हिरण्यगर्भः प्राजापत्यः कायम्' (अनु.क्र.10-121) इत्यनुक्रमणिकायां तु प्रजापतिपुत्रो हिरण्यगर्भनामा ऋषिः कशब्दवाच्यः प्रजापतिर्देवतेत्युक्तम्। - इति मूलमातृकायामदृष्टा पङ्क्तिः प्रा.पाठे दृश्यते।

2 सूक्तप्रतिपाद्यत्वोपगमेन इति ज.पाठः।

3 ऋ.सं. 10-82-3। `यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा।' इति पूर्वार्धम्। `तं सम्प्रश्नं भुवना यन्त्यन्या ' इति शेषः।

4 वि.त.वि.उदाहृता भाल्लवेयश्रुतिः।

5 भा.ता.1-3-24 उदाहृतं वामनवचनम्।

6 ऋग्भाष्ये अपि प्रथमाध्याये इन्द्रसूक्तमारभ्य लक्ष्मीसूक्तपर्यन्तं समस्तवेदानां स्वोत्तमदेवतावाचकत्वमुपपादितम्।

`हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीमुत द्यामुतेमां कस्मै देवाय हविषा विधेम' इति ।

हिरण्यशब्दोऽत्र हिरण्यमयब्रह्माण्डपरः ।

`अप एव ससर्जादौ तासु वीर्यमवासृजत् ।
तदण्डमभवद्धैम'मित्युक्तेः (ब्र.सू.भा.1-1-20उदा. व्याससमृतिः) ।

तस्य **गर्भः** गर्भवदन्तर्विद्यमान इत्यर्थः । `सप्तार्धगर्भा' इत्यादिश्रुतेः (ऋ.सं.1-164-36) । ब्रह्माण्डावरणमहदादितत्वसप्तकमध्ये महदभिमानितया हिरण्यनामकब्रह्माण्डमेव गर्भो यस्य स इति वार्थः । हिरुक् सुखरूपं णं चेष्टारूपं यं ज्ञानरूपं ब्रह्म गर्भे जठरे विशेषेण सन्निहितं यस्येति वा **हिरण्यगभः** ब्रह्मा । अग्रे **भूतस्य** अनादितो विद्यमानस्य, `भू = सत्तायाम्' इति धातोः (धा.पा.1) । यद्वा `भू = बहौ' `बहुः पूर्णतायाम्' इति (छा.भा.3-12-1) छान्दोग्यभाष्योक्तेर्भूतस्य देशकालगुणपूर्णस्य हरेस्सकाशाद् **एकः** एकाकी **अग्रे** सृष्ट्यादौ **जातः** उत्पन्नः । **समवर्तत** अतिष्ठत् । `यो ब्रह्माणं विदधाति पूर्वं' (श्वेता.उ. 6.18) `ब्रह्मा देवानां प्रथमः सम्बभूव' इत्यादेः (मु.उ.1-1-1) सर्वश्रैष्ठ्यद्योतनायैक इत्युक्तिः । सृष्टौ हरेः यः पूर्वमुत्पन्नः सः स्वजातावुत्तम इति व्याप्तेः । यथा शब्देषु प्रथमोत्पन्न ॐकार इति दृष्टान्तसम्भवात् । अन्तर्यामिणो जननं च रूपान्तरेण तत्र प्रादुर्भावो द्युभ्वाद्यधिकरणन्यायेन (ब्र.सू. 1-3-1) । `तदधीनत्वादर्थवत्' इति (ब्र.सू. 1-4-3) सूत्रोक्तदिशा हिरण्यगर्भजननं प्रति स्वातन्त्र्येण निमित्तेन वा जात इत्युक्तिर्युक्ता । तस्य महिमानमाह - **पतिरिति ॥** भूतस्येत्यन्वेति । समुदायाभिप्रायमेकवचनम् । प्राणिजातस्य **पतिः** स्वामी आसीत् । सर्वप्राण्याधिपत्येऽधिकृतोऽभूदित्यर्थः । किञ्च **स** हिरण्यगर्भः **इमां** प्रमाणसिद्धां **पृथिवीम्** अधस्तनसप्तलोकान् **द्यामुत** स्वर्गाद्युपरितनलोकांश्च । उतेत्यन्तरिक्षसमुच्चयो वा । **दाधार** धृतवान् । तदाधारतया पृथिव्यादिजगत्तिष्ठती-

त्यर्थः । `छन्दसि लुङ्लङ्लिटः' (पा. 3-4-6) इति सार्वकालिकोऽयं लिट् । एतच्च धारणमेको दाधार भुवनानि विश्वा, `स सेतुर्विधृतिः' (छा.उ.8-4-1) `एष सेतुर्विधारणः' (बृ.उ.6-4-22) `यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतम्' इत्यादिश्रुतेः, `धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः' (ब्र.सू.1-3-16) `द्युभ्वाद्यायतनं स्वशब्दाद्' (ब्र.सू.1-3-1) इत्यादिसूत्रैश्च हरौ मुख्यम् । अन्यत्र तदधीनं सङ्कुचितं चेति ज्ञेयम् । एवमग्रेऽपि । **॥देवाय॥** `दिवु =क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु' इति (धा.पा.1107) क्रीडाद्यर्थाद्दीव्यतेः कर्तर्यच्प्रत्यये स्तुत्यर्थात्कर्मणि घञ्प्रत्यये च देव इति रूपसिद्धेः क्रीडादिकर्त्रे स्तुतिविषयभूतायेत्यर्थो भगवति । विरिञ्चे तु स्तुत्यर्थाद्दीव्यतेः कर्मणि कर्तरि च । स्वाधमैः स्तुत्याय हरिस्तोत्रकर्त्रे चेत्यर्थः । **कस्मै** कशब्दवाच्याय ब्रह्मणे । `हिरण्यगर्भः कः प्रोक्त' इति गीतातात्पर्योक्तेः[1]। सर्वनामत्वाभावेऽपि छान्दसः स्मै इत्यादेशः। **हविषा** हविरादिपूजासाधनद्रव्यैः **विधेम** परिचरेम । विधधातुः परिचरणार्थः[2]। तस्य सकर्मकत्वेन कशब्दार्थस्य कर्मकारकत्वेऽपि प्राजापत्यात्मकपशोर्वपापुरोडाशादिहविर्दाने सम्प्रदानत्वाच्चतुर्थी । **देवं** क्रीडादिगुणकं **कं** विरिञ्चं तदन्तर्यामिणं च हविषा **परिचरेम** आराधयाम इत्यर्थः । उत्तरमन्त्रगतं य इति पदमत्राप्याकृष्यते । य एवंविधस्त्रिपाद्यामुक्तरूपः **तस्मै** तादृशाय कस्मै हविषा विधेम ॥ छ ॥

द्वितीया ।

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥

यः हिरण्यगर्भः **आत्मदाः** आकारान्तः, सेवकेभ्यः स्वात्मप्रदः भक्तवश इति यावत् । परमात्मोपदेष्टेति वा । **बलदाः** बलप्रदश्चेत्यर्थः । **विश्वे** सर्वे जनाः **यस्य**

---

1 इदं गीताभाष्यवचनम् । गी.भा.उदा.2-54

2 विध विधाने इति 1326तमः धातुः । धातूनामनेकार्थत्वात् परिचरणार्थकत्वमिति भाति ।

हिरण्यगर्भस्य **प्रशिषम्** अनुशासनमनुतिष्ठन्ति। देवाश्च यस्य **प्रशिषं** प्रशासनमुपासते। **अमृतं** भावे निष्ठा[1], मृत्यभावः यस्य छायेव **छाया** अधीनः। **मृत्युः** मृतिश्च यस्य छायेव। तस्मै कस्मै देवायेति पूर्ववद्योजना। यस्य छायामृतं यस्य मृत्युरिति पालकानां संहारकाणां चेन्द्रादीनां रुद्रादीनां च तत्प्रतिबिम्बत्वं चाब्रवीत्। पुनर्यस्येति योगादादरत इत्युक्तमिति। `यस्य छायामृतं मृत्युरिति चादरतोऽब्रवीत्' इति प्रथमाध्यायऋग्भाष्यवाक्यात् (ऋ.भा.1-68)। न विद्यते **मृतं** मरणं यस्मादित्यमृतं पालकजातमिन्द्रादि। **मृत्युः** मारको रुद्रादि यस्य छायेव **छाया** प्रतिबिम्बभूत इति सम्प्रदायार्थः। `शासु = अनुशिष्टौ' (धा.पा.1075) क्विप्। क्वौ च `शास इत्व'[2] मित्युपधाया इत्वे `शासिवसिघसीनां च' इति (पा.सू.8-3-60) षत्वे प्रोपसर्गे च प्रशिषमिति रूपम्। एतच्च प्रशासनं हरेरेव मुख्यम्। `एतस्य वाऽक्षरस्य प्रशासने गार्गि' इत्यादिश्रुतेः (बृ.उ.5-8-9)। `एकः शास्ता न द्वितीयोऽस्ति शास्ता' इत्यादेः (म.भा.2-58-7; 12-220-8; 14-27-1)। `सा च प्रशासनात्' इति (ब्र.सू.1-3-11) सूत्राच्चेति ॥ छ ॥

तृतीया।

`यः प्राणतो निमिषतो महित्वैक इन्द्राजा जगतो बभूव।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥

यो हिरण्यगर्भः **प्राणतः** प्रश्वसतः `अन = प्राणन' (धा.पा.1070) इति धातोः। यद्वा प्रकर्षेण चेष्टमानस्य, `अन = चेष्टायाम्' इति[3] धातोः। **निमिषतः** निमेषम-

---

1 `क्तक्तवतू निष्ठा' पा.सू.1-1-26, इति क्तप्रत्यस्य निष्ठा इति नाम।

2 पा.सू.6-4-34. शास इदङ्हलोरिति सूत्रपाठः। तस्यार्थानुवादोऽयम्।

3 धा.पा.1070। धातुपाठे `श्वस प्राणने अन च' इत्यस्ति। धातुपाठे एव 1176तमः अन प्राणने इति द्वितीयो धातुरस्ति। प्रथमः अदादिः। द्वितीयो दिवादिः। उभयस्यापि प्राणनमेवार्थः। अन चेष्टायामिति अन्यधातुपाठेपु स्यात्।

क्षिपक्ष्मचालनं कुर्वतः **जगतो** जङ्गमस्य **महित्वा** महित्वेन, `सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजाल' (पा.सू.7-1-39) इति तृतीयायाः आकारादेशः, माहात्म्येन **एक इत्** अद्वितीय एव राजा बभूव। **यो** हिरण्यगर्भः **अस्य** प्रमाणप्रसिद्धस्य **द्विपदः** द्वौ पादौ यस्य पादद्वययुक्तस्य मनुष्यस्य। जातावेकवचनम् । **चतुष्पदः** पादचतुष्टययुक्तस्य गवाश्वादेश्च **ईशे** ईष्टे। कर्मणि षष्ठी। द्विपदादीन् यो नियामयति तस्मै कस्मै देवायेत्यादि पूर्ववत् । अत्रापि जगद्राजत्वं द्विपदादीशत्वं च `न ते महित्वमन्वश्नुवन्ति' (ऋ.सं.1-154-1) `य आत्मानमन्तरो यमयति' इत्यादेः[1] हरेरेव मुख्यम् ॥

चतुर्थी।

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥

हिमान्यस्मिन्सन्तीति **हिमवान्।** बहुवचनमाद्यर्थे[2]। हिमवदादयः इमे प्रमिताः सर्वेऽपि पर्वताः यस्य हिरण्यगर्भस्य **महित्वा** महित्वमैश्वर्यमित्याहुः। तेन सृष्टत्वपाल्यत्वादिहेतोः तदीयमाहात्म्यद्योतकत्वेन वर्तन्त इत्यर्थः। **रसया।** रसो जलम् । मतुबर्थे `अर्श आदिभ्योऽजि' (पा.सू.5-2-127) त्यकारप्रत्ययः। जातावेकवचनम् । **रसया** रसवतीभिर्नदीभिः सह **समुद्रम्,** अत्रापि जातावेकवचनं, सर्वान् समुद्रान् यस्य महित्वमाहुरार्याः। पूर्वत्रेवाभिप्रायः। यस्य च **इमाः प्रदिशः** आग्ने-

---

1 अन्तर्यामिब्राह्मणे

2 `अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः' [ऋ.सं. 10-71-7] इति मन्त्रव्याख्यानावसरे न्यायसुधायां मनोजवेषु इति बहुवचनमेवमेव व्याख्यातम् । तथा हि सुधा - `अक्षण्वन्तोऽक्षिमन्तः। अनो नुडिति नुट् । कर्णवन्तः प्राप्तसमस्तेन्द्रियफलाः। परस्परं सखायो मुक्ता। मनोजवेषु मनोजवः प्रज्ञातिशयो बहुवचनमाद्यर्थे ज्ञानादिगुणेषु असमास्तारतम्योपेता बभूवुः।' - इति।

यादिकोणदिशः महित्वमाहुः। बाहुरित्यनेनान्वयः। यस्येति पुनः श्रवणादिन्द्रादिप्रधानदिशः कोणदिशश्च यस्य बाहू, कार्यकारणयोरभेदोपचारः, बाहुभ्यां जातास्तस्मै देवायेत्यादि ॥छ॥

पञ्चमी।

येन द्यौरुग्रा पृथिवी च दृळ्हा येन स्वः स्तभितं येन नाकः।
यो अन्तरिक्षे रजसे विमानः कस्मै देवाय हविषा विधेम॥

येन हिरण्यगर्भेण **द्यौरुग्रा** कृतेति शेषः। **उग्रा** गहनरूपा कृता। येन पृथिवी च **दृळ्हा** दृढीकृता स्थिरीकृता। येन **स्वः** स्वर्गलोकः **स्तभितः**, यथा अधो न पतति तथा उपर्यवस्थापित इत्यर्थः। `ग्रसितस्कभितस्तभिते'ति[1] निपातनात्साधुः। ततः उपरितनलोकश्च येन स्तभितः नाक आसीदित्येके। **यो** हिरण्यगर्भः अन्तरिक्षे **रजसः**, उपलक्षणमेतत्, रजस्तमःप्रधानान् प्राणिनो **विमानो** निर्मिमाणो रक्षःपिशाचादीनन्तरिक्षचारिणः कुर्वाण इत्यर्थः। तस्मै कस्मै देवायेत्यादि। एतदपि द्यावाभूम्यादिकर्तृत्वं `द्यावाभूमी जनयन्देव एक' (ऋ.सं. 10-81-3) इत्यादेर्हरेरेव मुख्यमिति ज्ञेयम्॥

॥छ॥ इति हिरण्यगर्भसूक्ते आद्यो वर्गः ॥छ॥

द्वितीयवर्गे आद्या ऋक्।

यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम॥

---

1 पा.सू.7-2-34. आंशिकस्यास्य सूत्रस्य समग्ररूपमष्टाध्याय्यामित्थं पठ्यते `ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूत्रीरुज्वलितिक्षरितिवमित्यमितीति च' इति।

क्रन्दसी, प्रजापतिना क्रन्दितत्वात् नोदितत्वात् प्रेरितत्वहेतुना क्रन्दसीत्युक्ते स्तुतिं कुर्वन्त्याविति वा, **अवसा** रक्षणेन लोकस्य रक्षणनिमित्तं **तस्तभाने** प्रजापतिना स्तब्धे लब्धसर्वैश्वर्ये सत्यौ **रेजमाने** राजमाने दीप्यमाने, आकारस्यैकारः,[1] द्यावापृथिव्यौ **यं** हिरण्यगर्भं **मनसा** बुध्या **अभ्यैक्षे** तामावयोर्महित्वं कृतमनेनेत्यभ्यपश्यतामित्यर्थः। अभिमान्यपेक्षयैतत्। ईक्ष = दर्शनाङ्कनयोः (धा.पा.25) लङ्। **यत्राधि** यस्मिन्नाधारभूते लोके[2] हिरण्यगर्भाधारकत्वेनेति वा। **सूरः** सूर्यः **उदितः** उदयं प्राप्तः सन् **विभाति** प्रकाशते। तस्मै कस्मै देवायेत्यादि।

द्वितीया।

आपो ह यद्बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्।
ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम।

`आपो वै सर्वा देवता' (जा.उ.4) इति श्रुतेराप इति सर्वदेवानामप्भूतस्य च सङ्ग्रहः। **बृहतीः** बृहत्यः। `बृहन्महतोरुपसङ्ख्यानम्' इति ङीप्। **अग्निं जनयन्तीः** जनयन्त्यः। यज्ञाङ्गभूतगार्हपत्याद्यग्निं तदभिमानिनं चोत्पादयन्त्यः। हविर्दाने दूतं कुर्वन्त्य इति वा। आपः **गर्भं** ब्रह्माण्डस्य गर्भीभूतं हिरण्यगर्भं **दधानाः** हृदये धारयन्त्यः ध्यायन्त्य इति यावत्। **विश्वं** जगत् **आयन्** प्राप्नुवन्, इण् = गतौ (धा.पा.1045) लट्। **यद्** यस्मात् ततः देवानाम् **असुः** प्राणभूतः एकः समवर्तत। तस्मै कस्मै देवायेत्यादि।

तृतीया।

यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम्।
यो देवेष्वधिदेव एक आसीत् कस्मै देवाय हविषा विधेम।

---

1 `राजमाने' इति भाव्ये धातोराकारस्य एकारः छान्दसत्वात् प्राप्त इत्यर्थः।

2 `द्युलोके' इति ज1.पाठः।

यज्ञम् अग्निष्टोमादियज्ञं **जनयन्तीः** वैदिकाग्निसम्पादनेनानन्तरं तदङ्गकयज्ञकर्म कुर्वाणाः **दक्षं** प्रजापतिपर्यायोऽयम्, प्रजापतिं हिरण्यगर्भमिति यावत् । तदन्तर्यामिणं च **दधानाः** हृदये धारयित्रीः[1] **महिना** महिम्ना स्वमाहात्म्येन। **आपः** अपः, द्वितीयायाः व्यत्ययेन प्रथमा। **यश्चित्** योऽपि ब्रह्मा **पर्यपश्यत्** परितो दृष्टवान् । यश्च देवेषु **अधि** अधिक एवासीत् । तस्मै कस्मै देवायेत्यादि।

चतुर्थी।

मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान।
यश्चापश्चन्द्रा बृहती जजान कस्मै देवाय हविषा विधेम।

हिरण्यगर्भः **नो** अस्मान् **मा हिंसीत्**, `विसि हिंसायां', मद्विषयपीडां मा कार्षीदित्यर्थः। यः **पृथिव्याः** भूमेः भूम्याद्यधस्तनलोकानां **जनिता** जनयिता। `जनिता मन्त्र' (पा.सू.6-4-53) इति निपातनात् णिलोपः। स्रष्टेत्यर्थः। **यो वा** यश्च **सत्यधर्मा** अवितथजगद्धारणादिधर्मवान् । **दिवः** द्युप्रभृत्युपरितनलोकान् **जजान** जनयामास। यश्च **बृहतीः** महती **श्चन्द्राः** आह्लादिनीः **अपः** उदकानि **जजान** जनयामास। तस्मै कस्मै देवायेत्यादि।

पञ्चमी।

प्रजापते न त्वदेतान्यन्यो जातानि परि ता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥

हे प्रजापते **त्वत्** त्वत्तः अन्यः कश्चिद् **एतानि** प्रमितानि **जातानि** कार्यभूतानि **विश्वा** विश्वानि **न परि बभूव।** तत्परिभूय स्थितो नाभूत् । ततोऽतिशयितशक्तिमान्नाभूत् । तानि त्वमेव परिबभूविथेति भावः। ततोऽतिशयितशक्तिमानभूः तत्स्वामित्वेन वर्तस इति यावत् । वयं च **यत्कामाः** यत्फलं कामयमानाः। **ते** तुभ्यं

---

[1] `धात्रीः' इति ज1.पाठः।

त्वदर्थं **जुहुमः** हवींषि प्रयच्छामः । **तत् फलं नः** अस्माकम् **अस्तु** भवतु । तथा च वयं **रयीणां** धनानां **पतयः** ईश्वराः **स्याम** भवेम ॥

॥ हिरण्यगर्भसूक्तार्थे द्वितीयो वर्गः ॥

॥ इति तन्त्रसारटीकायां चतुर्थाध्याये हिरण्यगर्भसूक्तार्थः समाप्तः ॥

अस्य सरस्वत्यादिदेवतामन्त्रेष्वपि देवतात्वं ज्ञेयम् । यथोक्तमृग्भाष्ये - `तथात्र च । ऋते प्रसिद्धां ब्रह्मैव' इति (ऋ.भा.अ1-सू1-श्लो47) । `तथात्र च श्रीदेव्यां प्रसिद्धाः अम्भ्रणीसूक्ताद्याः ऋते अन्यासां विद्यानां ब्रह्मैव देवता' इति तट्टीकायाम् ।

न्यासमाह - **ब्रह्मेति** ॥

ब्रह्मधातृविरिञ्चाजपाद्मैरङ्गमुदाहृतम् ॥ 62 ॥

ध्यायेन्निषण्णमजमच्युतनाभिपद्मे

प्रोद्यद्दिवाकरसमूहनिकाशमग्र्यम् ।

मातृप्रकारकरमुत्तमकान्तिमद्भि-
र्वक्त्रैः सृजन्तमखिलैः परमार्थविद्याम् ॥ 63 ॥

ध्यानमाह - **ध्यायेदिति** ॥ **अच्युतनाभिपद्मे** पद्मनाभस्य नाभिकमले **निषण्णम्** आसीनम् । **प्रोद्यद्दिवाकरसमूहनिकाशं** सम्यगुद्यदादित्यसमूहनिभम् । **मातृप्रकारकरम्** । **मातुः** लक्ष्म्याः **करप्रकारः** कराणां प्रकारः पद्मद्वयाभयवरयुक्तत्वरूपो यस्य स तथेति । करशब्दस्य परनिपातः । उत्कृष्टकान्तिसम्पन्नैरखिलैर्वक्त्रैश्चतुर्मुखैः **परमार्थविद्याम्** `ता एव परमा विद्या यदा विष्णोस्तु वाचका' (आ.उ.1-1) इत्युक्तेरृगादिरूपां **सृजन्तम्** उच्चारयन्तम् ॥62,63 ॥

4.28 ब्रह्मपञ्चाक्षरः-हिरण्यगर्भाष्टाक्षरः 43-44

तस्य पञ्चाक्षरमन्त्रमाह - **स्वयमिति ॥**

स्वयमुद्देशनतिमांस्तस्य पञ्चाक्षरो मनुः ।
स्वयमेवापरोऽष्टार्णस्तादृशः सम्प्रकीर्तितः ॥ 64 ॥

स्वयं ब्रह्मशब्दः । **उद्देशनतिमान्** चतुर्थीविभक्तिनमःशब्दवान् । तथा च `ब्रह्मणे नमः' इति मन्त्रनिष्पत्तिः । तस्यैव मन्त्रान्तरमाह - **स्वयमेवेति ॥ स्वयं** हिरण्यगर्भ एव **तादृशः** चतुर्थीनमःशब्दयुक्तः अपरः अष्टार्णो मनुः । ततश्च `हिरण्यगर्भाय नमः' इति मन्त्रनिष्पत्तिः । अत्र मन्त्रद्वये न्यासादिकं पूर्वमन्त्रवदेवेति[1] द्रष्टव्यम् ॥64 ॥

4.29 वेदोक्तप्राणमन्त्रः 45

इदानीं वायुमन्त्रमाह - **बळाद्यमित्यादिना ॥**

बळाद्यं भृगुणा दृष्टं प्राणाग्नेः सूक्तमुच्यते ।

बट् इत्याद्यं यस्य तत् **बळाद्यम् ।** `बळित्था तद्वपुषे धायि' इति (ऋ.सं.1-141-1) पञ्चर्चं **प्राणाग्नेः** मुख्यप्राणस्य **सूक्तम्** । बळित्थेत्यस्य अग्निसूक्तत्वप्रसिद्धेः प्राणाग्नेरित्युक्तम् । प्राणस्याग्नित्वमुपनिषत्प्रसिद्धं[2] द्रष्टव्यम् ।

यद्वा बट् एतस्मादाद्यं

1 तं.सा. 4-62तमश्लोकरीत्येत्यर्थः ।

2 `स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते ।' [ष.प्र.उ. 1-6] `प्राणाग्नय एवैतस्मिन् पुरे जाग्रति ।' [ष.प्र.उ. 4-3] इत्यादाविति भावः ।

राष्ट्रिय संस्कृत संस्थान ग्रन्थालय 23655 जयपुर

`वेदिषदे प्रियधामाय सुद्युते धासिमिव प्रभरा योनिमग्नये ।
वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुभ्रवर्णं तमोहनम्' इति
(ऋ.सं.1-140-1)

त्रयोदशर्चं वर्गत्रयात्मकं सूक्तम् । वट् इत्याद्यं यस्येति **बळाद्यं** बळित्थेत्यादि पञ्चर्चम् । तन्त्रावृत्त्येकशेषाणाम् अन्यतमाश्रयणेन उदाहृतसूक्तद्वयं **प्राणाग्नेः** सम्बन्धि तद्देवताकमित्यर्थः । प्राणाग्नेरित्येकवचननिर्देशात् `प्राणाग्नय एवैतस्मिन् पुरे जाग्रति' इति (ष.प्र.उ. 4-3) श्रुतौ `पञ्चवृत्तिर्मनोवद्व्यपदिश्यत' इत्यधिकरणन्यायेन रूपबहुत्वापेक्षया बहुवचनमिति सूचयति। भृगुणा दृष्टमित्युक्त्या च सर्वानुक्रमकारोक्तस्य एतत्सूक्तद्वयद्रष्टुरौचथ्यस्य दीर्घतमसः प्रसिद्धाग्निवाचकतया दर्शनेऽपि भार्गवदर्शनापेक्षया प्राणाग्निदैवत्यताऽप्युपपन्नेति सूचयति। अन्यथा ऋषिदेवताकथनस्य वैयर्थ्यात् । न च तज्ज्ञानार्थमेव तदुक्तिः। छन्दसोऽपि कथनप्रसङ्गात् । `यो ह वा' इत्यादौ[1] तद्ज्ञानाभावेऽपि दोषश्रवणात् । वैष्णवमन्त्रकथनानन्तरं कथितानां विष्णोर्नुकमिति सूक्तानां छन्दर्षिदैवतस्याकथनाच्च। तस्माद्यस्मिन्नंशेऽधिकविवक्षा तावानंश आचार्येणोच्यते । प्रकृते चाश्वलायनोक्तछन्दोविषये विप्रतिपत्त्यभावात् तदनुक्त्वा ऋषिदेवते एवोपात्ते ।

नन्वेवं `वेदिषदे सप्तोना दीर्घतमा औचथ्य आग्नेयं तु' इति (अनु.क्र.1-141) आश्वलायनेनानुक्रमकारेणास्य सूक्तस्य एतदनन्तरस्य बळित्थेति सूक्तस्य च द्वित्वसङ्ख्यायां परिभाषितेन तुशब्देनाग्निदेवताकत्वोक्तेस्तद्विरोध इत्यत उक्तं - **प्राणाग्नेरिति ॥** `प्राणाग्नय एवैतस्मिन् पुरे जाग्रति' इति (ष.प्र.उ. 4-3) श्रुतेरग्निशब्दस्य प्राणेऽपि रूढत्वात् । न च प्राणाश्चाग्नयश्चेति श्रुतौ द्वन्द्वमाश्रियत इति वाच्यं, `द्वन्द्वे घी'त्यनेन (पा.सू.2-1-32) अग्निशब्दस्य पूर्वनिपातप्रसङ्गात् । यदि च प्राणस्याग्न्यपेक्षयाऽभ्यर्हितत्वात् `द्वन्द्वे घी' (पा.सू.2-1-32) त्यस्य बाधः, तर्हि, सुषुप्तौ मनआद्यभिमानिनां

1 छान्दोग्यब्राह्मणवचनम् । पूर्णपाठः तं.सा.1-17श्लोकटीकायां द्रष्टव्यः ।

रुद्रादीनामप्युपरतव्यापारतया सुप्तत्वेन तदपेक्षया निकृष्टस्य वागभिमानिनोऽग्नेः सुतरां सुप्ततया जाग्रत्वोक्त्ययोगात् प्राण एवात्राग्निः । अपकृष्टेष्वस्यादिषूत्कृष्टानां वाय्वादीनां नियामकतया स्थितत्वेनाग्निसूक्तत्वेनाभिमतस्यापि वायुप्रतिपादकताया अविरोधाच्च । ऋषिविशेषेण देवताविशेषवाचकतया दृष्टस्यापि मन्त्रस्य ऋष्यन्तरेण देवतान्तरवाचकतया दर्शनस्य सम्भवेनाविरोधाच्च । अन्यथा `अग्निर्मूर्धा दिव' (ऋ.सं.8-44-16) इत्यादीनामपि सर्वानुक्रमे आग्नेयादित्वेन पठितत्वात् स्मृतिकाराद्युक्ता मङ्गलादिग्रहपरताऽपि न स्यात् । आश्वलायनोक्त्यपेक्षया प्राणाग्नेरिति तन्त्रसारसङ्ग्रहवचनस्य विष्णूदिततन्त्रसारमूलकत्वेन प्रामाण्यातिशयाच्च । केवलस्वोत्प्रेक्षामूलत्वे च तत्तन्मन्त्रपुरश्चरणजन्यफलावाप्तिरनुभवसिद्धा न स्यात् । तस्मान्मुख्यामुख्यवृत्तिभ्यामग्निशब्दस्य उभयपरत्वमवश्यं वक्तव्यम् ।

वेदिषद इति ऋगर्थस्तु - हे अधिकारिन्, अङ्गानि नयति प्रेरयतीति **अग्निः** मुख्यप्राणः । तस्मै **योनिम्** आसनं **प्रभर** । `यो निष्ट इन्द्रनिषदे अकारि' इत्यादौ (ऋ.सं.1-104-1) योनिशाब्दस्याऽसने प्रयोगात् । **वेदिषदे** वेद्यां सौमिक्यां सीदति सोमपानार्थं निषीदतीति वेदिषत् तस्मै । **प्रियं धाम** यज्ञवेदिलक्षणं धाम यस्य तस्मै **प्रियधामाय** । शोभना द्युत् यस्येति **सुद्युत्** । तस्मै । किमिव । **अग्नये** प्रसिद्धायादनशीलाय पुरुषाय वा **धासिमिव** अन्नमिव, दधाति सिनोति चेति योगात्, अन्ननामसु पाठाच्च । किञ्च ज्योतीरूपस्य वायोः रथस्थानीयं वेदिरूपस्थानं वस्त्रेणेव **वासय** बर्हिषा वेदिं स्तृणीहि । वस्त्रदृष्टान्तेनानतिसादृश्यं स्तृणातिश्रुत्युक्तप्रकारं सूचयति । वस्त्रेणाच्छादितं हि किञ्चिद्दृश्यते किञ्चिन्न । एवं बर्हिषा वेदिस्तरीतव्येति भावः । **शुचिं शुद्धं शुभ्रवर्णं** सत्यगुणकार्यत्वाच्छुक्लवर्णं **तमोहनं** प्रकाशरूपं **रथमिति** । शिष्टसूक्तार्थः नारायणपण्डितार्यप्रणीतायां मध्वमन्त्रार्थमञ्जर्यां[1] द्रष्टव्यः ॥65,66 ॥

---

1 अत्रोल्लिखिताः वैश्वनाथीनारायणाचार्याः ।

बळित्थेत्यादेरयमर्थः[1] **सहसः** सहोरूपस्य **देवस्य** क्रीडादिगुणसम्पन्नस्य वायोः मूलरूपं **बट्** बलात्मकम् । **दर्शतं** ज्ञानरूपम् । **भर्गः** जगद्भरणगुणम् । **इत्था** इत्थम्भूतमेव न पुनरन्यथा। **वपुषे** रूपत्रयावताराय। **यतो** यस्मात् भगवतः **अधायि** निहितं भगवता प्रेरितं तस्मादजनि। यद्वा **यतो** वायोर्भगवान् **अजनि** व्यक्तोऽभूत्तस्य वायोरिति सम्बन्धः। प्रथमावतारस्य स्वरूपमाह। **॥यदीमिति॥ यदी** यदेव **मतिः** हनुमदाख्यं प्रथमं रूपम् । हनशब्दो ज्ञानवाची। उच्छब्दः उत्कृष्टत्ववाची। `उत्कृष्टत्वमुकारार्थ' इति बृहद्भाष्योक्तेः। तथा च निर्वचनत्वान्नकारस्थाकारलोपे हनु इति जाते `तदस्यास्त्यस्मिन्नि' (पा.सू.5-2-94) ति सूत्रेण मतुप्प्रत्यये हनुमदिति प्रातिपदिकम् । तथा च ईशादन्यत्रालोचने सर्वविषयकत्वेनोत्कृष्टज्ञानवान् हनुमानित्यर्थः। अथ वा गत्यर्थाद्धनधातोस्ताच्छील्यार्थे उन्प्रत्ययः। `ताच्छील्यार्थादुनस्तथा' इति अनुव्याख्यानोक्तेः (अनु.व्या.1-4-343)। तथा च `हलन्त्य'मिति (पा.सू.1-3-3) न इत्यस्य लोपे उक्तसूत्रेण मतुप्प्रत्यये सति अनादिकालाभिव्यक्तवैदिकेश्वरज्ञानवत्वेन ज्ञानस्वभाववान् हनुमानित्यर्थः। तर्हि मतिमच्छब्दवाच्यत्वप्राप्त्या मतिशब्दवाच्यत्वं कथमिति चेत्, सत्यम्, ज्ञानवतोऽपि ज्ञानस्वरूपताप्रकटनाय मतिशब्दप्रयोगात् । **उपह्वरते** रामस्य समीपे तिष्ठति। **साधते** रामकार्याणि साधयति। **तेन** हनूमता। **ऋतस्य** सत्यरूपस्य पूर्वावगतवत्सदा स्थितस्य वा रामस्य। **सस्रुताः** अमृतस्रावयुक्ताः **धेनाः** वाचोऽनयन्त सीतां प्रतीति शेषः ॥

---

[1] अस्य सूक्तस्य अन्ये मन्त्राः आकरेषु लिखिताः। आदिममन्त्रः परं न लिखितः। स मन्त्रः इत्थं वर्तते -

बळित्था तद् वपुषेऽधायि दर्शतं देवस्य भर्गः सहसो यतोऽजनि।
यदीमुप ह्वरते साधते मतिरृतस्य धेना अनयन्त सस्रुतः ॥ - इति ॥

पृक्षो वपुः पितुमान् नित्य आशये द्वितीयमा सप्तशिवासु मातृषु ।

तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः ॥

द्वितीयावतारस्वरूपमाह - **पृक्ष इति ॥** द्वितीयं वपुः भीमाख्यं **पृक्षः** कुरुपृतना-क्षयकारि । **पितुमान् ।** पितुरित्यन्नसंज्ञा । `भूमनिन्दाप्रशंसासु भवन्ति मतुबादय' इति वचनाद्भूमार्थे मतुबयम् । **भूमा** बाहुल्यम् । बह्वन्नवान् । तद्वत्त्वं च भोक्तृत्वेनेति द्रष्टव्यम् । तथा च बह्वन्नभोक्तेत्यर्थः । बकासुरवधादौ दर्शनात् । **नित्यः** नित्यं **स-प्तशिवासु** परममङ्गलरूपासु सप्तसु मातृषु प्रमाणभूतासु ऋगाद्यासु **आशये** शेते । तद्विचाररत इति भावः । अनेन भृताः माः प्रमाः प्रमाणानि यस्मिन्नसौ भीम इति भी-मशब्दार्थ उक्तः । तृतीयावतारस्वरूपमाह - **तृतीयमिति ॥ अस्य** वृषभस्य श्रे-ष्ठस्य वायोस्तृतीयवपुः **दोहसे** ज्ञानदोहाय **दशप्रमतिं** पूर्णप्रज्ञनामकं **योषणो** मध्यगेहभट्टस्य पत्न्यो, गुरुत्वाद्बहुवचनम्, **जनयन्त** अजनयन्त । अत्र वृषभस्य तृतीयवपुरित्युक्त्या आनन्दतीर्थाचार्यापरनामा पूर्णप्रज्ञः साक्षाद्वाय्ववतार एवेति सम्प्र-दायविदः । **अन्ये तु** `आनन्दतीर्थवरनामवती तृतीया भैमी तनुर्मरुत आह कथाः परस्य' इति (म.ता.नि.3-8) तात्पर्यनिर्णयवाक्ये सन्निधानेन भैमीत्यनेन तनुं विशिष्य भीमसेनस्य रूपान्तरमानन्दतीर्थः, न तु साक्षान्मूलरूपस्य वायोरिति मन्यन्ते । तदसत् । तृतीयेत्यस्यानन्वयात् । भीमावधिकतृतीयत्वस्यानन्दतीर्थेऽसम्भवात् । हनुमदपेक्षया तृतीयत्वस्य साक्षाद्वायुतनुत्वं विनाऽसम्भवात् । न च तत्पक्षे भैमीत्येतदसङ्गतं, भीम-सेनादनन्तरा भैमीत्यर्थोपपत्तेः । एवमन्यान्यपि द्वात्रिंशदध्यायस्थितानि वाक्यानि यो-ज्यानि[1] ।

---

[1] तानि च वाक्यानि -

`ग्रन्थः कृतोऽयं जगतां जनित्रं हरिम् गुरुं प्रीणयताऽमुनैव ।[म.भा.ता.नि. 32-159]

तनुस्तृतीया पवनस्य सेयं सद्धारतार्थप्रतिदीपनाय ।

ग्रन्थं चकारेममुदीर्णविद्या यस्मिन् रमन्ते हरिपादभक्ताः ॥ [म.भा.ता.नि. 32-159] ।

शिष्टर्क्षक्रयव्याख्यानमन्यत्र पितृचरणरचिततैत्तिरीयभाष्यटीकायां द्रष्टव्यम् ॥

अङ्गन्यासमाह - **प्राणाद्यैरिति ॥**

प्राणाद्यैः पञ्चभिस्तस्याप्यङ्गान्युक्तानि सूरिभिः ॥ 65 ॥

उद्यद्रविप्रकरसन्निभमच्युताङ्के
स्वासीनमस्य नुतिनित्यवचःप्रवृत्तिम् ।
ध्यायेद्गदाभयकरं सुकृताञ्जलिं तं
प्राणं यथेष्टतनुमुन्नतकर्मशक्तिम् ॥ 66 ॥

प्राणापानव्यानोदानसमानैः **सोद्देशैः** नमोन्तैरिति ग्राह्यम् । ध्यानमाह - **उद्यदिति ॥ उद्यद्रविप्रकराणाम्** उद्यदादित्यरश्मीनां सन्निभम् । उद्यद्रविसमूहसदृशं वा। सुष्ठु आसीनम् **अस्य** अच्युतस्य **नुतिं**रूप स्तुतिरूपं यत् **नित्यवचः** वेदवाक्यं तत्प्रवृत्तिर्यस्य तमित्यर्थः । नुतौ नित्यं वचःप्रवृत्तिः यस्यासाविति वा । नुतिशब्दस्य नित्यसापेक्षत्वात्समासः । **गदाभयकरं** गदाभयाभ्यां युक्तकरम् । सुष्ठु कृता **अञ्जलिः** करयोर्मुकुलीभावो येन तं **सुकृताञ्जलिम् ।** प्रकृष्टचेष्टकत्वात् **प्राणम् । यथेष्टतनुम् । इष्टम्** इच्छा भावे क्तः । इच्छामनतिक्रम्य स्थिता तनुः यस्य तं कामरूपमित्यर्थः । **उन्नता** उत्कृष्टा **कर्मणि** जगद्धारणादौ **शक्तिः** सामर्थ्यं यस्य सः उन्नतकर्मशक्तिः तम् ॥65,66 ॥

4.30 पञ्च प्राणमन्त्राः 46-50

तस्य अपरानपि मन्त्रानाह - **प्राणाद्या इति ॥**

प्राण्याद्याः पञ्च मन्त्राश्च तस्य देवस्य वाचकाः ।
उच्यते हरिरप्येतैः साक्षान्नारायणादिकः ॥ 67 ॥

उद्देशनमःशब्दयुताः प्राणादिशब्दा मन्त्रा इत्यर्थः । `प्राणाय नमः' इत्यादिमन्त्रप्रकारो द्रष्टव्यः । एतेषां वैष्णवमन्त्रत्वं चाह - **उच्यत इति ॥** एतैः पञ्चमन्त्रैर्नारायणवासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धरूपो हरिरपि साक्षात्परममुख्यतः उच्यते । यद्वा **साक्षात्** पृथक्स्थितः वाय्वनन्तर्गतः **नारायणादिकः ।** वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाः आदिपदोक्ताः । नारायणादिव्यूहः प्राणादिपञ्चकान्तर्गतः एकः । तदनन्तर्गतश्चापरः । एतद्विवक्षया चेदम् । अन्यथा सर्वमन्त्राणामप्यन्तर्यामिपरत्वेन एतैरिति विशिष्योक्त्ययोगात् । अन्तर्यामिपरत्वस्य `मन्त्रेष्वि'त्युत्तरत्र (तं.सा.4-125) वक्ष्यमाणत्वाच्च । पूर्वमन्त्राणामप्यनन्तर्गततत्तद्रूपपरत्वेन पृथङ्मन्त्रत्वमेतन्न्यायेनैव ज्ञेयम् ॥67 ॥

4.31 वेदोक्तसरस्वतीभारतीमन्त्रौ 51-52

अथ ब्रह्माणीभारतीमन्त्रावाह - **ब्रह्माण्या इति ॥**

ब्रह्माण्या अपि भारत्या गौरीर्यस्त इति श्रुतौ ।
मन्त्रौ दीर्घतमोदृष्टौ सर्वाभीष्टप्रदायकौ ॥ 68 ॥

उद्यद्दिवाकरसमूहनिभां स्वभर्तु-
रङ्कस्थितामभयसद्वरबाहुयुग्माम् ।
मुद्रां च तत्वदृशये वरपुस्तकं च
दोर्युग्मकेन दधतीं स्मरताऽत्मविद्याम् ॥ 69 ॥
पादैर्व्यस्तैः समस्तैश्च तदङ्गानि विदो विदुः ।

गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूविषी सहस्राक्षरा परमे व्योमन् ॥ इति सारस्वती ऋक् ।

यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि ।
यो रत्नधा वसुविद् यः सुदत्रः सरस्वति तमिह धातवेऽकः ॥
(ऋ.सं.1-164-49)

इति भारतीदेवत्या । इति श्रुतौ प्रसिद्धौ द्वौ मन्त्रौ दीर्घतमसा दृष्टौ सर्वाभीष्टप्रदावित्यर्थः ।

गौरवर्णत्वात् जगद्गुरुब्रह्मभार्यात्वाद्वा **गौरीः** [1] सरस्वती । **सलिलानि** सलिलोपलक्षितभूम्यादीनि पञ्चभूतानि **मिमाय** निर्ममे । तानि **तक्षति** ब्रह्माण्डादिकार्यरूपतया तनुत्वेन करोति । **एकपदी** एकपादात्मकछन्दोबद्धमन्त्राभिमानिनी । **द्विपदी** द्विपादात्मकछन्दोबद्धमन्त्राभिमानिनी । **चतुष्पदी** पादचतुष्टयात्मकछन्दोबद्धमन्त्राभिमानिनी । **सहस्राक्षरा** अनियताक्षरच्छन्दोबद्धमन्त्राभिमानिनी । **बभूविषी** भवितुमिच्छन्ती सती **परमे** सर्वोत्तमे विशेषेण गुणैरोतत्वात् **व्योमन्** व्योम्नि भगवद्विषये प्रतिपादकतया वर्तत इत्यर्थः ।

हे सरस्वति भारति । ते यः स्तनः **शशयः** अतिशयितसुखानुभवकरः, शं सुखं तस्य शयः आश्रय इति वा । **मयोभूः मयस्य** सर्वप्रधानस्य हरेः **भूः** सन्निधानपात्रतया आश्रयः । यद्वा भिन्नं पदं,[2] अवग्रहदर्शनात् [3]। मयः सर्वप्रधानः भूः पूर्णः । `भू = बहावि' (धा.पा.1845) ति पठन्ति । त्वं येन स्तनेन **वार्याणि** पुत्रत्वेन **वरयितुं** स्वीकर्तुं योग्यानि **सर्वा** सर्वाणि गरुडशेषादिदेवजातानि **पुष्पसि** पुष्णासि

---

1 `ङ्याप्प्रातिपदिकात्' [पा.सू. 4-1-1] इति ङ्यन्तात् सुप्रत्ययलोपविधायकस्य सूत्रस्य `सर्वे विधयः छन्दसि विकल्प्यन्ते' इति न्यायेन छन्दसि विभाषाश्रयणात् गौरीरिति सुप्रत्ययान्तं रूपं सिध्यति - इति शब्दसाधुत्वमुपपादनीयमिति भाति ।

2 पूर्वं `मयोभूः' इत्यत्र समास आश्रितः । इदानीं `मयः भूः' इति भूपदं समासानन्तर्गतमिति भावः ।

3 अस्यार्थः न स्फुटः ।

रक्षसि । यः स्तनः रत्नानि धत्त इति **रत्नधाः** । नवरत्नमयमालाधरः । **वसु** आभरणरूपमेव **विन्दति** प्राप्नोतीति **वसुवित्** सुवर्णमयाभरणप्राप्तिमान् । **सुदत्रः** सुष्ठु पिबद्देवादिदन्तसम्बन्धवान् । सम्यग्दाता रक्षकश्चेति वा । तम् **इह** देवेतरजीवजातविषये **धातवे** धातुं रक्षितुम् । **अकः** अकरोः **करोषि** करिष्यसि चेत्यर्थः । क्रियाप्रबन्धे लट् ।

ध्यानमाह - **उद्यदिति** ॥ अभयसहितः सन् वरः यस्य तत् अभयसद्वरम् । अभयसद्वरं बाहुयुग्मं यस्याः सा ताम् । **अभयसद्वरबाहुयुग्माम्** । अभयमुद्रावरमुद्राभ्यां संयुतबाहुद्वयामिति यावत् । **तत्वदृशये** स्वोपासकानां तत्वज्ञानाय **मुद्रां** ज्ञानमुद्राम् । **वरपुस्तकम्** उत्तमपुस्तकं[1] च **दोर्युग्मकेन** बाहुद्वयेन दधतीम् । **आत्मविद्यां** परमात्मप्रतिपादकविद्यादेवताम् । आत्मनः जीवसमूहस्य विद्या यया सा तथा ताम् । भगवद्विषयकज्ञानदात्रीमिति वा । आत्मनो विद्या यस्यां सेति भगवद्विद्यायुतामिति वा । सरस्वतीं भारतीं स्मरतेत्यर्थः । अङ्गन्यासं वक्ति - **पादैरिति** ॥ तयोः सरस्वतीभारतीमन्त्रयोः **अङ्गानि** पञ्चाङ्गानि ॥ 68,69 ॥

4.32 ब्रह्माणीमन्त्रः-भारतीमन्त्रः 53-54

तयोरेव पञ्चाक्षरमन्त्रावाह - **स्वयमिति** ॥

स्वयमुद्देशनत्यन्तौ मन्त्रौ द्वावपरौ तयोः ॥ 70 ॥

स्ववाचकौ ब्रह्माणीभारतीशब्दावित्यर्थः । चतुर्थीनमःशब्दान्तौ **तयोः** ब्रह्माणीभारत्योः अपरौ मन्त्रौ । तथा च `ब्रह्माण्यै नमः' `भारत्यै नमः' इति मन्त्रोद्धारः ।

[1] प्रा.पाठे एतच्छब्दं चिह्नयित्वा पार्श्वे `विष्णुसर्वोत्तमत्वादिगुणप्रतिपादकसकलसच्छास्त्ररूपवेदादिपुस्तकं' इति लिखितम् ।

ब्रह्मभार्यात्वाद्ब्रह्माणी। तस्यै नमोऽस्तु। ज्ञानप्रकाशरमणततत्वात् भरतो विष्णुर्वायुश्च। वेदादिभिः प्रतिपादकतया तत्सम्बन्धित्वात्,[1] रतत्वाद्भात्मके विष्णौ भरतो वायुस्तस्येयमिति वा भारती। तस्यै नम इति मन्त्रद्वयार्थः ॥70॥

शिवादिमन्त्रान् वक्तुं तेषामुक्तमन्त्रसाम्यप्रतीतिं निवारयितुमाह - **मन्त्रा इति॥**

मन्त्रा एते हरेः प्रीतिदायकाः सर्वकामदाः।
इष्टं दैवं हरिः साक्षाल्लक्ष्मीर्भाग्यस्य देवता।
गुरुर्ब्रह्माऽथ वायुर्वा विद्या देव्यौ प्रकीर्तिते ॥ 71 ॥

तस्मादेते प्रिया विष्णोरन्तरङ्गतया सदा।
ज्ञेयाश्चैव प्रपूज्याश्च विष्णोः प्रीतिमभीप्सता ॥ 72 ॥

प्रीतिदायकाः। विशेषेणेति शेषः। नन्वेतदयुक्तम्। अन्यपूजयाऽन्यप्रीत्यदृष्टेरित्याशङ्कायां राजादौ प्रेक्षावत्पुरुषे दृष्टमित्याशयेन हिरण्यगर्भादीनामन्तरङ्गत्वं वदन्नुपासनाप्रकारं सूचयति - **इष्टमिति॥** हरिः **साक्षादिष्टं** मुख्येष्टम्। **दैवं** स्तुत्यम्. लक्ष्मीः भाग्यस्य देवता। ब्रह्मा अथवा वायुः गुरुः सर्वेषामिति शेषः। **देव्यौ** ब्रह्माणीभारत्यौ[2] **विद्या** विद्याभिमानिन्यौ प्रकीर्तिते। `विज्ञानतत्वं महतः समुत्पन्नं चतुर्मुखात्' इत्यादाविव[3] अभिमान्यभिमन्यमानयोरैक्योक्तेरिति ज्ञेयम्। तस्मादेते पञ्चान्तरङ्गतया सदा विष्णोः प्रियाः। तस्माद्विष्णोः प्रीतिमभीप्सता विष्णुप्रियत्वेन तदङ्गत्वेन च ज्ञेयाः पूज्याश्च।

---

1 अस्य अग्रिम`भारती'त्यनेनान्वयः।

2 ब्रह्माणीसरस्वत्यौ इति ज.पाठः। प्रा.पाठेऽपि `भारत्यौ' इति चिह्नयित्वा पार्श्वे `सरस्वत्यौ' इति लिखितम्। तथापि ज1.पाठे दर्शनात् अर्थदृष्ट्या सङ्गतेश्चायं पाठ आदृतः।

3 ब्र.सू.भा.उदा.स्कान्दवचनम् 2-3-15।

`गुरुर्ब्रह्माऽस्य जगतो दैवं विष्णुः सनातनम् ।

इत्येवोपासनं कार्यं नान्यथा तु कथञ्चनेति' वाराहवचनात्[1]।

इदमुक्तं भवति। विष्णुभक्तिस्तावत्कर्तव्येति सकलसम्मतम् । मुक्तिहेतुत्वात् । सा च तद्भक्तभक्त्यैव साङ्गा। नान्यथा। विमतः भगवद्भक्तभक्तिमान् भगवद्भक्त्या पुरुषार्थभाक्त्वात्, यो यद्भक्तत्या पुरुषार्थभागसौ तद्भक्तभक्तो दृष्टः। यथा राजसखभक्तो अमात्य इत्यनुमानात् । सा च भक्तभक्तिः यस्मिन्नधिकविष्णुप्रसादः तस्मिन्नधिका। यत्र न्यूनस्तत्राल्पेति तथाऽनुष्ठान एव स्वस्मिन्नीशप्रसादोत्पत्तेः राजादौ दर्शनात् । तथा च प्रयोगः - ईश्वरः स्वप्रीत्यनुसारेण स्वभक्तेषु भक्ते प्रसीदति प्रेक्षावत्पुरुषत्वाद्राजवदिति। यथोक्तं -

`तारतम्येन तेष्वद्धा भक्तिर्दृष्टानुसारतः।

विष्णुप्रसादानुसारात्कार्या दोषस्तदन्यथा।

तत्प्रीत्यनुसृतौ प्रीतिः लोकेष्वद्धैव दृश्यते' इति ॥71,72॥

4.33 शिवपञ्चाक्षरः 55

इदानीं पञ्चाक्षरं शिवमन्त्रमाह - उद्देशेति॥

उद्देशनतियुङ्मन्त्रः स्वयमेव शिवस्य तु ।

वर्णैरेतैस्तदङ्गानि वामदेवो मुनिः स्मृतः ।

पङ्क्तिः शब्दार्थविज्ञाने[2] न हि च्छन्दसि संशयः ॥ 73 ॥

ध्येयः पञ्चमुखो रुद्रः स्फटिकामलकान्तिमान् ।

1 भा.ता.उदा.

2 `पङ्क्तिशब्दार्थविज्ञाने' इति गु.दी.सू.पाठान्तरम् ।

विद्युच्छुभ्रासितरजःश्यामान्यस्य मुखानि तु ।
जटावबद्धेन्दुकलः प्रियायुङ् नागभूषणः ॥ 74 ॥

चतुर्थीनमःशब्दाभ्यां युतः **स्वयं** स्ववाचकशिवशब्द एव। तथा च 'शिवाय नमः' इति मन्त्रनिष्पत्तिः। मङ्गलरूपत्वाच्छिवाय नम इत्यर्थः। न्यासमाह - **वर्णैरिति ॥** तस्य मन्त्रस्य पञ्चाङ्गानि। अस्य मन्त्रस्य छन्द आह - **पङ्क्तिरिति ॥** छन्द इति शेषः। इदं च सुज्ञानायोक्तम् । वस्तुतस्तु अक्षरगणनया छन्दोज्ञानं सर्वत्रापि सुकरमित्याशयेनाह - **शब्दार्थविज्ञान इति ॥** शब्दरूपार्थज्ञान इत्यर्थः। पञ्चाक्षरोऽयं शब्दः षडक्षरोऽयं शब्द इत्यादिप्रकारेण अक्षरसङ्ख्यापूर्वकं शब्दस्वरूपज्ञाने संशयो नास्तीति भावः। यद्वा शिवमन्त्रस्य फलमाह - **शब्दार्थेति ॥** विषयसप्तमीयम् । **वेदे** शब्दार्थप्रतिज्ञाने वैदिकशब्दार्थज्ञानविषये संशयो न भवतीत्यर्थः। पङ्क्तिशब्दार्थविज्ञान इति पाठे 'पञ्चाक्षरा पङ्क्तिः' इति तैत्तरेयशाखोक्तपङ्क्तिशब्दार्थविज्ञाने सति शिवमन्त्रस्य **छन्दसि** विषये न सन्देह इति भावः॥ ध्यानमाह - **ध्येय इति ॥** स्फटिकवदमला कान्तिरस्येत्यर्थे मतुप् । अस्य पञ्चमुखानि विद्युदादिवर्णानि। **श्यामो** इन्द्रनीलमणिः। ततोऽसित इति न पुनरुक्तिः। **असितः** मेघनीलः। जटासु अवबद्धा **इन्दुकला** अर्धचन्द्रो यस्य स तथा। **प्रियया** उमया युक् ॥73,74 ॥

ननु 'परिवारतया ग्राह्या अपि हेयाः प्रधानत' (अनु.व्या.1-1-5) इत्यादौ प्राधान्येनेतरदेवताध्यानादेर्निषिद्धत्वेन कथं रमाब्रह्मशिवादीनां प्राधन्येन ध्येयत्वमित्यतो न प्राधान्येन ध्येयत्वं तेषां किन्तु भगवत्प्रतिमात्वेनैवेत्याशयेनाह **॥मन्त्रेष्विति ॥**

मन्त्रेष्वेतेषु सर्वेषु वाच्यस्तारेण केशवः ।
अन्तर्यामितया ध्येयः सर्वदेवेषु सर्वदा ॥ 75 ॥

सर्वदा तत्तन्मन्त्रप्रतिपाद्यसर्वदेवेषु केशवः अन्तर्यामितया ध्येयः। ननु तत्तन्मन्त्राणां तत्तद्देवतामात्रप्रतिपादकत्वेन केशवप्रतिपादकत्वाभावात् कथं तत्तज्जपाङ्गध्यानकालेऽन्तर्यामित्वेन भगवद्ध्यानमित्याशङ्कां परिहरन् केशवं विशिनष्टि **॥मन्त्रेष्विति॥ सर्वेषु** उक्तवक्ष्यमाणेतरदेवतामन्त्रेष्वाद्यन्तयोरुच्चार्यमाणतारेण वाच्यः केशव इत्यर्थः। प्रागन्यदेवतामन्त्रोद्धारसमये ओङ्कारस्यानुक्तत्वेऽपि 'स्रवत्यनोङ्कृतम्' इत्यादेरोङ्कारस्योहः कर्तव्य इति द्रष्टव्यम्। तारवाच्यत्वेन मन्त्रप्रतिपाद्यत्वमित्येतदुपलक्षणम्। तत्तच्छब्दप्रवृत्तिनिमित्तानां भगवत्येव मुख्यत्वादिति द्रष्टव्यम्। तथा चोक्तमनुव्याख्याने

'देवतान्तरगाः सर्वे शब्दवृत्तिनिमित्ततः।
विष्णुमेव वदन्त्यद्धा तत्सङ्गादुपचारतः॥
अन्यदेवान् वदन्ति' इति (अनु.3-3-श्लो38) ॥75॥

4.34 पार्वतीपञ्चाक्षरः 56

अथ पार्वतीमन्त्रमाह - **स एवेति॥**

**स एव वनितालिङ्गः पार्वत्या मनुरुच्यते।
गौरी वराभयकरा ध्येया पीताम्बरा च सा॥ 76॥**

पूर्वमन्त्रगतः शिवशब्द एव **वनितालिङ्गः** स्त्रीलिङ्गः पार्वत्या मन्त्रः। तथा च 'शिवायै नमः' इति मन्त्रप्रयोगः। मङ्गलस्त्रीरूपत्वात् **शिवा**। तस्यै नम इत्यर्थः। ध्यानमाह - **गौरीति॥** गौरवर्णयुता। वराभयाभ्यां युतकरा ॥76॥

4.35 शेषमन्त्रः 57

शेषमन्त्रमाह - **स्वयमिति॥**

स्वयमुद्देशनत्यन्तः पूर्वपूर्वः षडक्षरः ।
सनत्कुमारदृष्टोऽयं मनुः शेषस्य कामदः ॥ 77 ॥

दधानो हलसौनन्दौ श्वेतवर्णः कृताञ्जलिः ।
सहस्रमूर्धाऽद्वितीयकर्णभूषः प्रियायुतः ।
वनमाली नीलवासा ध्येयो विष्णोस्तु पृष्ठतः ॥ 78 ॥

स्वयं शेषशब्दः **उद्देशनत्यन्तः** चतुर्थीनमःशब्दौ अन्ते यस्य स तथा। **पूर्वपूर्वः** पूर्वाक्षरभूतबिन्द्वन्तशेकारपूर्वः । तथा च `शें शेषाय नमः' इति मन्त्रनिष्पत्तिः । `शिष्लृ = विशोषण' (धा.पा.1452) इति धातोः शिष् इत्यस्मात् पचाद्यचि कृते `पुगन्तलघूपधस्य चे' (पा.सू.7-3-86) ति इकारस्य एकाररूपे गुणे शेषेति रूपम् । तथा च विशिष्टत्वाच्छेषायेत्यर्थः । ध्यानमाह - **दधान इति** ॥ सौनन्दशब्देन मुसल उच्यते । सहस्राणि मूर्धानि यस्य स तथा । न विद्यते द्वितीयकर्णभूषा यस्य स तथोक्तः । एककर्णाभरणयुक्त इत्यर्थः । यथोक्तं भागवते `नीलवासा एककुण्डल'[1] इति । **पृष्ठतः** पश्चाद्भागे । अत्र मन्त्राक्षरैरेव पञ्चाङ्गन्यासः । द्विरावृत्तैः पदैः षडङ्गन्यासो वा द्रष्टव्यः ॥77,78 ॥

4.36 गरुडमन्त्रः 58

गरुडमन्त्रमाह - **व्यत्यस्त इति** ॥

[1] भा.5-23-38 । शेषस्य लोकधारकत्ववर्णनात्मके गद्येऽयं भागः प्राप्तः । गद्यस्य पूर्णपाठः एवं वर्तते - `ध्यायमानः सुरासुरोरगसिद्धगन्धर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुखरितामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुळसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो हलककुदिकृतसुभगसुन्दरभुजो भगवान् महेन्द्रो वारणेन्द्र इव काञ्चनीं कक्षामुदारलीलो बिभर्ति ।' इति

व्यत्यस्तपक्षितारौ च स्वाहान्तो गारुडो मनुः।
काश्यपोऽस्य[1] मुनिर्ध्येयः सुधापूर्णं हिरण्मयम् ॥ 79 ॥
दधानः कुम्भमभयं पीतशुक्लारुणो हरिः।
कृष्णश्चाऽजानुतो नाभेः कण्ठात् कादन्त एव च ॥ 80 ॥
प्रियायुक् पुरतो विष्णोः पक्षतुण्डसमन्वितः।
जङ्गमस्थावरविषहृदयं सर्वकामदः ॥ 81 ॥

विपरीतः पक्षिशब्दः क्षिप इति। **तारश्च** ओङ्कारश्च **व्यत्यस्तपक्षितारौ** ताभ्यामुपेतः। तथा स्वाहान्तश्चेति गारुडो मनुः। कश्यप एव **काश्यपः।** कश्यप इति **क्वचित्पाठः।** तथा च `ओं क्षिप स्वाहा' इति मन्त्रः। प्रसिद्धानि **विषाणि** अज्ञानादीनि च **क्षिप** निराकुरु इत्यर्थः। ध्यानमाह - **ध्येय इति॥ हिरण्मयं** कुम्भमभयं च दधानः। आ इति सर्वत्रानुषज्जते। `आङ् मर्यादावचने' (पा.सू.1-4-89)। आङ् मर्यादायां कर्मप्रवचनीयसञ्ज्ञः स्यात्[2]। `पञ्चम्यपाङ् परिभिः' (पा.सू.2-3-10) एतैः कर्मप्रवचनीययोगे पञ्चमी स्यादिति सूत्रात्[3]। आ जानुतः इत्याङः कर्मप्रवचनीयत्वेन तद्योगे आ जानुत इत्यादिपञ्चमी युक्ता। **आ जानुतः** पादमारभ्य जानुपर्यन्तम् **आ जानुतः** जानुमारभ्य **आ नाभेः** नाभिपर्यन्तमित्यर्थः। इममेव स्फुटमुपदिशन्ति गुरुचरणाः। `पादमारभ्य जानुपर्यन्तं पीतः। जानुमारभ्य नाभिपर्यन्तं शुक्लः। नाभिमारभ्य कण्ठपर्यन्तमरुणः। कण्ठमारभ्य शिरःपर्यन्तं हरिद्वर्णः। कात् शिरसः आरभ्य अन्तः अन्तिमो भागः कृष्णः श्यामवर्ण' इति। अन्ते शिरसि कृष्ण इति वा। **प्रियया** सौपर्ण्या युतः विष्णोः पुरतः कृताञ्जलिः स्थित इति शेषः।

1 `कश्यपोऽस्य' इति गु.दी.सू.पाठान्तरम्।
2 इदं वाक्यं सूत्रार्थविवरणरूपम्।
3 इदं वाक्यं सूत्रार्थविवरणरूपम्।

फलमाह - **जङ्गमेति** ॥ जङ्गमः सर्पवृश्चिकादिः **स्थावरः** वत्सनाभ्यादिः तयोर्विषं हरतीति **जङ्गमस्थावरविषहृत्** । **अयं** गारुडो मन्त्रः **सर्वकामदः** सर्वाभीष्टविषयदः ॥79-81 ॥

4.37 दिक्पालमन्त्राः 59-67

इदानीं लोकपालमन्त्रानाह - **मन्त्राश्चेति** ॥

मन्त्राश्च लोकपालानां नमोन्ताः सर्वकामदाः ।
नीलरक्तासितश्वेतरक्तशुक्लाश्च वर्णतः ॥ 82 ॥

सप्रियाः साभयाः वज्रशक्तिदण्डासिपाशिनः ।
गदाकुमुदशूलेष्टखङ्गिनो भूषणोज्वलाः ॥ 83 ॥

नमोन्ताः सोद्देशाः इन्द्रादयः शब्दाः दशलोकपालानां मन्त्रा इत्यर्थः । तत्रोर्ध्वाधोलोकपालयोः ब्रह्मशेषयोर्मन्त्रौ प्रागेवोक्तौ । इतरेषां तु - `लं इन्द्राय नमः' `रम् अग्नये नमः' `हं यमाय नमः' `बं निर्ऋतये नमः'[1] `वं वरुणाय नमः' `यं वायवे नमः' `सं सोमाय नमः' `शम् ईशानाय नमः' इति मन्त्राः मान्त्रिकसम्प्रदायसिद्धाः द्रष्टव्याः । वर्णानाह - **नीलेति** ॥ नीलश्च रक्तश्च असितश्च श्वेतश्च रक्तश्च शुक्लश्चेति विग्रहः । ध्यानमाह - **सप्रिया इति** ॥ स्वस्वभार्याभिः सहिताः । **साभयाः** अभयमुद्रासहिताः । द्वितीयहस्ते आयुधान्याह - **वज्रेति** ॥ अत्रायं वर्णायुधयोर्विवेकः । इन्द्रः नीलः वज्री । अग्निः रक्तः सशक्तिः । यमः असितः दण्डी । निर्ऋतिवरुणवायुसोमेशानाः श्वेताः असिपाशगदाकुमुदशूलिनः । ऊर्ध्वदिगभिमानिब्रह्मा रक्तः सेषुः[2]। अधोदिगभिमानी अनन्तः शुक्लः खड्गीति । ननु ब्रह्मानन्तयोरिव वायुमन्त्रोऽपि उक्त

1 षं निर्ऋतये नमः इति ज.पाठः ।

2 पार्श्वे `सबाणः' इति लिखितम् ।

एवेति चेत् । सत्यम् । स प्रधानवायुः अयं तु तत्पुत्रः कोपाधिपः आतिवाहिकमरीच्यपरनामा प्रवह इति ध्येयम् ॥82,83 ॥

4.38 स्कन्दमन्त्रः 68

षडर्णस्कन्दमन्त्रमाह - **अग्निरिति ॥**

अग्निश्च स्वयमुद्देशी सनमः स्कन्दवाचकः ।
कौशिकोऽस्य मुनिर्वह्निवर्णः षण्मुख उज्ज्वलः ।
धनुःशक्तिधरो ध्येयः कामदो भयनाशनः ॥ 84 ॥

अग्निबीजं रमिति । **स्वयं** स्ववाचकः स्कन्दशब्दः **उद्देशी** चतुर्थ्यन्तः **सनमः** नमोन्तः स्कन्दवाचकमन्त्रः । अस्य मन्त्रस्य **कौशिको** विश्वामित्रो मुनिः । तथा च `रं स्कन्दाय नमः' इति मन्त्रनिष्पत्तिः । ध्यानमाह - **वह्नीति ॥** शुक्लभास्वरवर्णः वह्नेर्यो वर्णः रक्तरूपः प्रागुक्तः तद्युक्त इति वा । **भयनाशनः** भीतिनाशकः ॥84 ॥

4.39 सूर्यमन्त्रः 69

सूर्यमन्त्रमाह - **ह्रस्व इति ॥**

ह्रस्वः कृपालुः सेतश्च स्वयमन्यः स्वयं तथा ।
सतारोऽष्टाक्षरः सौरः क्रमव्युत्क्रमतः पदैः ॥ 85 ॥
अङ्गानि, पद्मयुगलधरो ध्येयोऽरुणो रविः ।
सर्वव्याधिहरः श्रीदो वृष्टिदोऽयं मनुः स्मृतः ॥ 86 ॥

कृपालुः कृपालुवाचकः घृणीतिशब्दः । स च **ह्रस्वः** अदीर्घः **सेतः** सविसर्गः । एवं च घृणिरिति भवति । **स्वयं** स्ववाचकः सूर्यशब्दः । **स्वयं** स्ववाचकः **अन्यः** आदित्यशब्दः । **सतारः** सप्रणवः **सौरः** सूर्यप्रतिपादको मन्त्रः । तथा च `ॐ घृणिः सूर्य आदित्य' इति मन्त्रनिष्पत्तिः । दयालुत्वाद्घृणिः । सूरिप्राप्यत्वात्सूर्यः । आदितः सर्वकाले भव आदित्य इत्यर्थः । न्यासमाह - **क्रमेति ॥** ताराातिरिक्तैरिति शेषः । घृणिः सूर्य आदित्य इति क्रमः । आदित्यः सूर्यो घृणिरिति व्युत्क्रमः । **अङ्गानि** षडङ्गानि । ध्यानमाह - **पद्मेति ॥** फलमाह - **सर्वेति ॥ वृष्टिदः** अवग्रहनिवारणद्वारा ॥85,86 ॥

4.40 गणपतिमन्त्रः 70

गणेशमन्त्रमाह - **मोनेति ॥**

मोनयदासाप्रप्रक्षि व्यत्यस्तो विघ्नराण्मनुः ।
रक्ताम्बरो रक्ततनू रक्तमाल्यानुलेपनः ॥ 87 ॥
लम्बोदरो गजमुखः पाशदन्ताङ्कुशाभये[1] ।
बिभ्रद् ध्येयो विघ्नहरः कामदस्त्वरया ह्ययम् ॥ 88 ॥

अयं पादः व्यत्यस्तः सन् क्षिप्रप्रसादाय नम इत्याकारेण मनुरित्यर्थः । भजकानां क्षिप्रफलहेतुः प्रसादो यस्मात्सः क्षिप्रप्रसादः । तस्मै नम इति मन्त्रार्थः । ध्यानमाह - **रक्ताम्बर इति ॥ रक्तमाल्यं** जपाकुसुमादिस्रक् **अनुलेपनं** चन्दनगन्धः ते यस्य स तथा । **॥पाशदन्ताङ्कुशाभये ॥** पाशदन्ताभ्यां सहिते अङ्कुशाभये इति मध्यमपदलोपी समासः । पाशदन्तोऽङ्कुशाभय इति[2] पाठे पाशयुक्तो दन्तो यस्य सः

[1] पाशदन्तोऽङ्कुशाभय इति गु.दी.सू.पाठान्तरम् ।

[2] `-अभये इति' इति पदच्छेदः, न तु `-अभयः इति' इति ।

पाशदन्तः। पाशदन्तधर इति यावत् ॥87,88॥

ननु उक्तानामन्यदेवतामन्त्राणां नानाविधफलसाधकत्वमभिहितम् । न च तत्सम्भवति। तत्तन्मन्त्रप्रतिपाद्यदेवतानामस्वातन्त्र्येण फलदानासमर्थत्वादित्यत आह - **तत्र तत्रेति॥**

तत्रतत्र स्थितो विष्णुस्तत्तच्छक्तीः प्रबोधयन् ।
एक एव महाशक्तिः कुरुते सर्वमञ्जसा ॥ 89 ॥

तत्रतत्र गरुडविघ्नेशादौ स्थितो विष्णुः तत्तत्फलदानशक्तीः **प्रबोधयन्** अभिव्यञ्जयन् सर्वं कर्म कुरुते। ननु एकस्य एकदैवानेकपदार्थेषु स्थित्वा तत्तच्छक्तिप्रबोधकर्तृत्वमन्यत्राविद्यमानमस्मिन् कथं ज्ञातव्यमित्यत अचिन्त्यशक्त्याख्यसम्भावकेन ज्ञातव्यमित्याह - **महाशक्तिरिति** ॥89॥

4.41 धन्वन्तरिमन्त्रः 71

अन्यदेवतामन्त्रेण तत्समाप्तिमरोचयमानः अत्युत्तमं धान्वन्तरमष्टाक्षरमन्त्रमाह - **स्वयमिति॥**

स्वयमुद्देशवान् पूर्ववर्णपूर्वो नमोयुतः ।
धान्वन्तरो महामन्त्रः संसृतिव्याधिनाशनः[1] ॥ 90 ॥

चन्द्रौघकान्तिममितोरुकरैर्जगन्ति[2]
संजीवयन्तममितात्मसुखं परेशम् ।

1 'अत्रोक्तसर्वमन्त्राणां नायकोपलसन्निभः' इति टीकाकृता पाठान्तरत्वेनोल्लिखितमधिकं पादद्वयम् ।

2 अमृतोरुकरैरिति गु.दी.सू.पाठान्तरम् ।

ज्ञानं सुधाकलशमेव च सन्दधानं
शीतांशुमण्डलगतं स्मरताऽत्मसंस्थम् ॥ 91 ॥
मूर्ध्नि स्थितादमुत एव सुधां स्रवन्तीं
भ्रूमध्यगाच्च तत एव च तालुसंस्थात् ।
हार्दाच्च नाभिसदनादधरस्थिताच्च
ध्यात्वाऽभिपूरिततनुर्दुरितं निहन्यात् ॥ 92 ॥

स्वयं स्ववाचकः धन्वन्तरिशब्दः **वर्णपूर्वः** पूर्ववर्णभूतधकारपूर्वः। स च बीजत्वेन बिन्दुसहित इति द्रष्टव्यम् । **हृदयसंयुतः** नमःशब्दयुतः। एवं च `धं धन्वन्तरये नमः' इति मन्त्रोद्धारः। धन्वं पापं तत्कार्यं ज्वरादिकं च तारयतीति धन्वन्तरिरित्यर्थः। `त्रीधन्व योजना' इति ऋग्भाष्ये तथा धन्वपदव्याख्यानात्[1]। फलमाह - **सर्वेति**॥[2] `अत्रोक्तसर्वमन्त्राणां नायकोपलसन्निभ' इति क्वचित्पाठः। तत्र नायकोपलसन्निभ इत्यस्य शिरोरत्नसमान इत्यर्थः। ध्यानमाह - **चन्द्रेति॥ अमितोरुकरैः** अपरिच्छिन्नोत्कृष्टरश्मिभिः जगन्ति **सञ्जीवयन्तम्** उज्जीवयन्तम्। अमृतोरुकरैरिति पाठे नाशरहितैः **अमृतत्वस्य** मुक्तत्वस्य प्रदैर्वा अमृतस्राविभिर्वा उरुभिः किरणैरित्यर्थः। **अमितात्मसुखम्** अपरिच्छिन्नस्वरूपसुखम्। **आत्म-**

---

1 `अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्रीधन्व योजना सप्तसिन्धून् ।'
इति ऋ.सं.1-35-8तममन्त्रस्य पूर्वार्धम् । तत्रत्यधन्वपदव्याख्यानावसरे ऋग्भाष्ये एवमुक्तम् - `ऊर्ध्वं मध्यमधरं चेति धन्वत्रयं तमः सुखलीनं यतस्तत्' - इत्यादि।
तत्रेत्थं टीका - `तत्तमो यतस्सुखलीनं सुखरहितं तस्माद्धन्वशब्दम् । निरुदको हि देशो धन्वशब्देनोच्यते। तेन सुखाभावो लक्ष्यते' - इति। एवं च धन्वपदस्य लक्षितलक्षणया ज्वरादिरोगः अर्थः इति भावः।

2 सर्वेति पदं मूले न दृश्यते। अत्र तथा प्रतीकधारणात् `सर्वव्याधिविनाशनः' इत्यादिरूपं पाठान्तरं सम्भाव्यते।

संस्थं चित्तसंस्थं तद्विषयीकृतमिति यावत् । शरीरसंस्थमिति वा। **मूर्ध्नि स्थितात्** मूर्धस्थद्वादशदलपद्मगतात् । **अमुतः** धन्वन्तरेरेव स्रवन्तीं सुधां ध्यात्वेति सर्वत्र योज्यम् । **भ्रूमध्यगात्** भ्रूमध्यगतचतुर्दलपद्मगतात् **तत** एव धन्वन्तरेरेव। इदं सर्वत्र सम्बध्यते। **तालुसंस्थात्** इन्द्रयोन्यपरनामकतालुगतद्विदलकञ्जगतात् । **हार्दात्** हृदिस्थाष्टदलपद्मगतात् । **नाभिसदनात्** नाभिगतषड्दलपद्मस्थाच्च। **अधरस्थितात्** गुदाख्यमूलाधारस्थचतुर्दलपद्मगताच्च। धन्वन्तरेरेव स्रवन्तीं सुधां ध्यात्वा **तया** सुधया अभिपूरिततनुः **दुरितं** पापम् । `अंहो दुरितदुष्कृतम्' इत्यमरः (अ.को.1-4-84) ॥90-92 ॥

अपरे तु - चन्द्रस्थत्वमेव विवृण्वन्नाह - **मूर्ध्नीति** ॥ **अमुतः** चन्द्रमण्डलात् । **तत** एव चन्द्रमण्डलादेव **स्रवन्तं** स्रावयन्तमिति व्याचक्षते।

मन्त्रसामर्थ्यमाह - **अज्ञानेति** ॥

अज्ञानदुःखभयरोगमहाविषाणि
योगोऽयमाशु विनिहन्ति सुखं च दद्यात् ।
उन्मादविभ्रमहरः परतश्च सान्द्र-
मानन्दमेव पदमापयति स्म नित्यम् ॥ 93 ॥

अयं योगः उक्तध्यानरूपोपायः अज्ञानादीनि विनिहन्ति। तावन्मात्रस्यापुरुषार्थत्वादाह - **सुखं च दद्यादिति** ॥ **उन्मादः** अपस्मारव्याधिविशेषः। **विभ्रमः** पित्तकार्यमूर्धभ्रमणविशेषः। नेदमैहिकमात्रमस्य फलम् । पारत्रिकं चास्तीत्याह - **परतश्चेति** ॥ **सान्द्रं** पूर्णं नित्यमानन्दं पद्यते इति **पदं** मोक्षस्थानम् । **आपयति** सम्प्रापयति ॥93 ॥

प्रकारान्तरेण ध्यानमाह - **ध्यात्वैवेति** ॥

ध्यात्वैव हस्ततलगं स्वमृतं स्रवन्तं
देवं स यस्य शिरसि स्वकरं निधाय ।
आवर्तयेन्मनुमिमं स च वीतरोगः
पापादपैति मनसा यदि भक्तिनम्रः ॥ 94 ॥

शतं सहस्रमयुतं लक्षं वाऽऽरोगसङ्ख्यात् ।
इममेव जपेन्मन्त्रं साधूनां दुःखशान्तये ॥ 95 ॥

सुष्ठु अमृतं स्रवन्तं देवं धन्वन्तरिम् स्वहस्ततलगं ध्यात्वा यस्य शिरसि करं निधाय इमं मन्त्रम् **आवर्तयेत्** जपेत् स च **पापात्** रोगहेतोः अपैति। अत एव वीतरोगो भवतीति योजना। मनसा भक्त्या विनतश्चेत्यर्थः। कियद्वारमित्यपेक्षायां प्रयोगमाह - **शतमिति॥** रोगानुसारेण **शतं** शतवारं सहस्रवारम् अयुतवारं लक्षवारं वा जपेत् । लक्षवारमावर्तनेऽपि रोगनिवृत्त्यभावे कथमित्यत आह - **आ-रोगसङ्ख्यादिति॥** आत्मन इति शेषः। स्वस्य रोगनाशपर्यन्तं वा। इमं धान्व-न्तरं मन्त्रं जपेत् । **साधूनां** परेषां दुःखशान्तये च। अत्र साधूनामित्युक्त्याऽसाधूनां शिरसि हस्तं निधाय जपेऽपि उक्तफलं न भवतीति सूचयति ॥94,95 ॥

ज्वरादिनिवर्तकमनन्यशेषभूतं तर्पणमाह - **ज्वरेति॥**

ज्वरदाहादिशान्त्यर्थं तर्पयेन्मनुनाऽमुना ।
ध्यात्वा हरिम् जले सप्तरात्राज्जूतिर्विनश्यति ॥ 96 ॥

ज्वरशान्त्यर्थं तापशान्त्यर्थं ज्वरप्रयुक्तो यस्तापस्तच्छान्त्यर्थमिति वा। **अमुना** मन्त्रेण **तर्पयेत्** तर्पणं कुर्यात् । जले हरिम् ध्यात्वा **सप्तरात्रं** सप्तरात्रपर्यन्तं यदि तर्पयेत् तदा **जूतिः** ज्वरः विनश्यति ॥96 ॥

रोगनिवर्तकहोममाह - **अयुतेति ॥**

अयुतामृतसमिद्धोमाद् गोघृतक्षीरसंयुतात् ।
सर्वरोगा विनश्यन्ति विमुखो न हरेर्यदि ॥ 97 ॥

गोघृतक्षीराभ्यां संयुतात् **अयुतामृतसमिद्धोमात्** अयुतसङ्ख्याकात् `अमृता गुडूची तन्त्रिकाऽमृते'त्यभिधानात् तत्समिद्धोमात् । सर्वरोगा विनश्यन्ति । **हरेः** नारायणस्य **विमुखः** विरुद्धमुखः तत्कटाक्षाविषय इति यावत्, यदि न भवेत् ॥97 ॥

परकृताभिचारकर्मशान्त्यर्थं होमविशेषमाह - **भूतेति ॥**

भूताभिचारशान्त्यर्थमपामार्गाहुतिक्रिया ।
द्विगुणामृतया पश्चात्केवलेन घृतेन वा ॥ 98 ॥

भूतानां पिशाचविशेषाणामावेशशान्त्यर्थम् **अभिचारशान्त्यर्थम्** । अभिचारो नाम मरणादिसाधनक्रियाविशेषः । तत्प्रयुक्तमरणादिशान्त्यर्थं च **अपामार्गाहुतिक्रिया** अपामार्गाणाम्[1] आहुतिक्रिया कार्येति शेषः । अस्मिन्नेव होमे अङ्गहोममाह - **द्विगुणेति ॥ पश्चाद्** अपामार्गहोमानन्तरं **द्विगुणामृतया** अपामार्गसङ्ख्यातः द्विगुणितसङ्ख्यावती या अमृता तया समिधेतिशेषः, होमः कार्यः । होमद्वयेन भूताभिचारशान्तिरित्यर्थः । अमृतया द्विगुणा आहुतिक्रियेति वा । वस्तुतस्तु - समिधेति शेषः । अमृतसमिधां चतुरङ्गुलत्वोक्तेस्तद्द्विगुणया अष्टाङ्गुलपरिमितापामार्गसमिधेति योज्यम् । अपामार्गाभावे अनुकल्पम्[2] आह - **केवलेति ॥** पूर्वं विद्यमानं द्विगुणपदं बुध्या विविक्तं नपुंसकलिङ्गं तृतीयान्तं सदनुवर्तते ॥98 ॥

इदानीं फलान्तरसाधनहोमान्तरमाह - **आयुरिति ॥**

---

1 प्रा.पाठे पार्श्वे उत्तरायणि इति कन्नडभाषाशब्दो लिखितः ।

2 प्रा.पाठे पार्श्वे `गौणपक्षे' इति अनुकल्पशब्दार्थो लिखितः ।

आयुर्विवृद्धये नित्यं जन्मनक्षत्र एव वा ।
चतुश्चतुर्भिर्दूर्वाभिः क्षीराज्याक्ताभिरिष्यते ॥ 99 ॥

आयुर्विवर्धये[1]। **नित्यं** प्रत्यहं जन्मनक्षत्र एव वा **चतुर्भिश्चतुर्भिः** चत्वारश्चत्वारो मानं यासां ताः चतुश्चतस्रः ताभिश्चतुश्चतसृभिरिति यद्यपि भवितव्यम् । तथापि छन्दस्त्वात् चतुश्चतुर्भिरिति पुल्लिङ्गता युक्ता। चतुश्चतुःसङ्ख्याकाभिः दूर्वाभिः क्षीराज्याभ्यां संसिक्ताभिरेको होमः इष्यते । एवं दूर्वादिभिरयुतादिहोमः[2] ॥99 ॥

अथ साङ्गादेव कर्मणः फलावश्यम्भावात् जपादिसर्वक्रियाणामङ्गमाह - **सर्वेत्यादिना ॥**

सर्वक्रिया हरौ भक्ते हरिभक्तैः स्वनुष्ठिताः ।
गुरुभक्तैः सदाचारैः फलन्त्यद्धा न चान्यथा ॥ 100 ॥

सर्वक्रियाः होमादिकर्माणि **हरौ भक्ते** हरिभक्तविषये **स्वनुष्ठिताः** हरिस्मरणपूर्वकमनुष्ठिताः **अद्धा** सत्यं फलन्ति।

`यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति ।
यदीं श्रृणोत्यलकं श्रृणोति न हि प्रवेद सुकृतस्य पन्थाम्'

इति (ऋ.सं.10-71-6) मन्त्रवर्णोऽत्र मानम् । यः पुरुषः **सचिविदं** सखिविदं परकृतसेवादि जानन्तं **सखायम्** एकदेहस्थत्वेन जीवसखायं परमात्मानं **तित्याज** तत्याज तस्य **वाच्यपि** वेदवाचि अधीतायामपि **भागः** फलं नास्ति। **सुकृतस्य**

1 सर्वत्राऽऽकरेष्वेवमेव पठ्यते । `विवृद्धये' इति भाव्यमिति भाति ।

2 `दूर्वाभिः' इति ज1.पाठः ।

शुभकर्मणः **पन्थां** पन्थानं प्राप्तिसाधनं भगवन्तं न प्रवेद । **हि** यस्मादतो विष्ववभक्तो यच्छृणोति तद् **अलकम्** अलीकम् । **ई** मिथ्यैव[1] फलाहेतुत्वात् । अतो विष्णुस्मरणं प्रतिकर्म कार्यमिति । इत्थम्भावान्तरमाह - **गुरुभक्तैः सदाचारैरिति ॥** गुरुषु भक्तैः, सन् आचारः प्रयत्नो येषां ते सदाचारास्तैः । `आचार इति सम्प्रोक्तः कर्माङ्गत्वेन शुद्धिद' (भा.11-8-48) इति वचनादाचारशब्दार्थो ज्ञेयः । **अन्यथा** भक्तविषयकत्वभक्तादिकर्तृकत्वाभावे ॥ 100 ॥

गुरुभक्तैरिति प्रकृताः गुरवः क इत्याशङ्कायां साधारणानसाधारणांश्च गुरून् प्रदर्शयन्नेव तत्पूजादिकमपि अङ्गमित्याह - **ब्रह्मान्ता इति ॥**

ब्रह्मान्ता गुरवश्चैव सम्प्रदायप्रवर्तकाः ।
तत्तद्गुणानुसारेण पूज्या ध्येयाश्च कृत्स्नशः ॥ 101 ॥

स्वोत्तममारभ्येति शेषः । तदुक्तं - `अन्येऽपि स्वात्मनो मुख्याः क्रमाद्गुरव ईरिता' (म.भा.ता.नि.1-120) इति ।[2] गुरुत्वे हेतुः **सम्प्रदायप्रवर्तका** इति ।[3] स्वावराणामपि क्वचित्सम्प्रदायप्रवर्तकत्वे तेषामपि पूज्यत्वज्ञापनार्थमिदमुक्तम् । तदुक्तमन्यत्र `मर्यादार्थं तेऽपि पूज्या'इति (म.भा.ता.नि.1-126) । सम्प्रदायप्रवर्तक इत्युपलक्षणम् । अनुग्राहकाश्चेत्याद्यपि ग्राह्यम् । ननु विद्योपदेष्टृत्वं गुरुत्वम् । न च सर्वान् प्रति ब्रह्मणस्तदस्ति । तत्कथं तस्य गुरुत्वमिति चेत्, सत्यं, अस्त्यत्र सम्प्रदायविशेषः । इह जन्मान्तरे वा हिरण्यगर्भोपदेशेन विना कस्यापि न मुक्तिरिति साधारणं गुरुत्वं तस्योपपन्नम् । तथा चोक्तमनुव्याख्याने - `उपदेशो ब्रह्मणश्च सर्वेषामेव मुक्तये' (अनु.व्या.3-3-28) इति । एकादशस्कन्धतात्पर्ये च `ज्ञानं प्राप्य बहुभ्योऽपि

1 प्रा.पाठे पार्श्वे वृथैव ।
2 प्रा.पाठे पार्श्वे `साक्षादुत्तमो गुरुः ततोऽप्युत्तमो गुरुः गुरुतरः इति क्रमात्' इति सुधा उपासनापादीया ।
3 प्रा.पाठे पार्श्वे `तत्वदर्श्युपदेशपरम्परा सम्प्रदायः' इति लिखितम् ।

नर्ते मुक्तिश्चतुर्मुखात् । ज्ञानमप्राप्य' इति[1]। ब्रह्मेतरेषामप्युत्तमानां तात्विकानां शेषादीनां तत्सम्प्रदायप्रवर्तकत्वेन सन्मार्गप्रवर्तकत्वेन च साधारणगुरुत्वम् । विद्याप्रवर्तकानां च पितृप्रभृतीनामनुग्राहकत्वादिना असाधारणं गुरुत्वमित्यादि द्रष्टव्यम् । तथाह मनुः-

`निषेकादीनि कर्माणि यः करोति यथाविधि ।
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते ॥

अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ।
तमपीह गुरुं विन्द्याच्छ्रुतोपकृतिहेतुतः' इति ॥

`श्रीमदानन्दतीर्थीयमतमाचन्द्रतारकम् ।
आसेतोराहिमाद्रेश्च समीचीनं प्रवर्तताम्'

इत्यादि प्रार्थनाकर्तृत्वेनापीतरेषां स्वोत्तमानां गुरुत्वं द्रष्टव्यम् । ब्रह्मादयः पित्रन्ताः सर्वे किं साम्येन पूजाद्यर्हाः ? नेत्याह - **तत्तद्गुणानुसारेणेति** ॥ कृत्स्नशः समस्ताः ब्रह्माणमैहिकसद्गुर्वादींश्चारभ्य पित्रन्ताः सर्वे **तत्तद्गुणानुसारेण** ज्ञानभक्त्यादिगुणतारतम्यानुसारेण **पूज्याः** वन्दनादिना मान्याश्चेत्यर्थः ।

ननु तर्हि निषेकादिकर्तृपितृमातृविद्योपदेष्टृगुरुपरमगुर्वादीनामेकत्र दैवात्सम्मेलने के प्रथमं मान्या इत्यतश्चेदमुदितम् ॥**तत्तद्गुणानुसारत इति** ॥ प्रथममिति शेषः । अत्र गुणशब्दः शुभार्थः । तदुक्तं गीताभाष्ये -

`शब्दाद्या इन्द्रियाद्याश्च सत्वाद्याश्च शुभानि च ।
अप्रधानानि च गुणा निगद्यन्ते निरुक्तिगैः' इति (गी.भा.3-29) ।

[1] भा.ता.11-9-31 उदाहृतं गुरुविवेकवचनम्

उच्चत्वादिशुभधर्मानुसारेण अधिकाः प्रथमतो वन्द्या इत्यर्थः । तथा हि मातापित्रोः समवाये पिता प्रथमं वन्दनीयः । तस्य मुख्यत्वात् । `सहस्रं तु पितुर्माता गौरवेणातिरिच्यत' इति वाक्यं तु निषेकमात्रकर्तृजातकोपनयनादिसंस्काराकर्तृपितृविषयम् । आचार्यपित्रोः समवाये तु आचार्यः आदौ नम्यः ।

`उत्पादकब्रह्मदात्रोः गरीयान् ब्रह्मदः पिता ।
शिरसा प्रणमेत्तं हि पितरं तदनन्तरम्' इति वचनात् ।

गुरोः परमगुरोश्च समवाये परमगुरुरादावभिवन्दनीयः । यथाहाऽपस्तम्भः -

`प्रोष्य च समागते प्राचार्याचार्यसन्निपाते प्राचार्यमुपसङ्गृह्याचार्यमुपसञ्जिघृक्षेत्' इति ॥ 101 ॥

हरिभक्तैर्गुरुभक्तैरिति चोक्तम् । तत्र हरिभक्तिः कीदृशी ? गुरुभक्तिश्च कीदृशी ? किञ्च ब्रह्मान्ता गुरव इत्युक्तम् । एवं सति लक्ष्म्यसङ्ग्रह इत्यत आह - **सर्वेभ्य इत्यादिना** ॥

सर्वेभ्योऽप्यधिका भक्तिर्विष्णौ स्यादतिनिश्चला ।
लक्ष्मीब्रह्मादिषु ततः क्रमेण स्यात् सुभाविता ।
एवं विद्याः फलिष्यन्ति नान्यथा तु कथञ्चन ॥ 102 ॥

सर्वेभ्यो ब्रह्मादिभ्यः **अभ्यधिका** अतिनिश्चला अन्तरायसहस्रेणाप्यप्रतिबद्धा भक्तिर्विष्णौ स्यात् । **ततः** विष्ण्वनन्तरं लक्ष्मीं ब्रह्माणं चारभ्य चतुर्गुणोपासकान्तेषु स्वोत्तमेषु **क्रमेण** गुणतारतम्यक्रमेण भक्तिः **सुभाविता** सुष्ठु भाविता अनुष्ठिता , सम्यक् सम्पादिता वा स्यात् । एवं क्रमेण भक्तिकरणे मन्त्ररूपाः **विद्याः**

फलिष्यन्ति फलदानसमर्थाश्च भविष्यन्ति। **अन्यथा** विष्णौ सर्वाधिकभक्त्यभावे अन्यथाक्रमेण साम्येन वाऽनुष्ठाने वा न फलिष्यन्ति। तथा च ब्रह्मान्ता इत्युपलक्षणमिति भावः ॥102॥

मन्त्रविद्याप्रयोगादौ कर्तृगुणान्तराण्याह - **शुभानिति**॥

शुभान् ध्यायन्ति ये कामान् गुरुदेवप्रसादजान् ।
इतरानात्मपापोत्थांस्तेषां विद्या फलिष्यति ॥ 103 ॥

काम्यन्त इति **कामाः** विषयास्तान् । तदुत्थसुखविशेषांश्च गुर्वाद्यनुग्रहसम्भवान् । **इतरान्** अशुभान् । आध्यात्मिकादिक्लेशानात्मपापोत्थान् ये **ध्यायन्ति** चिन्तयन्ति तेषां विद्या फलिष्यति ॥103॥

मुक्तावपि च संसारे नाऽत्मनो विष्णुतां क्वचित् ।
ब्रह्मरुद्रादिभावं वा साम्यं वाऽऽधिक्यमेव वा ॥ 104 ॥

अतद्वशत्वमथवा यः स्मरेत् स तु सिद्धिभाक् ।
नान्यथा सिद्धिमाप्नोति कल्पकोटिशतैरपि ॥ 105 ॥

आत्मनो ब्रह्मैक्यज्ञानं मोक्षसाधनमिति **केचित्**। आत्मनः सर्वाभेदज्ञानं मोक्षासाधनमित्यन्ये आस्थिषत। सर्वत्र तारतम्याभावज्ञानं मोक्षसाधनमिति **अपरे**। अतः सर्वेभ्योऽभ्यधिका भक्तिरित्यादिकं कथमुपपाद्यत इत्यत आह - **मुक्तावपीति**॥ अन्योन्यसमुच्चयेऽपिचशब्दौ। आत्मन इति सर्वत्र सम्बध्यते। तथा च मुक्तौ संसारेऽपि **आत्मनः** स्वस्य **विष्णुतां** विष्ण्वभेदम् । **ब्रह्मरुद्रादिभावं** ब्रह्मरुद्रादित्वम् । ब्रह्मत्वं रुद्रत्वमादिपदादिन्द्रादित्वम् । ब्रह्मादिभिर्विष्णुना च स्वस्य साम्यं वा तेभ्य आधिक्यं वा। **अतद्वशत्वं** तदधीनत्वाभावं वा यो न स्मरेत् सोऽधिकारी

सिद्धिभाक् फलप्राप्तिमान् भवति। **अन्यथा** मुक्तौ संसारे च आत्मनो विष्णुत्वादिस्मरणे। कल्पानां याः कोटयस्तासां शतैरपि। बहुत्वोपलक्षणमेतत्। बहुकल्पैरपि सिद्धिभाङ्न भवति।

इदमुक्तं भवति। न तावदैक्यादिज्ञानं मोक्षसाधनम्, अन्यथाज्ञानत्वात्। न हि जीवेशयोरैक्यं कदाऽप्यस्ति। संसृतौ तावदहमज्ञ इति साक्षिणा श्रुतिसिद्धेश्वराद्भेद एवावसीयते। तथा हि। जीवस्तावत्प्रत्यक्षसिद्धः। स तु `यः सर्वज्ञ' इत्याद्यागमसिद्धेश्वरगुणभूतसार्वज्ञ्यादिविरुद्धाज्ञानादिकं `अहमज्ञः' `मामन्यं च न जानामि' इति स्वात्मन्यनुभवन् ततो भेदं प्रत्येत्येव। प्रत्यक्षे धर्मिणि भेदकधर्मसाक्षात्कारस्य भेदसाक्षात्कारव्याप्तत्वात् `पृथगुपदेशादि' (ब्र.सू. 2-3-28) त्यादि शास्त्राच्च। `द्वा सुपर्णा' इत्यादि (ऋ.सं.1-164-20, आ.उ.2-1) निरवकाशवाक्याच्च। मुक्तावपि `यज्ञस्य मात्रां विमिमीत उ त्व' इति भेद एवावसीयते, ध्यातृध्येययोर्भेदनियमात्। न च

`ब्राह्मे मुहूर्ते चोत्थाय वार्युपस्पृश्य माधवः।
दध्यौ प्रसन्नकरण आत्मानं तमसः परम्' (भा. 10-78-4)

इत्यादाविवोपपत्तिः। `पूर्णमदः पूर्णमिदम्' (बृ.उ.) इत्याद्यनन्तश्रुतिसिद्धाभेदे भेदकार्यस्य विशेषबलादुपपत्तेः। अभिन्ने अनुपचरितभेदव्यवहारहेतुर्विशेषः। घटपटभेदव्यवहारे विशेषाभावादभिन्नेत्युक्तम्। पशुकार्यकारित्वेन पशुसदृशं कञ्चित्पुरुषं दृष्ट्वोच्यते `अयं पुरुषो न' इति। तत्राभिन्ने पुरुषे `पुरुषो न' इति भेदव्यवहारहेतुर्विशेषः क्लृप्तः स्यादत उक्तमनुपचरितेति। स तूपचरित इति नातिप्रसङ्गः। स्पष्टं च जीवेश्वरयोः भेदकधर्मवत्त्वं विष्णुपुराणे -

`उपजीवकत्वं जीवत्वमीशत्वं तद्विपर्ययः।
स्वाभाविकं तयोरेतन्नान्यथाऽस्मात्कथञ्चन' इति।

न हि कदापि जीवेश्वराभेदे प्रमाणमस्ति । न च `तत् त्वमसि' इत्यादीन्यत्रापि (छा.उ.6-3-14) सन्तीति वाच्यम् । तेषां शास्त्रेऽन्यथा व्याख्यातत्वात् । तत ऐक्यस्यान्यथात्वेन तज्ज्ञानमन्यथाज्ञानमिति, अन्यथाज्ञानं च नरकहेतुत्वेन प्रमितमिति न तन्मोक्षसाधनम् । एवं सर्वाभेदज्ञानमपि । तारतम्यस्याप्यनन्तश्रुतिपुराणवाक्यैः शास्त्रे साधितत्वेन तदभावज्ञानमप्यन्यथाज्ञानमेवेति न तारतम्याभावज्ञानमपि मोक्षसाधनमिति ॥ 104,105 ॥

इदानीं विद्यारम्भकाले गुर्वादिस्मरणरूपमित्थम्भावान्तरमाह - **स्मृत्वेति ॥**

स्मृत्वा गुरुं पूर्वगुरुमादिमूलगुरूंस्तथा ।
देवतां वासुदेवं च विद्याभ्यासी तु सिद्धिभाक् ॥ 106 ॥

अनेन स्मृतिपूर्वं नमनमभिप्रेतम् । **गुरुं** विद्योपदेष्टृस्वगुरुम् । **पूर्वगुरुं** गुरोर्गुरुम् । **आदिगुरुम्** आनन्दतीर्थश्रीचरणम् । **मूलगुरून्** व्यासादिनारायणान्तान् सप्त । तदाह पञ्चरात्रे -

`व्यासं च भारतीं वाणीं विधिं वायुं रमां तथा ।
ततो नारायणं मूलगुरूनाहुर्विपश्चित'इति ।

देवतां विद्याप्रतिपाद्यदेवताम् । `या तेनोच्यते सा देवता' इति[1] अभियुक्तोक्तेः । मोक्षप्रदं वासुदेवं च स्मृत्वा । अयमत्र सम्प्रदायः । यदा यन्मन्त्रजपः क्रियते तदा तन्मन्त्रप्रतिपाद्यदेवतानत्यन्तरं वासुदेवनतिरनुष्ठेयेति । **अपरे तु** - देवतां वासुदेवमिति सामानाधिकरण्यम् । देवताशब्दस्य नित्यस्त्रीलिङ्गत्वात् न विरोध इत्याहुः । अत्र **केचित्** - गुरुशब्देन साक्षात् स्वगुरुः सर्वे गुरवश्च विवक्षिताः । एकवचनं समुदायाभिप्रायम् । पूर्वगुरुशब्देन गुरुगुर्वादयः । **आदिगुरुः** श्रीमदाचार्यः । मू-

[1] सर्वानुक्रमणी 1-2 ।

लगुरुः वेदव्यासः। अत्र देवताशब्देन महालक्ष्मीः ब्रह्माणीभारत्यौ सर्वदेवताश्च विवक्षिताः। **वासुदेवं** च वसुदेवसुतं कृष्णम्। चशब्दाद्ब्रह्मवायू इति। 'न चान्यथा' इत्यादिना (तं.सा.4-105) हरिगुरुभक्तेरावश्यकत्वमुक्तम् ॥106॥

प्रसङ्गात् तदवज्ञाकर्तुरनर्थमाह - **अवज्ञातेति॥**

अवज्ञाता गुरूणां च देवतानां न सिध्यति।
प्रयाति च तमो घोरं मन्त्रावज्ञाकृदेव च ॥ 107 ॥

यस्तारतम्यवेत्ता स्याद्गुरूणां देवतास्वपि।
भक्तिमान् गुरुदेवेषु तद्भक्तेषु च सिध्यति ॥ 108 ॥

गुरुदेवप्रतीपानां विमुखस्तत्प्रिये रतः।
अकामक्रोधलोभश्च नचिरात् सिद्धिमाप्नुयात् ॥ 109 ॥

सकामेभ्योऽमितगुणा याऽकामैस्तु कृता क्रिया।
तस्मादकाम एवालं भजेद्विष्णुं सनातनम् ॥ 110 ॥

देवतानां मन्त्रप्रतिपाद्यानां **गुरूणां** ब्रह्मादीनां चशब्दात् वासुदेवस्य चा**वज्ञाता** अपमानकर्ता न सिध्यति। **घोरम्** अपुनरुत्थानं तमश्च प्रयाति। न केवलमयं किन्तु देवताप्रतिपादकगुरूक्तमन्त्रावज्ञाकृच्च तम एव यातीति यात्येवेति वा सम्बन्धः। अनेन मन्त्रे विश्वासश्चाङ्गमिति सूचितं भवति। गुरुदेवतातारतम्यज्ञानं चाङ्गमित्याह - **य इति॥** देवतास्विति सप्तमी षष्ठ्यर्थे। गुरुदेवताभक्तेरत्यावश्यकत्वज्ञापनाय पुनर्भक्तिमान् गुरुदेवेष्वित्युक्तम्। अत्र गुरुशब्देन सम्प्रदायप्रवर्तनद्वारा विशेषज्ञानदायका एवोच्यन्ते। न तु स्वोत्तममात्राः। **तद्भक्तेषु** देवतागुरुभक्तेषु

भक्तिमानिति पृथग्विद्यमानत्वात् । **गुरुदेवप्रतीपानां** गुरुदेवताद्वेषिणां **विमुखः** विरोधीति यावत् । **तत्प्रिये** गुरुदेवताप्रिये रतः। **कामो** दुर्विषये। **क्रोधः** सत्सु । **लोभः** सत्पात्रे वित्तत्यागानिच्छा। तैः शून्यः।

`त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्' इति

गीतोक्तेः (भ.गी.16-21)। **नचिरात्** शीघ्रम् । काम्यकर्मिभ्यः निवृत्तकर्मिण आधिक्यं वदन् अकामनया विष्णुभजनं विधत्ते - **सकामेभ्य इति ॥** सनातनं नादेन सहितः सनादनः। स एव सनातनस्तम् । वेदवेद्यमित्यर्थः। **अलं** सुष्ठु ॥107-110 ॥

4.42 वेदोक्तधन्वन्तरिमन्त्रः 72

एवं प्रासङ्गिकं समाप्यावश्यवक्तव्यमवशिष्टमन्त्रमाह - **अयं म इति ॥**

अयं मे हस्त इति च मन्त्रः पूर्वोक्तवत् स्मृतः ।
अत्रोक्तास्तु क्रियाः सर्वमन्त्रेष्वप्युपलक्षणम् [1] **॥ 111 ॥**

`अयं मे हस्तो भगवानयं मे भगवत्तरः ।
अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ॥'

इति मन्त्रश्च पूर्वोक्तधान्वन्तरमन्त्रवत् धन्वन्तरिप्रतिपादक उक्ताशेषफलकश्चेति स्मृत इत्यर्थः। **अयं** बुद्धिसन्निहितः मे **हस्तः** हस्तस्थितो धन्वन्तरिः **भगवान्** समग्रैश्वर्यगुणः। स्वयोग्यसमग्रैश्वर्यादिमत्त्वेन लक्ष्म्यादावपि भगवच्छब्दवृत्तेः कथमीश्वरे

1 `पूर्वमन्त्रेषु' इति गु.दी.सू.पाठान्तरम् ।

विशेषणत्वमित्यत उक्तं ॥**भगवत्तर इति**॥ अनन्याधीननिरवधिकानन्तसमग्रैश्वर्यादिगुणवानतिशयेनेति **भगवत्तरः**। **विश्वभेषजः** सर्वानिष्टनिवर्तकत्वेनौषधस्थानीयः **शिवस्य** परममङ्गलस्य **अभिमशनं** सम्बन्धो यस्मात्स शिवाभिमर्शन इति मन्त्रार्थः। धान्वन्तरमन्त्रोक्तप्रयोगानन्यमन्त्रेष्वतिदिशति - **अत्रेति**॥ धान्वन्तरमन्त्रे **सर्वमन्त्रेषु** वराहादिमन्त्रेषु उपलक्षणं यथा भवति तथा द्रष्टव्या इत्यर्थः। पूर्वमन्त्रेष्विति **क्वचित्पाठः** ॥111॥

प्रसङ्गान्नृसिंहमन्त्रेष्वनुक्तं फलमाह - **विजयेत्यादिना**॥

विजयस्तम्भनादीनि नारसिंहैर्विशेषतः।
जामदग्न्यैश्च कार्याणि राघवैर्यादवैरपि।
वाराहैः स्तम्भनं क्षिप्रं श्रीकराः कथिताः पुरा॥ 112॥

बहुबाहुं महाकायमुद्युक्तं चोद्यतायुधम्।
स्मरन् विजयमाप्नोति स्तम्भनादींश्च कारयेत् ॥ 113॥

विजयः प्रतिपक्षिपराजयः **स्तम्भनम्** अग्न्यादिस्तम्भनं वाङ्मुद्रणं वा। आदिपदेन पिशाचोच्चाटनादीनि सर्वमन्त्रैरपि भवन्ति। नारसिंहैस्तु विशेषत इत्यर्थः। जामदग्न्यैरित्यादौ विशेषत इत्यनुवर्तते। श्रीकरा इति बहुवचनमाद्यर्थे। श्रीकरशब्दस्यावृत्तिः। इतिशब्दोऽध्याहार्यः। तथा च श्रीकरादयो मन्त्राः श्रीकरा इति कथिता इत्यर्थः। पुरा कथिताः सर्वेऽपि मन्त्राः श्रीकराः सम्पत्करा इति वा। नृसिंहादिमन्त्रैः विजयादीनि भवन्तीत्युक्तम्, तत्र विजयादिप्राप्त्यर्थं तदुपयुक्तध्यानविशेषः कार्य इत्याह - **बहुबाहुमित्यादिना**॥ बहवो बाहवो यस्य स बहुबाहुस्तम्। **महाकायं** स्थूलकायम्। **उद्युक्तं** वैरिसंहरणोद्योगसम्पन्नं स्मरन् **विजय** पराभवम्[1] आत्मन

1 शत्रूणामिति शेषः।

उत्कर्षं च आप्नोति लभते। स्तम्भनादीन् कारयेच्च ॥ 112,113 ॥

धनप्राप्तिसाधनं ध्यानविशेषं निरूपयति - वसुपूर्णेति ॥

वसुपूर्णकरं रत्नपर्वतस्थं विभावयन् ।

वसुसिद्धिमवाप्नोति सेव्यमानमजादिभिः ।
श्रिया विभूतिभिर्युक्तं भावयन् भूतिमाप्नुयात् ॥ 114 ॥

द्रव्यपूर्णकरं रत्नपर्वते अधिष्ठितं विभावयन् ध्यायन् वसुसिद्धिं स्वेच्छया द्रव्यलाभाख्यसिद्धिमाप्नोति। श्रिया रमया। विभूतिभिः सम्पद्भिः। भूतिं महालक्ष्मीम् ॥ 114 ॥

अथ सामान्यतः प्रयोगमाह - यद्यदिति ॥

यद्यन्मनोहरं तस्य तत्तदाप्नोत्यसंशयम् ।

तथातथा हरिम् ध्यायन् क्रियास्तास्ताश्च साधयन् ॥ 115 ॥

श्रिये पद्मानि जुहुयात् सम्प्रीत्या उत्पलानि च।

श[स]रान् जयाय जुहुयादभिमन्त्र्य प्रयोजयेत् ॥ 116 ॥

विद्यायै मन्त्रितं वारि वचां वा तुलसीमपि।
ब्राह्मीं[1] घृष्टसुवर्णं वा शतावृत्या तु नित्यशः ॥ 117 ॥

स्वमनोरथं यद्यद्विद्यादिकं तत्तद्विशिष्टत्वेनेत्यर्थः। तास्ताः स्वमनोगततत्तत्प्रयोजनानुकूलाः [2] होमादीनि। साधयन् कुर्वन् तत्तदाप्नोति। ता एव क्रियाः लेशतो

1 'सोमम्' इति गु.दी.सू.पाठान्तरम् ।

2 क्रियाः

दर्शयति - **श्रिय इत्यादिना॥ श्रियै** सम्पदे **पद्मानि** सरसिजानि **सम्प्रीत्यै** सन्तृप्त्यै, `तृप् = सन्तर्पण'[1] इति धातोः, उत्पलानि **जयाय** जयार्थं **शरान्** इषून् **समिद्विशेषान्** वा जुहुयादिति सम्बन्धः। प्रयोजयेदित्यत्रापि शरानित्यस्यानुषङ्गः। तथाचाभिमन्त्र्य शरान् शत्रवे प्रयोजयेदित्यर्थः। **विद्यायै** विद्यार्थम्। धान्वन्तरादिभिर्मन्त्रैः शतावृत्त्याऽभिमन्त्रितं वारि नित्यशः पिबेदिति शेषः। वचां[2] तुलसीम् अत्रापि लिङ्गव्यत्ययेन मन्त्रितामिति मन्त्रितपदमनुवर्तते। भक्षयेदिति शेषः। अपिशब्दो विकल्पार्थे। **ब्राह्मीम्।** वन्देलगु इत्यपभ्रष्टभाषा। सोममिति **क्वचित्पाठः।** तत्र सोमलतायाः रसमित्यर्थः। **घृष्टसुवर्णं** सुवर्णचूर्णं पिबेदित्यन्वयः॥115-117॥

निष्कामनया कुर्वाणस्येदं सर्वं भवतीत्याह - **अकुर्वन्निति॥**

अकुर्वंश्च क्रिया भक्त्या निरपेक्षो भजन् हरिम्।
सर्वमेतदवाप्नोति विशेषेण न संशयः॥ 118॥

क्रियाः होमाद्याः अकुर्वन्। **निरपेक्षः** कामनाशून्यः भगवदुपास्त्यङ्गभूतैश्वर्यादिकामनायाः अनिषिद्धत्वस्य `आवहन्ती वितन्वाना' इत्यादौ (तै.उ.1-10) दृष्टत्वात् केवलैश्वर्यादिविषयककामनारहितः। हरिम् भजन् **एतत्सर्वं** जयैश्वर्यादिकं **विशेषेण** स्वकामनादपि विशेषेणावाप्नोति। नात्राधिकारिभिः संशयः कार्यं इत्याह - **न संशय इति** ॥118॥

अथेदानीं तत्वमन्त्रादिषु न्यासे प्रकारविशेषमाह - **सृष्टिस्थितिलयन्यासा इति॥**

---

1 धा.पा.1196। यद्यपि तृप प्रीणने इति धातुपाठः तथाप्ययमर्थानुवाद इति भाति। अन्येऽपि त्रयः तृपधातवः धातुपाठे पठिताः। तथा हि तृप प्रीणने 1272तमः, तृप तृप्तौ 1308तमः तथा तृप तृप्तौ 1820तमः।

2 प्रा.पाठे पार्श्वे `बजी' इति एतद्वाचककन्नडभाषीयशब्दः लिखितः।

सृष्टिस्थितिलयन्यासाः प्रातिलोम्यानुलोम्यतः ।
स्थित्यन्ता एव वर्णानां श्रेष्ठा एवं चतुर्दश ।
संहृत्यन्ता मोक्षिणां तु एकविंशतिरेव वा ॥ 119 ॥

प्रातिलोम्यं चानुलोम्यं च प्रातिलोम्यानुलोम्ये चेत्येकशेषेण समासः[1]। अत्र यथायोग्यं सम्बन्धो न यथाक्रमम् । अयं भावः । अनुलोमतः पठनं **सृष्टिन्यासः ।** यथा मातृकान्यासे `अं अजाय नमः' इत्यारभ्य `क्षं नृसिंहाय नमः' इत्यन्तं पठनम् । यथा वा तत्वमन्त्रे `शक्तिः प्रतिष्ठा' इत्यारभ्य `पृथिव्यात्मने नमः' इत्यन्तं पठनम् । प्रातिलोम्येन पठनं **लयन्यासः ।** यथा `क्षम्' इत्यारभ्य `अं अजाये'त्यन्तं पठनम् । यथा वा `पृथिव्यात्मने नमः' इत्यारभ्य शक्तिपर्यन्तं पठनम् । **प्रातिलोम्यानुलोमतः** अर्धं प्रतिलोमतः, अर्धमनुलोमतः इत्युभयसमाहारेण पठनं **स्थितिन्यासः ।** यथा `अं अजाय' इत्यारभ्य `अः अर्धगर्भाये'त्यन्तं स्वराक्षाराणां न्यासमानुलोम्येन पठित्वा `क्षं नृसिंहाय' इत्यारभ्य `कं कपिलाय' इत्येतत्पर्यन्तं प्रातिलोम्येन पठनम् । एवं शक्तिमारभ्य पुरुषपर्यन्तमानुलोम्येन पठित्वा पृथिवीमारभ्याव्यक्तान्तं प्रातिलोम्येन पठनम् ।

इदानीं गृहस्थादिभेदेन न्यासभेदमाह - **स्थित्यन्ता इति ॥** उत्तरत्र मोक्षिणामित्युक्तेरत्र गृहस्थानामिति लभ्यते । **वर्णानां** मन्त्राक्षराणां स्थित्यन्ता एव न्यासाः श्रेष्ठाः । प्रथमतः सृष्टिन्यासः तदनन्तरं संहतिन्यासस्ततस्स्थितिन्यास इत्यन्तास्त्रयो न्यासाः सर्वेषां गृहस्थानां श्रेष्ठाः । ते च **चतुर्दश** सृष्टिस्थितिसंहारास्त्रयः । स्थितिसंहारसृष्टयस्त्रयः । संहारस्थितिसृष्टयस्त्रयः । संहारसृष्टिस्थितयस्त्रय इति द्वादश । पूर्वोत्तरौ सृष्टिस्थितिन्यासौ द्वौ । एवं चतुर्दशवारमेव कृता एव श्रेष्ठा इत्यर्थः । `स्थित्यन्तो गृहिणां श्रेष्ठ' इति पञ्चसंस्कारोदाहृतवचनात् । अन्ते स्थितिन्यासं कृत्वा गृह-

[1] घटश्च पटश्च घटपटौ च = घटपटाः इतिवदिति ज्ञेयम् ।

स्थैः समाप्तिः कार्येति भावः ।

यतीनां न्यासनियममाह - **संहृत्यन्ता इति ॥ मोक्षिणां** सर्वसङ्गत्यागिनां संन्यासिनामिति यावत् । संहृत्यन्ता एव न्यासाः श्रेष्ठाः । ते च **एकविंशतिर्वा ।** वाशब्दोऽधिकारविकल्पे । न सङ्ख्याविकल्पे । आरम्भे स्वस्मिन् त्रयो न्यासाः । कलशे त्रयः । अभिषेकात्पूर्वं प्रतिमायां त्रयः । अभिषेकानन्तरं प्रतिमायां त्रयः । अनुयागे त्रयः । अन्ते देवे त्रयः स्वस्मिन् त्रयः इत्येकविंशतिः । `संहृत्यन्तो यतीनां स्यात्' इति वचनात् ।

केचित् - वाशब्दादेक एव संहृत्याख्यो न्यास इति अनुकल्पश्च ग्राह्यः ।

`व्याख्याव्यासङ्गहीनानां त्रयो न्यासाश्च मोक्षिणाम् ।
तद्व्यासङ्गवतामेक एव न्यासो लयाभिध' इति

योगदीपिकावचनादिति वर्णयन्ति[1]। `सृष्ट्यन्तो ब्रह्मचारिणाम्' इति प्रमाणाद्ब्रह्मचारिणां सृष्ट्यन्ताः त्रयो न्यासाः इत्यपि ग्राह्यम् । तथा च क्रमदीपिकायां `न्यासः संहारान्तः मस्करिवैखानसेषु[2]विहितोऽयम् । स्थित्यन्तो गृहमेधिषु । सृष्ट्यन्तो वर्णिनामिति प्राहुः' इति। **वर्णिनां** ब्रह्मचारिणामित्यर्थः । `अशक्तेन सृष्ट्यन्तादिन्यासं विहाय सृष्ट्यन्ताधिकारिणा सृष्टिन्यासः, स्थित्यन्ताधिकारिणा स्थितिन्यासः, यतिना संहृतिन्यासः कार्य' इति गौतमीयतन्त्रे । `न्यासत्रयं सदा कार्यमशक्तैरेक एव तु' इति ॥119॥

एतदध्यायोक्तसर्वमन्त्रेषु वर्णन्यासस्थानान्याह - **पादेति ॥**

पादहृत्केषु नाभ्यास्ययुतं च सललाटकम् ।

---

1 अद्यतनयोगदीपिकापाठे इदं वचनं नोपलभ्यते ।

2 ज1.पाठे `वानप्रस्थ' इति वैखानसशब्दार्थो लिखितः ।

सनासिकादृग्जान्वोश्च सश्रोत्रं सोरुकं तथा ॥ 120 ॥

सोरस्कं च सकण्ठं च सभुजद्वयमेव च ।

सगण्डयुग्मं सालीकं सतुण्डक्रोडकं तथा ॥ 121 ॥

समूलं च सगुह्यं च सपार्श्वद्वयमेव च ।

सदोर्द्वयं व्यापकं च गलपार्श्वद्वयेन च ॥ 122 ॥

ककुदा स्तनद्वयेनापि पृष्ठमूलेन सर्वशः ।

अयं च न्यासो मन्त्राक्षरक्रमेण बोध्यः । चतुरक्षरमन्त्रन्यासः **पादहृत्केषु** चरणयोः हृदि शिरसि च । यद्वा पादहृत्केष्विति एकाक्षरे क्लीमित्यादिमन्त्रे व्यञ्जनस्वरबिन्दुभिर्न्यासः कार्यः । यथोक्तं सङ्ग्रहे

`न्यास एकाक्षरे मन्त्रे व्यञ्जनस्वरबिन्दुभिः ।

पादहृत्के'ष्विति । पञ्चाक्षरे न्यासस्थानमाह - **नाभ्येति ॥** नाभिमुखाभ्यां युतं पूर्वं पादाद्यवयवत्रयम् । षडक्षरे त्वाह - **सललाटकमिति ॥** ललाटसहितं पूर्वावयवपञ्चकम् । `ललाटमलिकं गोधिः' इत्यमरः (अ.को.2-5-113) । एवमग्रेऽपि पूर्वोक्तमन्यच्चेति द्रष्टव्यम् । अष्टाक्षरे तु **॥सनासिकादृगिति ॥** नासिकासहितदृक् । नवाक्षरे तु जान्वोश्च । चतुर्दशाक्षरे त्वाह - **सश्रोत्रं सोरुकं सोरस्कं सकण्ठं सभुजमिति ॥** इदं श्रोत्रादेः द्वित्वमविवक्ष्यैकत्वविवक्षायां ज्ञेयम् । पञ्चादशाक्षरे तु **॥सभुजद्वयमेवेति ॥** एवकारेण विभागप्रतिपादनात् विभक्तयोः भुजयोः अङ्गत्वं ज्ञेयम् । अष्टादशाक्षरे तु **॥ सभुजद्वयं सगण्डयुग्मं सालीकमिति ॥** चतुर्विंशत्यक्षरे **सतुण्डक्रोडकम्** ओष्ठपुटसहितं क्रोडकं, भुजयोर्मध्यमित्यर्थः । `क्रोडकं

तु भुजान्तरम्' इत्यमरः (अ.को.2-2)। **समूलं** तलसहितं सगुह्यं सपार्श्वद्वयमित्येतत् ज्ञेयम् । द्वात्रिंशदक्षरे तु **सदोर्द्वयं** बाहुद्वयसहितं **व्यापकं** सर्वाङ्गमभिव्याप्य स्थितं **गलस्य** कण्ठस्य **पार्श्वद्वयेन** सव्येन वामेन च भागेन ककुदा स्तनद्वयेनापि न्यसनं ज्ञेयम् । त्रयस्त्रिंशदक्षरे वाराहमन्त्रे त्वाह - **पृष्टमूलेन सर्वश इति ॥** पृष्टमूलेन **सर्वशः** सर्वैः पादादिस्तनद्वयान्तैः स्थानैश्च न्यसनं ज्ञेयम् ॥120-122 ॥

उक्तन्यासमुपसंहरति - **न्यास इति ॥**

न्यासो यथाक्रमं प्रोक्तो मन्त्रेष्वेतेषु सर्वशः [कृत्स्नशः]।
प्रतिमायामात्मनि च न्यासोऽयं सन्निधानकृत् ॥ 123 ॥

सर्वशः सर्वेषु तेषु मन्त्रेषु अयं न्यासः **यथाक्रमं** मन्त्राक्षरक्रमेण प्रोक्तः। अत्र चतुरक्षरमारभ्य त्रयस्त्रिंशदक्षरपर्यन्तं न्यासस्थानकथनं त्र्यक्षरैकविंशाक्षरादीनां त्वन्यत्रोक्तान्येव न्यासस्थानानि ज्ञातव्यानि। एतेषां त्वन्यत्रोक्तन्यासा न कार्याः । अपि तु अत्रोक्त एवेति ज्ञापयितुम् ।

न्यासफलं निरूपयति - **प्रतिमायामिति ॥** प्रतिमायाम् **आत्मनि** देहे चायं न्यासः सन्निधानकृत् हरेरिति शेषः। हरेः सन्निधानकृद्भवतीत्यर्थः ॥123 ॥

4.43 यन्त्रविधिः

अथ यन्त्रलेखनप्रकारमाह - **बीजान्तरिति ॥**

बीजान्तःसाध्यमध्यं च विभक्तदलमन्त्रयुक् ।
वर्णानुप्रतिलोमेन वृत्तं भूपुरसंयुतम् ।
बीजसन्दब्धकोणं च यन्त्रं रक्षादिसाधकम् ॥ 124 ॥

यन्त्रं रक्षादिसाधकं भवतीति शेषः। तत्कीदृशमित्यतः **॥ बीजान्तः साध्यमध्यं चेत्यादि ॥** बीजान्तर्गतसाध्यं मध्ये यस्य तत्। तेन मध्ये बीजमालिख्य तद्गर्भ एव साध्यमपेक्षितप्रयोजनवाचकवाक्यमालेख्यमित्युक्तं भवति। **विभक्तदलमन्त्रयुक्** विभक्तानि च तानि दलानि च तेषु मन्त्रेण मन्त्राक्षरैः युक्। अनुप्रतिपदाभ्यां युतं लोम **अनुप्रतिलोम।** तेनेति विग्रहः। तथा च वर्णानाम् **अनुलोमः** अकारादिक्षकारान्तं यथास्थितक्रमः। **प्रतिलोमः** व्युत्क्रमश्च। तेन **वृतं** परिस्तृतम्। यद्वा यस्य मन्त्रस्य सिद्धिः स्वस्यास्ति तन्मन्त्रगतवर्णसमसङ्ख्याकानि दलानि कृत्वा तेषु तान् वर्णान् क्रमेण पुनः व्युत्क्रमेण च विलिखेदिति भावः। **भूपुरसंयुतं** चतुरस्त्ररेखारूपाभ्यां भूपुराभ्यां युतम्। **बीजसन्दृब्धकोणम्। बीजेन** मन्त्रबीजेन सन्दृब्धानि कोणानि यस्य तत्तथा। **बीजैः** लोकपालबीजैः सन्दृब्धकोणमित्यप्याहुः ॥124॥

उक्तं यन्त्रलेखनप्रकारं सर्वत्राप्यतिदिशति - **सममिति ॥**

समं तत्[1] सर्वमन्त्रेषु जप्तं धार्यं तु वा भुवि।
विलिख्य मण्डले वा तत्पूजयेद्धरिमञ्जसा ॥ 125 ॥

तत् यन्त्रलेखनं **सर्वमन्त्रेषु** वाराहादिनिखिलमन्त्रेषु सममित्यर्थः। **समन्तादिति पाठे - समन्ताद्** विद्यमानेषु सर्वमन्त्रेषु लेखनप्रकारः सम इत्याध्याहृत्यार्थो द्रष्टव्यः। यन्त्रोपयोगं वक्ति - **जप्तमिति ॥ जप्तम्** अभिमन्त्रितं प्रतिष्ठितमिति यावत्। **धार्यं** तुशब्दोऽप्यर्थे। पूज्यं चेत्यर्थः। धारणपूजनयोः विकल्पो वेति। विकल्पान्तरमाह - **भुवीति ॥** भुवि कृते मण्डले तत् यन्त्रं विलिख्य। तदिति प्रथमा सप्तम्यर्थेऽपि। 'सप्तसु प्रथमा' इति सूत्रात्। तथा च तस्मिन् यन्त्रे हरिमञ्जसा पूजयेद्वेत्यन्वयः ॥छ॥

---

[1] समन्तादिति गु.दी.सू.पाठान्तरम्।

अथायं मन्त्रलेखनप्रकारः ॥छ ॥

यावद्वर्णयुतो मन्त्रो लेख्यस्तावत्पत्रकं मध्ये कर्णिकायुक्तं पद्मं कृत्वा कर्णिकाया-मूर्ध्वभागे मन्त्रबीजं परितो लिखित्वा बीजमध्य एव साधकस्य नाम षष्ठ्यन्तं विलिख्य तत्रैव द्वितीयान्तं साध्यफलनाम लिखित्वा कुरुकुर्विति द्विवारं लिखेत् । तत्पत्रेषु म-न्त्रवर्णान् लिखित्वा तद्बहिः कर्णिकासु अनुलोमान् अकारमारभ्य क्षकारान्तान् ए-वमेकपञ्चाशद्वर्णान् तद्बहिः प्रतिक्षकारमारभ्य अकारान्तान् प्रतिलोमांश्च वर्णान् वृ-त्ताकारेण विलिख्य ततः चतुर्दिक्षु `हंसः सोऽहम्' इति यन्त्रप्राणजीवौ विलिख्य ततो बहिः चतुरस्त्ररेखारूपं भूपुरद्वयमालेख्य आद्यभूपुरादौ अनङ्गगायत्रीमालिख्यानन्तरं भूपुरद्वयमध्ये -

`यन्त्रराजाय विद्महे महायन्त्राय धीमहि ।

तन्नो यन्त्रः प्रचोदयात्' इति

यन्त्रगायत्रीमालिख्य द्वितीयभूपुरोर्ध्वम् `ईं ईं' विलिख्य भूपुरदशदिक्षु `लं रं मं क्षं वं यं सं हं ह्रीं आम्' इति यन्त्रहृदयरूपं लोकपालबीजं विलिखेदिति। यथोक्तं यन्त्रसारे - `लरमक्षान्वयौ सहौ ह्रीं आं यन्त्रस्य हृदयम् । बिन्दुयुतं लेख्यं समन्ततः हंसः सोऽहं प्राणजीवौ यन्त्रे लेख्यौ प्रयत्नत' इति। लेख्यपत्राणि तु त्रिलोहभूर्जपत्राणि क्षौमताल-दलानीति सम्प्रदायविदः।

कामनाविशेषेण पत्रविशेषो लक्षसागरे -

`सुवर्णरचितं यन्त्रं सर्वराजवशङ्करम् ।

रजतेन कृतं यन्त्रमायुरारोग्यकामदम् ॥

ताम्रेण रचितं यन्त्रं सर्वैश्वर्यप्रदं मतम् ।

यन्त्रं हि स्फाटिकं देवि! मनोभिलषितप्रदम् ।

माणिक्यरचितं यन्त्रं राज्यदं मुक्तिदं मतम्' इत्यादि ।

यन्त्रकालावधिरुक्ता तत्वसागरे -

`यावज्जीवं सुवर्णे स्याद्रूप्ये द्वाविंशतिः प्रिये !।

ताम्रे द्वादशकं वर्षं तदर्धम् भूर्जपत्रके' इति।

सीसादौ लेखने दोष उक्तः तन्त्रराजे -

`सीसकांस्यादिषु पुनः पूर्वोक्तविपरीतकृत्' इति ॥ 125 ॥

4.44 विद्यागुरुः

`गृहीत्वा गुरुणा दत्तं यन्त्रं भक्त्या प्रसन्नधीः।
बिभृयादुक्तविधिना विश्वस्तः सर्वसिद्धये'

इति वचनेन गुरुप्रसादागतस्य यन्त्रस्य सफलत्वावगमात् तत्सङ्गतगुरुलक्षणमाह - **प्रतिमोक्तेति ॥**

प्रतिमोक्तलक्षणैर्यावद्युक्त आचार्य उत्तमः।
सर्ववित्तपसा युक्त आज्ञाशक्तियुतो हरेः ॥ 126 ॥

प्रतिमोक्तयावल्लक्षणैः तृतीयाध्यायोक्तषण्णवत्यङ्गुलादिसर्वप्रतिमालक्षणैः युक्तः। उपलक्षणमेतत् द्वात्रिंशल्लक्षणैश्चेत्यपि ग्राह्यम्। `द्वात्रिंशल्लक्षणैर्युक्तो गुरुरुत्तम इष्यंत'[1] इति विष्णुतीर्थीयोक्तेः। **सर्ववित्** अश्रुतप्रतिभावान् तपसा युक्तः।

---

[1] वि.ती.1 - 252। विष्णुतीर्थीयस्थः श्लोकद्वयात्मकः गुरुलक्षणभागः अत्र प्रदर्शितः - `गुरुलक्षणम् -

मन्दमध्योत्तमत्वेनेत्यादिनोक्तं तु लक्षणम्।
गुरोरपि समं प्राहुर्वेदवेदार्थपारगाः ॥1-251 ॥
द्वात्रिंशल्लक्षणैर्युक्तो गुरुरुत्तम उच्यते।
ब्रह्मैव तादृशस्तस्य समो नान्योऽस्ति कश्चन ॥1-252 ॥ '।

हरेराज्ञाशक्तियुतः । `श्रुतिस्मृती हरेराज्ञे' इति वचनात् हर्याज्ञारूपाणामृगादि-पञ्चवेदानां शक्तिर्मुख्यार्थज्ञप्तिस्तया युतः । निखिलवेदानां भगवत्परत्वरूपमुख्यार्थ-ज्ञानी भीमसेनप्रभृतिरेव उत्तम आचार्यः । यथोक्तं गीतातात्पर्ये -

`अश्रुतप्रतिभा यस्य श्रुतिस्मृत्यविरोधिनी ।
विस्तृता नृषु जातं च तं विन्द्याद्देवसत्तमम्' इति

(गी.ता.13-26) । व्याख्यातं चेदमवतार्य टीकाकारैः - `यदुक्तं मनुष्याणां मूलप्रमा-णापेक्षा प्रायो न सम्यग्विभासत इति । तदयुक्तम् । पाण्डवादिमनुष्याणामश्रुतार्थेऽपि सम्यग्बहुप्रतिभादर्शनादित्याशङ्क्यां प्रमाणवाक्येन परिहरते - **अश्रुतेति ॥** विस्तृता व्याप्ता बहुलेत्यर्थ' (न्या.दी.13-26) इति ॥ 126 ॥

तादृशगुरुप्राप्तेः सर्वेषामभावदाह - **यावदिति ॥**

यावद्भक्तो यथालब्धैर्गुणैर्युक्तो हि वैष्णवः ।
गुरुः सत्सम्प्रदायज्ञस्तारतम्येन सिद्धिदः ॥ 127 ॥

यावद्भक्तः पूर्णभक्तः । `यावत्तावच्च सकल'मित्यभिधानात् । अथानन्तरं मुख्यो गुरुर्न चेद् **यावद्भक्तः** यावती योग्यता तावद्भक्तः **यथालब्धैः** स्वयोग्य-तानुसारेण प्राप्तैर्व्याख्यातृत्वादिगुणैः **युक्तः** सम्पन्नः सत्सम्प्रदायज्ञो गुरुरित्यर्थः ।

इदमुक्तं भवति - मुख्यो गुरुश्चतुर्मुखः, तस्यैव सम्पूर्णगुरुलक्षणवत्त्वात् । त-दुक्तं `तस्माद्ब्रह्मा गुरुर्मुख्य' (म.भा.ता.नि.1-120) इति । शिवमारभ्य स्वोत्तमान्ताः सर्वेऽपि क्रमान्मुख्यगुरवः क्रमादूनगुणत्वात् । यथोक्तमनुव्याख्याने -

`क्रमादूनगुणास्त्वन्ये ईरिता गुरवः क्रमात्' इति ।

क्रमान्मुख्यगुरुत्वे युक्त्यन्तरमाह - **तारतम्येनेति ॥** ॥127 ॥

तारतम्येन सिद्धिद इत्युक्तं विवृणोति - **उत्तमादिति ॥**

उत्तमादुत्तमा सिद्धिर्धर्ममोक्षादिषु स्फुटा ।
तस्मादुत्तम आचार्ये लब्धे नातोऽवरं व्रजेत् ॥ 128 ॥

एकस्य शिष्यतां प्राप्य तदाज्ञां न विना समम् ।
अवरं वा व्रजेदुच्चगुणश्चेन्नैव दुष्यति ॥ 129 ॥

विशेषतो गुणश्च स्याद् देवेष्वप्येवमेव हि ।
तस्मादुत्तममाचार्यं देवेशं चाऽऽश्रयेद्धरिम् ॥ 130 ॥

सम्यग्ज्ञानादिसमपेक्षमाणानामधिकगुरुप्राप्तिरावश्यकीति वक्तुं पूर्वमुत्तमगुरुं प्राप्तानामवरगुरुप्राप्तावनर्थमाह - **तस्मादिति ॥ लब्धे** उपदेशकतयेति शेषः । प्राप्ते अपरं न व्रजेदित्यर्थः । `गुरुमन्त्रपरित्यागी रौरवं नरकं व्रजेत्' इति वचनादिति भावः । उक्तं चानुव्याख्याने -

`गुणाधिकं गुरुं प्राप्य तद्धीनं नाप्नुयात्क्वचित्' इति (अनु.व्या.3-3-28) ।

पूर्वगुरुसमानगुर्वन्तरे प्राप्ते प्राक्तनस्त्याज्यः किमित्यतस्तत्त्यागे विकल्पमाह - **एकस्येति ॥ एकस्य** गुरोः शिष्यत्वं प्राप्य तदाज्ञां विना न समं व्रजेत् । अयं भावः । पूर्वस्वीकृतेन गुरुणा समे गुरौ समग्रानुग्रहकर्तरि स्वयमेव प्राप्ते सति स अवश्यं स्वीकार्यः न तु तदर्थं प्रयतितव्यम् । तर्हि दोषस्मृतेः का गतिरिति चेत्, उच्यते । समगुर्वन्तरस्वीकारे पूर्वस्यानुज्ञा सर्वथा भाव्या । विनाऽनुज्ञया समानपूर्वगुरुपरित्यागविषयं दोषस्मरणम् । सत्यामनुज्ञायामन्यगुरुस्वीकृतिरन्यथा तु नेति विकल्प एवेति ।

यथोक्तं `समे विकल्प एव स्यात् पूर्वानुज्ञा च सर्वथा' इति (अनु.व्या.3-3-28)। पूर्वं प्राप्तान्नीचेऽपि किं विकल्पः नेत्याह - **अवरं वेति** ॥ वाशब्दः नञोऽनुकर्षणार्थः। एवार्थश्च। अवरं न व्रजेदेवेत्यर्थः। ननु दैवादल्पं गुरुमादौ प्राप्तस्य पश्चात्प्राप्तः उत्तमगुरुः किं स्वीकार्यः उत पूर्वानुज्ञा मृग्यत इत्यतो नेत्याह - **उच्चगुणश्चेदिति** ॥ **उच्चाः** पूर्वगुरोः सकाशाच्छ्रेष्ठाः गुणाः यस्य स उच्चगुणः गुरुश्चेल्लभ्यते तदा **नैव दुष्यति** `गुरुमन्त्रपरित्यागी'त्युक्तदोषवान्न भवतीत्यर्थः। न केवलं दोषाभावादुत्तमगुरुस्वीकारः किन्त्वन्यप्रयोजनमप्यस्तीत्याह - **विशेषतो गुणश्च स्यादिति** ॥ संशयादेर्निर्वृत्तिरूपः अधिकगुणश्च स्यादित्यर्थः। अन्यथा दैवादादावल्पगुरुं प्राप्तस्य शिष्यस्य प्रज्ञोत्कर्षवतः जातयोः संशयविपर्ययोरज्ञानस्य च निवृत्तिर्न स्यादिति भावः। एवं तर्ह्यनुपदिशत उत्तमस्य त्यागेनोपदिशतोऽधमस्य स्वीकारोऽपि कर्तव्यः स्यादिति चेत् सत्यम्। `गुणाधिकं गुरुं प्राप्य तद्धीनं नाप्नुयात्क्वचित्' इति (अनु.व्या.3-3-1) प्रतिषेधवचने क्वचित्प्रयोजनविशेषेऽपीत्यनेन यस्माच्छुभप्राप्तिः तं प्राप्नुयादिति सामान्यन्यायस्यापोदितत्वात् ॥छ॥

इममेव प्रकारं विबुधेष्वतिदिशति - **देवेष्विति** ॥ उपास्यत्वेन देवताप्राप्तावपि अयमेव न्यायो द्रष्टव्य इति भावः। फलितमाह - **तस्मादिति** ॥ उत्तमगुरुदेवताप्राप्तेः महाफलहेतुत्वादित्यर्थः। देवेशं हरिमिति सम्बन्धः ॥128-130॥

4.45 उपासनाविधिः

ननु गुरुप्राप्तिरेव व्यर्था। स्वयं पुरुषार्थरूपत्वाभावात् सत्साधनत्वाभावाच्च। तथा च तद्विचार एव अनुपपन्न इत्यतः तस्याः पुरुषार्थत्वसाक्षात्तत्साधनत्वान्यतरत्वाभावेऽपि महापुरुषार्थमोक्षसाधनीभूतश्रवणमननादिकारणत्वेन परम्परया पुरुषार्थसाधनत्वेन वैयर्थ्याभावात् गुरुप्राप्तौ विचार उपपन्न एवेत्याशयेनाह - **अपरोक्षदृशेरेवेति** ॥

अपरोक्षदृशेरेव यस्मान्मोक्षो न चान्यथा ।
अपरोक्षदृशिश्चापि श्रवणान्मननादनु ।
सम्यङ्निश्चिततत्वस्य निदिध्यासनया भवेत् ॥ 131 ॥
द्विविधा सा च सम्प्रोक्ता विष्णुशास्त्रावमर्शनम् ।
एकं ध्यानं हरेरन्यच्चत्वार्यङ्गानि तत्र च ।

यस्मादपरोक्षदृशेरेव मोक्षः नान्यथा । सा च अपरोक्षदृशिः श्रवणान्मननादनन्तरं निदिध्यासनया भवेत् । तस्माच्छ्रवणाद्यर्थमाचार्यमाश्रयेदित्यर्थः । निदिध्यासनायाः अवान्तरभेदकथनपूर्वकं तदङ्गानि तेषां प्रभेदांश्च सप्रपञ्चमाह - द्विविधेत्यादिना ॥ विष्णुप्रतिपादकसच्छास्त्रावमर्शनमेकं हरेर्ध्यानमन्यद्द्वितीयम् । तत्र ध्याने चत्वार्यङ्गानि । चशब्दोऽनुक्तप्रत्याहारस्य समुच्चये । यद्वा यमानां ध्याने ज्ञानोत्पादे मोक्षातिशये चाङ्गत्वमिति समुच्चये `यमानामुपासनोत्पत्तौ ज्ञानोत्पादे मोक्षातिशये चाङ्गत्वमिति सूचनाय "पुरुषार्थमभीप्सता" "शुभमिच्छता" "दृश्यते क्षिप्रमीश्वर" इति विचित्रोक्तिः' इत्युपासनापादीयसुधोक्तेः[1] ॥ 131 ॥

---

1 न्या.सु.3-3-1 । अत्र विचित्रोक्तिरित्यनेन अनुव्याख्यानगतवचः विवक्षितम् । एतद्भागसम्बन्धि अनुव्याख्यानमध्ययनसौकर्याय उल्लिख्यते । अनुव्याख्यानम् -

`अतो विष्णौ परा भक्तिस्तद्भक्तेषु रमादिषु ।
तारतम्येन कर्तव्या पुरुषार्थमभीप्सिता ॥
स्थादरः सर्वजन्तूनां संसिद्धो हि स्वभावतः ।
ततोऽधिकः स्वोत्तमेषु तदाधिक्यानुसारतः ॥
कर्तव्यो वासुदेवान्तं सर्वथा शुभमिच्छता ।
न कदाचित् त्यजेत् तं च क्रमेणैनं विवर्धयेत् ॥
समेषु स्वात्मवत् स्नेहः सत्स्वन्यत्र ततो दया ।

कानि तानि चत्वारीत्यत आह - **यमाश्चेति ॥**

यमाश्च नियमाश्चासा प्राणायाम इतीरिताः[1] ॥ 132 ॥

अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ।
यमाः, शौचं तपस्तुष्टिः स्वाध्यायो हरिपूजनम् ।
नियमा, वीरपद्मे च स्वस्तिकाद्यानि चासनम् ॥ 133 ॥

अङ्गानीति वर्तते । अङ्गानीत्युद्दिश्य यमा इतीरिता इत्यादिविधानात्पुल्लिङ्गोपपत्तिः । अत्र चासा इतीरिता प्राणायाम इतीरित इति द्रष्टव्यम् । **क्वचिच्च** यमश्चेति ईरित इति च एकवचनान्तः पाठः ।

ननु देशकालावस्थाव्यवस्थां विना सर्वावस्थासु यदनुष्ठेयं तद्यमशब्दाभिधेयम् । तच्च विष्णुभक्त्यादिगुणसम्पूर्तिर्विषयसंसर्गादिदोषवर्जनं च । नियमादयश्च वक्ष्यमाणाः । मनसो विषयेभ्यो भगवन्तं प्रत्याहरणं प्रत्याहारः । एतेषां नोपासनोत्पत्तावुपयोगः । अवितथं ब्रह्मानुचिन्तनं हि ध्यानम्[2]। तेषामभावेऽप्यनुचिन्तनदर्शनात् । नाप्युपासनफलज्ञानोत्पत्तौ । एतत्सहितमेवोपासनं ज्ञानं जनयतीत्यत्र प्रमाणाभावादिति चेत् । उपासनोत्पत्तौ तावत्तेषामुपयोगं ब्रूमः । विषयसंसर्गादिमतो भक्तिरहितस्योपासनानुपपत्तेः । न ह्यन्यत्र व्यासक्तमनाः तत्र स्नेहविधुरस्तं चिन्तयतीति युज्यते । द्वितीयं पक्षमपि स्वीकुर्मः । न च तत्र प्रमाणाभावः ।

`विषयेषु च संसर्गाच्छाश्वतस्य च संशयात् ।

कार्यैवमापरोक्ष्येण दृश्यते क्षिप्रमीश्वरः ।' - इति ।

---

1 `यमश्च निममश्चासा प्राणायाम इतीरितः' इति गु.दी.सू.पाठान्तरम् ।

2 `अवितथं ब्रह्मानुचिन्तनं हि निदिध्यासनम्' इति सर्ववेदान्तप्रत्ययाधिकरणसुधा 3-3-1 ।

मनसा चान्यदाकाङ्क्षात् परं न प्रतिपद्यते'[1]

इति भारतवाक्ये **न प्रतिपद्यते** न पश्यतीति विषयसंसर्गादिदोषाणां ज्ञानविरोधित्वाभिधानात् । तथा च विष्णुभक्त्याद्यभावाः विषयसंसर्गाद्याश्च दोषास्तावन्मुमुक्षादिमतः त्याज्याः मोक्षादिविरोधित्वात् । यद्यस्य विरोधि तत्तदर्थिना त्याज्यं दृष्टम् । यथा आरोग्यार्थिना आरोग्यविरोध्यपथ्यम् । तथा च विष्णुभक्त्यादिकं तावत्कार्यम् । भावानुष्ठानेन विनाऽभावपरित्यागायोगादित्यभिसन्धिं हृदि निधायोक्तप्रवृत्तिनिमित्तभूतलक्षणाक्रान्तलक्ष्यप्रदर्शनार्थं यमादीन् निरूपयति - **अहिंसेत्यादिना**॥ अहिंसादयः पञ्च यमाः । शौचादयः पञ्च नियमाः प्रोक्ता इति शेषः । ननु यमा नियमाश्च पञ्चेत्ययुक्तम् ।

`अहिंसा सत्यमस्तेयमसङ्गो ह्रीरसञ्चयः ।
आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाऽभयम् ॥
शौचं जपस्तपो होमः श्रद्धाऽऽतिथ्यं मदर्चनम् ।
तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनम् ।
एते यमाः सनियमाः उभयोर्द्वादश स्मृता' (भा.11-19-32,33,34)

इति भागवते यमानां नियमानां च पृथक् द्वादशत्वोक्तेरिति चेत् सत्यम् । तेष्वाधिक्येनोक्तानां चतुर्दशानामप्येतेषु दशस्वेवान्तर्भावात् । तथा हि लोकासङ्ग्रहरूपासङ्गस्य द्रव्यासङ्ग्रहरूपस्यासञ्चयस्य वाग्व्यापारपरित्यागरूपस्य मौनस्येति त्रयाणामप-

[1] अनु.व्या.उदाहृतभारतवाक्यम् । म.भा.12-197-7, 12-197-21 । महाभारते उभयत्रापि उपलभ्यमानपाठे कश्चन व्यत्यासः दृश्यते । तथा हि -
`विषयेषु च संसर्गाच्छाश्वतस्य नसंश्रयात् ।
मनसा चान्यदाकाङ्क्षन्परं न प्रतिपद्यते ।' इति
`विषयेषु च संसर्गाच्छाश्वतस्य च दर्शनात्
मनसा चान्यदाकाङ्क्षन्परं न प्रतिपद्यते ।' इति च ।

रिग्रहेऽन्तर्भावसम्भवात् । क्षमायाः दुःखे सुखे च समत्वरूपायाः चित्तस्थापनरूपस्य स्थैर्यस्य च सन्तोषे । ह्रीआस्तिक्याभयानां सत्यमूलकत्वेन सत्ये । जपहोमश्रद्धातिथ्यतीर्थाटनपरार्थेहानां तपसि। स्वाध्यायस्य आचार्यसेवाप्राप्यत्वेन कार्ये स्वाध्याये आचार्यसेवनस्य अन्तर्भाव इति द्रष्टव्यम् ।

वीरपद्मे स्वस्तिकमाद्यं येषां तानि स्वस्तिकाद्यानि चासनानि । आदिपदेन गोमुखसिंहभद्रमुक्तामयूरासनादीनां ग्रहणम् । अत्र साक्षाद्वीरादित्रितयग्रहणं तु तेषामुत्तमोत्तमताप्रदर्शनाय । तथा चाह योगी याज्ञवल्क्यः

'स्वस्तिकं गोमुखं पद्मं वीरं सिंहासनं तथा ।
भद्रं मुक्तासनं चैव मयूरासनमेव च ।
आसनान्युत्तमान्यष्टौ त्रयं तेषूत्तमोत्तमम्' इति ॥ 132,133 ॥

प्रसङ्गाद्धरिस्मृतिरहितरेचकादेर्नियमान्तर्भाव इत्याह - **रेचक इति ॥**

रेचकः पूरकश्चैव कुम्भकश्च त्रिधा स्मृतः ।
प्राणायामः स्मृतिं विष्णोर्विना नियम उच्यते ॥ 134 ॥

अधीतिः स्मृतियुक्ता तु निदिध्यासनमेव हि ।
प्राणायामे च विष्णोर्यत् स्मरणं ध्यानमेव तत् ॥ 135 ॥

इति त्रिधा प्राणायाम इत्यर्थः । हरिस्मृतिसहितरेचकादिरेव प्राणायामः । स एव ध्यानाङ्गत्वेन प्रागुक्त इति द्रष्टव्यम् । विष्णोः स्मृतिं विना नियमः । एवं नियमत्वेनोक्तस्वाध्यायस्यापि वाक्यार्थज्ञानपूर्वकहरिस्मृतियुक्तत्वे शास्त्रावमर्शनरूपत्वेन निदिध्यासनान्तर्भाव एवेत्याशयेनाह - **अधीतिरिति ॥ अधीतिः** मन्त्राध्ययनं स्वाध्याय इति यावत् । प्राक् हरिस्मृतियुक्तरेचकादेः प्राणायामत्वमभिप्रेतम् । तत्र स्मृ-

त्यंशस्य ध्यानान्तर्भाव इत्याह - **प्राणायामे चेति ॥** प्राणायामे विष्णोर्यत्स्मरणं तद्ध्यानमेव ॥ 134,135 ॥

पृथग्[1] अङ्गत्वेनोक्तासनप्राणायामाभ्यां सहितयमनियमभेदानां तारतम्यमाह - **आसेति ॥**

आसा शौचं प्राणयामो निष्परिग्रहपूर्वकाः ।
तपआद्याः क्रमात्सर्व उत्तरोत्तरतोऽधिकाः ॥ 136 ॥

सर्वस्माच्छ्रवणाद्यास्तु मुख्या मुक्तिप्रसाधने ।
अज्ञस्य श्रवणं श्रेष्ठमयुक्तेर्मननं तथा ॥ 137 ॥

ध्यानं निश्चिततत्वस्य तस्माच्छास्त्रावमर्शनम् ।
वरं दशगुणं तस्माद्व्याख्यैकस्य शतोत्तरा ।

॥निष्परिग्रहपूर्वका इति ॥ यमेषु अन्तिमभूतापरिग्रहपूर्वका अहिंसासत्यास्तेयब्रह्मचर्यरूपाः यमप्रभेदाः । **तपआद्याः** तपस्तुष्टिस्वाध्यायहरिपूजनरूपाः नियमप्रभेदाः इत्येते सर्वे क्रमादुत्तरोत्तरतोऽधिका इत्यर्थः । तदुक्तं तत्वप्रदीपिकायाम् -

`आसा शौचं च धर्माङ्गे प्राणायामोऽपरिग्रहः ।
अहिंसा सत्यमस्तेयं ब्रह्मचर्यं तपस्तथा ॥

तुष्टिर्यज्ञादयो धर्माः स्वाध्यायोऽभ्यर्चनं हरेः ।
उत्तरोत्तरमेतानि कर्तव्यानि विशेषत' इति ।

---

1 प्रा.ज1.पाठयोः इदं पदमङ्कयित्वा पार्श्वे `यमनियमापेक्षया' इति लिखितम् ।

ननु उत्तरोत्तरतोऽधिका इत्ययुक्तम् । पूर्वमपरोक्षदृशिश्चापीति (तं.सा.4-131) श्रवणादेरेव साक्षादपरोक्षहेतुत्वोक्त्या तेषामेवाधिकत्वप्रतीतेरित्यत आह - **सर्वत इति ॥**
सर्वतः पूर्वोक्तात्सर्वस्मात् **श्रवणाद्याः** श्रवणमननध्यानानि मुक्तिप्रसाधने मुख्याः । तथा च श्रवणादीनामेतत्सर्वापेक्षया प्रधानसाधनत्वेऽपि मोक्षसाधनभूतध्यानाङ्गानामेतेषामुत्तरोत्तरत आधिक्यकथनं नायुक्तमित्याशयः । श्रवणादिष्ववान्तरतारतम्यमधिकारिविशेषनिष्ठत्वेनाह - **अज्ञस्येति ॥ अज्ञस्य** शास्त्रार्थज्ञानशून्यस्य श्रवणमेव श्रेष्ठं मननाद्यधिकाराभावात् । **अयुक्तेः** ज्ञातशास्त्रार्थस्य तत्रैव सम्यग्युक्त्यनुसन्धानशून्यस्य मननं श्रवणापेक्षया श्रेष्ठम् । अनेन मननस्य श्रवणापेक्षयोत्तमत्वे युक्तिः सूचिता भवति । एवमग्रेऽपि । **निश्चिततत्वस्य ।** श्रवणमननाभ्यामिति शेषः । **॥तस्माच्छास्त्रावमर्शनमिति ॥** निश्चिततत्वस्येत्यनुवर्तते । तथा च श्रवणमननाभ्यां निश्चिततत्वस्य पुंसः **तस्मात्** ध्यानात् शास्त्रावमर्शनमेव दशगुणं वरमिति प्रोक्तम् । ध्यानकाले बहुगुणानामप्रतिभासात् । शास्त्रावमर्शने तु तदुक्तानामनेकेषां गुणानां प्रतिभासादिति भावः ।

अत्रेदं ज्ञेयम् । शास्त्रावमर्शनं द्विविधम् । ध्यानाङ्गभूतं तदुत्तरभावि चेति । तत्राद्यस्य ध्यानादवरत्वेऽपि द्वितीयस्य तदुत्तरत्वमिति न विरोधः । यथोक्तं सुधायाम् - `शास्त्राभ्यासस्य ध्यानाङ्गत्वेऽपि स्वतन्त्रोपासनत्वं चास्ति' इति[1] । यदत्र वक्तव्यं त`दथवा सततं शास्त्रविमर्शेन भविष्यती'त्यत्र (तं.सा.4-153) वक्ष्यते । ध्यानरूपशास्त्रावमर्शनापेक्षया व्याख्यानतो विशेषगुणप्रतिपत्तेः तदेव वरमित्याशयेनाह - **व्याख्येति ॥** एकस्य सच्छिष्यस्यापीति शेषः । अत्र व्यक्तवचनवाचकः चक्षिङ् धातुः । तस्य धातोः ``चक्षिङः ख्याञ्' (पा.सू.2-4-54) `चक्षिङः ख्याञादेशः स्यादि'[2]त्यनेन ख्याञादेशः । ततश्च वि आ ख्याञ् इति स्थिते यणादेशान्त्यहल्लोपाभ्यां व्याख्याशब्दो निष्पद्यते ।

---

1 न्या.सु.3-3-3 `सोपासना च द्विविधा' इति कारिकाव्याख्यानावसरे ।

2 पूर्वोक्तसूत्रस्य वृत्तिरियम् ।

तत्र विशब्दो विस्तरार्थः । आङ् बलवदर्थः । तेन विस्तरेण बलवद्भिरुपायैः व्यक्तवचनेनार्थप्रतिपादनं व्याख्याशब्दार्थः। **शतोत्तरा** शतगुणोत्तमा। उक्तं चैतत्तैत्तरीयभाष्ये -

`सम्यग्ज्ञात्वा तु यो विष्णुं व्याख्यायीत जपेत च।
न तस्य किञ्चिदकृतं कर्तव्यं मुच्यते च स'[1] इति ॥136,137॥

व्याख्यानस्योत्तमत्वं हेतुसूचनेन विवृणोति - **अपरोक्षेति ॥**

अपरोक्षदृशाऽप्येषा कर्तव्या विष्णुतुष्टिदा ॥ 138 ॥

`य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ 139 ॥

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः।
भविता न च तस्मादन्यः प्रियतरो भुवि' ॥ 140 ॥

अपरोक्षदृशा अपरोक्षज्ञानिनाऽपि विष्णुतुष्टिदा व्याख्या कर्तव्या। तथा च अपरोक्षज्ञानिनस्तदुत्तरं श्रवणादि यथा मौक्तानन्दकारणं तथा व्याख्याऽपीति। अपरोक्षज्ञानिनाऽपि यदा कार्या तदा किमुतान्यैरिति वक्तुरिदमत्राकूतं- ज्ञानोत्तरानुष्ठितव्याख्यानादिप्रयत्नाधिक्याद्विष्णुतुष्टिद्वारा मुक्तावाधिक्यं प्राप्यत इति। इदं च मनुष्यपरमेव। न देवताविषयम्। तदुक्तं बृहद्भाष्ये - `मनुष्याणां योग्यतया स्वसमेभ्यः प्रयत्नाधिक्यादाधिक्यं मुक्तौ प्राप्यत' (बृ.भा. अ4-शारीरब्राह्मणम्) इति। `वृद्धिह्रासौ

---
[1] तै.भा.1-20 तद्धि तपस्तद्धि तप इति वाक्यव्याख्यावसरे।

विमुक्तिगा'वित्यादि (अणु.भा.3-7) चान्यत्र। ननु मुक्तौ प्राप्तमाधिक्यं नाम न तावत्स्वरूपसुखस्यैव। तस्य क्लृप्तत्वेनानागन्तुकत्वात् । नापि तदभिव्यक्तिः। ज्ञानेनाज्ञाननिवृत्तावभिव्यक्तेः सर्वसाधारण्यादिति चेदित्थम् । नाविद्यैवात्मस्वरूपावरणम् । किन्त्वीश्वरेच्छाऽपि। तथा चाज्ञाने निवृत्ते श्वेतद्वीपदर्शनेन स्वरूपसुखं व्यज्यते। न तु सर्वम् । येन ज्ञानोत्तरं प्रयत्नाधिक्यं कृतं तस्य तेन कर्मणा प्रसन्नः परमेश्वरो मुक्तौ विषयानुत्पाद्य तद्भोगेन ज्ञानानभिव्यक्तमपि स्वरूपसुखं व्यक्तीकरोतीति यावदभिव्यक्तिरेवाधिक्यम् । तदनभिव्यक्तिरेव ह्रासः। तत्र ज्ञानोत्तरं प्रयत्नाकरणं कारणम् । तदुक्तमीशावास्यभाष्ये -

`......................... कृष्णोपास्तिमकुर्वतः ।
ज्ञानिनोऽपि यतो ह्रास आनन्दस्य भवेद्ध्रुवम्' इति[1]।

विस्तरस्त्वस्मत्परमगुरुयादवाचार्यकृतसुधाटिप्पण्यां[2]

उक्तमर्थं गीतावाक्येन दृढयति[3]- **य इममिति॥** अत्र व्याख्यातुः स्वप्राप्तिरूपफलाभिधानात्कृष्णेन स्वस्यातिशयप्रियकृत्त्वप्रियत्वोक्तेश्च उक्तार्थोऽवसीयते ॥138-140॥

`आसा शौचं प्राणयाम' (तं.सा.4-136) इत्यत्र उत्तरोत्तराधिक्यकथनेन आसाशौचयोरपि प्राणायामादिवत्पृथग्धर्मकारणत्वप्रतीतिः स्यात् । अतस्तां निवारयति - **शौचेति॥**

शौचासने त्वङ्गमात्रं न पृथग्धर्मकारणम् ।

1 ईश.भा.मन्त्र2। `अज्ञस्य कर्म लिप्येत' इति अत्रोदाहृतवचनस्य प्रथमपादः। इदं च वाक्यं नारदीयमिति भाष्ये उक्तम् ।

2 वृद्धिह्रासाधिकरणे इति भावः 3-2-12-20। द्रष्टव्यः।

3 `द्रढयति' इति पाठेन भाव्यमिति भाति।

प्राणायामादयस्तुष्टिपर्यन्ता द्विगुणाधिकाः ॥ 141 ॥

स्वाध्यायोऽतः कोटिगुणस्ततोऽनन्तगुणा हरेः ।
पूजा तत्त्रिगुणं ध्यानमिति धर्मक्रमः स्मृतः ॥ 142 ॥

प्राणायामादीनां धर्मसाधनत्वमेव विशदयति - **प्राणायामादय इति॥** प्राणायामापरिग्रहाहिंसासत्यास्तेयब्रह्मचर्यतपस्तुष्टयः । पूर्वस्मात्पूर्वस्मात् **उत्तरतोत्तरतः द्विगुणाधिका** इति द्विगुणाधिका ज्ञेयाः । **अतः** तुष्टेः । **ततः** स्वाध्यायात् । हरेः पूजा अनन्तगुणा । उत्तमाधिकारिमात्रविषयत्वादस्य वाक्यस्य न दोषः । **तत्त्रिगुणं** तस्याः पूजायाः त्रिगुणं ध्यानमिति **धर्मक्रमः** धर्मसाधनेषु तारतम्यक्रमः **स्मृतः** प्रसिद्धः । ध्यानाच्छास्त्रावमर्शनं दशगुणोत्तमं तस्मादपि व्याख्यानं शतोत्तरमिति तु प्रागेवोक्तम् । अतो ध्यानान्तरस्यैव तारतम्यमत्र कथितमिति द्रष्टव्यम् ॥141,142॥

4.46 आसनम्

मृदादिनाऽङ्गशोधनं शौचमिति प्रसिद्धत्वात् तल्लक्षणमनुक्त्वा `वीरपद्मे' (तं.सा.4-133) इत्युक्तासनत्रयलक्षणानि व्युत्क्रमेणाह - **ऊर्वोरिति॥**

ऊर्वोरधः पदोरूर्ध्वं विभागेनेति च त्रिधा ।
आसनत्रयमुद्दिष्टम् .... ॥ 143 ॥

ऊर्वोरधोभागे **पदोः** पादयोरवस्थानं स्वस्तिकासनम् । तथा ऊर्वोरूर्ध्वभागे पादयोरवस्थानम् पद्मासनम् । **विभागेन** एकस्य पदस्योर्वोरुपरि अन्यस्य अध इत्येवं विभागेनावस्थानं वीरासनम् । तथा चोक्तं पञ्चरात्रे -

`ऊर्वोरुपरि विन्यस्य सम्यक् पादतले उभे ।

पद्मासनमिति प्रोक्तं योगिनां हृदयङ्गमम् ॥

ऊर्वोरधस्तात् सम्यक् च कृत्वा पादतले उभे ।

ऋजुकायो विशेद्योगी स्वस्तिकं तस्य चक्षते ॥

एकपादमधः कृत्वा विन्यस्योरौ तथेतरे ।

ऋजुकायो विशेद्योगी वीरासनमितीरितम्' इति ॥ 143 ॥

4.47 प्राणायामः

इदानीं रेचकादिलक्षणमाह - मन्त्रेति ॥

.... मन्त्रस्मरणपूर्वकम् ।

द्विगुणोत्तरं रेचकादि षोडशादिक्रमेण तु ।

मात्राणां ह्रस्ववर्णस्य कालो मात्रेति शब्द्यते ॥ 144 ॥

क्रमेणैवाभ्यसेन्मात्रावृद्धिमेकाग्रधीः पुनः ।

रेचयित्वा दक्षिणतः पूरयित्वा तु वामतः ।

कुम्भकं च सुषुम्नायां विष्णुं वायुं च संस्मरेत् ॥ 145 ॥

मन्त्रस्मरणपूर्वकं तद्वाच्यदेवतास्मरणपूर्वकं वा । मात्राणां षोडशादिक्रमेण द्विगुणोत्तरं यथा भवति तथा रेचकादि कर्तव्यमित्यर्थः । केयं मात्रेत्यत आह - ह्रस्वेति ॥ अ इत्यादिलघुवर्णोच्चारणस्य यः कालः स मात्रेत्यर्थः । षोडशादिक्रमः अनभ्यासदशायामिति भावेनाह - क्रमेणेति ॥ एकाग्रधीः स्वनासाग्रमवलोकमानः क्रमेणैव मात्रावृद्धिमभ्यसेत् ।

इदमुक्तं भवति । एकलघ्वक्षरोच्चारणकालो मात्रा । तादृशषोडशमात्राकालं रेचकः । द्वात्रिंशन्मात्राकालपर्यन्तं पूरकः । चतुःषष्टिमात्राकालपर्यन्तं कुम्भकः अनुष्ठेयः । तथा

द्वात्रिंशन्मात्राकालं चतुःषष्टिमात्राकालमष्टाविंशोत्तरशतमात्राकालं रेचकादित्रयमित्यादिक्रमेण मात्रावृद्धिमभ्यसेदिति ॥ छ ॥

एवं प्राणायामे कालेयत्तामभिधायेदानीं रेचकपूरककुम्भकानां स्थानं वदन् प्राणायामसमये सुषुम्नानाडीस्थयोः विष्णुवाय्वोः स्मृतिमपि निरूपयति - **रेचयित्वेति** ॥ **दक्षिणतः** दक्षिणघ्राणरन्ध्रात् **रेचयित्वा** स्वदेहस्थं वायुं बहिर्विसृज्य वामतः वामघ्राणरन्ध्रात् वायुं देहान्तः पूरयित्वा पूर्णकुम्भवत् संस्थानरूपकुंभकश्च कर्तव्य इति शेषः । यथाह याज्ञवल्क्यः -

`रेचकः सृजते वायुं पूरकः सन्निरोधकः ।
समेन सुस्थितिर्या[1] सा कुम्भकः परिगीयत' इति ।

वायुपुराणे च -

`नासिकापुटमङ्गुल्याऽऽपीड्यैकेन परेण तु ।
औदरं रेचयेद्वायुं यत् ततो रेचकः स्मृतः ॥
बाह्येन मरुता देहं दृतिवत्परिपूरयेत्[2]।
नासापुटेनापरेण पूरणात्पूरकं मतम् ॥
न मुञ्चति न गृह्णाति वायुमन्तर्बहिस्स्थितम् ।
सम्पूर्णकुम्भवत्तिष्ठेदबलः स तु कुम्भक' इति ।

अत्र छत्रिन्यायेन कुम्भकसाहचर्येण कुम्भकार्थत्वेन वा इतरयोः प्राणायामत्वोपचारः । `रेचकपूरकयोः कुम्भकार्थत्वेन पृथक् प्राणायामत्वाभावाच्च' इति (गी.भा.टी.4-29)

1 स्वस्थितिरिति ज.ज1.पाठौ ।

2 `दृतिः चर्मपात्रम्' इति वाचस्पत्यकोषे ।

गीताभाष्यटीकोक्तेः । अत्रापि रेचयित्वा पूरयित्वेति रेचकपूरकयोः कुम्भकार्थत्वं स्फुटमभिहितम् । अनेन त्रयाणामपि प्राणायामत्वं मूलाभिप्रेतमिति वदन्तो निरस्ताः। अपरिग्रहादीनां सुप्रसिद्धत्वात् तल्लक्षणानामत्रानुक्तिरिति द्रष्टव्यम् ॥144,145 ॥

4.48 नाडीचक्रम्

केयं सुषुम्नेत्यतस्तल्लक्षणं तद्विभागान् तदन्तर्गतभगवद्रूपाणि तेषामधिष्ठानभूतपद्मानि च सप्रपञ्चं निरूपयति - **मूलाधारमित्यादिना** ॥

मूलाधारं समारभ्य त्वामूर्धानमृजुस्थिता[1]।
मध्ये सुषुम्ना विज्ञेया वज्रिकाऽऽर्या प्रकाशिनी ।
वैद्युता ब्रह्मनाडीति सैव पञ्चप्रभेदिनी ॥ 146 ॥

पृष्ठवामाग्रदक्षान्तर्भेदास्ते च क्रमेण तु ।
हरिन्नीलः सितः पिङ्गो लोहितश्चात्र केशवः ।
प्रद्युम्नादिस्वरूपेण ध्येयः सिद्धिमभीप्सता ॥ 147 ॥

मूलाधारो वृषणाधोदेशः । गुदप्रदेशं समारभ्य **आमूर्धानं** शिरःपर्यन्तं तु विशेषेण **ऋजुस्थिता** ऋजुतया स्थिता। **मध्ये** इडापिङ्गलेत्यादिनाडीमध्ये । सुषुम्ना 'ऋजुः स्थिता' इति पाठे तनुशब्दवदुकारान्तस्त्रीलिङ्गोऽयमृजुशब्दः। **ऋजुः** ऋज्वी अवक्रा। **मध्ये** देहमध्ये स्थितेत्यन्वयः। **सैव** सुषुम्नैव **पञ्चप्रभेदिनी** वज्रिकादिप्रभेदसंयुतेत्यर्थः । ते च प्रभेदाः कुत्र तिष्ठन्तीत्यत आह - **पृष्ठेति** ॥ प्रकृतत्वानुसन्धानार्थस्तुशब्दः । तथा च सर्वेषां पृष्ठे वज्रिका । वामभागे आर्या । अग्रभागे प्रकाशिनी । दक्षिणभागे वैद्युता । अन्ते मध्ये ब्रह्मनाड्यपरनाम्नी सुषुम्नैवास्तीति क्रमो

---

1 'ऋजुः स्थिता' इति गु.दी.सू.पाठान्तरम् ।

ज्ञेयः । यदर्थमिदं नाडीप्रभेदकथनं तदिदानीमाह - **हरिदिति ॥ अत्र** पञ्चप्रभेदयुक्तनाड्याम् । प्रद्युम्नानिरुद्धवासुदेवसङ्कर्षणनारायणरूपेण ध्येयः चिन्त्य इत्यर्थः ।

तत्रायं विवेकः । पृष्ठभागस्थवज्रिकायां हरिद्वर्णः प्रद्युम्नोऽस्ति। वामभागे स्थितायामिडेत्यपरनामिकायामार्यानाड्यां नीलरूपोऽनिरुद्धस्तिष्ठति। पुरःस्थितनान्दिनीत्यपरनामिकायां प्रकाशिन्यां शुक्लवर्णो वासुदेवो वर्तते। दक्षभागस्थपिङ्गलापरनामकवैद्युतायां पिङ्गलवर्णः सङ्कर्षणोऽस्ति। मध्ये ब्रह्मनाड्यां रक्तवर्णो नारायणोऽधितिष्ठतीति। तदुक्तं छान्दोग्यभाष्ये -

`नारायणाख्यं सौषुम्नमध्यस्थं रक्तवर्णकम् ।
शुक्लं तु वासुदेवाख्यं नान्दिन्यामग्रतः स्थितम् ॥
पिङ्गलायां पिङ्गलं च रूपं सङ्कर्षणाभिधम् ।
पश्चिमे वज्रिकायां तु पीतं प्रद्युम्ननामकम् ॥
इडायामनिरुद्धाख्यं नीलरूपं व्यवस्थितम्' इति (छा.भा.8-6-6) ।
`शुक्लं तु वासुदेवाख्यमनिरुद्धं सुनीलकम् ॥
साङ्कर्षणं पिङ्गलं च प्राद्युम्नं हरितं तथा।
नारायणं लौहितं स्यात् पञ्चरूपाण्यजे हरा'विति[1] बृहद्भाष्ये च ॥146,147 ॥

अथ नाड्यां स्थानगतपद्मान्याह - **मूले चेति ॥**

मूले च नाभौ हृदयेन्द्रयोनि-
भ्रूमध्यमूर्धद्विषडन्तकेषु ।
चतुःषडष्टद्विचतुर्द्विषड्क-

---

[1] बृ.भा.अ4-शारीरब्राह्मणे `तस्मिन् शुक्लमुत नीलमाहुः' इति मन्त्रव्याख्यावसरे ।

दलेषु पद्मेषु सितारुणेषु ।
पञ्चात्मकोऽसौ भगवान् सदैव
ध्येयो हृदन्तान्यरुणानि तानि ॥ 148 ॥

मूले मूलाधारे गुदप्रदेशे । **नाभौ** नाभिस्थाने । हृदयं च इन्द्रयोनिश्च भ्रूमध्यं च मूर्धद्विषडन्तकं च हृदयेन्द्रयोनिभ्रूमध्यमूर्धद्विषडन्तकानि । तेष्विति विग्रहः । **इन्द्रयोनिः** अणुजिह्वा । `य एषस्तन इवावलम्बते । सेन्द्रयोनिः' इति (तै.उ.1-15) तैत्तिरीये प्रयोगात् । **मूर्धा** शिरोमध्यप्रदेशः । द्विगुणिताः षट् द्विषट् । द्विषडेवान्तकं स्थानं द्विषडन्तकम् । ततश्च नासाग्रमारभ्य द्विषडन्तप्रदेशे मूर्धैवेत्यर्थः ।

केचित्तु मूर्धोपरि द्वादशाङ्गुलव्यवहितमूर्धोपरिप्रदेशः मूर्धद्विषडन्तकशब्देन `मूर्ध्नः द्विषडन्तकं' व्युत्पत्त्योच्यत इति व्याचक्षते । तेषां

`परमात्मा चतूरूपः सर्वप्राणिशरीरगः ।
विश्वश्च तैजसः प्राज्ञस्तुरीयश्चेति कथ्यत' इति

तुरीयस्य शरीरेऽवस्थानप्रतिपादकमाण्डूकभाष्यविरोधः (मा.भा.1-6) । नाडीस्थपद्मकथनावसरे तदुक्त्ययोगाच्च ।

`विष्णुस्तुरीयरूपेण द्वादशान्ते व्यवस्थित' इति

तत्पूर्ववाक्यमपि[1] नासिकामारभ्य द्वादशान्त इति व्याख्येयम् । षण्णां पद्मानां पत्राण्याह - **चतुरिति ॥** अत्र द्वन्द्वान्ते श्रूयमाणो दलशब्दः प्रत्येकमभिसम्बध्यते । मूले चतुर्दलम् । नाभौ षड्दलम् । हृदयेऽष्टदलम् । इन्द्रयोनौ द्विदलम् । भ्रूमध्ये चतुर्दलम् । नासिकाग्रमारभ्य द्वादशाङ्गुलपरिमिते शिरोमध्यप्रदेशे मूर्धद्विषडन्तकाख्ये

1 परन्त्विदं परतो [मा.भा.2-4] दृश्यते ।

द्विषक्कदलं द्वादशदलं पद्मम् । सामान्यतो वर्णमाह - **सितेति ॥** सितानि च अरुणानि च सितारुणानि। तेषु सितारुणेषु। सितेषु त्रिषु अरुणेषु त्रिषु पञ्चात्मकः प्रद्युम्नाद्यात्मकः असौ भगवान् तुरीय इति षड्रूपो ध्येय इत्यर्थः। तत्र कानि सितानि कान्यसितानीत्यत आह - **हृदन्तानीति ॥** हृदन्तस्स्थानगतानि मूलनाभिहृदयस्थितानि अरुणानि। एतेन तदुपरिस्थानगतानि पद्मानि सितानीति लभ्यते ॥ 148 ॥

इदानीं षण्णां पद्मानां स्थानभूतानि षण्मण्डलानि क्रमेणाह - **त्रिकोणेति ॥**

त्रिकोणवह्नौ च षडस्रवायौ
द्विस्तावदस्त्ररविवृत्तशशित्रिवह्नौ[1]।
वृत्ते विधावपि विचिन्त्यमिदं दशार्ध-
रूपं सितं तदखिलं हृदयात् परस्थम् ॥ 149 ॥

अत्र वह्न्यादिशब्दैः तत्तन्मण्डलान्युच्यन्ते। तथा च **त्रिकोणवह्नौ** वह्निमण्डले। **द्विस्तावदस्त्ररविवृत्तशशित्रिवह्नौ।** तावच्छब्देन पूर्वोक्तषड्संख्या परामृश्यते। **तावदस्त्रम्** षडस्रम्। द्विगुणितानि तावदस्राणि **दलानि** कोणानि यस्य स द्विस्तावदस्त्रः। द्विस्तावदस्त्रश्चासौ रविश्च। वृत्तश्चासौ शशी च ताभ्यां सहितः त्रिः त्रिकोणवान् वह्निश्च तेषां समाहारः तस्मिन्। **वृत्ते विधौ** वर्तुले चन्द्रमण्डले च। **इदं** दशार्धरूपं प्रद्युम्नादिरूपपञ्चकं चिन्त्यमित्यर्थः। इन्द्रयोन्यादिस्थपद्मानां वर्णमाह - **सितमिति ॥ हृदयात्परस्थं** तालुभ्रूमध्यमूर्धस्थितं पद्मत्रयं **सितं** श्वेतमित्यर्थः ॥

अयमत्र समुदायार्थः। मूलाधारे त्रिकोणं वह्निमण्डलं वर्तते। तस्मिन् मण्डले चतुर्दलमरुणं पद्मम्। तयोः प्रद्युम्नो ध्येयः। नाभिप्रदेशे षट्कोणं वायुमण्डलम्।

---

1 '-शशिस्थ-' इति गु.दी.सू.पाठान्तरम्।

तत्र षड्दलमरुणं पद्मम् । तयोरनिरुद्धो ध्येयः । हृदये द्वादशकोणं रविमण्डलम् । तत्राष्टदलमरुणं[1] पद्मम् । तयोर्वासुदेवो ध्येयः । तालुस्थाने वर्तुलं चन्द्रमण्डलम् । तत्र द्विदलं सितं पद्मम् । तयोः सङ्कर्षणो ध्येयः । भ्रूमध्ये त्रिकोणं वह्निमण्डलम् । तत्र चतुर्दलं सितं पद्मम् । अनयोर्नारायणो ध्येयः । मूर्ध्नि वर्तुलं विधुमण्डलम् । तत्र द्वादशदलं सितं पद्मम् । तयोस्तुरीयो ध्येय इति । यद्वा `पञ्चात्मकोऽसौ' इत्यत्र (तं.सा.4-148) प्रद्युम्नादिपञ्चकमेव ग्राह्यम् । ननु तर्हि षण्मण्डलेषु पद्मेषु च कथं पञ्चरूपाणां ध्यानमिति चेत् । न । मूलाधारभ्रूमध्यस्थानद्वयगतत्रिकोणवह्निमण्डलगतः तद्गतचतुर्दलपद्मयोः स्थितश्च प्रद्युम्न एक एव मध्ये ध्येय इत्यङ्गीकारान्नानुपपत्तिः ॥ छ ॥

द्विस्तावदस्रविवृत्तशशिस्थवह्नाविति पाठे त्वयमर्थः । द्विगुणितानि तावन्ति षड्सङ्ख्याकानि यस्य स तथोक्तः । स चासौ रविश्च द्विस्तावदस्ररविः । वृत्तश्चासौ शशी च । द्विस्तावदस्ररवौ वृत्तशशी । तस्मिन् तिष्ठतीति शशिस्थः । स चासौ वह्निश्च । तस्मिन् द्वादशास्रे सूर्यमण्डले स्थितं यच्चन्द्रमण्डलं तत्रस्थिते वह्निमण्डले इत्यर्थः । उपर्युपरि स्थितमेतन्मण्डलत्रयं च हृदयस्थानगताष्टपत्रोपेतपद्मगतमिति बोध्यम् । यथोक्तं प्रणवकल्पे -

`अष्टपत्रे तु हृत्पद्ममध्ये सूर्येन्दुवह्निगम्' इति ।

भागवते च -

`हृत्पुण्डरीकमष्टपत्रम्' इत्युक्त्वा[2]

`कर्णिकायां न्यसेत् सूर्यसोमाग्नीनुत्तरोत्तरम्' इत्यभिहितम् (भा.11-14-37) ।

---

1 `-षड्दलमरुणम्' इति ज1.पाठः ।

2 भागवते अष्टपत्रमिति पदं तस्मिन्नेव श्लोके अग्रे पठ्यते । स च श्लोकः इत्थं पठ्यते -

`हृत्पुण्डरीकमन्तःस्थमूर्ध्वनालमधोमुखम् ।

ध्यात्वोर्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णिकम् ॥' [भा.11-14-36] एवं चायमर्थानुवाद इति भाति ।

वृत्तं चन्द्रमण्डलमिन्द्रयोनिभ्रूमध्यमूर्धाख्यस्थानत्रयगतपद्मेषु पृथक् पृथक्स्थितमिति मन्तव्यम् । अस्मिन् पाठे पापपुरुषदहनाय सर्वैः पठ्यमानं हृदयेऽग्निमण्डलमनुकूलितं भवति। प्राचीनपाठे हृदये रविमण्डलप्राप्त्या तदनानुकूल्यमिति द्रष्टव्यम् ।

नन्वत्र मूलाधारेण सह षद्स्थानान्यभिहितानि। `स्वपार्ष्णिनाऽपीड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः। नाभ्यां स्थितं हृद्यवरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः। ततोऽनुसन्धाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत। तस्माद्भ्रुवोरन्तरमुन्नयीत निरुद्धसप्ताश्वपथोनपेक्षः। स्थित्वा मुहूर्तार्धमकुण्ठदृष्टिः निर्भिद्य मूर्धन् विसृजेत्परं गत' (भा.2-2-22) इति द्वितीयस्कन्धे द्वितीयाध्याये गुदसाहित्येन स्थानसप्तकमुक्तमिति तद्विरोधोऽस्येति चेन्न। द्वितीयस्कन्धोक्तं स्थानसप्तकं वायुधारणाविषये। न तद्ध्याने। अत एव तत्र षट्सु स्थानेषु अनिलमुन्नयेदित्युक्तम् । अत्र तु उरआख्यस्थानस्य हृदयताल्वोर्मध्यस्थस्य कण्ठकूप एवान्तर्भावमभिप्रेत्य गुदाख्यमलेन सह स्थानषट्कमभिधाय तत्र पद्मानि मण्डलानि चोक्त्वा विचिन्त्यमिदं दशार्धं रूपमिति[1] भगवद्रूपध्यानमुक्तम् ॥149॥

इदानीं सुषुम्नायाः परितो विद्यमाननाडीचतुष्टयमाह - **इडेति॥**

इडा च पिङ्गला चैव वज्रिका धारिणी तथा।
सुषुम्नायाश्चतुर्दिक्षु वज्रिकाद्यासु तत्र च।
चतुर्मूर्तिः स भगवान् हृदये संव्यवस्थितः ॥ 150 ॥

सुषुम्नायाः नाड्याः चतुर्दिक्षु सुषुम्नायाः दक्षिणतः पिङ्गला। वामे इडा। पूर्वतः धारिणी। पश्चिमायां वज्रिकेति क्रमेण वर्तते। यथोक्तम् -

`इडा वामे स्थिता नाडी पिङ्गला दक्षिणा मता।

1 दशार्धरूपमिति समासः ज1.पाठे पठ्यते।

तयोर्मध्यगते नाड्यौ सुषुम्नां च समाश्रिते' इति ।

एतेषु कानि रूपाणि कुत्र वर्तन्त इत्यत आह - **वज्रिकाद्यास्विति ॥** वज्रिकाइडाधारिणीपिङ्गलासु **तत्र** सुषुम्नायां च **चतुर्मूर्तिः** प्रद्युम्नादिचतुर्भिः सहितः **स भगवान्** नारायणः **हृदये** हृत्प्रदेशगतनाडीपञ्चके संव्यवस्थितः । तथा चोक्तं छान्दोग्यभाष्ये -

`स एष हृदि नाडीषु पञ्चरूपः प्रतिष्ठितः ।

विष्णोरणिम्नो रूपाणि पञ्चनाडीस्थितानि तु ॥

नारायणाख्यं सौषुम्न' (छा.भा.8-6-6) मित्यादि ।

न च तत्र धारिण्या अनुक्तिः, नान्दिनीपदेनैव तल्लाभात् । धारिण्या एव नान्दिनीति नामान्तरमिति साम्प्रदायिकाः ॥150 ॥

अपरा अपि नाडीस्तत्र विद्यमानभगवद्रूपाणि चाह - **द्वासप्ततीति ॥**

द्वासप्ततिसहस्राणि नाड्योऽन्यास्तु प्रधानतः ।

बृहतीसहस्रस्पर्शानामृचो[1] वाच्योऽत्र केशवः ॥ 151 ॥

रूपाणां लक्षणं तेषां रहस्यत्वान्न कथ्यते ।

विष्णुना ब्रह्मणे प्रोक्तं ग्रन्थसङ्कोचतस्तथा ॥ 152 ॥

देहे सन्तीति शेषः । ननु `शतं चैका च हृदयस्य नाड्यः' (का.उ. 2-3-16) `अत्रैतदेकशतं नाडीनाम्' इत्यादौ (ष.उ.3-5) एकशतनाडीनामेवोक्तेः कथं द्वासप्ततिसहस्राणि इत्युक्तमित्यत आह - **अन्यास्तु प्रधानत इति ॥** अन्यत्रैकशतादित्वेनोक्तिस्तु तासां प्राधान्याभिप्रायेणेति भावः । यद्वा द्वासप्ततिसहस्रनाड्योऽप्रधानाः

---

1 बृहतीसहस्रवर्णानामृचामिति बृहतीसहस्रस्पर्शानामृचामिति च टीकाकृत्सूचिते पाठान्तरे ।

अन्याः वज्रिकाद्यास्तु प्रधाना इत्यर्थः। सम्प्रदायस्तु - प्रधानेन विष्णुना वायुना च **अन्याः** अननीयाः चेष्टनीयाः प्रेर्या इत्यर्थः, अन = चेष्टायाम्' (धा.पा.1070) इति धातोरिति भावः। **प्रधानत** इति सार्वविभक्तिकतसः प्रधानेन इत्यर्थः। तेन वज्रिकादीनां सुषुम्नातो व्यतिरेके तासामपि प्रतिशाखानाडीकथने नाडीनां द्वासप्तति-सहस्रत्वभङ्ग इत्याद्यपास्तम्। प्रधानतोऽन्या इत्यस्याप्रधाना इत्यर्थानभ्युपगमात्। वायुना हरिणा च अननीयाश्चेष्टनीया इत्यर्थाङ्गीकारात् - इति।[1] तत्प्रकारमेवाह - **बृहतीसहस्रस्पर्शानामिति॥** बृहतीसहस्रस्य **स्पर्शः** सम्बन्धो यासां तासामृचो बृहतीसहस्रस्य समन्धिनीनामृचां वाच्यः केशवः अत्र नाडीषु वर्तत इति शेषः। अत्र द्वासप्ततिसहस्रनाडीषु षट्त्रिंशत्सहस्रनाड्यो दक्षिणभागस्थाः। षट्त्रिंशत्सहस्रनाड्यो वामभागस्थिताः। बृहतीसहस्रसम्बन्धिऋचां वर्णाश्च षट्त्रिंशत्सहस्रसङ्ख्याकाः। तथा च बृहतीसहस्रस्य व्यञ्जनाक्षराणि षट्त्रिंशत्सहस्राणि स्वराक्षराण्यपि तावन्ति। एवं मिलित्वा द्वासप्ततिसहस्राणि भवन्ति। एवं च पुरुषायुषमानभूतस्य शतसंवत्सरस्य अह्नां षट्त्रिंशत्सहस्रसङ्ख्याकानां नियामकानि यानि भगवतः षट्त्रिंशत्सहस्रपुंरूपाणि तान्येव बृहतीसहस्रस्थस्वराक्षरप्रतिपाद्यानि। तान्येव दक्षिणभागस्थनाडीषु वर्तन्ते। यानि षट्त्रिंशत्सहस्रसङ्ख्याकानां शतसंवत्सररात्रीणां नियामकानि भगवतः षट्त्रिंशत्सहस्रस्त्रीरूपाणि तान्येव बृहतीसहस्रव्यञ्जनप्रतिपाद्यानि। तान्येव वामभागस्थितषट्त्रिंशत्सहस्रनाडीषु वर्तन्त इति भावः। एतदुक्तमैतरेयोपनिषदि तद्भाष्ये च।

`तद्वा इदं बृहतीसहस्रं सम्पन्नम्। तस्य वा एतस्य बृहतीसहस्रस्य सम्पन्नस्य षट्त्रिंशदक्षराणां सहस्राणि भवन्ति। तावन्ति शतसंवत्सरस्याह्नां सहस्राणि भवन्ति। व्यञ्जनैरेव रात्रीराप्नुवन्ति। स्वरैरहानि' इति (ऐ.उ.2-7-5)। `एकैकं च सहस्रं तद् व्यञ्जनेषु च रात्रिषु। रूपं विष्णोः स्थितं व्यूह्य षट्त्रिंशतिसहस्रधा' इत्यादि (ऐ.उ.भा.2-

---

1 अत्र मूलमातृकायामदृष्टं वाक्यद्वयं प्रा.पाठे पार्श्वे लिखितम्। ज1.पाठे अधो लिखितम्। तच्चेदम् - तेन सम्भूय द्वासप्ततिसहस्राणि नाड्यो भवन्तीति षड्प्रश्नटीकाऽप्युपपद्यते। नाडीकल्पलताप्रमाणं चोपपन्नमिति ध्येयम्। - इति।

7-5)। बृहतीसहस्त्ररीतिस्तु तत्रैव। यावन्तीभिर्ऋग्भिः शंसिताभिः षड्त्रिंशतिसहस्राक्षराणि भवन्ति यस्मात्कस्मादपि छन्दसः तावत्य ऋचः शंसित्वा तदा बृहतीसहस्रत्वानुसन्धानं कार्यम् । तदा सम्पादितं बृहतीसहस्रं भवति। `यावत् सहस्रं बृहती तावच्छंसेदनुष्टुभाम् । छन्दसां वा तदन्येषां बृहतीत्वं स्मरेत् ततः' इति।

बृहतीसहस्त्रवर्णानामृचामिति **पाठे** ऋचां यद्बृहतीसहस्त्रं तस्य वर्णानामित्यर्थः। नित्यसापेक्षत्वात्समासः। बृहतीसहस्त्रवर्णानामृचां च वाच्य इति वा। बृहतीसहस्रस्पर्शानामृचां वाच्योऽत्र केशव इति **पाठे** कादिमावसानानां स्पर्शाक्षराणामकारादिस्वराणां च केशव एव वाच्य इत्यर्थः। तेषां लक्षणं कुतो नोच्यत इत्यत आह - **रूपाणामिति ॥** रहस्यत्वादेवाकथनं नाज्ञानादिति भावः। रहस्यत्वे हेतुमाह - **विष्णुनेति ॥** तथा च उत्तमाधिकारिव्यतिरिक्तानां तल्लक्षणज्ञानानधिकारित्वेन रहस्यत्वमिति भावः। तथा च न कथ्यत इत्यर्थः ॥151,152 ॥

4.49 धारणा-ध्यानं-समाधिः

निदिध्यासनया अपरोक्षदृशिर्भवेदित्युक्तम् । सा च निदिध्यासना त्रिविधा। धारणा ध्यानं समाधिश्चेति। तेषां त्रयाणां क्रमेण लक्षणान्याह - **खण्डस्मृतिरित्यादिना ॥**

खण्डस्मृतिर्धारणा स्यादखण्डा ध्यानमुच्यते ।
अप्रयत्नात् समाधिश्च दर्शनं चिरया तया।
अथवा सततं शास्त्रविमर्शेन भविष्यति ॥ 153 ॥

खण्डा विच्छिन्ना कादाचित्केति यावत् । किञ्चित्कालं स्मृतिः किञ्चित्कालं विस्मृतिरित्यर्थः। खण्डस्य एकैकाङ्गस्य स्मृतिश्च धारणा स्यात् । **स्मृतिः** मानसापरोक्षज्ञानम् । `मानसप्रत्यक्षजा स्मृतिः' इत्युक्तेः (प्र.ल.)। तथा च श्रवणादिज-

नितवासनामयैकैकावयवस्य विच्छिन्नमानसापरोक्षज्ञानं धारणेति लक्षणमुक्तं भवति। यथोक्तं भागवते - `स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणम्' इति (भा.3-29-6)। **स्वस्य** स्वतन्त्रस्य **धिष्ण्यानाम्** अवयवानामेकदेशे इन्द्रियधारणं धारणेति तदर्थः। **॥अखण्डेति॥** अविच्छिन्ना प्रयत्नानन्तरं बहुकालानुवृत्तेति यावत्। समग्रावयवविषयिणी **स्मृतिः** मानसापरोक्षं ध्यानमित्यर्थः। `नैरन्तर्यं मनोवृत्तेर्ध्यानमित्युच्यते बुधैः' इति (ब्र.सू.भा. 4-1-3-8) भाष्यात्। ज्ञानमेव ध्यानम्। तच्च परोक्षमपरोक्षं च। यथोक्तं तत्वप्रकाशिकायां `अविच्छिन्नापरोक्षज्ञानसन्ततिर्हि ध्यानम्' इति[1]। `श्रवणवासनादिजनितमानसवासनामयस्य वस्तुनो मनसा अवलोकनं ध्यानमित्यङ्गीकारात्' इति[2] सुधायां च। न चैकस्य परोक्षत्वापरोक्षत्वव्याघातः। व्यवसायानुव्यवसायन्यायेन वासनामयवस्त्वंशे अपरोक्षस्यैव ब्रह्मांशे परोक्षत्वोपपत्तेः।

अत्र **केचित्।** मनःस्पन्दो ध्यानमिति। तन्न। उक्तवचनविरोधात्। ऐन्द्रियकत्वविरोधात् सविषयकत्वविरोधाच्च। कथं तर्हि `पूर्वविकल्पः प्रकरणात्स्यात् क्रियामानसवत्' इति (ब्र.सू.3-3-46) सूत्रनिर्देशः? `ध्यानं हि मानसी क्रिये'ति टीकाकृदुक्तिश्च[3] इति चेत्। न। क्रियाशब्दस्य कार्यार्थत्वात्। अन्यथा `सङ्कल्पः कर्म मानसम्' इति (अ.को.1-5-93) वचनात् तस्यापि क्रियात्वापत्तौ `सङ्कल्पादेव च तच्छ्रुतेः' इति (ब्र.सू.4-4-8) सूत्रविरोधात्।

॥अप्रयत्नादिति॥ ध्यानार्थं प्रयत्नमकृत्वाऽपि प्राप्ता समग्राङ्गस्मृतिः[4] समाधिरित्यर्थः। यथोक्तं तृतीयस्कन्धभागवततात्पर्ये - `समाधिरप्रयत्नेन मनसः संस्थितिर्भवेत्' इति (भा.ता.3-19-6)। न चात्र `ध्यानसमाध्योरनतिभिन्नत्वाद्ध्यानशब्देन

---

1 त.प्र.4-1-3-8।

2 न्या.सु. `इत्युक्तेर्वन्धमिथ्यात्वं नैव मुक्तिरपेक्षते' इति जिज्ञासाधिकरणानुव्याख्यानस्य व्याख्यानावसरे।

3 न्या.सु.1-1-1। बन्धमिथ्यात्वनिरासे।

4 `समग्राङ्गा स्मृतिः' इति प्रा.पाठः।

समाधिरपि गृह्यत' इति उपासनापादीयसुधाविरोधः[1] शङ्क्यः । अखण्डस्मरणस्योभयत्राविशिष्टतयाऽभेदोक्तिस्तत्र । वस्तुतस्तु भेद एव । अत एवानतिभिन्नत्वादिति तत्रोक्तम् । अन्यथाऽभिन्नत्वादित्येवावक्ष्यदिति ज्ञेयम् । निदिध्यासनाविशेषध्यानस्यापरोक्षज्ञानसाधनत्वमुपसंहरन् निदिध्यासनाविशेषयोर्धारणाध्यानयोस्तद् [=निदिध्यासना] विशेषसमाधिद्वारैवापरोक्षसाधनत्वं समाधेस्तु बहुकालानुवृत्तायाः साक्षादेवेत्याशयेनाह - **दर्शनमिति ॥ चिरया** बहुकालानुवृत्तया **अनया** समाध्याऽप्रयत्नस्मृत्या दर्शनं भविष्यतीति सम्बन्धः । ननु `तथाऽन्यत्' इति (ब्र.सू.3-2-37) सूत्रे चित्ते प्रतीतस्य प्रतिबिम्बस्य ब्रह्मत्वप्रतिषेधेन `नेदं यदिदमुपासत' इति श्रुत्या[2] च ब्रह्मणो ध्यानविषयत्वप्रतिषेधादन्यविषयैर्धारणादिभिरन्यविषयकमपरोक्षज्ञानरूपफलं कथमिति चेत्, न । प्रतिबिम्बस्याब्रह्मत्वेऽपि तत्रत्यस्य ब्रह्मत्वात् तदादाय समानविषयत्वं सम्भवति । यथोक्तम् -

`ब्रह्मैव प्रतिबिम्बे यदतस्तेषां फलप्रदम् ।
तदुपासनं च भवति प्रतिमोपासनं यथा' इति (ब्र.सू.भा.3-2-37) ।

पूर्वं `तस्माच्छास्त्रावमर्शनम्' इति (तं.सा.4-138) शास्त्राभ्यासस्य ध्यानादुत्तमत्वमुक्तम् । तदयुक्तम् । तस्य ध्यानाङ्गत्वादिति केचिद्वदन्ति । तन्न । तदङ्गत्वेऽपि स्वतन्त्रोपासनत्वस्याप्यङ्गीकारात् ।

`सोपासना च द्विविधा शास्त्राभ्यासस्वरूपिणी ।
ध्यानरूपा परा चैव' इति (अनु.व्या.3-3-श्लो36) वाक्यात् ।

ननु तर्हि शास्त्राभ्यासे ध्यानसाधारणं धारणादिव्यावृत्तं किमुपासनाशब्दप्रवृत्तौ निमित्तं, यद्योगात् तत्रोपासनाशब्दो मुख्य इत्यत आह - **अथवेति ॥** निरन्तरशास्त्रा-

1 न्या.सु.3-3-1 तृतीयाध्यायसङ्गतिकथनादनु ।

2 इदं वाक्यं के.उ.1-5तः नवममन्त्रपर्यन्तमभ्यस्तम् ।

र्थविचारेण भविष्यति दर्शनमिति वर्तते । ब्रह्मसाक्षात्कारहेतुत्वमुपासनाशब्दप्रवृत्तौ निमित्तम् । इदं चाधिकारिविशेषाभिप्रायेण । उपलक्षणं चैतत् । चित्तवृत्तिनिरोधत्वं च द्रष्टव्यम् । इदं च सर्वसाधारणमुपासनाशब्दप्रवृत्तिनिमित्तं शास्त्राभ्यासेऽस्तीति तस्योपासनाशब्दवाच्यत्वमिति भावः ॥ 153 ॥

4.50 भक्तेरत्यावश्यकता

ननु शास्त्रावमर्शेन दर्शनं भवतीत्युक्तम् । तदयुक्तम् । निरन्तरशास्त्रार्थविचारकाणां मीमांसकानां तदद्दष्टेरित्याशङ्क्य परमस्नेहसंयुक्तयथार्थज्ञानिनामेवात्र विवक्षितत्वात्तेषां च निरीश्वरवादित्वेन तदभावादित्यभिप्रेत्य भक्तिस्वरूपकथनपूर्वकं भक्तिरेव ज्ञाने प्रधानसाधनमित्याह - **परमेति** ॥

परमस्नेहसंयुक्तयथार्थज्ञानतो भवेत् ।
सा भक्तिरिति विज्ञेया साधनं भोगमोक्षयोः ॥ 154 ॥

मुख्यमेषैव नान्यत्स्यात् सर्वं व्यर्थं तया विना ।
सैकाऽप्यभीष्टफलदा मोक्षो दर्शनयुक्तया ॥ 155 ॥

दर्शनं च तया हीनं व्यर्थमन्यत्किमुच्यते ।
योग्यं तु दर्शनं नैव तया हीनं भविष्यति ॥ 156 ॥

भवेद्दर्शनमिति वर्तते । सेति विधेयलिङ्गम् । 'शैत्यं हि यत्सा प्रकृतिर्जलस्य' इतिवत् । **सा** यथार्थज्ञानमेव भक्तिरिति विज्ञेया । न केवलं दर्शनस्यैव मुख्यसाधनं भक्तिः, किन्तु तत्साध्यमोक्षस्य मुक्तावानन्दभोगस्यापीत्याह - **साधनमिति** ॥ एषैव भोगमोक्षयोर्मुख्यसाधनमिति सम्बन्धः । मुख्यत्वमेव व्यतिरेकेणोपपादयति - **नान्यदिति** ॥ मुख्यं साधनमिति वर्तते । ननु कर्मण एव मुख्यसाधनत्वान्नान्यदिति

कथमित्याशङ्कां परिहरन्नेतदेव विवृणोति - **सर्वमिति ॥ तया** भक्त्या विना **सर्वं** सर्वकर्मादि **व्यर्थं** विगतार्थं विरुद्धार्थं चेत्यर्थः । परमस्नेहरूपभक्त्यभावे मोक्षाभावाद्विगतार्थं नरकाद्यनर्थहेतुत्वाद्विरुद्धार्थं चेति भावः । ननु किं भक्तिरपि कर्मादिना विना व्यर्थेत्याशङ्कामपनुदन् प्रसङ्गाद्भक्तेः सर्वाभीष्टसाधनत्वमप्याह - **सैकाऽपीति ॥ एका** कर्मादिनिरपेक्षा अभीष्टफलदाऽपीति सम्बन्धः । भक्तेर्मोक्षे मुख्यसाधनत्वमुदितम् । तत्किं केवलाया इत्यतः नेति भावेनाह - **मोक्ष इति ॥** भवेदिति शेषः । **दर्शनयुक्तया ।** दर्शनं योग्यबिम्बसाक्षात्कारः बिम्बैक्यसाक्षात्कारश्च । तद्युक्तया भक्त्या मोक्षो भवेदित्यर्थः । सर्वेषां बिम्बसाक्षात्काराभावश्चोपासनापादीयभावबोधे `न सामान्यादप्युपलब्धेः' इति नये (ब्र.सू. 3-3-53) स्फुटः ।

ननु किमनया भक्त्या ? भगवद्दर्शनमात्रेण वा उपासनादिना वा मोक्षः किं न स्याद् ? इति चेत्, सत्यम् । किं नाम भगवद्दर्शनं यद् भक्तिहीनं मुक्तिसाधनं स्यात् ? अवतारसाक्षात्काररूपं योग्यसाक्षात्काररूपं वा ? नाद्य इत्याह - **दर्शनं त्विति ॥ तया** भक्त्या हीनं **व्यर्थं** विगतार्थं विरुद्धार्थं च ।

अयं भावः । अवतारदर्शनं तावन्न मोक्षसाधनम् । `सामान्यदर्शनाल्लोका' (ब्र.सू.भा.3-3-53) इति वचनात् । इतरलोकहेतुत्वमपि तस्य भक्तिसाहित्येनैव । तया हीनं तु मोक्षेतरप्रयोजनादेरप्यहेतुरिति विगतार्थम् । `अवजानन्ति मां मूढा मानुषीं तनुमाश्रित' (भ.गी.9-11) मित्यादिना स्नेहविरुद्धद्वेषसहितस्य तमआद्यनर्थहेतुत्वाद्विरुद्धार्थं च । दृष्टं चैतद्दुर्योधनादाविति । उक्तं च भागवते - `नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्' इति (भा.12-12-51) । एवं भक्तिरहितस्यावतारज्ञानिनोऽपि यदा न मोक्षाशा किमुपासनामात्रं कुर्वत इत्याह - **अन्यत्किमिति ॥** उपासनादिकं तया हीनं **व्यर्थं** मोक्षाख्यप्रयोजनसाधनं नेति किमु वक्तव्यम् । `नैष्कर्म्यमप्यच्युतभाववर्जितम्' इति (भा.12-12-51) वचनात् । अनेन उपासनादिना वा मोक्षः किं न स्यादिति साधनान्तरशङ्काऽपास्ता । अस्तु तर्हि बिम्बदर्शनं भक्तिरहितं

मोक्षहेतुरिति द्वितीयः पक्ष इत्यत आह - **योग्यं त्विति ॥ योग्यं दर्शनं** बिम्बापरोक्षज्ञानं **तया** स्वयोग्यया यावद्भक्त्या **हीनं** रहितं न भविष्यति। तथा च बिम्बदर्शनस्य भक्त्यविनाभूतत्वेन भक्तिहीनं बिम्बदर्शनं मोक्षसाधनमिति व्याहतत्वान्न युक्तमिति भावः ॥ 154-156 ॥

4.51 भक्तितारतम्येन फलतारतम्यम्

एवमुक्तैः भक्त्यादिभिः साधनैः प्रसन्नो भगवानेव मोक्षादिप्रद इत्येतमर्थमुपपादयन्न सर्वेषामधिकारिणां साम्येनानन्दः किन्तु तरतमभावेनेति सहेतुकं दर्शयति - **आनन्देति ॥**

आनन्दचित्सदितिपूर्वगुणैः समस्तै-
-र्मर्त्यादिभिर्विधिपरैर्भगवान् क्रमेण।
ध्यातोऽधिकैरधिगुणोऽधिकमेव सौख्यं
मुक्तौ ददाति सततं परमस्वरूपः ॥ 157 ॥

भगवानेव मर्त्यादिभिः ब्रह्मान्तैः क्रमेणाधिकैः अधिकारिभिः **आनन्दचित्सदितिपूर्वगुणैः आनन्दः** सुखं **चित्** ज्ञानं **सत्** सत्वं निर्दुष्टत्वमित्येते गुणा एव पूर्वे येषां गुणानां तैः स्वामित्वादिगुणैः **ध्यातः** गुणसहितत्वेन ध्यातः सन्मुक्तौ तेषां क्रमेणाधिकमेव सौख्यं **सततं** सर्वकालेष्वपि ददाति। अत्र मर्त्यशब्दोक्तमनुष्योत्तमैरानन्दचित्सदिति गुणाः आदिशब्दोक्तेषु स्वामित्वमेकमित्येवं गुणचतुष्टयमुपास्यम् । तथा चोक्तम् `आनन्दादयः प्रधानस्ये'त्युपासनापादीयसूत्रभाष्ये (ब्र.सू.3-3-12) - `सच्चिदानन्द आत्मेति ब्रह्मोपासा विनिश्चिता' इति[1]। `सत्वं निर्दोषत्वम् ।

1 ब्र.सू.भा.3-3-12। इदं भाष्योदाहृतब्रह्मतर्कवचनस्य पूर्वार्धम् । "सर्वेषां च मुमुक्षूणां फलसाम्यादपेक्षिता" इति उत्तरार्धम् ।

तच्च ज्ञानानन्दादौ सर्वापेक्षितं फलम् । आत्मपदोदितस्वामित्वं तु स्वसम्बन्धानुस्मरणस्य भगवत्प्रीतिसाधनत्वादुपास्यम्' इति[1] तत्वप्रकाशिकायां च। एतेनात्मत्वमात्रोपासकस्य स्वामित्वाभावात् किं तदुपासनेनेति शङ्काऽपहस्तिता। तदुक्तमैः सर्वैः क्रमेणाधिकैः बहुगुणैः ब्रह्मणा त्वखिलश्रुत्युक्तैस्तदनुक्तैः सम्प्रदायागताखिलगुणैश्च ध्यात इति विवेकः ॥ छ ॥

तदुक्तम् -

`सर्वैर्गुणैर्ब्रह्मणा च समुपास्यो हरिः सदा ।
आनन्दो ज्ञः सदात्मेति ह्युपास्यो मानुषैर्हरिः ॥
यथाक्रमं गुणोद्रेकात् तदन्यैराविरिञ्चतः' इति भारततात्पर्यनिर्णये । (म.ता.नि. 1-92,93)

तृतीयाध्यायगीताभाष्ये च -

`अपौरुषेयवेदेषु विष्णुवेदेषु चैव हि ।
सर्वत्र ये गुणाः प्रोक्ताः सम्प्रदायागताश्च ये ॥
सर्वैस्तैः सह विज्ञाय ये पश्यन्ति जनार्दनम् ।
तेषामेव भवेन्मुक्तिः' इति (गी.भा.3-43) ।

`वेदाद्यनुक्ता अपि भगवत्सम्प्रदायागता' (गी.भा.प्र.दी.3-43) इति प्रमेयदीपिकायाम् ।

`सच्चिदानन्द आत्मेति मानुषैस्तु सुरेश्वरैः ।
यथाक्रमं बहुगुणैर्ब्रह्मणा त्वखिलैर्गुणैः' इति (अणु.भा.3-4) चान्यत्र ।

1 त.प्र.3-3-12 ।

अत्र गुणग्रहणं क्रियारूपयोरुपलक्षणम् । ब्रह्मा सर्ववेदोदितैर्गुणक्रियारूपैरुपास्ते । सरस्वती सर्ववेदोक्तगुणोपेततयाऽनन्तरूपं हरिमुपास्ते । त्रिविक्रमत्वादिक्रिया नित्य-विक्रान्त्यादिष्वन्तर्भावयति । रुद्रः समस्तरूपाण्युपास्ते । गुणान् क्रियांश्च सङ्कोचयति । शक्रादयः सर्वे रूपाणि गुणान् क्रियाश्च सङ्कोचयन्तीति द्रष्टव्यम् । यथोक्तमनुव्या-ख्याने -

`ब्रह्मा सर्वगुणैश्चैव क्रियासामान्यतश्च गीः ।
गुणसामान्यतो रुद्रो रूपसामान्यतः पर' (अनु.व्या.3-3-29) इति ।

भगवत एव तद्दातृत्वं कुत इत्यतस्तस्य सर्वोत्तमत्वादित्याह - **अधिगुण इति ॥** स-वोत्तमत्वं च कादाचित्कं चेत्तर्हि कदाचिदेव तस्य मोक्षदातृत्वं स्यादित्यतः सततमिति अधिगुणस्यापि विशेषणम् । **सततं** सन्ततम् अधिगुणः । न राजादेर्द्रव्यादिदा-नवत्परमात्मनः सुखदानं किन्त्वतिविलक्षणमित्येतदर्थं सततमित्येतद्ददातीत्यनेनापि सम्बध्यते । तथा च **सततं ददाति** प्रतिक्षणं ददाति । प्रतिक्षणमपि सुखादिसत्ता-नियमनपूर्वकं तस्यानुभूयमानत्वादिकं ददातीति भावः ।

नन्वीश्वरस्य देहोऽस्ति न वा ? द्वितीये ज्ञानादिगुणाभावेनाधिगुणत्वायोगः । ज्ञा-नस्येन्द्रियापेक्षत्वात् । इन्द्रियाणां च शरीरसंयुक्तत्वनियमात् । अस्ति चेज्जननमर-णादिमत्त्वेन मौक्तसुखदानानुपपत्तिरित्यत उक्तं - **परमस्वरूप इति ॥** प्रकृत्या-द्यकार्यत्वेन परमं स्वं स्वाभिन्नं रूपं विग्रहः यस्य स परमस्वरूपः । तथा च देह-वत्त्वादधिगुणस्तस्य च देहस्य प्रकृत्याद्यकार्यत्वेन तदभिन्नत्वाज्जननादिदोषाभावश्चेति भावः ॥ 157 ॥

4.52 ग्रन्थनामकथनम्

एवं सर्वेषामत्यावश्यकमन्त्रादिकमभिधायात्राधिकारिणामतिशयेनादरजननाय `विधिं विधाय सर्गादा' (तं.सा.1-2) वित्यत्रोपपादितमपि तन्त्रसारस्याप्तिमूलकतया प्रामाण्य-

मतिविस्मरणशीलानां मन्दानां हृदि न सम्यक् तिष्ठतीति मन्दाननुजिघृक्षुः पुनराप्ति-मूलकत्वं सूचयन् स्वज्ञानस्यापि महफलहेतुत्वात्स्वनामकथनपूर्वकं स्वकृतग्रन्थस्य नाम स्थापयति - **निर्दोषेति** ॥

निर्दोषाखिलसम्पूर्णगुणेन हरिणा स्वयम् ।
ब्रह्मणे कथितात् तन्त्रसारादुद्धृत्य सादरम् ।
आनन्दतीर्थमुनिना कृतो ग्रन्थोऽयमञ्जसा ॥ 158 ॥

निर्दोषश्चासावखिलसम्पूर्णगुणश्च तेन हरिणा **ब्रह्मणे** चतुराननाय **कथिताद्** उपदिष्टात् तन्त्रसारात् । उद्धृत्य एकदेशमिति शेषः । **अयं** ग्रन्थः **कृतः** प्रणीतः । तेन तन्त्रसारसङ्ग्रह इति तन्त्रसारोद्धार इति वा नाम स्थापितं भवति । ननु ब्रह्मणे तन्त्र-सारोपदेष्टृत्वमनुपपन्नं हरेः प्रयोजनाभावादित्यतः स्वयमित्युक्तम् । साक्षात्प्रयोजना-नपेक्षयेति यावत् । तदभावेऽपि कृपापारवश्येन उपदेशोपपत्तेरिति भावः । ननु मूल-तन्त्रसारगतार्थास्फुरणे कथं तदुद्धारो युक्तः स्यादित्यत उक्तं - **सादरमिति** ॥ सा-दरमुद्धृत्येति सम्बन्धः । न हि तत्रादरवतः तदर्थास्फुरणमिति युज्यते । यो हि यत्रा-दरवान् तस्यैव तद्वस्तु सोपपादकं स्फुरतीति व्याप्तेः । न तन्त्रसारमूलकत्वमात्रेणायं ग्रन्थ आदरणीयः, अपि तु सुरवरावतारेण मया कृतत्वाच्चेत्याह - **आनन्दतीर्थेति** ॥ कालिदासादय इव नाहं पामरमनोरञ्जनार्थं ग्रन्थकर्ता येनाविद्यमानार्थवर्णनशङ्केत्याह - **मुनिनेति** ॥ न हि मुनेः कर्म पामरमनोरञ्जनं नारदादावदर्शनादिति भावः । तथापि नायमादरणीयः अतिगहनार्थत्वादित्यत आह - **अञ्जसेति** ॥ सुगमार्थतयेत्यर्थः ॥ 158 ॥

4.53 एतद्ग्रन्थमहिमवर्णनम्

एतद्ग्रन्थाभ्यासोऽत्रोक्तमन्त्रजपादिकं च कर्तव्यमित्याशयेन एतद्ग्रन्थार्थज्ञानादिना सकलाभीष्टसिद्धिर्भवतीति कैमुत्यन्यायेन उपपादयति - **ग्रन्थोऽयमिति** ॥

ग्रन्थोऽयं पाठमात्रेण सकलाभीष्टसिद्धिदः ।
किमु ज्ञानादनुष्ठानादुभयस्मात् पुनः किमु ॥ 159 ॥

॥ किमु ज्ञानादिति ॥ ग्रन्थार्थज्ञानात्सकलाभीष्टसिद्धिर्भवतीति किमु वक्तव्यमित्यर्थः । **अनुष्ठानात्** सर्वार्थज्ञानाभावेऽपि तत्रतत्रोपयुक्तयत्किञ्चिदनुष्ठेयज्ञानमात्रेणानुष्ठानात् किम्विति सम्बध्यते । **उभयस्मात्** सर्वार्थज्ञानात् तत्पूर्वककर्मानुष्ठनाच्चेत्युभयस्मात् किमु पुनः । वक्तव्यमिति शेषः । यद्वा **ज्ञानादनुष्ठानादिति** ज्ञानपूर्वकानुष्ठानादित्यर्थः । उभयस्मादिति पाठात् ज्ञानपूर्वकानुष्ठानाच्चेत्युभयस्मादित्यर्थः । ततश्चाधिकारिणस्त्रिविधाः । उत्तमा मध्यमा अधमाश्च । तत्रोत्तमानामानन्दतीर्थमुनिनेत्यत्र मुनिप्रणीतत्वोक्त्या प्रामाण्यनिश्चयः । मध्यमानां तु निर्दोषाखिलसम्पूर्णेत्यत्रोक्तसर्वोत्तमप्रमाणतन्त्रसारमूलकत्वात्प्रामाण्यनिश्चयः । ग्रन्थोऽयं पाठमात्रेणेत्युक्त्यैहिकामुष्मिकफलसंवादित्वयुक्त्या अधमानां प्रामाण्यनिश्चय इत्युक्तं भवति ॥ 159 ॥

4.54 उपसंहारः ग्रन्थसमर्पणं च

एवं समापिततन्त्रसारसङ्ग्रहाख्यग्रन्थो भगवान् नाकनायकाधिनायकपिनाकिमुखभक्तजनाभीप्सितसकलपुरुषार्थप्रवर्षककल्पद्रुमः श्रीमदाचार्यवर्यः भगवत्स्वरूपज्ञानमिव स्वस्वरूपज्ञानस्याप्यशेषपुरुषार्थान्तरङ्गकारणत्वेन श्रुत्यादिसकलप्रमाणसिद्धत्वात्स्वस्वरूपं ज्ञानाधिकारिणामाविष्कुर्वन् स्वकृतं ग्रन्थं भगवति समर्पयति - **यस्येति** ॥

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः
मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥ 160 ॥

यस्य वायोर्देवस्य बळित्थेत्यादिवेदवचने **दिव्यानि** क्रीडादिगुणसंयुक्तानि त्रीणि रूपाण्युदितानि **अमुना** वायुना अयं ग्रन्थः केशवे कृत इत्यन्वयः। तस्य वायोर्मूलरूपम् **अलं** सम्यक् **बट्** बलात्मकं **दर्शतं** ज्ञानरूपं **भर्गः** परमात्मानं बिभर्ति गच्छति चेति, 'भारतिज्ञानरूपत्वात्' इति (ऋ.भा.अ1-सू1-श्लो3) ऋग्भाष्योक्तरीत्या भारतिज्ञानरूपत्वाद्वा। मुद्गगर्गादिशब्दवत्कर्तरि गप्रत्ययविधानात्। भरणकर्तृत्वाद्वा। **महत्** पूज्यम्। न केवलमेवं मूलरूपमपि तु यस्यावतारेषु निहितं रूपम् **इत्थमेव** बलाद्यात्मकमेव। तत्र प्रथमकं रूपं रामवचोनयं द्वितीयं वपुः **पृक्षः** पृषोदरादित्वात् तकारलोपः[1]। यस्य यत्तृतीयं वपुः एतन्मध्व इति। आनन्दरूपस्य हरेः प्रतिपादकशास्त्रनिर्मातृमध्वाभिधमिति ॥160॥

4.55 अन्त्यमङ्गलम्

अथ तन्त्रसारसङ्ग्रहकर्ता विज्ञानमहादिवाकरः यं गुणगणार्णवतया प्रतिपादितवान् यस्मिंश्चात्मनो निरुपाधिकप्रीतिः तमेव स्तुवन् स्वस्वरूपप्रकटनेन ग्रन्थसमाप्तिमरोचयमानः अन्ते भगवन्माहात्म्यमुपदर्शयन् प्रणामेन प्रीणयति - **अशेषेति**॥

अशेषदोषोज्झितपूर्णसद्गुणं
सदा विशेषापगतोरुरूपम्[2]।
नमामि नारायणमप्रतीपं
सदा प्रियेभ्यः प्रियमादरेण ॥ 161 ॥

---

1 यथा खलु पृषत् उदरमिति पदयोगेन पृषदुदरमिति भाव्ये तकारलोपेन पृषोदरमिति भवति, एवमेव पृतनार्थकस्य पृत् इति शब्दस्य क्षयार्थक-क्ष-इति शब्दस्य च योगे 'पृत्क्ष' इति भाव्ये 'पृक्ष' इति जातमिति भावः।

2 'सदा[ऽ]विशेषावगतोरुरूपम्' इति गु.दी.सू.पाठान्तरम्।

॥इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमत्तन्त्रसारसङ्ग्रहे चतुर्थोऽध्यायः॥ ॥ समाप्तोऽयं ग्रन्थः॥

नारायणं नमामीत्युत्तमपुरुषप्रयोगादेवाहमिति कर्ता सिध्यति। नानिर्धारितस्वरूपस्य वन्दनं युक्तम् । न च लक्षणेन विना निर्धारणमित्यतोऽध्यायचतुष्टयनिर्णीतलक्षणान्याह - **अशेषदोषोज्झितपूर्णसद्गुणमिति॥** अशेषदोषोज्झितश्चासौ पूर्णसद्गुणश्च तम् । `विशेषणं विशेष्येण बहुलम्' इत्यत्र (पा.सू.2-1-57) बहुलग्रहणात् समासः। अत्र निर्दोषत्वग्रहणेन पारतन्त्र्यराहित्यादीनि[1]। तदर्थमेवाशेषेत्युक्तम् । पूर्णगुणमित्यनेन परिपूर्णानन्दत्वादीनि चानन्तलक्षणानि सूचितानि। वैशेषिकादिभिर्दुःखादीनामपि गुणव्यवहारात् सदिति। ननु भगवतः शरीरमस्ति न वा? आद्ये मरणादिदोषप्रसङ्गः। द्वितीये इन्द्रियविकलस्य ज्ञानादिगुणाभावप्रसङ्ग इत्यत उक्तम् **॥ विशेषेति॥ विशेषो** भेदः तस्मादपगतम् **उरु** सच्चिदानन्दरूपात्मकत्वादुत्कृष्टं **रूपं** शरीरं यस्य स तथा। अस्त्येवेशस्य शरीरम् । तच्च सच्चिदानन्दात्मकत्वेन तदभिन्नत्वेन चाक्षयमिति न कश्चिद्दोष इति। यथोक्तम् -

`अतोऽशेषगुणोन्नद्धं निर्दोषं यावदेव हि।

तावदेवेश्वरो नाम तत्र भेदोऽपि न क्वचित्' इति (अनु.व्या.3-2-8)।

`सदा[ऽ]विशेषावगतोरुरूपम्' इति **क्वचित्पाठः। सदा विद्यमाना** यावल्लक्ष्यभाविनो ये **विशेषाः** जगज्जन्मादिकारणत्वाद्यसाधारणधर्माः तैरवगतं रूपं यस्येति वा। सदाऽविशेषितत्वेन परस्परमुत्कर्षरहितत्वेनावगतानि **उरुरूपाणि** अनन्तानि अवतাররूपाणि अन्तर्यामिरूपाणि च यस्य तमित्यर्थः। न हि[2] देवतावन्दनं व्यसनितया क्रियते किन्तु पुरुषार्थापेक्षितया। विशिष्टैव देवता तस्येष्टे इति विशिष्टत्वमु-

1 ग्राह्याणीति शेषः।

2 इतः द्वित्रवाक्यानि अनुव्याख्यानावतारिकान्यायसुधावाक्यान्यनुकुर्वन्ति।

पपाद्य भक्त्याद्युपेतमेव हि वन्दनं सफलम् । तच्चेष्टायामेव देवतायामुपपद्यत इत्यभिप्रायेण इष्टत्वं प्रदर्शयति - **प्रियेभ्यः प्रियमिति ॥ प्रियेभ्यः** आत्मादिभ्यः **सदा** संसारे मुक्तौ च **प्रियं** मुख्येष्टम् । ननु न तस्येष्टत्वमुपपन्नम्, पापादिकारयितृत्वेन तत्फलदातृत्वेन च सर्वविरोधित्वादित्यतः - **अप्रतीपमिति ।** न विद्यते **प्रतीपो** विरोधो यस्यासौ अप्रतीपः तम् । तत्कथमित्यतः तत्रापि - **अप्रतीपमिति ।** अ-प्रतिगताः **आपः** कर्माणि यस्मिन्निति अप्रतीपः तम् । कर्मसापेक्षमिति यावत् । `आपो दंसः सूदं कर्म' इति कर्मनामसु पाठात् (निरुक्तम्) । `तस्मिन्नपो मातरिश्वा दधाति' (ई.उ.4) इति प्रयोगाच्च । अनादिपूर्वकर्मादिकमपेक्ष्य पापादि कारयित्वा तत्फलदातृत्वान्न विरोधः । `द्व्यन्तरुपसर्गेभ्योऽप ईत्' (पा.सू.6-3-97) एभ्यः परस्य कृतसमासान्तस्य अप्शब्दस्य ईत् स्यात्[1] । द्विर्गताः आपो यस्मिन्निति द्वीपम् । अन्तर्गताः आपो यस्मिन्निति अन्तरीपम् । प्रतिगता आपो यस्मिन्निति प्रतीपम् । सम्यग्गता आपो यस्मिन्निति समीपम् इति समासप्रक्रियायां साधितत्वादप्रतीपशब्द उक्तार्थे साधुः । **आदरेण** श्रद्धातिशयेन इति श्रद्धादिसाहित्यलक्षणां प्रणामस्य समीचीनतामाह । तादृश एव हि प्रणामो भवत्यभिमतसिद्धेरङ्गम् । सदा नमामीत्युक्त्या न मम नरायणवन्दनं ग्रन्थप्रचयादिप्रयोजनोद्देशेन । किन्तु स्वभाव एवेति सूचितं भवतीत्यशेषमतिमङ्गलम् ॥छ ॥छ ॥छ ॥छ ॥ ॥161 ॥

पराशराब्धिसम्भूतं वेदव्यासकलानिधिम् ।
ब्रह्मसूत्रादिसच्छास्त्रकौमुदीयुतमाभजे ॥ 1 ॥

यच्छास्त्रश्रवणादेव भवन्ति विबुधा नराः ।
तं वन्दे श्रीमदाचार्यं तच्छास्त्रावृत्तयेऽन्वहम् ॥ 2 ॥

श्रीयादवाचार्यसुपादशिष्यश्रीश्रीनिवासार्यगुरूपदिष्टः ।

---

1 एभ्योऽपोऽकारस्य ईत् स्यात् इति प्रा.पाठः । `अप इति कृतसमासान्तस्यानुकरणम्' इति सिद्धान्तकौमुद्यां [सि.कौ.सू.सं.941] वृत्तिः । तमिमं वृत्त्यर्थं ज1.पाठः सङ्गृह्णातीति स आदृतः ।

अर्थो निबद्धोऽत्र विचार्य सद्भिरार्यैरुपेक्ष्यो न भवेदतोऽयम् ॥ 3 ॥

गृहीतुरिव दीपस्य स्खलनं स्यात् पदे पदे ।
तथापि मम तत्सन्तः शोधयन्तु कृपावशात् ॥ 4 ॥

श्रीनिवासार्यसूनूत्था तन्त्रसारार्थभासिका ।
सद्वार्जानन्ददात्रीयं[1] भूयाद्गुर्वर्थदीधितिः ॥ 5 ॥ ॥छ ॥

॥छ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य
श्रीमत्तन्त्रसारसङ्ग्रहस्य टीकायां
श्रीमद्यदुपत्याचार्यच्छात्रवर्यश्रीनिवासाचार्यपूज्यपादाराधकेन वेङ्कटपतिना
विरचितायां गुर्वर्थदीधितौ चतुर्थोऽध्यायः समाप्तः ॥छ ॥

॥ छ ॥ श्रीमध्वेशः प्रीयतामतिमङ्गलम् ॥ छ ॥[2]

---

1 `सद्वर्गानन्दे'ति वा `सद्व्रजानन्दे'ति वा `सद्व्राजानन्दे'ति वा पाठेन भाव्यमिति भाति। मूलमातृकाया अन्त्यपत्रं कालप्रभावात् दुष्पठम् ।

2 `श्री श्रीनिवासार्पितं भवतु' इति ज1.पाठः। `श्रीवासुदेवाय नमः' इति र.पाठः। ज1.पाठे अन्ते एवं लिखितम् - `विभवनामसंवत्सरमाघशुक्ल10[दशमी]स्थिरवासरे इदं पुस्तकं नेलवं-गलस्त[स्थ]ल नाडगवड लक्षमण[लक्ष्मण]रायेण लिखितं श्रीगुरुभ्यो नमः ॥' - इति लिखितम् । र.पाठे अन्ते - `श्रीविष्वब्दे विलिखिता तिर्मलेत्यभिधायुजा। तन्त्रसारस्य टीकेयं भूयाद्व्याख्योप-कारिणी ॥' इति लिखितम् ।

परिशिष्टम् A

गुर्वर्थदीधित्युदाहृतग्रन्थसूची

1. अमरकोशः[1]
2. अग्निपुराणम्
3. अणुभाष्यम्
4. अनुक्रमणिका
5. अनुव्याख्यानम्
6. अभिधानम्
7. आदित्यपुराणम्
8. आपस्तम्भः
9. ऋग्भाष्यम्
10. ऋक्संहिता
11. ऐतरेयोपनिषत्
12. ऐतरेयभाष्यम्
13. कर्मनिर्णयः
14. काठकोपनिषत्
15. काठकोपनिषद्भाष्यम्
16. कात्यायनः
17. कुलार्णवः
18. गीतातात्पर्यम्
19. गीतातात्पर्योदाहृतम्
20. गीताभाष्यम्

[1] आहत्य 100 ग्रन्थाः गुर्वर्थदीधितिग्रन्थे व्याख्यानावसरे उल्लिखिताः। तेषां पट्टिका अत्र दर्शिता।

21. गौतमीयम्
22. छान्दोग्योपनिषत्
23. छान्दोग्यभाष्यम्
24. तन्त्रभागवतम्
25. तन्त्रसारः
26. तत्वप्रदिपः
27. तत्वसागरः
28. तन्त्रतिलकम्
29. तन्त्रराजः
30. महाभारततात्पर्यनिर्णयः
31. तैत्तरीयोपनिषत्
32. तैत्तरीयोपनिषद्भाष्यम्
33. धनञ्जयकोशः
34. धातुपाठः[पाणिनीयः]
35. न्यायदीपिका
36. न्यायसुधा
37. पञ्चरात्रम्
38. पञ्चसंस्कारः
39. पञ्चसंस्कारसङ्ग्रहः
40. पदार्थादर्शः
41. पद्यमाला
42. परमपुरुषसंहिता
43. पराशरः
44. पाद्मसंहिता
45. पाणिनीयसूत्रम्
46. पाद्मतन्त्रम्
47. पाद्मसंहिता
48. पाद्मपुराणम्
49. पुरुषसूक्तम्
50. पुरुषविधानम्
51. प्रमाणलक्षणम्
52. बृहदारण्यकोपनिषत्
53. बृहदारण्यकोपनिषद्भार्यम्
54. ब्रह्मसूत्रम्

55. ब्रह्मसूत्रभाष्यम्
56. ब्रह्माण्डपुराणम्
57. भगवद्गीता
58. भगवद्गीता
59. भागवतम्
60. भागवततात्पर्यम्
61. महाभारततात्पर्यनिर्णयः
62. मनुस्मृतिः
63. महावाराहम्
64. मत्स्यपुराणम्
65. मोक्षधर्मः
66. यतिप्रणवकल्पः
67. यन्त्रसारः
68. याजुषपुरुषसूक्तम्
69. याज्ञवल्क्यः
70. योगदीपिका
71. लक्षसङ्ग्रहः
72. लक्षसागरे
73. वराहपुराणम्
74. वामनपुराणम्
75. वामनपुराणान्तर्गतदधिवामनस्तोत्रम्
76. वराहपुराणम्
77. वसिष्ठसंहिता
78. वासिष्ठसंहिता
79. विश्वकोशः
80. विष्णुसहस्रनामस्तोत्रम्
81. विष्णुतीर्थीयम्
82. विष्णुपुराणम्
83. वैभवम्
84. वैहायसपञ्चरात्रम्
85. शारदाग्रन्थः
86. शेखरः
87. शैवतन्त्रम्
88. शैवागमः

89. शौनकवचनम्

90. श्रीवादिराजयतिकृतकेशवादिस्तुतिः

91. श्रुतिः

92. षट्प्रश्नोपनिषत्

93. षट्प्रश्नोपनिषद्भाष्यम्

94. सङ्ग्रहः

95. सारसङ्ग्रहः

96. स्मृतिः

97. हयशीर्षम्

98. हरिवंशः

99. हारीतस्मृतिः

100. हारीतस्मृतिः

परिशिष्टम् B

पुराणेषु प्रतिमालक्षणम्

अग्नि-कूर्म-गरुडपुराण-ब्रह्मकाण्डेगरुड-देवीभागवत-नरसिंह-पद्म-ब्रह्म-भविष्य-भागवत-मत्स्य-मार्कण्डेय-लिङ्ग-वामन-वायु-विष्णुधर्मोत्तर-विष्णु-स्कन्दपुराणेषु षड्पुराणेषु प्रतिमालक्षणमधिकृत्य प्रपञ्चितम् । तेषां पुराणानां नाम, अध्यायसङ्ख्या विषयश्चात्र प्रदर्शिताः ।

- अग्निपुराणे अध्यायः 44 वासुदेवादिप्रतिमालक्षणम् प्रतिमासु अङ्गानां प्रमाणम् ।
- अग्निपुराणे अध्यायः 49 दशावतारप्रतिमालक्षणम् ।
- अग्निपुराणे अध्यायः 50 चण्ड्यादिप्रतिमालक्षणम् तत्र विंशतिभुजचण्डीस्वरूपम् दशभुजचण्डीस्वरूपम् नवदुर्गास्वरूपम् अष्टादशभुजादिदेवतानां स्वरूपाणि ।
- अग्निपुराणे अध्यायः 51 नवग्रहदेवतादीनां प्रतिमालक्षणम् अनन्ततक्षकादिलक्षणम् इन्द्राद्यष्टदिक्पाललक्षणम् विश्वकर्मलक्षणम् हनूमल्लक्षणम् कि-

न्नरलक्षणम् विद्याधरलक्षणम् पिशाचलक्षणम् वेताललक्षणम् क्षेत्रपालल-क्षणम् ।

- अग्निपुराणे अध्यायः 52 चतुष्षष्टियोगिनीप्रतिमालक्षणम् । भैरवलक्षणम् । वीरभद्रलक्षणम् । गौरीलक्षणम् । 50तमेऽध्यायेप्युक्तम् । ललितालक्षणम् । चण्डिकालक्षणम् ।
- अग्निपुराणे अध्यायः 55 प्रतिमानां पिण्डिकालक्षणम् - सर्वदेवानां विष्णूक्तं मानम् । सर्वदेवीनां लक्ष्म्युक्तं मानम् ।
- भविष्यपुराणे अध्यायः 114 स्थापितादित्यप्रतिमास्नापनयोगवर्णनम् ।
- भविष्यपुराणे अध्यायः 129 साम्बाय सूर्यप्रतिमालाभः प्रतिमायां स्वस्थापन-स्थानकथनम् ।
- भविष्यपुराणे अध्यायः 130 साम्बेन चन्द्रभागासरित्तीरे सूर्यप्रतिमास्थापनं, नारदेन साम्बाय सूर्यप्रासादनिर्माणविधिकथनम् ।
- भविष्यपुराणे अध्यायः 131 सूर्यप्रतिमानिर्माणविधौ दारुपरीक्षाविधिवर्णनम् ।
- भविष्यपुराणे अध्यायः 132 सर्वदेवप्रतिमालक्षणवर्णनम् ।
- भविष्यपुराणे अध्यायः 133 प्रतिमाप्रतिष्ठाविधौ विश्वरूपवर्णनम् ।
- भविष्यपुराणे अध्यायः 135 सूर्यप्रतिमास्नानकर्मविधिवर्णनम्, स्नानकर्मोप-युक्तभोजकादिद्विजवर्णनम्, वर्ज्यद्विजवर्णनं च ।
- भविष्यपुराणे अध्यायः 136 सूर्यप्रतिमाधिवासनप्रकारवर्णनम् ।
- भविष्यपुराणे अध्यायः 12 प्रतिदेवताप्रतिमालक्षणवर्णनम् ।

- मत्स्यपुराणे अध्यायः 259 प्रतिमालक्षणम् । तत्र प्रतिमाकारकथनम् ।

- मत्स्यपुराणे अध्यायः 260 अर्धनारीश्वरादिप्रतिमास्वरूपकथनम् ।

- मत्स्यपुराणे अध्यायः 261 प्रभाकरादिप्रतिमाप्रकारकथनम् ।

- मत्स्यपुराणे अध्यायः 264 कुण्डादिप्रमाणकथनम् । तत्र प्रतिमास्थापनदिनकथनम् । प्रतिमास्थापनप्रकारश्च ।

- विष्णुधर्मोत्तरपुराणे अध्यायः 2 प्रतिमास्वरूपनिश्चायकसूत्रस्यातोद्यनृत्यशास्त्रज्ञानायत्तत्वं तस्य च गीतशास्त्राधीनत्वं, गीतस्य तु संस्कृतप्राकृतापभ्रष्टादिभेदाद्बाहुल्यं तत्रापि गद्यपद्यादिभेदपूर्वकं शब्दशास्त्रानुसृतत्त्वम् ।

- विष्णुधर्मोत्तरपुराणे अध्यायः 88 चतुःषष्ठिपदे देवतायतने(सामान्यप्रासादे) द्वारप्रतिमापिण्डिकाकटिवसुधामञ्जरीगर्भद्वारभित्ति वसुधासञ्चरसोपानादिप्रमाणवर्णनम् ।

- विष्णुधर्मोत्तरपुराणे अध्यायः 93 सत्ययुगे देवानां प्रत्यक्षपूजनम्, त्रेताद्वापरयोः प्रत्यक्षपूजा प्रतिमासु च, तत्रापि त्रेतायुगे गृहे द्वापरे चारण्ये कलौ च देवायतननिर्मितिर्नगरेषु समारब्धा, भूमिदानं विधायैव देवायतनप्रतिष्ठा कार्या, देवालययोग्यभूमिः ।

- विष्णुधर्मोत्तरपुराणे अध्यायः 341 विष्णुमाश्रित्य कृतानां धर्माणां फलवत्त्वम्, तत्स्मरणकीर्तनादिभक्तियोगस्य सर्वार्थसाधकत्वं, देवालयान्निर्माय तद्गतपरमाणुसङ्ख्याब्दसहस्रपर्यन्तं स्वर्गलोके पूज्यते । काष्ठाश्मलौहताम्ररौप्यरत्ननिर्मितप्रासादे विष्णुप्रतिमापूजनेऽनन्तपुण्यं । देवप्रासादे सुधासंस्कार-चित्रकरण- गीतवाद्यनृत्यकरण-प्रेक्षणीयप्रदानाभ्यर्चनाभ्युक्षण-सम्मार्जनोपलेपन-पुष्पोपच्चय-जीर्णोद्धार-कीर्तन- सहस्रनामोच्चारणपूर्वकस्तवन-चतुर्वेदोक्तप्राका-

राभिष्टवन-भक्तिभावपूर्णस्वरचितस्तवस्तवन-तन्माहात्म्यप्रतिपादकपुस्तकवितरण-तद्भक्तेभ्यस्तन्माहात्म्यश्रावण-तदालयं शङ्खघण्टाकिङ्किणीपताकादिप्रदानविविधपुष्पसमलङ्कृतवाटिकापुष्करिण्यादिनिर्माणैरसङ्ख्यपुण्यफलभाक्त्वम् । एवंविधमहापूजया सकामस्यानन्तकालपरिमितसुखभोगावाप्तावपि न तादृग्भवत्तोषो यादृङ् निष्कामस्येति ।

(अयं सङ्ग्रहः पूर्णप्रज्ञसंशोधनमन्दिरस्य Linux यन्त्रे विद्यमानायाः पुराणविषयानुक्रमण्याः सकाशात् गणकयन्त्रस्य साहाय्येन कृतः ।)

परिशिष्टम् C

साम्प्रदायिकाद्यर्थाः

गुर्वर्थदीधितौ यत्र यत्र `साम्प्रदायिकोऽर्थः' `सम्प्रदायागतोऽर्थः' `गुरूपदिष्टोऽर्थः' `केचित्तु' `अपरे तु' `अन्ये तु' इत्यादि उल्लिख्य अर्थान्तराण्युल्लिखितानि तानि स्थलान्यत्र सङ्गृहीतानि। आहत्य एनानि 82स्थलानि भवन्ति! अनेन आदौ व्याख्याकृद्भिः श्रीवेङ्कटपत्याचार्यैः -

`अथैषां कृपया पुर्वटीकाश्चालोच्य सादरम् ।
व्याकरिष्ये वचःशुद्ध्यै तन्त्रसारस्य सङ्ग्रहम् ॥ '

इति यत् प्रतिज्ञातं तस्य प्रतिज्ञावचसः गाम्भीर्यं स्फुटीकृतं भवति। तुलनात्मकाध्ययनरतानामियं व्याख्या कियदुपकारिणीत्यप्यनेन विशदीभवति।

साम्प्रदायिकार्थाः (आहत्य 30) -

- प्रथमाध्याये श्लोकाः - 3,16,20,24,31,36,48,52,56,60,65,65,65

- तृतीयाध्याये श्लोकाः - 5,6,33,100,136,136,136

- चतुर्थाध्याये श्लोकाः - 19,47,47,50,54,101,83,106,125,150,152, विष्णुसूक्ते द्वितीयमन्त्रः, बळित्थासूक्ते द्वितीयमन्त्रः

गुरूपदिष्टोऽर्थः

- तृतीयाध्याये श्लोकः 18

केचित् इत्युल्लिख्य अनूदिता अर्थाः -

- प्रथमाध्याये श्लोकाः - 3,6,14,22,30/31,31/32,37,50/51
- तृतीयाध्याये श्लोकाः - 5,6,7,18,21,33,43,46,47,58,60,66,71,75,100,135
- चतुर्थाध्याये श्लोकाः - 2,29,106,119,148

स्थलद्वये (श्लोकः 105,153) केचित् इत्युल्लिख्य दर्शनान्तरविषयोऽनूदितः

अन्ये इत्युल्लिख्य अनूदिता अर्थाः -

- प्रथमाध्याये श्लोकाः - 5,50,54,65
- तृतीयाध्याये श्लोकाः - 6,30,62,88,136
- चतुर्थाध्याये श्लोकाः - 21, बळित्थासूक्ते द्वितीयमन्त्रः

अपरे इत्युल्लिख्य अनूदिता अर्थाः -

- प्रथमाध्याये श्लोकाः - 14,22,37,45
- तृतीयाध्याये श्लोकाः - 6
- चतुर्थाध्याये श्लोकाः - 4,9,106

परिशिष्टम् D

गुर्वर्थदीधितौ उल्लिखितानामनुपलब्धाकराणां वाक्यानां सूची

- `अङ्गुलीषु च विन्यस्येदङ्गमन्त्रेण वै क्रमाद्' ।(1-31)
- `अप्रतिष्ठितबिम्बस्य पूजनं सिद्धिहानिकृद्' ।(1-2)
- `अभक्तोदाहृतं नैव फलदातृ भविष्यति' ।(1-71)
- `अव्यक्तं नियतिं चैव कालदं विष्णुमेव च। आग्नेयादिचतुर्दिक्षु स्वभावेषु समर्चयेत् । एतानप्यङ्घ्रिरूपांश्च पीठाधस्थांश्च संस्मरेद्' ।(1-51)
- `अश्वत्थपत्रवद्योनिर्गजोष्ट्रप्रतिमाथवे' ।(3-18)
- `अष्टस्वांशासु कुण्डानि चतुरस्त्रानि कारयेत् । हस्तमात्राणि सर्वाणि दीक्षासु स्थापनादिषु' ।(3-81)
- `आरभ्यैकाक्षरात् पादादेकैकाक्षरवर्धितैः । पृथक् छन्दो भवेत्पादैः यावत् षड्विंशतिं गतम्' ।(4-6)

- `इडा वामे स्थिता नाडी पिङ्गला दक्षिणा मता। तयोर्मध्यगते नाड्यौ सुषुम्नां च समाश्रिते' ।(4-150)

- `उत्पादकब्रह्मदात्रोः गरीयान् ब्रह्मदः पितुः। शिरसा प्रणमेत्तं हि पितरं तद-नन्तरम्' ।(4-101)

- `कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम् । प्राणायामः स विज्ञेयो तर्जनीमध्यमे विना' ।(2-5)

- `कलशस्य मुखे विष्णुः कण्ठे रुद्रः' ।(2-9)

- `कलौ स्थानानि पूज्यानि' ।(1-49)

- `कृत्वा वेदिं च तन्मध्ये नवहस्तप्रमाणतः। अष्टहस्तेन वा कुर्यात् सप्तहस्तेन वा पुनः। द्विहस्ताध्यर्धहस्ता वा वेदिका ह्यतिशोभना' ।(3-80)

- `क्रमस्तु वर्णधर्मः' ।(1-30)

- `क्रमादूनगुणास्त्वन्ये ईरिता गुरवः क्रमाद्' ।(4-127)

- `गर्भाधानं पुंसवनं सीमन्तो वैष्णवो बलिः। जातकं नाम निष्क्रान्तिरन्नप्राश-नचौलकम् । उपनीतिर्महानाम्नी महाव्रतमतः परम् । उपनिषच्च गोदानं स-मावर्तविवाहकम्' ।(3-67)

- `गुरुमन्त्रपरित्यागी रौरवं नरकं व्रजेद्' ।(4-128)

- `गुरोर्नाम न गृह्णीयाच्छिष्यो भार्या पतेरपि' ।(अम्भ्रणीसूक्ते द्वितीये वर्गे द्विती-यमन्त्रः)

- `गृहीतप्रतिमायां तत्तदङ्गुलिसङ्ख्यया । विभज्य तेषु भागैकं तदाहुर्लब्धमङ्गुलम् । लब्धाङ्गुलेन कुर्वीत प्रतिमावयवं बुधः' । (3-53)

- `गृहीत्वा गुरुणा दत्तं यन्त्रं भक्त्या प्रसन्नधीः । बिभृयादुक्तविधिना विश्वस्तः सर्वसिद्धये' । (4-125)

- `जप्येनैव तु संसिद्ध्येद्' । (1-70)

- `तारतम्येन तेष्वद्धा भक्तिर्दृष्टानुसारतः । विष्णुप्रसादानुसारात्कार्या दोषस्तदन्यथा । तत्प्रीत्यनुसृतौ प्रीतिः लोकेष्वद्धैव दृश्यते' । (4-72)

- `त्रिमेखलं द्विजकुण्डं क्षत्रियस्य द्विमेखलम् । मेखलैकं तु वैश्यस्य' । (2-17)

- `दूर्वोपमां त्रिनेत्रां च शङ्खचक्रसमन्विताम् । शूलतर्जनसंयुक्तां ध्यायेद्दुर्गामभीष्टदाम्' । (4-58)

- `ध्यानहीने तु निष्फलम्' । (4-5)

- `न्यासहीने हरेदायुः' । (4-7)

- `पञ्चागुलीभिर्नासाग्रे पीडनं प्रणवाभिधा । मुद्रेयं सर्वपापघ्नी वानप्रस्थगृहस्थयोः ॥ कनिष्ठानामिकाङ्गुष्ठैर्नासाग्रे यत्प्रपीडनम् । ॐकारमुद्रिका प्रोक्ता यतेश्च ब्रह्मचारिणः' । (2-5)

- `परो दिवेभिरसुरैर्यदस्ति' । (अम्भ्रणीसूक्ते द्वितीये वर्गे तृतीयमन्त्रः)

- `पादमारभ्य जानुपर्यन्तं पीतः । जानुमारभ्य नाभिपर्यनं शुक्लः । नाभिमारभ्य कण्ठपर्यन्तमरुणः । कण्ठमारभ्य शिरःपर्यन्तं हरिद्वर्णः । कात् शिरसः आरभ्य अन्तः अन्तिमो भागः कृष्णः श्यामवर्णः' । (4-81)

- \`पुल्लिङ्गेनोच्यते स्त्री च पुंवच्छक्तिमती यदि' ।(4-59)
- \`प्रणवेन च संयुक्तां व्याहृतीभिशच संयुताम् । प्राणायामः स विज्ञेयो गायत्रीं यज्जपेत्त्रिशः' ।(2-5)
- \`प्राणायामत्रयं कृत्वा मातृकान्यासमाचरेत्' ।(2-4)
- बृहदण्डवोढा' (1-55)
- \`वकारोऽमृतबीजं स्यात्' ।(4-30)
- \`रुद्रं समाश्रिता देवाः' ।(पुरुषसूक्ते सप्तास्यासन्निति मन्त्रे)
- \`विज्ञानमानन्दं ब्रह्म' ।(अम्भ्रणीसूक्ते प्रथमे वर्गे चतुर्थमन्त्रः)
- \`वेदशास्त्रात्परं नास्ति' ।(4-54)
- \`श्रीमदानन्दतीर्थीयमतमाचन्द्रतारकम् । आसेतोराहिमाद्रेश्च समीचीनं प्रवर्तताम्' ।(4-101)
- \`श्रीमन्त्रस्य क्षत्रहन्ता रामो देवता' ।(4-61)
- \`श्रुतिस्मृती हरेराज्ञे' ।(4-126)
- \`संहृत्यान्तो यतीनां स्यादि'ति ।(4-119)
- \`सप्तपर्णो विशालत्वक्क्षारदो विषमच्छदः' ।(3-71)
- \`सर्वतस्तु जले श्रेष्ठम्' ।(3-48)
- \`सर्वे सर्वगुणात्मानः सर्वकर्तार एव च' ।(1-1)

- `सहस्त्रं तु पितुर्माता गौरवेणातिरिच्यते' ।(4-101)
- `सृष्यन्तो ब्रह्मचारिणाम्' ।(4-119)
- `सोपानदेवताः पूज्या आत्माद्या दिक्कतुष्टये' ।(1-57)
- `सौवर्णं कलशं रम्यं रौप्यं ताम्रमथापि वा । निर्दोषं मृण्मयं वापि चन्दनेन वि-लेपितम् । षडङ्गुलोन्नताः कार्याः' ।(2-12)
- `स्त्रवत्यनोङ्कृतम्' (4-75)

परिशिष्टम् E

मूलमातृकापरिशीलनेन लब्धानां शुद्धपाठानां कानिचि-दुदाहरणानि

अन्यमातृकापाठः-मूलमातृकापाठः

- तथा च सङ्ग्रहः `प्रणवोऽष्टौ व्याहृतयो द्विषड्डावित्रनामकः। पौरुषं वैष्णवं चेति जपे क्रम उदाहृत' इति। - तथा च सङ्ग्रहः `प्रणवोऽष्टौ व्याहृतयो द्विषड्डावित्र-मातृकाः। पौरुषं वैष्णवं चेति जपे क्रम उदाहृत' इति। (१-४८)

- परमात्मा गर्भे गर्भोदकमध्ये - परमात्मा मध्ये गर्भोदकमध्ये। (१-५४)

- स्मृत्युक्त्या आवाहनादिषण्मुद्राः प्रदर्शयेत्। - स्मृत्युक्ता आवाहनादिषण्मुद्राः प्रदर्शयेत्। (१-५९)

- व्यां व्यीं व्यूं व्यैं व्यौं व्याः इति षडङ्गानीति सम्प्रदायविदः। - व्यां व्यीं व्यूं व्यैं व्यौं व्यः इति षडङ्गानीति सम्प्रदायविदः। (४-४७)

- रुक्मिणी - रुग्मिणी (४-३९)

- अशेषपदार्थत्वमस्यैव - अशेषवेदार्थत्वमस्यैव (४-५३)

- उत्तरमुत्तरतरमतिविस्तीर्णं - यद्वा उत्तरमुत्तरतरमतिविस्तीर्णम् । (विष्णुसूक्ते प्रथममन्त्रः)

- तृतीयस्तवने - तृतीयसवने । (विष्णुसूक्ते द्वितीयमन्त्रः)

- सम्प्रदानाच्चतुर्थी - सम्प्रदानत्वाच्चतुर्थी । (तृतीयमन्त्रः)

- सर्वोत्तमश्च देवः प्रसिद्धः `वेदशास्त्रात्परं नास्ती'त्यादौ - सर्वोत्तमश्च वेदः प्रसिद्धः `वेदशास्त्रात्परं नास्ती'त्यादौ । (४-५४)

- अर्धं प्रतिलोमतः, अर्धमनुलोमतः इत्युभयसमाहारेण पठनं स्थितिन्यासः । यथा `अं अजाये'त्यारभ्य `अः अर्धगर्भाये'त्यन्तं स्वराक्षाराणां न्यासमानुलोम्येन पठित्वा पृथिवीमारभ्याव्यक्तान्तं प्रातिलोम्येन पठनम् । - अर्धं प्रतिलोमतः, अर्धमनुलोमतः इत्युभयसमाहारेण पठनं स्थितिन्यासः । यथा `अं अजाये'त्यारभ्य `अः अर्धगर्भाये'त्यन्तं स्वराक्षाराणां न्यासमानुलोम्येन पठित्वा `क्षं नृसिंहाये'त्यारभ्य `कं कपिलाये'त्येतत्पर्यन्तं प्रातिलोम्येन पठनम् । एवं शक्तिमारभ्य पुरुषपर्यन्तमानुलोम्येन पठित्वा पृथिवीमारभ्याव्यक्तान्तं प्रातिलोम्येन पठनम् । (४-११९)

अर्थभेदशून्याः मातृकापाठाः

- अनन्तपूजानन्तरं कर्तव्यमाह ॥ तत्रेति ॥ - अनन्तपूजानन्तरं कार्यमाह ॥ तत्रेति ॥ (१-५९)

- निजाः स्वकीयाः - निजाः स्वीयाः । (४-५)

- इमां प्रमाणप्रसिद्धां पृथिवीं - इमां प्रमाणप्रसिद्धां पृथिवीम् । (हिरण्यगर्भसूक्तेप्रथममन्त्रः)

- तस्मादिमे पञ्चान्तरङ्गतया सदा विष्णोः प्रियाः । - तस्मादेते पञ्चान्तरङ्गतया सदा विष्णोः प्रियाः । (४-७३)

- साधूनामित्युक्त्याऽसाधूनां शिरसि हस्तं निधाय जपेऽपि उक्तफलं न भवतीति सूचयति । - अत्र साधूनामित्युक्त्याऽसाधूनां शिरसि हस्तं निधाय जपेऽपि उक्तफलं न भवतीति सूचयति ।(४-९५)

व्यर्थतां गमिताः अधष्टिप्पण्यः । अधष्टिप्पण्यः आवरणयोर्दर्शिताः

- अपरे तु - नामभूतवराहशब्देन बीजेन उद्देशेन नमःशब्देन च युक्तः तस्यापरो मन्त्रो वर्तत इत्यर्थ इत्याहुः (आहुरिति पदं वि.पाठे नास्ति। `अपरे तु' इति प्रारम्भे दर्शनात् आहुरितिपदेन भाव्यम् ।)(४-४)

- `इच्छाद्या मोचिकाद्याश्च (विमलाद्याश्च इति ज.पाठः ।) अणिमाद्याश्च शक्तयः' । (४-५)

- जपहोमश्रद्धातिथ्यतीर्थाटनपरार्थेहतानां (`-परार्थेहानाम्' इति पाठेन भाव्यमिति भाति ।) तपसि ।

- नन्वत्र (अयं प्रघट्टकः र.पाठे शोधपत्रे लिखितः । प्रमादादिवशात् मध्ये त्यक्तः भागः यत् पृथक् पत्रे लिख्यते तत् शोधपत्रमिति आकरग्रन्थेषु व्यवहृतम् । अन्याकरेषु निरन्तरं लिखितः ।) मूलाधारेण सह षड्वानान्यभिहितानि ।(४-१४९)

परिशिष्टम् F

विद्यावारिध्युपाधिकृते समर्पितस्य शोधप्रबन्धस्य विस्तृतायाः भूमिकायाः विषयानुक्रमणी

कृतज्ञताः

विषयानुक्रमणी

सङ्केताक्षरसूची

भूमिका

1. भारतीयसंस्कृतौ तन्त्रमार्गस्य स्थानम्

2. तन्त्रसारसङ्ग्रहकाराः श्रीमध्वाचार्याः

3. तन्त्रसारसङ्ग्रहस्य इतराः टिप्पण्यः

4. गुर्वर्थदीधितिकाराः श्रीवेङ्कटपत्याचार्याः

5. गुर्वर्थदीधितिः

6. गुर्वर्थदीधितेः वैशिष्ट्यम्

7. प्रकृतं सम्पादनम्

8. सम्पादने गणकयन्त्रस्योपयोगः

गुर्वर्थदीधितिसहितः तन्त्रसारसङ्ग्रहः

प्रथमाध्यायः 1-64

द्वितीयाध्यायः 65-74

तृतीयाध्यायः 75-125

चतुर्थाध्यायः 126-221

परिशिष्टानि

1. तन्त्रसारसङ्ग्रहस्य श्लोकानुक्रमणी1-22
2. गुर्वर्थदीधित्युदाहृतग्रन्थसूची23-24
3. पुराणेषु प्रतिमालक्षणम्25-26
4. साम्प्रदायिकाद्यर्थाः27
5. उपयुक्तग्रन्थसूची (Bibliography)28-29
6. गणककार्यांशाः (Computer Programs) 30-39
7. गुर्वर्थदीधितौ प्रदर्शितानि तन्त्रसारसङ्ग्रहस्य पाठान्तराणि40-42
8. मातृकासु पार्श्वे लिखितानां सूची43-45
9. गुर्वर्थदीधितौ उल्लिखितानामनुपलब्धाकराणां वचनानां सूची46-47

भूमिकाविषयाणां विस्तृतसूची

0.0 निवेदना

1.0 भारतीयसंस्कृतौ तन्त्रशास्त्रस्य स्थानम्

1.1 तन्त्रशास्त्रम्

1.1.1 किं नाम तन्त्रम् ?

1.1.2 कोशेषु तन्त्रशब्दार्थः

1.1.2.1 अमरकोषः

1.1.2.2 मेदिनीकोषः

1.1.2.3 वैजयन्तीकोषः

1.1.2.4 इतरकोषाः

1.1.2.5 तन्त्रग्रन्थे तन्त्रशब्दार्थः

1.2 तन्त्रशास्त्रस्य महत्त्वम्

1.3 तन्त्रशास्त्रस्य विषयः, प्रयोजनं प्रस्तुतता च

1.4 तन्त्रप्रभेदः

1.5 तन्त्रसारसङ्ग्रहः

2.0 श्रीमध्वाचार्यविरचितः तन्त्रसारसङ्ग्रहः

2.1 श्रीमध्वाचार्याः

2.2.1 ग्रन्थपरिचयः

2.2.2 ग्रन्थनाम

2.2.3.1 ग्रन्थसङ्ख्या, अध्यायादिविभागश्च

2.2.3.2 गुर्वर्थदीधितौ अधिकः श्लोकः

2.2.4 ग्रन्थस्य विषयाः

2.3.1 सङ्ग्रहप्रकारौ

2.3.2 तत्र गमकम्

2.4 तन्त्रसारसङ्ग्रहस्य वैशिष्ट्यम्

2.4.1.0 मध्वविजये तन्त्रसारसङ्ग्रहस्य प्रशस्तिः

2.4.1.1 वाञ्छापूर्तिप्रकारः

2.4.1.2 अपरा वाञ्छा - जिज्ञासा

2.4.2 योगदीपिकोक्तं महत्त्वम्

2.4.3.0 मङ्गलाचरणसूचितं महत्त्वम्

2.4.3.1 मङ्गलश्लोके प्रतिपाद्यार्थसूचना

2.4.3.1.1 विष्णुतत्वविनिर्णयस्य उदाहरणम्

2.4.3.1.2 ब्रह्मसूत्रभाष्यस्योदाहरणम्

2.4.3.1.3 ध्वन्यालोकस्योदाहरणम्

2.4.3.1.4 तन्त्रसारसङ्ग्रहे मङ्गलं प्रतिपाद्यार्थश्च

2.4.4 तन्त्रसारसङ्ग्रहोक्तः तन्त्रसारसङ्ग्रहमहिमा

3.0 तन्त्रसारसङ्ग्रहस्य इतरव्याख्यानानि

3.1 श्रीवसुधेन्द्रतीर्थकृतं व्याख्यानम्

3.2 श्री वेदवेद्यतीर्थशिष्यकृता श्रीतन्त्रसारविवृतिः

3.3 छलारीशेषाचार्यप्रणीतः तन्त्रसारार्थसङ्ग्रहः

3.3.1 छलारीयटीकायाः वैशिष्ट्यम् ।

3.3.2 छलारीयटीकायां विस्तृतविधिनिरूपणम्

3.4 श्रीरघुनाथयतिविरचिता तत्त्वकणिका

3.4.1 तत्वकणिकायाः वैशिष्ट्यम्

3.4.2.0 तत्वकणिकाया व्याख्याकौशलम्

3.4.2.1 उदाहरणम् 1

3.4.2.2 उदाहरणम् 2

3.5 श्रीश्रीनिवासाचार्यकृतः गूढार्थसङ्ग्रहः

3.5.1 गूढार्थसङ्ग्रहस्य गुर्वर्थदीधितिः उपजीव्या !!

3.6.0 तन्त्रसारसङ्ग्रहस्य कर्णाटकभाषानुवादाः

3.6.0.1 माध्वपरम्परायाः विस्तारः

3.6.1 श्री अग्रहार नारायणतन्त्रिणामनुवादः

3.6.2 श्रीबन्नञ्जे गोविन्दाचार्याणामनुवादः

3.6.3 श्री अद्यपाडि हरिदासभट्टानामनुवादः

4.0 गुर्वर्थदीधितिकाराः श्री वेङ्कटपत्याचार्याः

4.0.1 श्रीरघूत्तमतीर्थाः

4.0.2 श्रीवेदेशतीर्थाः

4.0.3 श्रीयादवार्याः

4.0.4 श्रीश्रीनिवासतीर्थाः - श्रीवेङ्कटपत्याचार्याणां पितृपादाः

4.0.4.1 माध्ववाङ्मये श्रीश्रीनिवासतीर्थानां स्थानम्

4.1.0 श्रीवेङ्कटपत्याचार्याः

4.1.0.1 आकराः

4.1.1 देशः

4.1.2 कालः

4.1.3 चरित्रम्

4.1.4 सन्ततिः

4.1.5 ऐतिह्यानि

4.2.0 श्रीवेङ्कटपत्याचार्याणां कृतयः

4.3 श्रीवेङ्कटपत्याचार्याणामुपरि श्रीश्रीनिवासतीर्थानां प्रभावः

5.0 प्रकृतव्याख्या गुर्वर्थदीधितिः

5.1 गुर्वर्थदीधितिरचने कारणम्

5.2.0 गुर्वर्थदीधितेः सम्पादने उपयुक्ताः मातृकाः

5.2.0.1 मातृकाः तथा ग्रन्थप्रसारः

5.2.1 गुर्वर्थदीधितेः मातृकाः

5.2.1.1 ज. मातृका

5.2.1.2 प्रा. मातृका

5.2.1.2.1 प्रा.मातृकायाः मूलमातृका

5.2.1.2.2 आधुनिकचिह्नस्योपयोगः

5.2.1.3 वि. मातृका

5.2.1.4 ज 1. मातृका

5.2.1.5 र. मातृका

5.2.1.5.1 र. मातृकावैशिष्ट्यम् - शोधपत्रम्

6.0 गुर्वर्थदीधितेः वैशिष्ट्यम्

6.1 नामनिर्वचनसूचितं वैशिष्ट्यम्

6.2 प्राक्तनटिप्पण्यः आकरभूताः

6.3 सूक्तव्याख्यानम्

6.4 अकारादिवर्णप्रतिपाद्यभगवन्नाम्नां निर्वचनप्रदर्शनम्

6.5 सर्वेषां मन्त्राणामर्थः प्रकाशितः

6.6 पितृभक्तिपराकाष्ठा

6.7 ग्रन्थशतोल्लेखः

6.8 पाठान्तरोल्लेखः

6.9.0 कानिचित् विशिष्टव्याख्यानोदाहरणानि

6.9.1.0 ग्रन्थगाम्भीर्याविष्करणम्

6.9.1.1 उदाहरणम् 1

6.9.1.2 उदाहरणम् 2

6.9.2 वेदतात्पर्यसमर्थनरीतिः

6.9.3 तात्पर्यवृत्तिः नाम का ?

6.9.4.0 कार्ये अपौनरुक्त्यम् !

6.9.4.1 उदाहरणम् 1

6.9.4.2 उदाहरणम् 2

6.9.5 व्याकरणवैदुष्यम्

6.9.6 श्वाससङ्ख्या

6.9.7 पञ्चविधानामाहाराणामपूर्वं विवरणम्

6.9.8 तन्त्रफलद्रष्टारः

6.9.9 मुक्तौ वृद्धिह्रासौ कीदृशौ ?

6.9.10 ध्यानधारणस्वरूपम्

6.9.11 गुरूपदिष्टार्थाः

7.0 प्रकृतसम्पादनमधिकृत्य - सम्पादनपद्धतिः

7.0.1 मातृकासु साधारणदोषाः

7.1.0 अधष्टिप्पणयोजनक्रमः

7.1.1 प्रामादिकपाठोल्लेखः

7.1.2 इति भाति

7.1.3 पाठान्तरप्रदर्शने `-' चिह्नस्योपयोगः

7.1.4 `नास्ति' इति उल्लेखः

7.1.5 `लिपिकृता अन्तरितम्'

7.1.6 मूलगतपदादीनामर्थवर्णनम्

7.1.7 शेषपूरणम्

7.1.8 विग्रहप्रदर्शनम्

7.1.9 आकरोल्लेखः

7.1.10 उद्धृतवाक्यस्य सन्दर्भोद्धारः

7.1.11 मातृकासु पार्श्वे लिखितस्योल्लेखः

7.2.0 दण्डनियमाः

7.2.1 गुर्वर्थदीधितिमातृकासु चिह्नद्वयम्

7.2.2 मातृकासु दण्डयोजनम्

7.2.3 प्रकृतसम्पादने दण्डक्रमः, इतरचिह्नानि च

8.0 सम्पादने गणकयन्त्रस्योपयोगः

8.0.1 टङ्कने उपयोगः

8.1 सप्तसोपानानि

8.1.1 प्रथमं सोपानम्

8.1.1.1 WX notation

8.1.2 द्वितीयं सोपानम्

8.1.3 तृतीयं सोपानम्

8.1.4 चतुर्थं सोपानम्

8.1.4.1 Roman तः भारतीयलिपिः, ततः पुनः Roman लिपिः । कुत एवम् ?

8.1.4.2 `बरह' कुतः ?

8.1.5 पञ्चमं सोपानम्

8.1.6 षष्ठं सोपानम्

8.1.7 सप्तमं सोपानम्

8.2 आकरान्वेषणे उपयोगः

उपसंहारः

जनसामान्योपयोगिनः तन्त्रविषयाः

अन्तनिवेदना

राष्ट्रिय संस्कृत संस्थान
ग्रन्थालय
23655
जयपुर

J.